अङ्कः - 14, 2025-26
ISSN: 2249-538X

# वाक्यार्थभारती

A Peer-reviewed research journal

संरक्षकः
आचार्यः श्रीनिवासः वरखेडी

प्रधानसम्पादकः
आचार्यः सुब्राय वि. भट्टः

सम्पादकाः
आचार्यः राघवेन्द्रभट्टः
डा. वेङ्कटरमणभट्टः
डा. कोम्पेल्लि विनयकुमारः
डा. राघवेन्द्रः पी. आरोल्ली

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

# वाक्यार्थभारती

A Peer-reviewed research journal

अङ्कः - 14, 2025-26
ISSN: 2249-538X

**संरक्षकः**
आचार्यः श्रीनिवासः वरखेडी

**प्रधानसम्पादकः**
आचार्यः सुब्राय वि. भट्टः

**सम्पादकाः**
आचार्यः राघवेन्द्रभट्टः
डा. वेङ्कटरमणभट्टः
डा. कोम्पेल्लि विनयकुमारः
डा. राघवेन्द्रः पी. आरोल्ली

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

| | | |
|---|---|---|
| Title | : | Vakyārthabhāratī |
| Publisher | : | Director<br>Central Sanskrit University<br>Shri Bharathi Teertha Center for Excellence in Shastras<br>Shri Rajiv Gandhi Campus, Sringeri - 577139<br>(Karnataka) |
| E-Mail | : | director-sringeri@sanskrit.ac.in |
| Patron | : | Prof. Srinivasa Varakhedi |
| Chief Editor | : | Prof. Subraya V. Bhatta |
| Peer-review Committee:<br>(Advisory Committee) | | Prof. CSS Narasimha Murthy<br>Retd. Director, CSU,<br>Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Ramachandrula Balaji<br>Associate Director, CSU,<br>Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Naveen Holla<br>Associate Director, CSU,<br>SBTSSK, Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Ganesh T. Pandit<br>Associate Dean, Research, CSU, New Delhi<br><br>Prof. Shivaram R. Bhat<br>Professor, Dept. of Research and Publication<br>NSU, Tirupati |
| Editors | : | Prof. Raghavendra Bhat<br>Dr. Venkaratamana S. Bhat<br>Dr. Komplelli Vinayakumar<br>Dr. Raghavendra P. Arolli |
| Publication Date | : | 29-08-2026 |
| Design | : | Dr. Raghavenadra P. Arolli, Dr. Raveesha N. |
| Printed at | : | Annu Graphics, Thirthahalli, 9480114845 |

© All the rights reserved for publisher. Provided that contributors are responsible for their respective articles.

**प्रो. श्रीनिवासः वरखेडी**
कुलपति
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

**केन्द्रीय संस्कृत विश्वविद्यालयः**
संसद के अधिनियम द्वारा स्थापित
**Central Sanskrit University**
Established by an Act of Parliament

के.सं.वि./कुलपति-101/2026-27/100

दिनाङ्कः -17-08-2026
श्रावण शुक्ल पञ्चमी, वि. सं. 2083



## ॥ शुभसन्देशः ॥

भारतीयज्ञानपरम्पराया अस्ति अनितरसाधारणं वैशिष्ट्यम्। अस्मिन् निहितानि ऐहिकम् आमुष्मिकञ्च निष्पादयन्ति वेदशास्त्रपुराणकाव्यादिरत्नानि समस्तजगतः गर्वकारणानि सन्ति। तेषां सम्यग् विमर्शेण स्थाने विनियोगेन च राष्ट्रोन्नतिः विश्वकल्याणञ्च सम्पद्यते।

अध्ययनम्, अध्यापनम्, लेखनम्, संशोधनम्, प्रसारः, सामाजिकापेक्षानिर्वाहः इत्यादिभिः विविधक्रियाभिः भारतीयविद्याशाखानां साधु समाश्रयः कर्तव्यः। एतदेव उद्देश्यं पुरस्कृत्य भारतसर्वकारेण प्रतिष्ठापितः केन्द्रीयसंस्कृतविश्वविद्यालयः कर्मण्यस्मिन् सर्वदा अग्रेसरो वर्तत इति नाविदितं सर्वेषाम्।

शिक्षा-शोध-प्रकाशनादिकार्येषु निरतेन अस्माकं विश्वविद्यालयस्य शृङ्गगिरिस्थेन श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रात्मना परिणतेन श्रीराजीवगान्धीपरिसरेण **'वाक्यार्थभारती'** नामिका शोधपत्रिका प्रकाश्यमाना वर्तते। भारतस्य विविधप्रदेशस्थैः विद्वद्भिः, विशिष्य तरुणैः अनुसन्धातृभिः लिखितैः भारतीयज्ञानपरम्पराप्रकाशकैः गम्भीरैः विमर्शात्मकैः च शोधलेखैः समलङ्कृतेयं शोधपत्रिका स्वलक्ष्यसाधने संलग्ना वर्तते।

**'वाक्यार्थभारती'** शोधपत्रिकेयं विद्वन्मनोरञ्जनी, विद्यार्थिजिज्ञासाशमनी, शास्त्रार्थपरम्परासंवर्धिनी च भूयात् इति लेखकानभिनन्दन् शुभं सन्दिशामि।

(प्रो. श्रीनिवासः वरखेडी)
कुलपतिः

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, Website : www.sanskrit.nic.in

**आचार्यः सुब्राय वि. भट्टः**
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

**Prof. Subraya V. Bhatta**
Director
Central Sanskrit University
Śrī Bhāratītīrtha Śāstrasamutkarṣa Kendram
Shri Rajiv Gandhi Campus, Sringeri - 577 139



## ॥ शुभं सन्दिशाम ॥

**"योऽनूचानः स नो महान्"** इति केन्द्रीयसंस्कृतविश्वविद्यालयस्य ध्येयवाक्यम् । साङ्गवेदाध्यायी अनूचानः इति परिभाषितः । वेदाध्ययनं च गुरुमुखोच्चारणानूच्चारणरूपम् अर्थज्ञानपर्यन्तमिति मीमांसकमर्यादा । तदर्थज्ञानञ्च अनुष्ठान-मननादिद्वारा चित्तशुद्धौ तत्त्वज्ञाने वा पर्यवस्यतीति तत्त्वज्ञानिनाम् ऋषीणाम् उपदेशः । तदर्थमेव महर्षिभिः शास्त्राणि संरचितानि । तदुक्तम् - **"शमार्थं सर्वशास्त्राणि रचितानि महर्षिभिः"** इति । काले काले महर्षयो वाचं तपसा संशोध्य ज्ञानस्य रत्नानि नः प्रददुः। काले गते बहुतिथे कालवशादेव मुनिवचनरूपाण्यमूनि रत्नजातानि धूलिधूसरितानीव जातानि। अतः तेषां संशोधनं प्रकाशनम् प्रचारं च कर्तुं दृढसङ्कल्पं कृत्वा केन्द्रीयसंस्कृतविश्वविद्यालयः वाक्यार्थभारतीनाम्नीं शोधपत्रिकां प्रकाशयति यस्यां च देशस्य प्रथितविदुषां, गवेषणरतानां शोधच्छात्राणां च मौलिकानि लेखनानि सङ्कलितानि। इयं च शोधपत्रिका प्राचीनपरम्परा-आधुनिकतयोः सेतुर्भवति येन शास्त्राणां कालातीतं सत्यं लोकसम्मुखमानेतुमवसरो लभ्यते।

अस्याः शोधपत्रिकायाः प्रकाशनदायित्वं शृङ्गेरीस्थाय श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रनाम्ना परिणतायास्माकं राजीवगान्धीपरिसराय प्रादात्। कुलपतीनामादेशं प्रह्वीभावेन स्वीकृत्य श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रं सश्रद्धमिदं कार्यं समपादयत्। अत्र सङ्कलितलेखाः शास्त्रीयप्रमाण-तार्किकसमीक्षा-भाषासौन्दर्यैः त्रिभिर्गुणैः मण्डिताः पत्रिकाया मौल्यं तन्वन्तीत्यत्र नास्ति संशयलेशः। एतदवसरं कल्पितवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभ्यः आचार्यश्रीनिवासवरखेडिमहाभागेभ्यः वन्दनानि समर्पयामि। लेखकेभ्यः लेखान् सङ्गृह्य, संशोध्य पत्रिकायाः सम्पादनकर्मणि व्यापृतेभ्यः शास्त्रसमुत्कर्षकेन्द्रप्राध्यापकेभ्यः अभिनन्दनानि समर्प्यन्ते। शारदाम्बायाः जगद्गुरूणां च अनुग्रहेण सनाथीकृतेयं शोधपत्रिका पाठकानां स्वान्तमावर्जयतु इत्याशासे।

**आचार्यः सुब्राय वि. भट्टः**
**निदेशकः**

दिनाङ्कः -17-08-2026
श्रावण शुक्ल पञ्चमी, वि. सं. 2083

# सम्पादकीयम्

महर्षिभिः लोकोपकाराय प्रवर्तितानि शास्त्राणि। तद्रहस्यं पुनः सम्यक् ज्ञातव्यं चेत् कारणसामग्री, सुयोग्यपात्रता, निरन्तरः यत्नश्च वैपुल्येन आसादनीयो भवति। तत्त्वप्रतिपत्तये पुनःपुनः तद्विषयको विचारः प्रवर्तनीयः। वेदः, वेदाङ्गानि, उपनिषदः, आयुर्वेदः, दर्शनम्, गणितम्, गोलविज्ञानम्, खगोलशास्त्रम्, वास्तुशास्त्रम्, साहित्यम्, कला, भौतिकशास्त्रञ्च शाखोपशाखतया इह भारते देशे अत्यन्तं समृद्धानि वर्तन्ते। एषा समेषां विदुषां जगतां च प्रसिद्धा वस्तुस्थितिः।

अद्य जगति यन्त्राणां प्राधान्यं, भौतिकसुखानां परा काष्ठा, मनसश्च अशान्तिः परिदृश्यते, तदा एतादृश्याः समृद्धशाखायाः विस्तृतिः समग्रविश्वकल्याणायापेक्ष्यते। शाखागतानां निगूढरहस्यानां लोकोपकारकतया चिन्तनं, गम्भीरविमर्शः, आधुनिकयुगानुकूलः प्रसारश्च भवेत्। अतः विद्वांसः स्वकीयैः चिन्तनैः विहितान् विचारान् लेखबद्धान् कुर्युः, येन आयतावपि लोकस्य महान् उपकारः स्यात्।

तदेतद् उद्देश्यं मनसि निधाय, भारतीयज्ञानपरम्परायाः शास्त्राणां च नूतनदृष्ट्या अनुसन्धानस्य प्रोत्साहनार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य निर्देशानुसारं '**वाक्यार्थभारती**' नाम्नी वार्षिकी शोधपत्रिका (अङ्कः-14) प्रकाश्यमाना वर्तते। विश्वविद्यालयस्य शृङ्गेरीस्थः **श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रात्मना** परिणतः **श्रीराजीवगान्धीपरिसरः** अस्य प्रकाशनस्य सर्वमुत्तरदायित्वम् ऊढ्वा विदुषां शोधलेखानां सङ्ग्रहः, व्यवस्थितं सम्पादनम्, मुद्रणम् इत्यादिकार्यं यथाविधि विधाय पत्रिकास्वरूपम् अनैषीत्।

अस्यां 'वाक्यार्थभारती' शोधपत्रिकायां भारतीयविद्याशाखाभिः अन्विताः संस्कृतभाषायां, हिन्द्याम्, आङ्ग्लभाषायाञ्च निबद्धाः **पञ्चचत्वारिंशत्** शोधलेखाः समाविष्टाः सन्ति। एतेषु लेखेषु न केवलं प्राचीनशास्त्राणां परम्परागता व्याख्या समागता, अपि तु आधुनिकवैज्ञानिकदृष्ट्या तेषां शास्त्रसिद्धान्तानां पुनर्मूल्याङ्कनमपि कृतं वर्तते। अस्यां पत्रिकायां प्रकाशिताः लेखाः विदुषां गम्भीरचिन्तनस्य फलस्वरूपाः सन्ति।

१. **संस्कृतसाहित्यं दर्शनञ्च:** वैशेषिक-न्याय-वेदान्त-मीमांसादि-दर्शनानां गूढप्रमेयाणां विशदीकरणं तथा च भास-कालिदास-भवभूत्यादि-महाकवीनां काव्येषु प्रतिपादितानां सामाजिक-नैतिक-सौन्दर्यशास्त्रीयमूल्यानां सूक्ष्मपरीक्षणमत्र समुपलभ्यते।

२. **भारतीयज्ञानपरम्परा (IKS) तथा च आधुनिकविज्ञानानि:** आयुर्वेदे वर्णितः स्वस्थवृत्तसिद्धान्तः, गणिते भास्कराचार्य-आर्यभटादीनां योगदानानि, वास्तुशास्त्रस्य पर्यावरणानुकूलता, तथा च गोलविज्ञाने खगोलस्य आकाशीयपिण्डानां च विवेचनपरा विषयाः अत्र भाषात्रये प्रस्तुतैः निबन्धैः अलङ्कृताः सन्ति।

३. **संस्कृतव्याकरणम्, भाषाशास्त्रम्, सङ्गणकशास्त्रञ्च:** पाणिनिकृतायाः अष्टाध्याय्याः सूत्रेषु निहितं तार्किकत्वम्, आधुनिकसङ्गणकभाषाशास्त्रे (Computational Linguistics) तस्य उपयोगिता, विभिन्नभाषाणां परस्परसम्बन्धस्य विमर्शः च अस्यां पत्रिकायां समावेश्यन्त।

**कृतज्ञतानिवेदनम्**

'वाक्यार्थभारती' पत्रिकायाः सम्पादनकार्यस्य सिद्धये येषां मार्गदर्शनं साहाय्यञ्च लब्धं, तेभ्यः सर्वेभ्यः हार्दिकं कार्तज्ञ्यं निवेद्यते। पत्रिकायाः सुचारुप्रकाशनाय शुभसन्देशं प्रदाय अस्मान् अन्वग्रहीषुः केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतयः **आचार्याः श्रीनिवासवरखेडीमहाभागाः**। तेभ्यः वयमत्र प्रणतिं समर्पयामः। प्रकाशनकार्यस्य अस्य प्रतिपदं मार्गदर्शनं व्यधुः श्रीराजीवगान्धीपरिसरस्य निदेशकाः **आचार्याः सुब्राय वि. भट्टवर्याः।** तेभ्यः धन्यवादाः समर्प्यन्ते। अस्याः पत्रिकायाः गुणवत्तापरिरक्षणाय परामर्शदातृसमितेः सदस्याः लेखान् आमूलाग्रं परिशील्य, शास्त्रशोधदृष्ट्या परीक्ष्य प्रकाशनयोग्यत्वेन चित्वा प्रादुः। एतेभ्यः विद्वद्भ्यः समीक्षकेभ्यः वन्दनानि समर्पयामः। पत्रिकायाः सुदृश्यविन्यासे साहाय्यं कृतवद्भ्यः अक्षयः भट्टः, मेधा गिरीष वर्मा, याह्वी जोषी, लक्ष्मी एस्. अय्यर्, सहना ज्योतेप्पा नरगुन्द्, अरुषा पि.वैद्या, भव वी. गुणे इत्येतेभ्यः छात्रेभ्यः धन्यवादा आविष्क्रियन्ते। ज्ञान-वैराग्य-तपोधनानां, जगद्गुरूणां, दक्षिणाम्नाय-श्रृङ्गेरी-शारदापीठाधीश्वराणां **श्रीश्रीभारतीतीर्थमहास्वामिनां** तत्करकमलसञ्जातानां **श्रीश्रीविधुशेखरभारतीमहास्वामिनां** च चरणाम्बुजयोः सभक्तिश्रद्धं प्रणामान् समर्पयामः।

पराभव-श्रावण-कृष्ण-प्रतिपत्
(29.08.2026)

विद्वज्जनविधेयाः,
सम्पादकाः

# विषयानुक्रमणिका


१. कर्मवत्कर्मणा तुल्यक्रियः इति सूत्रार्थविमर्शः – डा.चन्द्रशेखरभट्टः . . . . . . . १

२. भ्रस्जो रोपधयो रमन्यतरस्याम् इति सूत्रार्थविचारः – डा. प्रमोद् भट्टः . . . . . . . ५

३. "प्रत्ययलोपे स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ"...... – डा. पि. आर्. अर्चना कारन्त् . . . १०

४. पाणिन्युक्तदिशा निपातपदविमर्शः – श्री सौरभ राउतः . . . . . . . . . . १५

५. दुर्घटवृत्तिग्रन्थोक्तदिशा "प्रक्ढुप्यमानः"...... – श्री आत्मारामभट्टः के . . . . . . . २४

६. "गाङ्कुटादिभ्योऽञ्णिन् ङित्" इति....... – श्री गुरुप्रसादः के. एस्. . . . . . . . . . . . . २९

७. 'पश्य मृगो धावति' इति वाक्यात् शाब्दबोधः – डा. राघवेन्द्रः पी. आरोळ्ळी . . . . ३३

८. वैशेषिकसूत्रेषु अभावनिरूपणम् – श्री शशांक शिवराम भट्टः . . . . . . . . . ३६

९. स्वतःप्रामाण्यवादविमर्शः – श्री जैमिनः जयेशभाई दवे . . . . . . . . . . ३८

१०. सिद्धान्तलक्षणदीधितिग्रन्थोक्तदिशा द्रव्ये संयोगसामान्याभावसिद्धिः – श्री सुशोभनसिंहमहापात्रः ४५

११. न्यायनये सृष्टिप्रक्रियाविमर्शः – श्री बिप्लबसरकारः . . . . . . . . . . ५१

१२. न्यायदर्शनानुसारेण अवयवविचारः – श्री चण्डीप्रसादः . . . . . . . . . ५६

१३. भारतीयवादपद्धतौ निग्रहस्थानानामुपयोग आधुनिकवादे च तेषामुपयोगः – श्री सोमनाथमाइतिः ६२

१४. प्रमाविषये जैनतर्कभाषया सह तर्कभाषायाः मतवैषम्यम् – डा. देवार्पिताव्यानार्जी . . . ६८

१५. क्रियाविशेषणानां कर्मत्वविचारः – दुर्गा श्रीवत्सा . . . . . . . . . . . ७३

१६. जिज्ञासाधिकरणविचारः – आचार्यः सुब्राय वि भट्टः . . . . . . . . . . ७७

१७. मीमांसाशास्त्रीयं सर्गप्रलयविज्ञानम् – आचार्यः सूर्यनारायणभट्टः . . . . . . . ८०

१८. उद्देश्यगतगुणानामविवक्षा – डा. श्रीरामः ए एस् . . . . . . . . . . . . ८५

१९. प्रवर्ग्याधिकरणम् – डा. गोविन्दगोपालकृष्णहेगडे . . . . . . . . . . ९०

२०. आधानविमर्शः – श्री आदर्श विनायक भट्टः . . . . . . . . . . . . . ९३

२१. दृष्टिद्रष्ट्रोः असम्बन्धः – आचार्यः गणेश ईश्वर भट्टः . . . . . . . . . . . . . . . . . . . . . . ९६

२२. अद्वैतसिद्धौ मिथ्यात्वस्य मिथ्यात्वविचारः – डा. श्रीकरः जि.एन्. . . . . . . . १००

२३. श्रुतिघटकसप्तम्यर्थविचारपुरस्सरम् अनुकृत्यधिकरणनिरूपणम् – डा. विश्वनाथ हेगडे . . १०३

२४. मिथ्यात्वे अर्थापत्तिप्रमाणोपन्यासः – श्री ब्रह्मभट्ट नचिकेता सञ्जयकुमार् . . . . . १०९

२५. भामतीप्रस्थाने अविद्यास्वरूपस्य तात्त्विकविश्लेषणम् – श्री विकास गुरिकार् . . . . ११४

२६. विवेकमार्ताण्डग्रन्थानुसारेण सृष्टिविमर्शः – श्री सुशान्त हालदारः . . . . . . १२१

२७. अद्वैतवेदान्ते साक्षिस्वरूपस्य विवेचनम् – डा. राजेशः प्रामाणिकः . . . . . . १२७

२८. भक्तौ ध्वनेरन्तर्भावविवेचनम् – डा. कोम्पेल्लि विनयकुमारः . . . . . . . . . . . . . . १३६

२९. आधुनिकसन्दर्भे नरेन्द्रारोहणमहाकाव्यस्य... – श्री सौम्यरंजन बडपण्डा / प्रो. धर्मानन्दराउतः १४२

३०. सट्टकरचनात्वेन राजशेखरकृतकर्पूरमञ्जर्याः समीक्षात्मकमध्ययनम् – डा. दीपङ्करमण्डलः . १५१

३१. रसतत्त्वसमीक्षा – डा. रमेश चन्द्र बरमोला . . . . . . . . . . . १५४

३२. ग्रहस्फुटीकरणे मतभेदाः –डा. विजयानन्दः अडिगः बि . . . . . . . . १५९

३३. ज्योतिश्शास्त्रदृष्ट्या भूमेः स्वरूपादिचिन्तनम् – डा. रमानन्द भट्टः एन् . . . . . १६४

३४. पञ्चाङ्गस्य स्वरूपं वर्तमानकालिकविसङ्गतयः माहात्म्यञ्च – डा. ब्रजेशपाठकः . . . . १६९

३५. भास्कराचार्योक्तानां यन्त्राणां विमर्शः – श्री गिरीशभट्टः बि / दिवाकरशर्मा . . . . १७७

३६. अभिप्रेरणम् (Motivation) – आचार्यः रामचन्द्रुल बालाजी . . . . . . . १८५

३७. श्रीशङ्कराचार्यविरचितप्रश्नोत्तरमालिका शिक्षा च – आचार्यः हरिप्रसादः के . . . . १९२

३८. कन्फ्यूशियस : शिक्षादर्शनं युगानुसारं सम्बद्धता च – डा. दयानिधि शर्मा . . . . १९८

३९. इच्छा – डा. अरविन्दकुमारसोमदत्त : . . . . . . . . . . . . २०२

४०. शिक्षायाम् अधिगमस्य मनोवैज्ञानिकसंप्रत्ययः – डा. रामजियावन प्रजापतिः . . . . २०६

४१. अन्नं वै प्राणः – डा. जोषि सन्तोषकुमारः . . . . . . . . . . . २१६

४२. दैवव्यापाश्रयचिकित्सादिषु श्रीशङ्कराचार्यस्य... – श्रीविद्या सुब्रमण्यन् / डॉ. पाडुर ए सुब्रमण्य शास्त्री २२४

४३. चतुर्वेदेषु प्रतिपादितानां दार्शनिकतत्त्वानां समालोचनात्मकमनुशीलनम् – डा टुम्पा जाना . २२९

४४. प्रबन्धनक्षेत्रे नेतृत्वस्वरूपविमर्शः – श्री नवीनकुमारशर्मा . . . . . . . . . २३७

४५. जैनदर्शने मोक्षतत्त्वविमर्शनम् – श्री शशांकशेखरपात्रः, . . . . . . . . . २४२

 ISSN : 2249-538X

# कर्मवत्कर्मणा तुल्यक्रियः इति सूत्रार्थविमर्शः

डा.चन्द्रशेखरभट्टः*
आचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– सौकर्यातिशयविवक्षायां प्रधानकर्तृव्यापारस्य विवक्षा यदा न क्रियते तदा स्थाली पचति, काष्ठानि पचन्तीत्यादिप्रयोगा भवन्ति । कर्मणः कर्तृत्वेन विवक्षायां यगात्मनेपदादिसिद्ध्यर्थं कर्मवद्भावातिदेशविधानाय कर्मवत्कर्मणातुल्यक्रियः इति सूत्रमारब्धम् । सूत्रस्य अर्थविवृतिपूर्वकं एकैकस्य दलस्य प्रयोजनम्, कर्मस्थभावक-कर्मस्थक्रियकधातूनां कर्तुः कर्मवद्भावविचारः, सूत्रारम्भे फलविचारः इत्येते अंशाः अत्र प्रबन्धे चर्चिताः ।*

***कूटशब्दाः*** *– कर्मवद्भावः, कर्मस्थभावकः, कर्मस्थक्रियकः, तुल्यक्रियः, स्वयमेव, कर्ता*

**विषयप्रवेशः** - कारकान्विता क्रिया वाक्यम् इत्युक्तं कोशे[1] । कारकं च क्रियाजनकम् । अपादानादीनां सर्वेषामपि कारकाणां तदस्त्येव । किमिदं कारकं वस्तुतन्त्रम् अथवा लोकततन्त्रम् ? लोकतन्त्रमिति गृहाण । विवक्षातः कारकाणि भवन्ति । विवक्षा च लौकिकी न प्रायोक्त्री । अतः शक्तिः कारकमिति पक्षो मुख्यतया वैयाकरणैः स्वीक्रियते । यदि द्रव्यं कारकम्, अथवा कारकं वस्तुतन्त्रं स्यात् तर्हि यत्करणकारकं तत्सर्वदा करणमेव स्यात् न कदाचित् कारकान्तरं भवेत् । तदुक्तं भर्तृहरिणा–

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः[2] ॥

नन्वेवं शक्तिसाङ्कर्यप्रसङ्गः ; इति चेत् न,

शक्तिमात्रसमूहस्य विश्वस्यानेकधर्मणः ।
सर्वदा सर्वथाभावात् क्वचित्किञ्चिद्विवक्ष्यते[3] ॥

तत्र तावत् फलव्यापारयोर्धातुः वाचकः । चैत्रः पचति इत्यत्र पचधातुः विक्लित्त्यनुकूलव्यापारे वर्तते । विक्लित्तिः फलम् । तदाश्रयत्वात् तण्डुलस्य कर्मत्वम् । विक्लित्त्यनुकूलः अधिश्रयणादिपुरुषयत्नपरो व्यापारः । धातूपात्तव्यापाराश्रयः कर्ता स्वतन्त्रः कर्ता इति स्मारणात् । सर्वेषु कारकेषु स्वीयव्यापारः कश्चिद्वर्तत एव । चैत्रनिष्ठव्यापारः धातुना अभिधीयत इति चैत्रः कर्ता । कर्मादिकारकान्तरेषु व्यापारसत्वेऽपि न तेषां कर्तृत्वम्, कर्तृव्यापारपरतन्त्रत्वात्तेषाम् । यदा सौकर्यातिशयविवक्षया कर्तुः पुरुषस्य व्यापारः न विवक्षितः किन्तु अन्यकारकनिष्ठव्यापारः धात्वर्थत्वेन विवक्ष्यते तदा कर्मादिकारकाण्यपि कर्तृसंज्ञां लभन्ते । यद्यपि कारकान्तरस्य पुरुषव्यापाराधीनत्वात् तेषां स्वातन्त्र्यं दुर्वचम्, तथापि स्वव्यापारे सर्वेषां स्वतन्त्रत्वात् कर्तृत्वं लभ्यते । तेन स्थाली पचति, काष्ठानि पचन्ति, साध्वसिः छिनत्ति इत्यादिप्रयोगा भवन्ति । एवं कर्मणो व्यापारो धात्वर्थत्वेन यदा विवक्ष्यते तदा तण्डुलः पचति इति प्रयोगः प्राप्तः । तत्र कर्मवद्भावः सूत्रेणानेन विधीयते ।

तृतीयाध्यायस्य प्रथमपादे सप्ताशीतितमं सूत्रमिदं कर्मवत् कर्मणा तल्यक्रियः इति पदत्रयात्मकम् । कर्तरि शप्[4] इति सूत्रात् कर्तरि इत्यनुवृत्तं प्रथमान्ततया विपरिणम्यते । तुल्या क्रिया यस्य सः तुल्यक्रियः ।

***सम्पर्कसूत्रम्** - 9448836941, Email- chkbhat@sanskrit.ac.in

[1]अमरकोशः

[2]वाक्यपदीयम् ३.७.९२

[3]वाक्यपदीयम् ३.७.२

[4]अष्टाध्यायी ३.१.६८

अन्यपदार्थः कर्ता। कर्मणा तुल्यं वर्तत इति कर्मवत्। कर्मपदस्य कर्मस्थे लक्षणा। कर्मणि या क्रिया सैव कर्मशब्देनोच्यते।कर्मणा तुल्यक्रियः कर्ता कर्मवत् स्यादिति सूत्रार्थः। पच्यते ओदनः स्वयमेव। भिद्यते कुसूलः स्वयमेव। अथ कर्मवदित्यत्र को वतिः। न हि तत्र तस्येव[1] इति, उपमेये प्रथमादर्शनात्। अन्यथा तुल्यक्रिये इति सप्तम्या तुल्यक्रियस्य इति षष्ठ्या वा निर्देशं कुर्यात्। वाक्ये तावत् यतो वतिर्भवति यश्च प्रतियोगी उभाभ्यामपि ताभ्यां षष्ठीसप्तम्यौ भवतः। यथा - विप्रस्य इव अस्य शीलम्। काश्मीर इव कन्याकुमर्यां भवनानि। उभयोरपि सम्बन्धत्वाद् आधारत्वाच्च। अतोऽत्र तेन तुल्यं क्रिया चेद्वतिः[2] इति वतिप्रत्ययः। कर्मणा तल्यं वर्तते इति कर्मवत्। तुल्या क्रिया यस्य सः तुल्यक्रियः इति बहुव्रीहिः। केन तुल्यक्रियः इत्याकाङ्क्षायां कर्मणा इति सम्बध्यते। कर्मणा इत्यत्र तृतीया तुल्यार्थयोगे[3]। ननु तुल्यार्थयोगे विधीयमाना तृतीया यथा उपमानाद् भवति तथा उपमेयादपि स्यात्? इति चेन्न, यथा चन्द्रेण तुल्यं मुखम् इति तुल्यशब्दः उपमेये वर्तते इत्यतः तस्य तद्योगस्यायुक्तत्वाद् उपामानादेव तृतीया। ततश्च उपमेयात् प्रथमैवावतिष्ठत इति उत्पन्नेऽपि वतौ उपमेयात् प्रथमैव।

कर्मेह पारिभाषिकम्, न तु लौकिकम्। यदि लौककं क्रिया कर्म गृह्येत तर्हि क्रियया तुल्या क्रिया यस्य इति कथने क्रियायाः यया कयाचित् क्रियया तौल्यं भवत्येवेति विशेषणं व्यर्थं स्यात्। अतः पारिभाषिकस्य साधनकर्मणः ग्रहणम्। नन्विदानीमपि विशेषणं व्यर्थम्, साध्यसाधनयोरत्यन्तभेदेन सादृश्यासम्भवात्। एवं तर्हि कर्मशब्दः कर्मस्थे लाक्षणिकः। तास्त्स्थ्यात् ताच्छब्द्यम्। मञ्चाः क्रोशन्तीतिवत्। नेदानीं विशेषणस्य वैयर्थ्यम्। कर्मणः क्रियया नेतरस्येति वक्तुं शक्यत्वात्। एवञ्च कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यादिति सूत्रार्थः। नन्विह समासो दुर्लभः, तुल्यशब्दस्य कर्मसापेक्षत्वात् इति चेत् सत्यम्, तुल्यशब्दो हि नित्यसापेक्षः। देवदत्तस्य गुरुकुलमित्यादिवत् गमकत्वात्समासो भवति।

**वतिग्रहणविचारः** – परत्र प्रयुज्यमानः परशब्दः विनापि वतिं तदर्थं प्रयोजयति। यथा अब्रह्मदत्ते प्रयुज्यमानो ब्रह्मदत्तशब्दः ब्रह्मदत्तवदित्यर्थं गमयति[4]। एवं प्रकृतेऽपि कर्मणा तुल्यक्रियः कर्म इति कर्तरि कर्मपदं प्रयुज्यमानं कर्मवदित्यर्थं गमयति इति चेत्, उच्यते। यद्यपि वतिं विना तदर्थो गम्यते तथापि असति वत्करणे कर्तुः कर्मसंज्ञा स्यात्। ततश्च अकर्मकव्यपदेशाभावात् भावे लकारो न स्यात्। भिद्यते कसूलेन, पच्यते तण्डुलेन इति। वत्करणे कृते तु अतिदेशो गम्यते। ततश्च कर्तरि कर्मकार्याणि अतिदिश्यन्ते चेदपि स्वाश्रयकार्यं न निवर्तते। अतः तस्यां दशायां(कर्मणः कर्तृत्वेन विवक्षायां)अकर्मकत्वात् भावे लकारः सिद्ध्यति। तत्र कर्तुरनभिहितत्वात् भिद्यते कुसूलेन इत्यत्र तृतीया सिद्ध्यति।

ननु लान्तस्य कर्ता कर्म भवति इति वक्ष्यमाणत्वात् यावत् कर्तरि लकारो न भवति न तावत् कर्मसंज्ञा भवतीत्यतः अकर्मकत्वसत्वेन भावे लकारः सुलभ इति वतिग्रहणाभावेऽपि पूर्वोक्तः प्रयोगः सिद्ध्यतीत्यतः वतिग्रहणस्य नैतत्प्रयोजनमिति चेदुच्यते, तत्र कार्ये कर्तव्ये इत्यध्याहृत्य लान्तस्य कार्ये कर्तव्ये कर्ता कर्म इत्यर्थ आश्रीयते। ततश्च भावे लकारेऽपि कर्तव्ये कर्तुः कर्मत्वं स्यादिति अकर्मकत्वाभावात् भावे लो न स्यात्। न च भावे लविधिः लान्तस्य कार्यं कथमिति वाच्यम्, लः कर्मणि इति विधिः साधुत्वमात्रान्वाख्यापक इति सार्वधातुके यगति सूत्रोक्तरीत्या[5] लान्तकार्यत्वात्। वस्तुतस्तु लकारवाच्यः कर्ता कर्मवदित्यर्थाश्रयणेन भावलकारः भवत्येवेति

[1]अष्टाध्यायी ५.१.११६

[2]अष्टाध्यायी ५.१.११५

[3]तुल्यार्थैरतुलोपमाभ्यामन्यतरस्याम् अष्टाध्यायी २.३.७२

[4]महाभाष्यम् १.१.२३

[5]महाभाष्यम् ३.१.६७

भिद्यते कुसूलेन इति प्रयोगः सिध्यति इति नेदं वतिग्रहणस्य फलम्। नमते दण्डः स्वयमेव इत्यत्र शप्सिद्धिः फलम्। तत्र हि कर्मवद्भावे सति न दुहस्नुनमामिति यक्प्रतिषेधे सति स्वाश्रयः शप् सिध्यति। अन्यथा कर्मसंज्ञाया विधाने कर्तरि शप् न स्यात्।

**कर्मणा इति पदसार्थक्यम् -** ननु तुल्यक्रियः कर्ता कर्मवदित्युक्ते केन तुल्य इत्याकाङ्क्षायां प्रत्यासत्त्या धातुवाच्यक्रियापेक्षया तुल्यक्रियत्वस्य ग्रहणम्। धातुवाच्या क्रिया हि कर्तृकर्मणोरेव समवेता इति कर्तृकर्मणोरेव प्रतियोगित्वेन उपस्थितिः भवति। तुल्यक्रियः इत्यत्र अन्यपदार्थः कर्ता इत्युक्तम्। नहि कर्तृस्थया क्रियया तुल्यक्रियः कर्ता इत्येवमर्थः सम्भवति। सादृश्यस्य भेदघटितत्वात्। ततश्च सामर्थ्यात्कर्मस्थयैव क्रियया तुल्यत्वं गृह्यत इति कर्मणेति व्यर्थम्।

**अत्रोच्यते,** करणाधिकरणाभ्यां तुल्यक्रियस्य मा भूदित्येवं कर्मणेत्युच्यते। यथा साध्वसिः छिनत्ति, साधु स्थाली पचति इति। अयमाशयः - कर्मणा इत्यस्य अभावे यत्किञ्चित्कारकवृत्तिक्रियया तुल्यत्वमाश्रीयेत। ततश्च पूर्वोक्तस्थले अतिप्रसङ्गः स्यात्। ननु प्रत्यासत्त्या धातुवाच्यक्रियया एव तुल्यत्वमित्युक्तम्। करणादिनिष्ठा क्रिया धातुवाच्या न भवति। यदा करणादिनष्ठा क्रिया धातुना अभिधीयते तदा तस्य कर्तृत्वमेव न तु करणादिरूपता।

**कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्तुः कर्मवद्भावः**

भावक्रिययोरस्ति भेदः। अपरिस्पन्दसाधनसाध्यो धात्वर्थो भावः। सपरिस्पन्दसाधनसाध्यः क्रिया। तत्र कर्मस्थभावकानां कर्मस्थक्रियाणां च विवेकः कथमिति चेत् –

**विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता॥**

इति वाक्यपदीयम्[1]। क्रियाकृतविशेषो यत्र भवति तत्स्था क्रिया इत्युच्यते। यदा क्रियाकृतविशेषः कर्तर्येव दृश्यते तदा कर्तृस्था क्रिया भवति। पक्वेषु तण्डुलेषु शिथिलावयवत्वरूपा विक्लित्तिः। भिन्नेषु च काष्ठेषु अवयवविभागः। गच्छति धावति हसति इत्यादयः कर्तृस्थक्रियकाः। ग्रामादौ गमनादिजन्यं फलं संयोगादि यद्यप्यस्ति सकर्मकाणां कर्मस्थफलाभिधायित्वात्, तथापि न तत् कर्मस्थम्। न हि कर्मदर्शनमात्रेण संयोगादिफलं द्रष्टुं शक्यम्। ग्रामदर्शनमात्रेण अयं ग्रामः केनचिद्गत इति नावगन्तुं शक्यते। एवम् आसयति देवत्तम्, शाययति देवदत्तम् इत्यादयः कर्मस्थभावकाः। चिन्तयति मन्त्रयते इत्यादयः कर्तृस्थभावकाः। तत्र कर्मस्थक्रियाणां कर्मस्थभावकानां वा कर्ता कर्मवदिति वक्तव्यं[2] भवति।

नैतदस्ति। कर्मस्थया क्रियया अयं कर्तारम् अर्थात् कर्तृस्थक्रियाम् उपमिमीते। कर्तृस्थभावकानां कर्तृस्थक्रियाणां वा फलरूपक्रियायाः कर्मणि कर्ममात्रे प्रवृत्तिः नास्ति। तेषां धातूनां फलरूपक्रियायाः कर्तृकर्मोभयनिष्ठत्वात्। यथा गच्छतीत्यत्र संयोगरूपफलात्मकव्यापारः कर्तृकर्मोभयनिष्ठः। जानाति इत्यत्र च ज्ञानरूपफलात्मकव्यापारः विषयतासमवायाभ्यां कर्तृकर्मोभयनिष्ठः। कर्ममात्रनिष्ठफलरूपव्यापारः यस्मिन्न भवति स एव कर्ता कर्मवद्भवति। नचास्मिन्नर्थे मानाभावः; कर्मणा इति पदोपादानस्यैव मानत्वात्। तथा हि सूत्रे कर्मणा इति दलं करणादितुल्यक्रिये अतिव्याप्तिवारणाय निवेशितम्। तद्विनैव प्रत्यासत्त्याश्रयणेनातिव्याप्तिः वारयितुं शक्या। धात्वर्थव्यापारः कर्तृकर्मणोरेव व्यवस्थिता इति पूर्वं निवेदितम्। तल्यक्रियः कर्ता इत्युक्ते प्रत्त्यासत्त्या कर्मस्थया क्रियया इत्येव लब्धे कर्मणेति पदं निवेश्यमानं सामर्थ्यात् कर्मण्येव = कर्ममात्रनिष्ठफलरूपक्रियया तुल्यक्रियः इत्यर्थं गमयति। गम्यादीनां तु फलस्य संयोगस्य कर्ममात्रनिष्ठत्वं नास्तीति तत्र कर्मवद्भाव एव न भवति। अतः उपसंख्यानं न कार्यम्।

[1].वाक्यपदीयम्, ३.७.६६

[2]. वार्तिकम् ३.१.८७


ISSN : 2249-538X

**कर्मवद्भावफलविचारः** ननु कर्मवद्भावातिदेशोऽनेन शास्त्रेण क्रियते। कर्तरि कर्मवद्भावातिदेशे सति तन्निमित्तककार्यमेव स्यात् आहोस्वित् कर्त्राश्रयमपि किञ्चिद्भवेत् ? अतिदेशेन स्वाश्रयं कार्यं निवर्त्यते उत नेति यावत्। यद्यपि वतिग्रहणप्रयोजननिरूपणे स्वाश्रयमपि भवति इति स्थापितं तथापि दोषान्तरं तत्र सम्भवतीति भवत्यत्र विचारणा। तथा हि कर्माश्रयमेव चेत् अचीकरत कटः स्वयमेव इति प्रयोगो न स्यात्। कृधातोर्ण्यन्ते चैत्रो घटं कारयति इत्यत्र कर्मणः कर्तृत्वेन विवक्षायां कर्मवद्भावे सति कारयते घटः स्वयमेव इति प्रयोगो भवति। लुङि च्लेः चङपवादतया चिणि कर्तव्ये न दुहस्नुनमां यक्चिणौ[१] इति सूत्रे हेतुमण्ण्यन्तस्य यक्चिणोः प्रतिषेधस्य उपसंख्यातत्वेन चिणः प्रवृत्त्यभावे कर्त्राश्रयचङ्वृत्तिरिष्टा न स्यात्। ततश्च अचीकरत कटः स्वयमेव इति प्रयोगानापत्तिः। एवं नमते दण्डः स्वयमेव इति प्रयोगोऽपि दुःसाध्यः स्यात्। तत्र न दुहस्नुनमां यक्चिणौ[२] इति चिणः प्रतिषेधे सति कर्त्राश्रयः शबिष्टो न सिध्येत्। एतत्सिद्ध्यर्थं कर्त्राश्रयमपि भवतीत्यभ्युपगम्यमाने यत्र यगात्मनेपदादिभिः भाव्यं तत्र शप्-परस्मैपदादयः प्रसज्येरन् इति चेत् नैतदस्ति। शेषात् कर्तरि परस्मैपदम्[३] इति सूत्रे कर्तरि कर्मव्यतिहारे इति सूत्रात् कर्तरीत्यनुवर्तमाने पुनः कर्तरीत्युपादानात् कर्तैव यः कर्ता तत्र परस्मैपदमित्यर्थाश्रयणात् कर्मकर्तरि परस्मैपदाभावादात्मनेपदसिद्धिः। एवं कर्तरि शप्[४] इत्यत्र कर्तरि इति योगविभाग आश्रीयते। शबित्यपरो योगः। आद्ये सार्वधातुके यक् इति सूत्रात् यगित्यनुवर्तते। तेन कर्मकर्तरि प्राप्तः शब् यका बाध्यते। अथवा कर्मवदिति कार्यातिदेश आश्रयिष्यते। तेन यदविरुद्धं कार्यं तद्भवति नत्वन्यदिति सर्वेष्टसिद्धिः।

**उपसंहारः** – भाषायां कर्मकर्तरि प्रयोगः भूरिश उपलभ्यते। सहजसंस्कृतभाषायामपि प्रयोगोऽयं प्रसजत्येव। तत्र शास्त्रकारैः व्यवस्थापितानि कर्मवद्भावातिदेशसूत्राणि निषेधसूत्राणि च समाकलय्य निर्णयः सम्पाद्यो भवति। तदर्थं प्रबन्धेऽस्मिन् कर्मवद्भावातिदेशस्वरूपं चर्चितमस्ति।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥
इति कर्मवद्भावस्य उदाहरणानि प्रस्तुत्य उपसंह्रियते॥

## परामृष्टाः ग्रन्थाः


१. व्याकरणमहाभाष्यम्
२. वाक्यपदीयम्
३. वैयाकरणसिद्धान्तकौमुदी
४. अमरकोषः
५. प्रौढमनोरमा


[1]अष्टाध्यायी ३.१.८९
[२]. अष्टाध्यायी ३.१.८९
[३]. अष्टाध्यायी १.३.७८
[४]. अष्टाध्यायी ३.१.६८

# भ्रस्जो रोपधयो रमन्यतरस्याम् इति सूत्रार्थविचारः

डा. प्रमोद भट्टः*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– एतत्सूत्रव्याख्याने आदौ पदच्छेदः पदार्थोक्तिः इत्यादिक्रमेण सूत्रं व्याख्यास्यते । बहूनि उदाहरणानि अत्र सूत्रोक्तानि प्रदर्श्यन्ते । चतुर्भिः प्रकारैः अस्य सूत्रस्य न्यासः परिवर्त्यते । अन्ते महाभाष्यकारवचनात् सूत्रम् अन्यथाक्रियते चेत् अपाणिनीयं तु भवति इति कृत्वा "भ्रस्जो रोपधयो रमन्यतरस्याम्" इत्येव सूत्रयितव्यम् इति सिद्धान्तः उपस्थाप्यते । यदि सूत्रं परिवर्तयितुम् इष्यते तर्हि यदि लाघवपक्षपातेन स्वातन्त्र्यं चिकीर्ष्यते तर्हि "भ्रस्जो रसाम् अरन्यतरस्याम्" इति पठित्वा रसिति समुदायस्य अरेव विधीयतां तथा च न कः अपि दोषः इत्यनेन अयं प्रबन्धः समाप्यते । एतल्लेखोक्तविषयसङ्ग्राहकः कश्चन श्लोकः इत्थं वर्तते -*
*रस ऋच्चेदपिल्लितद्वन्लिङ्क्चिङ्करणिक्षु ते । दोषो भ्रस्जेर्भृजौ चैवं दोषो यङ्लुकि चाधिकः ॥*
*साभ्यासस्य हि भृउज्भावो भवेद्धन्तेर्बधिर्यथा । द्वित्त्वं पुनर्न लभ्येत स्थानिवत्त्वात‌द्धधेरिव ॥*
*तस्मादस्तु यथान्यासं स्वातन्त्र्ये अस्तु रसोरिति ॥*

इदं सूत्रं पाणिनीयाष्टके षष्ठे अध्याये चतुर्थे पादे सप्तचत्वारिंशत्तमं सूत्रं विद्यते । भ्रस्जः भ्रस्ज् इत्यस्य षष्ठीविभक्त्येकवचनम् । अवयवषष्ठी चेयम् । रश्च उपधा च रोपधे इति "चार्थे द्वन्द्वः"[१] इति सूत्रेण इतरेतरयोगद्वन्द्वसमासे रोपधे इति, तयोः रोपधयोः इति । र इत्यत्र अकारः उच्चारणार्थः । रोपधयोः इति षष्ठीविभक्ति-द्विवचनम् । स्थानषष्ठी च एषा । रम् इति प्रथमाविभक्त्येकवचनम्, विधीयमानम् । अत्रापि रेफादकारः उच्चारणार्थः । अन्यतरस्याम् इति विभक्तिप्रतिरूपकम् अव्ययम् । अनेन सूत्रेण रमागमः, रोपधयोः लोपरूपः आदेशश्च विधीयते । "आर्धधातुके"[२] इति अधिक्रियते । रम् मिदिति हेतोः "मिदचो अन्त्यात्परः"[३] इत्यनेन अन्त्यादचः परः भवति । एवं च अस्य सूत्रस्य अर्थः इत्थं फलति भ्रस्जो रेफस्य उपधायाः च स्थाने रमागमः वा स्यात् आर्धधातुके इति । स्थाननिर्देशलाभार्थं मित्करणात् रोपधयोः स्थाने रम्भवति । यत्र अनिर्धारितः स्थानषष्ठ्या निर्दिश्य विधीयते सः तत्स्थाने भवति । यथा "इको यणचि"[४] इत्यादौ । अत्र सूत्रे तु रमः मित्त्वात् निर्दिष्टस्थानिकत्त्वात् रेफोपधयोः स्थाने न भवति । यथा "रुधादिभ्यः श्नम्"[५] इति सूत्रेण विधीयमानः प्रत्ययः मित्त्वात् आगमः, प्रत्ययाधिकारे पाठात् प्रत्ययश्च । तथैव अयमपि रम् आगमः आदेशश्च ।

अन्ये तु अनेन लोपः आगमश्च विधीयते इति आहुः । तेषामयमभिप्रायः - अत्र सूत्रे "सनः क्तिचि लोपश्च"[६] इति सूत्रात् लोपः इति अनुवर्तते । रोपधयोः लोपः रमिति आगमः । एवं च लोपागमविधायकम् इदं सूत्रम् ।

अन्ये तु "भ्रस्जो रोपधयो रमन्यतरस्याम्"[७] इति सूत्रमेव मास्तु, तत्स्थाने लाघवात् "भ्रस्जो रस रन्यतरस्याम्" इति सूत्रं भवतु इति वदन्ति । अत्र "रस ऋ अन्यतरस्याम्" इति पदच्छेदः । र् च अश्च स् च

***सम्पर्कसूत्रम्** - 9481394969, Email- pramodbhat@sanskrit.ac.in

[१] पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०१-४७
[२]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-४६
[३]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०१-४७
[४]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-७७
[५]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०३-०१-७८
[६]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-४५
[७]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-४७

इति एतेषां "चार्थे द्वन्द्वः"[१] इति सूत्रेण समाहारद्वन्द्वे रः इत्यस्य षष्ठीविभक्त्येकवचने रसः इति रूपम् । ऋ इति लुप्तप्रथमाविभक्त्येकवचनं विधीयमानम् । रसस् ऋ अन्यतरस्याम् इत्यवस्थायां वाक्यावधिकान्वाख्यानपक्षे रसस् इत्यत्र "ससजुषो रुः"[२] इत्यनेन रुत्वे रसर् ऋ इति जाते रेफस्य "भोभगोअघोअपूर्वस्य यः अशि"[३] इत्यनेन य् इति आदेशे रसय् ऋ इति च जाते "लोपः शाकल्यस्य"[४] इत्यनेन विकल्पेन यलोपे रस ऋ इत्यवस्थायाम् इदानीं लोपशास्त्रस्यासिद्धत्त्वात् "आद्गुणः"[५] इति गुणसन्धिः न भवति । तदनु ऋ अन्यतरस्याम् इत्यत्र "इको यणचि"[६] इत्यनेन यणादेशे "रस रन्यतरस्याम्" इति सूत्रस्वरूपम् । एवं च अस्य सूत्रस्य अर्थः भ्रस्जः रेफाकारसकाराणां यः संघातः तस्य ऋ इत्यादेशः स्यात् आर्धधातुके इति फलति । बभर्ज इत्यत्र समन्वयः तावत् भ्रस्ज धातोः लिटि, तिपि, णलि भ्रस्ज् अ इति स्थिते "लिटि धातोरनभ्यासस्य"[७] इति द्वित्त्वं प्राप्नोति "रस रन्यतरस्याम्" इत्यनेन ऋ आदेशश्च प्राप्नोति । तत्र परत्त्वात् ऋ इति आदेशे भृज् अ इति जाते इदानीं धातोः द्वित्त्वे अभ्यासकार्ये च कृते बभृज् अ इति जाते "पुगन्तलघूपधस्य च"[८] इत्यनेन लघूपधगुणे बभर्ज इति इष्टं रूपं सिद्ध्यति । एवमेव अक्ङिति ण्वुलि, ल्युटि, च क्रमेण भर्जकः, भर्जनम् इति च रूपे सिद्ध्यतः । ऋकाराभावपक्षे तु बभ्रज्ज, भ्रज्जकः, भ्रज्जनम् इति रूपाणि भवन्ति । ऋकारपक्षे भ्रस्ज्धातोः क्ङिति प्रत्यये "स्त्रियां क्तिन्"[९] इति क्तिनि धातोः ऋकारादेशे भृज् ति इति जाते षत्वे ष्टुत्वे च कृते भृष्टिः इति रूपम् । एवमेव आशीर्लिङ्लकारे भ्रस्ज् यात् इति स्थिते "किदाशिषि"[१०] इति आशीर्लिङि यासुटः कित्त्वे रसः ऋ आदेशे भृज्यात् इति च रूपम् । ऋ आदेशाभावपक्षे तावत् "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च"[११] इति संप्रसारणे च भृष्टिः, भृज्यात् इत्येव रूपम् । एवं च एतावता प्रबन्धेन "भ्रस्जो रोपधयो रमन्यतरस्याम्"[१२] सूत्रस्य स्थाने "रस रन्यतरस्याम्" इति सूत्रिते अपि न कापि हानिः ।

पुनः पुनः भृज्जति इति विग्रहे भृस्ज्धातोः "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्"[१३] इति सूत्रेण यङ्प्रत्ययः विधीयते । तदा भ्रस्ज् य इति स्थिते यथाश्रुतसूत्रपक्षे "सन्यङोः"[१४] इति सूत्रेण द्वित्त्वं प्राप्नोति, ग्रहिज्यादिना सम्प्रसारणं प्राप्नोति, भृस्जो इति रमागमश्च प्राप्नोति । अत्र परत्वात् रमागमे प्राप्ते "ङ्किति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन"[१५] इति वार्तिकेन पूर्वं सम्प्रसारणे भृस्ज् य इति जाते इदानीं भृस्ज् धातोः अभावात् रमागमाभावे "सन्यङोः"[१६] इति द्वित्त्वे भृस्ज् भृस्ज् य इति जाते "रीगृदुपधस्य च"[१७] सूत्रस्थेन

१. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०२-०२-२९
२. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०८-०२-६६
३. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०८-०३-१७
४. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०८-०३-१९
५. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-८७
६. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-७७
७. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-०८
८. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०७-०३-८६
९. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०३-०३-९४
१०. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०३-०४-१०४
११. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-१६
१२. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-४७
१३. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०३-०१-२२
१४. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-०९
१५. कात्यायनवार्तिकम्
१६. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-०९
१७. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०७-०४-९०

"ऋत्वतः इति वक्तव्यम्"[१] इति वार्तिकेन रीङागमे बरीभृज्यते इति रूपम् । "रस रन्यतरस्याम्" इति सूत्रिते भृस्ज् य इत्यवस्थायां रसाम् ऋ इति आदेशे भृज् य इति स्थिते द्वित्ते, सम्प्रसारणे, ऋ आदेशे च प्राप्ते परत्वात् ऋ आदेशे भृ य इत्यवस्थायां द्वित्वे अभ्यासकार्ये बभृज्य इत्यवस्थायां रीङागमे बरीभृज्यते इति रूपम् । अत्र रीङागमस्य "रस रन्यतरस्याम्" इत्यनेन रेफस्य ऋ आदेशः प्राप्नोति इति चेत् अत्र इदं समाधानम् – "अनुदात्तोपदेशवनतितनोत्यादीनां अनुनासिकलोपो झलि क्ङिति"[२] सूत्रात् उपदेशे इति पदम् अनुवर्तते । एवं च "रस रन्यतरस्याम्" इति सूत्रस्य अर्थः भ्रस्जः धातोः उपदेशे विद्यमानानाम् एव रसाम् ऋ इति आदेशः स्यात् इति फलति । प्रकृते धातोरभ्यासस्य रीङादेशे कृते श्रूयमाणस्य रीत्यस्य धातूपदेशकाले अभावात् न ऋ आदेशः भवति । एवं च "क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन"[३] इति वार्तिकं च न कर्तव्यं भवतीति महदेव लाघवम् ।

उपरि प्रतिपादितः अयं च ग्रन्थः "रसो वर्वचनात् सिद्धम्" इति वार्तिकाशयवर्णनपरः एव । "रस वा ऋवचनात् सिद्धम्" इति च्छेदः । भाष्यकारैस्तावत् "सूत्रं तु भिद्यते यथान्यासमेवास्तु" इति वदद्भिः रसो वर्वचनात् इति एतादृशकल्पनायां दुष्टत्वं सूचितम् । तथा हि रेफाकारसकारसमुदायस्य ऋभावे पञ्च दोषाः सन्ति ।

"रस रन्यतरस्याम्" इति न्यासे प्रथमः दोषः - अपिल्लिटि बभर्जतुः, बभर्जुः इत्यादीष्यते । बभृजतुः, बभृजुः इत्यादि स्यात् । तथा हि भ्रस्ज्धातोः लिटि प्रथमपुरुषद्विवचने तसः अतुसादेशे भ्रस्ज् अतुस् इत्यवस्थायां यथाश्रुतसूत्रन्यासे सिद्धान्ते रमागमे भर्ज् अतुस् इति जाते धातोः द्वित्त्वे अभ्यासकार्ये बभर्जतुः इति इष्टं रूपम् । एवमेव बहुवचने बभर्जुः इत्यपि ।

"रस रन्यतरस्याम्" इति पक्षे तु भ्रस्ज् अतुस् इत्यवस्थायां रसाम् ऋ आदेशे भृज् अतुस् इति जाते अभ्यासकार्ये बभृजतुः इति अनिष्टं रूपम् । एवमेव बभृजुः इत्यत्रापि । ननु बभृज् अतुस् इत्यवस्थायां "पुगन्तलघूपधस्य च"[४] इति गुणे इष्टं रूपं सिद्धम् इति वक्तुं न शक्यते । यतो हि "असंयोगाल्लिट् कित्"[५] इति अतुसः कित्त्वात् "क्ङिति च"[६] इति गुणनिषेधे भर्जतुः इति इष्टं न सिध्यति ।

"रस रन्यतरस्याम्" इति न्यासे द्वितीयः दोषः - "सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्"[७] इति सूत्रेण एतेभ्यः धातुभ्यः सनि इडागः विकल्पेन विधीयते । तत्र इडागमः न भवति इति पक्षे बिभर्क्षति इति इष्यते । बिभृक्षति इति स्यात् । तथा हि भ्रस्ज्धातोः यथाश्रुतसूत्रन्यासे "धातोः कर्मणः समानकर्तृकादिच्छायां वा"[८] इति सन्प्रत्यये भ्रस्ज् स इति स्थिते रमागमे भर्ज् स इत्यवस्थायां "सन्यङोः"[९] इति द्वित्त्वे अभ्यासकार्ये बभर्ज् स इति जाते जकारस्य षत्वे तस्य कत्वे सनः सस्य षत्वे अभ्यासस्य इत्त्वे लिटि, तिपि, शपि पररूपे च बिभर्क्षति इति इष्टं रूपम् ।

ऋ आदेशपक्षे तावत् भ्रस्ज् स इत्यवस्थायां ऋ आदेशे भृज् स इति स्थिते द्वित्त्वे अभ्यासकार्ये च कृते बभृज्

[१]. कात्यायनवार्तिकम्
[२]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-३७
[३]. कात्यायनवार्तिकम्
[४]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०७-०३-८६
[५]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०२-०५
[६]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०१-०५
[७]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०७-०२-४९
[८]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०३-०१-०७
[९]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-०९


ISSN : 2249-538X

स इति जाते इदानीं "हलन्ताच्च"[१] इति सनः कित्त्वात् लघूपधगुणनिषेधे जस्य षत्वे तस्य च कत्वे सनः सस्य षत्त्वे अभ्यासस्य इत्वे बिभृक्षति इति स्यात् ।

"रस रन्यतरस्याम्" इति न्यासे तृतीयः दोषः - भ्रस्ज्धातोः आशीर्लिङि भर्क्षीष्ट इति इष्यते । भृक्षीष्ट इति च स्यात् । तथा हि भ्रस्ज्धातोः आत्मनेपदे आशीर्लिङ्लकारविवक्षायां लस्य तादेशे भ्रस्ज् त इति स्थिते यथाश्रुतसूत्रन्यासे रमागमे भर्ज् त इति जाते सीयुड्सुट्त्वष्टुत्त्वादिषु कृतेषु भर्क्षीष्ट इति इष्टं रूपम् ।

ऋ आदेशे तावत् भ्रस्ज् त इत्यवस्थायां ऋ आदेशे भृज् त इति जाते सीयुड्सुट्त्वष्टुत्त्वादिषु कृतेषु भृज् इत्यस्य "लिङ्सिचावात्मनेपदेषु"[२] इत्यनेन सूत्रेण कित्त्वात् गुणाभावे भृक्षीष्ट इति स्यात् ।

"रस रन्यतरस्याम्" इति न्यासे चतुर्थः दोषः - भ्रस्ज्धातोः लुङि अभर्ष्ट इति इष्यते । अभृष्ट इति च स्यात् । तथा हि भ्रस्ज्धातोः आत्मनेपदे लुङ्लकारविवक्षायां लस्य तादेशे भ्रस्ज् त इति स्थिते यथाश्रुतसूत्रन्यासे रमागमे भर्ज् त इति जाते च्लिसिजादिषु कृतेषु अभर्ष्ट इति इष्टं रूपम् ।

ऋ आदेशे तावत् भ्रस्ज् त इत्यवस्थायां ऋ आदेशे भृज् त इति जाते च्लिसिजादिषु कृतेषु भृज् इत्यस्य "लिङ्सिचावात्मनेपदेषु"[३] इत्यनेन सूत्रेण कित्त्वात् गुणाभावे अभृष्ट इति स्यात् ।

"रस रन्यतरस्याम्" इति न्यासे पञ्चमः दोषः - भ्रस्ज्धातोः णिजन्तात् चङि अबभर्जत् इति इष्यते, अबीभृजत् इत्यपि स्यात् । तथा हि भ्रस्ज्धातोः णिचि, लुङि, चङि, धातोः अडागमे च अभ्रस्ज् इ अ त् इति स्थिते यथाश्रुतसूत्रन्यासे रमागमे अ भर्ज् इ अ त् इति जाते धातोः द्वित्त्वे अभ्यासकार्ये अबभर्जत् इति इष्टं रूपम् ।

ऋ आदेशे तावत् अ भ्रस्ज् इ अ त् इत्यवस्थायाम् ऋ आदेशे अ भृज् इ अ त् इति जाते "पुगन्तलघूपधस्य च" इति लघूपधगुणे प्राप्ते "उर्ऋत्" इत्यनेन गुणापवादतया ऋकारस्य ऋकारादेशे कृते द्वित्त्वे भृज् भृज् इ अ त् इति जाते "सन्वल्लघुनि चङ्परे अनग्लोपे" इति सन्वद्भावे "सन्यतः" इति अभ्यासस्य इत्त्वे "दीर्घो लघोः" इति दीर्घे अबीभृजत् इति स्यात् । यद्यपि ऋआदेशपक्षे "उर्ऋत्" इत्यस्य वैकल्पिकत्वात् अबभर्जत् इति सिद्ध्यति । तथापि पक्षे अबीभृजत् इति अनिष्टमपि स्यात् ।

"ऋजि भृजी भर्जने" इति धातुः भ्वादिगणे पठितः । तत्र पठितस्य भृजी इत्यस्य धातोः अबीभृजत्, अबभृजत् इति रूपे इष्टे इति चेत् भर्जनार्थस्य तादृउशं रूपम् इष्टं न तु पाकसामान्यार्थस्य । उभयोः एकार्थकत्वाभ्युपगमे अपि पूर्वोक्तेषु पञ्चसु दोषेषु चत्वारः दोषाः दृढा एव । ते चत्वारः अपि दोषाः पूर्वोक्ताः धात्वन्तरेण (भृजी) सुपरिहराः इति चेत् अपिल्लिटि भृजेरपि धातोः गुणाभावादनुदात्तत्त्वेन आत्मनेपदित्वाच्च बभर्जतुः इत्यादिरूपस्य धात्वन्तरेणापि (भृजी) न सिध्यति । एवं च भृजेरुदात्तत्वेन ततः परेषां सन्लिङ्सिचामिडागमस्य सुस्थिरत्वात् बिभर्क्षति, भर्क्षीष्ट, अभर्ष्ट, इत्यादिरपि न सिध्यति ।

अन्ये तु वदन्ति "भ्रस्जो रोपधयो रमन्यतरस्याम्"[४] इति सूत्रस्य स्थाने "भ्रस्जेर्भृजिरन्यतरस्याम्" इति सूत्रं कर्तव्यमिति । एवं न्यासे अपि बभर्ज इत्यादीनि रूपाणि सिध्यन्ति चेदपि पूर्वोक्तदोषपञ्चकापेक्षया यङ्लुकि एकः दोषः अधिकः आपद्यते । तथा हि भ्रस्ज्धातोः यङि यङः आर्धधातुकत्त्वात् द्वित्त्वात् परत्वात् यथाश्रुतन्यासे रमागमे भर्ज् इत्यस्य "सन्यङोः"[५] इति द्वित्त्वे भर्ज् भर्ज् य इत्यवस्थायाम् "यङोऽचि च"[६] इति यङः लुकि

[१]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०२-१०

[२]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०२-११

[३]पाणिनीयाष्टाध्यायी सूत्रसंख्या ०१-०२-११

[४]पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-४७

[५]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०१-०९

[६]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०२-०४-७४

अभ्यासकार्ये आर्धधातुके लुट्लकारे बाभर्जिता, बाभ्रज्जिता इति रूपम् । "भ्रस्जेर्भृजिरन्यतरस्याम्"[१] इति सूत्रन्यासे आर्धधातुके लुट्लकारे बभ्रस्ज् तास् आ इति जाते "भ्रस्जेर्भृजिरन्यतरस्याम्" इति सूत्रन्यासेन भृज् इति आदेशः हनधातोः वधादेशवत् साभ्यासस्य स्यात् । भृजादेशे कृते पुनः "सन्यङोः"[२] इति द्वित्त्वं तु न भवति । यतो हि भृजादेशस्य स्थानिवत्त्वेन अनभ्यासस्य इति निषेधात् । यथाकथञ्चित् द्वित्त्वे कृते अपि रुग्रिग्रीकः अभ्यासस्य स्युरेव । एवं च रुगादिरहितं बाभ्रजिता, बाभ्रजिष्यति भृजादेशे कृते नैव सिद्येत् । यदि लाघवं पक्षपातेन स्वातन्त्र्यं चिकीर्ष्यते तर्हि भ्रस्जो रसाम् अरन्यतरस्याम्" इति पठित्त्वा रसिति समुदायस्य अरेव विधीयताम् । तथा च न कः अपि दोषः ।

अयमत्र सङ्ग्रहः -

रस ऋच्चेदपिल्लितद्वन्लिङ्गिचद्वरणिक्षु ते । दोषो भ्रस्जेर्भृजौ चैवं दोषो यङ्लुकि चाधिकः ॥
साभ्यासस्य हि भृउज्भावो भवेद्धन्तेर्बधिर्यथा । द्वित्त्वं पुनर्न लभ्येत स्थानिवत्त्वात्तद्वधेरिव ॥
तस्मादस्तु यथान्यासं स्वातन्त्र्ये अस्तु रसोरिति ॥ इति ॥

## उपसंहारः

एवं च अत्र प्रबन्धे सूत्रार्थवर्णनपुरस्सरं नानोदाहरणपुरस्सरं प्रत्युदाहरणपुरस्सरं सूत्रन्यासपरिवर्तनपुरस्सरं च इदं सूत्रं अत्र व्याख्यातम्) ।

## परामृष्टाः ग्रन्थाः


१. पाणिनीयाष्टाध्यायी ।
२. पाणिनीयधातुपाठः ।
३. वैयाकरणसिद्धान्तकौमुदी ।
४. कात्यायनवार्तिकम् ।
५. पतञ्जलिकृतवैयाकरणमहाभाष्यम् ।
६. अमरसिंहकृतः अमरकोषः ।
7. नागेशभट्टविरचितः लघुशब्देन्दुशेखरः ।
8. भट्टोजीदीक्षितकृतप्रौढमनोरमा ।
9. हरिदीक्षितविरचितलघुशब्दरत्नम् ।
10. प्रदीपोद्योतसहितं महाभाष्यम् ।


[१]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-४७
[२]. पाणिनीयाष्टाध्यायी सूत्रसंख्या ०६-०४-०९


ISSN : 2249-538X

# “प्रत्ययलोपे स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ” इति न्यासविवेचनम्

डा. पि. आर्. अर्चना कारन्त्*
अतिथ्युपन्यासिका(सं), क.सं.वि.,
बेङ्गलुरु

***लेखसारः*** *– पतञ्जलिविरचितमहाभाष्यस्य नवमाह्निके “प्रत्ययलोपे प्रत्ययलक्षणम्” इति सूत्रार्थनिरूपणावसरे वार्त्तिककारेणाचार्येण कात्यायनेनायं न्यासः निगदितः । “प्रत्ययलोपे प्रत्ययलक्षणम्”, “स्थानिवदादेशोऽनल्विधौ” इति द्वयोः सूत्रयोः स्थाने “प्रत्ययलोपे स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ” इति न्यासे लाघवमुपपाद्य, न्यासस्य गुणदोषान्निरूप्य, सर्वान्त्ये पाणिनिसूत्रभेदरूपमहद्दोषसंभवात् न्यासोऽयं भाष्यकृता निराकृतः । तथा हि कथं प्रकृतन्यासं द्वयोः सूत्रयोरर्थं समकालमुपस्थापयति, कान्यस्य प्रयोजनानि, कुतो वा एषः न्यासः समाश्रितः, कुतो वा परित्यक्त इत्यादयः समेऽप्यंशाः लेखेऽस्मिन् सविस्तरमुपवर्णिताः ।*

***कूटशब्दाः*** *– परिवीः, एकयोगलक्षणः, अनिमित्तम्, गव्यति, वतण्डी, शास्त्रपरविप्रतिषेधः, राजपुरुषः, आशीः, अतृणेट् ॥*

लोप-लुक्-श्लु-लुबिति चतसृभिः संज्ञाभिः यत्र प्रत्ययस्य लोपः विधीयते, तत्र लुप्तप्रत्ययनिमित्तकानि कार्याणि भवन्तीत्यर्थमुपस्थापयति “प्रत्ययलोपे प्रत्ययलक्षणम्” इति शास्त्रम् । यथा रमा इत्यादौ आबन्तशब्दात्परस्य सोः “हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्” इत्यनेन लोपेऽपि, प्रत्ययलक्षणेन रमा इत्यस्य सुबन्तत्वमादाय “सुप्तिङन्तं पदम्” इति पदसंज्ञासिद्धिः । अग्निचिदित्यादौ अग्नीत्युपपदपूर्वक-चिधातोः “अग्नौ चेः” इत्यनेन क्विपि सति, क्विपः सर्वापहारलोपे, लुप्तं क्विपं प्रत्ययलक्षणेनाश्रित्य, पिद्रूप-कृद्रूपप्रत्ययपरत्वात् “ह्रस्वस्य पिति कृति तुक्” इति तुगागमप्रवृत्तिः ।

परं “प्रत्ययलोपे प्रत्ययलक्षणम्” इति सूत्राभ्युपगमे राजपुरुषः – परिवीः इत्यादीनां रूपाणामसिद्धिः । तथा हि प्रत्ययलक्षणसूत्रस्य एषोऽर्थः पर्यवस्यति यत् – प्रत्ययस्य विद्यमानत्वे सति विद्यमानः सः प्रत्ययः यस्य कार्यस्य निमित्तं न भवति, लुप्तेऽपि तस्मिन् प्रत्यये सः प्रत्ययः तस्य कार्यस्य निमित्तं न स्यादिति । तथा च – राजपुरुषः इत्यत्र नलोपाप्रसङ्गः । राजन् + ङस् + पुरुष + सु इति दशायां “षष्ठी” इति सूत्रेण तत्पुरुषसमासे, “सुपो धातुप्रातिपदिकयोः” इत्यनेन द्वयोः सुप्प्रत्यययोः लुग्विधीयते । तत्र राजन् शब्दोत्तरः ङस्प्रत्ययः राजन्नित्यस्य पदसंज्ञायाः निमित्तभूतः न भवति, किन्तु भसंज्ञायाः एव निमित्तभूतः । स च ङस् प्रत्ययः समाससंज्ञोत्तरं लुप्तेऽपि तस्मिन्प्रत्यये, पदसंज्ञायाः निमित्तं न स्यात् । यस्य सतः कार्यं प्रति निमित्तं नाभूत्, सः लुप्तेऽप्यनिमित्त एव स्यात् । ततश्च राजन्नित्यस्य पदसंज्ञाभावात् नलोपाप्रसङ्गः ।

ननु राजपुरुषः इत्यत्र ङसः लुकि, “स्वादिष्वसर्वनामस्थाने” इत्यनेन प्रकृतेर्विधीयमानायाः पदसंज्ञायाः अभावेऽपि “सुप्तिङन्तं पदम्” सुबन्तत्वसमुदायनिष्ठपदसंज्ञायाः प्रवृत्तिः निर्बाधैव, तदाश्रितनलोपोऽपि अवश्यं प्रवर्तत एवेति चेन्न – यदि ङस् प्रत्ययः विद्यमानः स्यात् तदानीमिदं वक्तुं शक्यते यत् – अनेन सूत्रेण पदसंज्ञा भवति, अनेन न भवतीति । यथा ङस् प्रत्यये परे स्वादिष्वसर्वनामस्थाने इत्यनेन प्राप्तायाः पदसंज्ञायाः बाधिका भसंज्ञा भवति, ङस्सहितस्य राजन् शब्दस्य तु सुबन्तत्वात् “सुप्तिङन्तं पदम्” इति पदसंज्ञा भविष्यतीति । यदा तु ङसः लुग्विधीयते, तदा राजन् इत्येव सुबन्तम्, राजन् इत्येव पूर्वम् । अर्थात् प्रकृते द्वयोः पदसंज्ञासूत्रयोः राजन्नित्येवावधिः । तत्र “सुप्तिङन्तं पदम्” इत्यस्य यावानवधिः, तावानेवावधिः “स्वादिष्वसर्वनामस्थाने इति

---

*सम्पर्कसूत्रम् - 9481904228, Email- archanaksu11@gmail.com

सूत्रस्यापि। किञ्च लुप्तस्य ङसः प्रत्ययलक्षणेन समाश्रयणे अजादिप्रत्ययपरकत्वात् "यचि भम्" इत्येषा भसंज्ञा द्वयोरपि पदसंज्ञयोः बाधिका स्यात्। भसंज्ञा तु वर्णाश्रयाऽपि प्रत्ययलक्षणेन भवत्येव, प्राधान्येन वर्णाश्रयत्वाभावात् प्रत्ययलक्षणनिषेधाप्रवृत्तेः[१]। तत्र स्वादिष्विति पदसंज्ञामपवादत्वात्, सुप्तिङिति पदसंज्ञां परत्वात् बाधते इत्यतः राजन्नित्यत्र पदत्वाभावादसम्भव एव नलोपः। तदुक्तं पदमञ्जर्याम् – "लुप्ते तु प्रत्यये यस्यैवावधेः स्वादौ पदमिति पदसंज्ञा, सुबन्तं पदमित्यपि तस्यैवावधेः पदसंज्ञा। तत्रैवावधौ भसंज्ञा भवन्ती यथाऽयमपवादत्वात् स्वादिलक्षणां पदसंज्ञां बाधते, तथा सुबन्तलक्षणामपि परत्वाद्बाधते"[२] इति।

तद्वत् प्रत्ययलोपे प्रत्ययलक्षणमिति यथाश्रुतसूत्रसद्भावे परिवीरिति रूपस्याप्यसिद्धिः। तथा हि – परीत्युपसर्गपूर्वक-व्येञ्धातोः क्विपि, तस्य सर्वापहारलोपे, "वचिस्वपियजादीनां किति" इत्यनेन व्येञः यकारस्य सम्प्रसारणे इकारे, "संप्रसारणाच्च" इति पूर्वरूपे, परिवि इति जाते, लुप्तं क्विपं प्रत्ययलक्षणेन समाश्रित्य द्वयोः कार्ययोः प्रसक्तिः। एकं तु "ह्रस्वस्य पिति कृति तुक्" इति तुगागमः, अपरः "हलश्च" इति सूत्रेण दीर्घश्च। तत्र परत्वात् दीर्घ इति सिद्धान्तः। परमिदं परत्वं नैव सम्भवति। तदुक्तं वार्त्तिककारेण - ॥ तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति ॥[३] क्विपं प्रत्ययलक्षणेनादाय तुग्दीर्घौ प्राप्नुतः इत्यतः तयोः एकयोगलक्षणत्वम्। एकः योगः – सूत्रं लक्षणं – निमित्तं ययोः सः एकयोगलक्षणः। एकेन प्रत्ययलक्षणसूत्रेणानयोः द्वयोः कार्ययोः युगपत्प्राप्तिः। यतोहि क्विपः लोपे प्रत्ययाश्रितानि सर्वाणि कार्याणि पर्यवपन्नानि अर्थात् नष्टप्रायाणि भवन्ति। तानि सर्वाण्यपि प्रत्ययलक्षणबोधकेनानेन सूत्रेण प्रत्युत्थाप्यन्ते। अनेनैव तुक्, अनेनैव दीर्घ इत्यतः तुग्दीर्घत्वयोः एकयोगलक्षणत्वात् पौर्वापर्यनिश्चयोऽसम्भवः[४]। ततश्च परत्वात् दीर्घ इति कथनमप्यसम्भवमित्यतः परिवीरिति रूपासिद्धिप्रसङ्गः।

अनयोः दोषयोः परिमार्जनार्थं वार्त्तिककारेण न्यासोऽयं समाश्रितः – "प्रत्ययलोपे स्थानिसंज्ञाऽन्यभाव्यस्य" इति। स्थान्यपेक्षया अन्यद्वस्तु आदेशः। स एवान्यशब्देन व्यपदिश्यते। भावः स्वरूपम्। अन्यो भावः – अन्यभावः। अन्यभाव एव आन्यभाव्यम्, स्वार्थे ष्यञ्प्रत्ययः, चातुर्वर्ण्यादिवत्[५]। ततश्च आन्यभाव्यशब्देनादेशस्य परामर्शः। प्रत्ययस्य लोपे सति, लोपरूपादेशस्य स्थानिसंज्ञाः अतिदिश्यन्त इति प्रकृतन्यासस्यार्थः। किञ्च "अनल्विधौ" इति प्रतिषेधांशस्यापि निवेशे "प्रत्ययलोपे स्थानिसंज्ञाऽन्यभाव्यस्यानल्विधौ" इत्येवं रूपपरिष्कृतन्याससिद्धिः। अर्थात् परिवीरित्यत्र क्विब्रूपस्थानिनः याः संज्ञाः पित्वम्, कृत्वम्, प्रत्ययत्वमित्यादयः ताः, लोपरूपादेशस्यानेनातिदिश्यन्ते। प्रकृतन्यासेन केवलसंज्ञानामेवातिदेशात्, संज्ञाश्रितानि कार्याणि तैः तैः सूत्रैरेव सिध्यन्ति। ततश्च स्थानिनः सत्तामात्रमनेन न्यासेन बोध्यत इत्यतः "हलः" इति सूत्रेण दीर्घः, "ह्रस्वस्य पिति कृति तुक्" इति सूत्रेण तुगागमश्च प्राप्तः। तत्र च "विप्रतिषेधे परं कार्यम्" इत्युक्तत्वात् परत्वात् दीर्घे परिवीरितीष्टरूपसिद्धिः।

"प्रत्ययलोपे प्रत्ययलक्षणम्", "स्थानिवदादेशोऽनल्विधौ" इति द्वयोः सूत्रयोः स्थाने एषोऽभिधीयत इत्यतः अत्यन्तलाघवमप्यत्रास्ति। ननु यद्येतादृशन्यासः उररीक्रियेत तर्हि स्थानिवत्सूत्रस्य, प्रकृतन्यासस्य च अर्थभेदः स्यात्। तद्यथा – "आदेशः स्थानिवत् स्यात्" इत्यर्थः स्थानिवत्सूत्रस्य। "आदेशस्य स्थानिसंज्ञा

---

[१] "वर्णाश्रये नास्ति प्रत्ययलक्षणम्" इत्येष निषेधः।

[२] पदमञ्जरी – १/१/६२

[३] महाभाष्यम् – १/१/६२

[४] कार्यातिदेशपक्षमाश्रित्यायं पूर्वपक्षः ज्ञेयः, न तु शास्त्रनिमित्तादेशपक्षयोः।

[५] "चातुर्वर्ण्यादिभ्यः स्वार्थे उपसंख्यानम्" – वा. ५/१/१२४


ISSN : 2249-538X

स्यात्" इति प्रकृतन्यासस्य। ततश्च "आङो यमहनः" इति विहितमात्मनेपदं हन्तेरेव स्यात्, वधेर्न स्यात्। आयच्छते – आहते इत्यादौ आङुपसर्गपूर्वकयोः यम – हनधात्वोरात्मनेपदं विधीयते प्रकृतसूत्रेण। तत्र वध्यात् – अवधीत् इत्यादौ हन्-धातोराशीर्लिङि – लुङि च "हनि वध लिङि", "लुङि च" इत्येताभ्यां सूत्राभ्यां वधादेशः विहितः। हन् धातुरत्र स्थानी। वध इत्यादेशः। आदेशः स्थानिवत्स्यादिति यथाश्रुतसूत्रे वधादेशस्य हन्धातुत्वं सुकरमित्यतः वधेरप्यात्मनेपदं निर्बाधम्। परमादेशस्य स्थानिसंज्ञा स्यादित्यर्थकप्रकृतन्यासाश्रयणे वधादेशस्थले आत्मनेपदत्वोपपादनमसाध्यमेव। यतोहि हनः कापि तादृशी संज्ञा नास्ति, या च तत्स्थानिकस्य वधेरप्यतिदिश्येत, तादृशीञ्च संज्ञामाश्रित्य आत्मनेपदत्वं निरूपयितुं शक्येत। ततश्च वधादेशस्थले आत्मनेपदं नैव स्यात्। तत्र च "आङो यमहनः" इत्यनेन हन्ति स्वरूपेणोपादाय आत्मनेपदं विधीयते, न तु कांचित्संज्ञामाश्रित्य। यद्यपि हन्तेरस्ति धातुसंज्ञा, तथापि न तदुपादानेनात्मनेपदं विधीयत इत्यतः सा संज्ञा प्रकृते निष्प्रयोजिकैवेत्यतः वधेरात्मनेपदत्वं न स्यादिति चेन्न – हन्तेः हन्तिरेव संज्ञा "स्वरूपं शब्दस्याशब्दसंज्ञा" इति सूत्रप्रामाण्यात्। तत्र "आङो यमहनः" इति सूत्रोपात्तः हन्तिः संज्ञा, प्रयोगस्थः हन्तिः संज्ञीत्यर्थमाश्रित्य[1] हन्तिरिति संज्ञा वधेरतिदिश्यत इत्यतः सिध्यति तस्यात्मनेपदम्। अतो नास्ति दोषः प्रकृतन्यासे।

## न्यासस्य गुणदोषनिरूपणम् –

मुख्यतया भसंज्ञा, ङीब्विधिः, ष्फविधिः, गोरात्वविधिरिति चत्वारि प्रयोजनानि न्यासस्यास्य दर्शितानि। भसंज्ञायां तावत् – राजपुरुषः। यदि "प्रत्ययलोपे प्रत्ययलक्षणम्" इति यथाश्रुतसूत्रसमाश्रयणं तर्हि ङसं प्रत्ययलक्षणेन समाश्रित्य भत्वे सति पदत्वाभावः स्यात्, नलोपाभावश्च स्यात्। परन्तु प्रकृतन्यासाश्रयणे अनल्विधौ इति प्रतिषेधसद्भावात्, अजादिप्रत्ययमाश्रित्य प्रवर्तमानायाः भसंज्ञायाः अल्विधित्वात्, तस्यां कर्तव्यायां लुकः स्थानिसंज्ञायाः अभावः। ततश्च भत्वाभावात्, "सुप्तिङन्तं पदम्" इत्यनेन पदत्वात् "नलोपः प्रातिपदिकान्तस्य" इति नलोपे इष्टरूपसिद्धिः।

ङीब्विधौ यथा - चित्रा। चित्रेति नक्षत्रवाचकाच्छब्दात् युक्तः काल इत्यर्थे "नक्षत्रेण युक्तः कालः" इत्यण्प्रत्ययः, तस्य च "लुबविशेषे" इत्यनेन लुप्। ततश्च चित्रा इति शब्दस्य "लुपि युक्तवद्व्यक्तिवचने" इति युक्तवद्भावेन स्त्रीत्वम्। चित्रायां जातेति विग्रहे चित्रा शब्दात् जातार्थे "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" इति नक्षत्राणि, तस्य "चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्" इत्यनेन लुक्। ततो "लुक्तद्धितलुकि" इत्यनेन चित्रेत्यत्र टापः लुक्। तदनु लुप्तमणं प्रत्ययलक्षणेन समाश्रित्य चित्र शब्दात् "टिड्ढाणञ्..." इत्यादिना ङीप्प्रत्यये प्राप्ते चित्रीत्यनिष्टरूपप्रसङ्गश्च। परं "प्रत्ययलोपे स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति न्यासाश्रयणे, ङीब्विधेः अल्विधित्वात्[2] "अनल्विधौ" इति प्रतिषेधात् ङीपः अप्रसङ्गः। ततश्चौत्सर्गिके टापि चित्रा इति रूपनिष्पत्तिः।

ष्फविधेः वतण्डीत्युदाहरणम्। वतण्डस्य गोत्रापत्यमित्यर्थे वतण्डशब्दात् "वतण्डाच्च" इत्यनेन यञि, वातण्ड्य इति रूपम्। वतण्डस्य गोत्रापत्यं स्त्री इत्यर्थे विवक्षिते उत्पन्नस्य यञ् प्रत्ययस्य "लुक् स्त्रियाम्" इत्यनेन लुक्। ततश्च स्त्रियां लुप्तं यञं प्रत्ययलक्षणेन समाश्रित्य वतण्डेति शब्दस्य यञन्तत्वात् "प्राचां ष्फ तद्धितः" इत्यनेन ष्फः प्राप्तः। परं "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इत्युक्तत्वात्, ष्फविधायके सूत्रे, अतः इत्यस्यानुवृत्तिसद्भावात्, तद्विधेरल्विधित्वात् ष्फस्याप्राप्तिः। किन्तु शार्ङ्गरवादिगणे पाठात् ङीन्प्रत्यये वतण्डीति

[1] उक्तं हि वाक्यपदीये – अग्निशब्दस्तथैवाऽयमग्निशब्दनिबन्धनः।
अग्निश्रुत्यैति सम्बन्धमग्निशब्दाभिधेयया ॥ इति।

[2] "टिड्ढाणञ्..." इति सूत्रे "अजाद्यतष्टाप्" इत्यतः अतः इत्यस्यानुवृत्तेः ङीब्विधेः अल्विधित्वं बोध्यम्।

रूपसिद्धिः। ननु प्रत्ययलक्षणसूत्रसत्त्वेऽपि प्रत्ययलक्षणेन प्राप्तं ष्फं परत्वाद्बाधित्वा शार्ङ्गरवादिपाठात् ङीन् भवतीत्यतः न दोषः इति चेन्न – आवट्यायनी इत्यत्र यथा "आवट्याच्च" इति सूत्रेण प्राप्तं चापं बाधित्वा प्राचां मते ष्फो भवति, तद्वदत्रापि प्राचां मते ङीनं बाधित्वा प्रत्ययलक्षणेन ष्फस्य दुर्वारत्वात्।

गोरात्वविधौ यथा – गव्यति। गामिच्छतीति विग्रहे "सुप आत्मनः क्यच्" इति सूत्रेण गो + अम् इत्यस्मात् क्यच् प्रत्ययः। तदनु "सनाद्यन्ता धातवः" इत्यनेन गो + अम् + क्यच् इत्यस्य धातुत्वात्, "सुपो धातुप्रातिपदिकयोः" इत्यनेन सुब्लुकि गो + य इति जाते, "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यनेन अमः प्रत्ययलक्षणत्वे, तमादाय "औतोम्शसोः" इत्यनेन गोशब्दावयवौकारस्य आकारादेशप्रसङ्गः। परं प्रकृतन्यासाश्रयणे अनल्विधाविति प्रतिषेधसद्भावात् "इको यणचि" इत्यस्मात् आत्वविधायके शास्त्रे अचीत्यस्यानुवृत्तेः, तस्य च अल्विधित्वात् लुकः अम्रूपप्रत्ययसंज्ञायाः अभावः, गव्यतीत्यत्र आत्वाभावश्च। इमानि चास्य न्यासस्यासाधारणप्रयोजनानि।

न्यासस्य दोषास्तावत् वार्त्तिककारेणेत्थं सङ्गृहीताः – "तस्य दोषो ङौनकारलोपेत्त्वेम्विधयः" इत्यनेन वार्त्तिकेन। ङौ नलोपप्रसक्तिः, इत्व-इम्विध्योरप्रसक्तिश्च दोषः प्रकृतन्यासाश्रयणे। तथा हि – आर्द्रे चर्मन्, लोहिते चर्मन् इत्यादौ चर्मनिति शब्दात् सप्तम्येकवचने ङिप्रत्यये, तस्य च "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" इत्यनेन लुकि, प्रत्ययलक्षणेन भसंज्ञामाश्रित्य पदत्वाभावः साध्यते। पदत्वाभावाच्च नलोपाभावश्च कथ्यते। तदेतन्न सिध्यति "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति न्यासे, भसंज्ञायाः अल्विधित्वादनल्विधाविति प्रतिषेधात्। किञ्चाङुपसर्गपूर्वक-शासेः क्विपि, तस्य सर्वापहारलोपे, "शास इदङ्हलोः" इत्यनेन शासः इकारादेशे, "हलश्च" इति दीर्घे, सुबुत्पत्तौ च आशीरिति रूपम्। अत्रापि अङि हलादौ क्ङिति परे विधीयमानस्य शासः इकारादेशस्य अल्विधित्वात्, इकारादेशः न स्यात्, आशीरिति रूपं च न स्यात्। एवमेव अतृणेट्-ड् इत्यत्र "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति न्यासाश्रयणे "तृणह इम्" इति सूत्रविहितस्य इमागस्याप्राप्तिरूपः दोषोऽपि सम्भवति। तृह – हिंसायामिति धातोः लङि, अडागमे, तिप्सिपोरन्यतरस्मिन्, इतश्चेति लोपे, हल्ङ्यादिलोपे, "रुधादिभ्यः श्नम्" इत्यनेन श्नमि, इमागमे, आद्गुणे, ढत्वे, जश्त्वे, णत्वे[1] च अतृणेडिति रूपम्। तच्च न स्यात्, हलादि पित्सार्वधातुकप्रत्यये परतः विहितस्य इमः अल्विधित्वात्, हल्ङ्यादिलोपस्य तिप्प्रत्ययसंज्ञायाः अभावात्। अपि च पूर्वोक्तदोषसमुच्चितं दोषान्तरमप्यत्र न्यासे सम्भवति, यच्च पाणिनीयसूत्रभेदरूपः।

## न्यासस्य प्रत्याख्यानम्, यथाश्रुतसूत्रपरिग्रहश्च -

पूर्वोक्तगुणदोषपरामर्शपूर्वकं "यथान्यासमेवास्तु" इति कथयद्भिः भाष्यकारैः न्यासोऽयं प्रत्याख्यातः। स्वयं भाष्यकृता "प्रत्ययलोपे प्रत्ययलक्षणम्" इति यथाश्रुतसूत्रमङ्गीकृत्यैव राजपुरुषः, परिवीः, चित्रा, वतण्डी, गव्यतीत्यादौ परिहारोपायाश्च दर्शिताः। यदुक्तं राजपुरुषः इत्यत्र प्रत्ययलक्षणेन भत्वात् पदत्वाभावः, नलोपाभाश्चेति तन्न दोषाय। "न ङिसम्बुद्ध्योः" इत्यनेन शास्त्रेण ङिप्रत्यये परे नलोपनिषेधस्य पाणिनिनोक्तत्वात् "प्रत्ययलक्षणेन भसंज्ञाभावः" इत्येषोऽर्थः ज्ञाप्यते। यदि समासे ङसाद्यजादि विभक्तिपरकत्वं प्रत्ययलक्षणेनादाय भत्वमापाद्यते, तर्हि ङावपि तेनैव हेतुना भत्वेन पदत्वाभावात्, नलोपाभावस्य स्वतः सिद्धत्वे तदर्थं कृतः "न ङिसम्बुद्ध्योः" इति निषेधः व्यर्थः स्यात्। व्यर्थः सन् प्रत्ययलक्षणेन भत्वाभाव इत्यंशं ज्ञापयति, ज्ञापकस्य च सामान्यापेक्षत्वात् षष्ठ्येकवचन-ङस् प्रत्यये परेऽपि भत्वाभावः तेनैव हेतुना साध्यते। अतो नास्ति प्रत्ययलक्षणसूत्रे

[1] "ऋवर्णान्नस्य णत्वं वाच्यम्" इति वार्त्तिकम्।


ISSN : 2249-538X

दोषः ।

परिवीरित्यत्रापि शास्त्रपरविप्रतिषेधमादाय हलश्चेति दीर्घः सुकरः । प्रत्ययलोपे इति सूत्रेण केवलं कार्यस्यैवातिदेशः, न तु शास्त्राणाम् । द्वयोः उपदेशसूत्रयोर्मध्ये यः परः तदाश्रितं कार्यं भवति । "अतिदिश्यमानकार्याणामुत्पत्तिदेश एव विप्रतिषेधशास्त्रोपयोगी" इत्याहुः[1] उद्योतकाराः नागेशभट्टाः । प्रत्ययलक्षणसूत्रमिदं तत्तच्छास्त्रनिमित्तानि सम्पादयति , कार्याणि तु तैः तैः सूत्रैरेव भवन्ति । तथा च प्रत्ययलोपे इति सूत्रस्यायमर्थः कैयटेनोपवर्णितः[2] – "सति प्रत्यये यत्कार्यं दृष्टं तल्लुप्तेऽपि भवति" इति । प्रकृते परिवीरित्यादौ प्रत्यये सति दीर्घः दृष्टः, तुगगामः नैव दृष्टः ह्रस्वत्वाभावात् । तस्मात् क्विपः लोपोत्तरमपि दीर्घ एव भवति न तुगित्यतः परिवीरिति रूपं निर्बाधम् । स्पष्टीकृतश्चायमर्थः रत्नप्रकाशकारेणापि, उक्तं हि तेन – "एकेनैव सूत्रेण तुग्दीर्घयोरतिदेशे प्राप्तेऽपि तयोर्विरोधे तदुपदेशशास्त्रगतपौर्वापर्यावलम्बनेन विप्रतिषेधे परमिति सूत्रेण दीर्घ एव भविष्यति" इति[3] ।

चित्रा इत्यत्र अण्णन्तत्वात् ङीबापादिता । परं सोऽपि न भवति "टिड्ढाणञ्.." इति सूत्रस्य अर्थान्तरस्वीकारात् । तथा हि अजाद्यतष्टाप् इत्यनेन अत इत्यनुवृत्तौ, अण्णन्तादकारान्तात् प्रातिपदिकात् ङीबिति नार्थः । किन्तु अण्रूपः यः अकारः तदन्तात् प्रातिपदिकात् ङीबित्येवार्थः । प्रकृते चित्रेत्यत्र प्रत्ययलक्षणेन अणः समाश्रयणेऽपि, अतिदेशसहस्रेणापि अण्रूपाकारस्य तत्राभावात् ङीपः अप्राप्तिरेव । तद्वत् वतण्डीत्यत्रापि ष्फः न प्राप्नोति, ष्फविधायके "प्राचां ष्फ तद्धितः" इति सूत्रे अत इत्यस्यानुवृत्तिं कृत्वा यञ् रूपः यः अकारः, तदन्तात् ष्फः इत्यर्थाभ्युपगमात् । अत्रापि स्थले प्रत्ययलक्षणेन यञ्रूपाकारस्य प्रतिपादनमसम्भवमेवेत्ययः ष्फस्याप्रसक्तिः । गामिच्छति गव्यतीत्यत्र "औतोम्शसोः" इति सूत्रस्य "अम् प्रत्ययसम्बन्धी यः अच् तस्मिन् परे पूर्वपरयोः आकार एकादेशः" इत्यर्थं समाश्रित्य आकारादेशः वार्यते । किञ्च चित्रा-वतण्डी-गव्यतीति त्रिष्वपि स्थलेषु ङीबादिविधायकसूत्राणां पूर्वोक्तार्थाश्रयणे, सर्वाणि शास्त्राणि वर्णाश्रितानि भवन्तीत्यतः "वर्णाश्रये नास्ति प्रत्ययलक्षणम्" इति प्रत्ययलक्षणस्य प्रतिषेधात् "प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रसद्भावेऽपि दोषाभावनिरूपणं सुकरमेव ।

इत्थञ्च "प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रे प्रासङ्गिकरूपेण न्यासोऽयं वार्त्तिककृता स्वीकृतः । भाष्यकृता च तदर्थः उपवर्णितः, तस्य गुणाः दोषाश्च सविस्तरं प्रतिपादिताश्च । सर्वान्त्ये प्रत्ययलक्षणसूत्रेणैव सर्वाण्युदाहरणानि संसाध्य न्यासोऽयं खण्डितः ॥

## परामृष्टाः ग्रन्थाः


१. पाणिनीयः अष्टाध्यायी - सूत्रपाठः, 'प्रह्लाद' टिप्पणीसहितः, चौखम्बा कृष्णदास अकाडमी ।

२. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, चौखम्बासंस्कृतप्रतिष्ठानम् ।

३. काशिकावृत्तिः, न्यास-पदमञ्जरीव्याख्याभ्यां सहिता, प्रकाशनम् – प्राच्यभारती १९६५ ।

४. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी, बालमनोरमा-तत्त्वबोधिनीसमन्विता, मोतीलाल् बनारसीदास ।

५. नागेशभट्टैर्विरचितः "परिभाषेन्दुशेखरः", दुर्गा व्याख्यानम्, राष्ट्रियसंस्कृतसंस्थानम्, नव देहली ।

६. नागेशभट्टविरचितः लघुशब्देन्दुशेखरः, राधिकासंस्कृत-हिन्दीव्याख्याद्वयोपेतः, चौ. सं. सी. आफिस, वाराणसी ।

७. आचार्यभर्तृहरिप्रणीतं वाक्यपदीयम्, व्याख्याद्वयोपेतम्, संपूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी ।


[1]उद्योतः – १/१/६२

[2]प्रदीपव्याख्यानम् – १/१ ६२

[3]महाभाष्यप्रदीपव्याख्यानानि – प्रत्ययलोपे प्रत्ययलक्षणम् ।

# पाणिन्युक्तदिशा निपातपदविमर्शः

श्री सौरभ राउतः*
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः

***लेखसारः*** *– पाणिनीयशब्दानुशासने निपातसंज्ञा केवलं पदजातिविभागपर्यवसायिनी न, अपि तु द्रव्याद्यर्थव्यावृत्तिसंज्ञासमावेशवाक्यार्थोपस्कारसम्बन्धनियमनरूपाणां बहूनां शास्त्रीयव्यापाराणामधिकरणम् । प्रस्तुतलेखे यास्कप्रभृतिप्रदर्शितस्य निपातस्वरूपस्य तथा पाणिनीयचातुर्विध्यस्य मूलप्रतिपादनं रक्षित्वा द्योतकत्ववाचकत्वविवादः, निपातजन्यविषयताप्रकारतासंसर्गतावच्छेदः, उपसर्गकर्मप्रवचनीयसंज्ञयोः कार्यभेदश्च उपबृंहिततर्कपद्धत्या परीक्ष्यन्ते । अन्वयव्यतिरेकाभ्यां निपातस्य निरर्थकत्वाभावं साधयित्वा तस्य स्वतन्त्रद्रव्याभिधायकत्वाभावेऽपि समभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वम्स्, संसर्गविशेषावच्छेदकत्वं, प्रकरणतात्पर्यसूचकत्वं च वाक्यार्थनिर्माणे नियामकमिति निर्णीयते ।*

***कूटशब्दाः*** *– निपातः, असत्त्वम्, द्योतकत्वम्, वाचकत्वम्, संज्ञासमावेशः, कर्मप्रवचनीयः, वाक्यार्थः, प्रक्रियार्थः, विमर्शचिह्नम्*

'निपात' इति पदं व्याकुर्वाणैः शाब्दिकैर्निर्वचनकारैश्च निर् उपसर्गपूर्वकात् पतॢँ गतौ इति धातोर्घञि निष्पाद्यते । धातूपसर्गाभ्यां तस्य जन्म ; सिद्धान्तश्च यास्काचार्येण—"अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति" इति प्रतिपादितः । [१] महेश्वरस्तद्वाक्यम् "उच्चावचेषु—अनेकप्रकारेषु प्रतिपाद्येष्वर्थेषु प्रतिपादकत्वेन निपतन्ति वर्तन्ते" इति व्याचष्टे । दुर्गाचार्योऽपि "उच्चावचाः पदार्थाः भवन्तीति गार्ग्यः" इत्यादिना प्रत्येकं निपातस्य नामाख्यातयोगेऽनेकार्थत्वमभिप्रैति । सायणाचार्येण 'उच्च'शब्दः क्वचित् प्रभूतार्थे,[२] क्वचिदुच्छ्रितार्थे च व्याख्यातः ; अतः निपातानामर्था एकरूपतया सङ्कोचयितुं न शक्यन्ते । [३]

ऋक्प्रातिशाख्येऽपि निपातबह्वर्थत्वमसङ्ख्येयत्वं चोक्तम्—

**"निपातानामर्थवशान्निपातनादर्थैकानामितरे च सार्थकाः ।**
**नेयन्त इत्यस्ति सङ्ख्येह वाङ्मये मिताक्षरे चाप्यमिताक्षरे च ये ॥"**[४]

उव्वटाचार्यः केषाञ्चिदर्थविशेषे निपातनं, केषाञ्चित् सार्थकत्वं, केषाञ्चिन्निरर्थकत्वं च दर्शयन् पद्यगद्यात्मकवाङ्मये तेषां संख्यानाशक्यतामाह । 'निपतन्ति' इति बहुवचननिर्देशेन वाक्यार्थसिद्धौ तेषां सम्भूयकारित्वमपि सूच्यते ।

लोकेऽपि दुरधिगमकार्यसिद्धये शक्तीनां सम्भूय प्रवृत्तिर्दृश्यते । तद्वदन्योन्यसंसक्तैः पदैरुन्नीतो वाक्यार्थो निपातानामुच्चावचैः प्रयोगैः परिपूर्यते । भोजराजेन कार्यभेदमवलम्ब्य—

**"केऽप्येषां द्योतकाः केऽपि वाचकाः केऽप्यनर्थकाः । आगमा अपि केऽपि स्युः सम्भूयार्थस्य साधकाः ॥"**

---

***सम्पर्कसूत्रम्** - 8328883056, Email- routsourav636@gmail.com

[१]यास्कः, निरुक्तम्, दुर्गाचार्यकृतवृत्तिसहितम्, १.४—"अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति" ; सम्पा० डॉ० उमाशङ्कर ऋषिः, वाराणसी—चौखम्बा विद्याभवन, २०२२ ।

[२]ऋग्वेदसंहिता, २.२.१०, सायणभाष्यम् ; सम्पा० डॉ० गङ्गासहायशर्मा, वाराणसी—संस्कृतसाहित्यप्रकाशन, २०१६ ।

[३]ऋग्वेदसंहिता, २.४०.४, सायणभाष्यम् ; सम्पा० डॉ० गङ्गासहायशर्मा, वाराणसी—संस्कृतसाहित्यप्रकाशन, २०१६ ।

[४]शौनकः, ऋग्वेदप्रातिशाख्यम्, १२.९, उव्वटभाष्यम् ; व्याख्या/सम्पा० वीरेन्द्रकुमारवर्मा, दिल्ली—चौखम्बा संस्कृत प्रतिष्ठान, २०२२ ।

इति निपातानां चातुर्विध्यमुक्तम् । [१] शौनकोऽपि—

**"इयन्त इति सङ्ख्यानं निपातानां न विद्यते । प्रयोजनवशा ह्येते निपात्यन्ते पदे पदे ॥"**

इति प्रयोगप्रयोजनाधीनत्वं द्रढयति । [२] एतेन 'निपात' इति संज्ञा अर्थौपाधिकी, न तु नितान्तं शब्दस्वरूपौपाधिकी ; वैदिकवाङ्मये चास्याः प्राचीनं बीजमस्तीति निष्कर्षः ।

## पाणिन्यभिमतं व्युत्पादनम्

भगवता पाणिनिना निपातपदस्याभिधानिकं नियमनं "चादयोऽसत्त्वे" इति कृतम् । [३] सूत्रं व्याचक्षाणः पतञ्जलिराह—"अयं सत्त्वशब्दोऽस्त्येव द्रव्यपदार्थकः । तद्यथा—सत्त्वमयं ब्राह्मणः, सत्त्वमियं ब्राह्मणीति । अस्ति क्रियापदार्थकः—सद्भावः सत्त्वमिति । कस्येदं ग्रहणम्? द्रव्यपदार्थकस्य" इति । [४] कैयटोऽपि "द्रव्यशब्देनात्र सिद्धरूपं सत्त्वमभिधीयते" इत्याह । हरदत्तस्य "इदं तदिति सर्वनामपरामर्शयोग्यं वस्तु द्रव्यमुच्यते" इति व्याख्यानात् सर्वनामपरामर्शयोग्यता द्रव्यत्वावच्छेदिकेति लभ्यते ।

भोजराजेन "तदेवमर्थग्रहणसामर्थ्यात् सलिङ्गः, ससंख्यः, सद्रव्यश्च समर्थः पदार्थ उपादीयते" इति सत्त्वस्य लिङ्गसंख्यादिसम्बन्धो दर्शितः । तस्मात् सिद्धरूपद्रव्यबोधकाः शब्दाः सत्त्ववचनाः, तद्व्यावृत्तसमुच्चयविकल्पाव-धारणाद्यर्थनिष्ठाः शब्दा असत्त्ववचना इति सामान्यतः स्थितिः । 'असत्त्वे' इति पदनिवेशेन चादिगणपाठस्य शा-ब्दस्वरूपमात्रनिबद्धत्वं निरस्य अर्थविषयकं निमित्तं पाणिनिना प्रकल्पितम् ; एतदेव निपातलक्षणस्य वाक्यार्थानु-गामित्वे मूलम् ।

## सूत्रकृन्मते निपातविषयको विमर्शः

पाणिनीयदृष्ट्या निपाताः कार्यवैचित्र्येण चतुर्धा विभज्यन्ते—विशुद्धनिपाताः, गत्युपसर्गसंज्ञाविशिष्टनिपाताः, गतिसंज्ञामिश्रितनिपाताः, कर्मप्रवचनीयसंज्ञायुक्तनिपाताश्च । अयं विभागो न शब्दरूपस्य चतुर्धा भेदः, किन्तु एकस्यापि रूपस्य प्रयोगोपाधिभेदेन संज्ञाकार्यभेदः ; अत एव पाणिनीयसंज्ञातन्त्रे समावेशस्य विशेषमहत्त्वम् ।

### १. विशुद्धनिपाताः

विशुद्धनिपाताः "चादयोऽसत्त्वे"[५] "प्रादयः"[६] इत्याभ्यां सूत्राभ्यां निर्दिष्टाः । 'असत्त्वे' इत्यत्र नञः प्रसज्यप्रतिषेधत्वं पर्युदासत्वं वेति संशये भाष्यकारः प्रसज्यप्रतिषेधमाश्रयति । पर्युदासे सत्त्वादन्यस्मिन्नर्थे वर्तमानस्य चादेर्निपातसंज्ञेति स्यात्; ततश्च 'विशेषेण प्राति पूरयति' इति विग्रहे 'विप्रः' इत्यस्य क्रियाद्रव्यसमुदायस्य केवलद्रव्याद्भिन्नत्वात् निपातसंज्ञापत्तिः, सुपो लुक् च स्यात् । प्रसज्यप्रतिषेधे तु द्रव्यगन्धसद्भावमात्रेण संज्ञा निषिध्यते, अतो दोषो नास्ति । [७]

---

[१] भोजदेवः, सरस्वतीकण्ठाभरणम्, १.१.११८ । उपलब्धसंस्करणभेदेन पृष्ठसंख्या निश्चेतुं न शक्यते ; अतः सूत्रसंख्यैव प्रदत्ता ।

[२] शौनकः, बृहद्देवता, २.१५ ; सम्पा० आर्थर् आन्थोनी मॅक्डोनेल्, हार्वर्ड्-ओरिएण्टल्-सीरीस् ५–६, केम्ब्रिज्—हार्वर्ड् विश्वविद्यालयः, १९०४ ।

[३] पाणिनिः, अष्टाध्यायी, १.४.५७—"चादयोऽसत्त्वे" ; भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, संज्ञाप्रकरणम् ; वाराणसी—चौखम्बा सुरभारती प्रकाशन, २०१७ ।

[४] पतञ्जलिः, व्याकरणमहाभाष्यम्, १.४.५७ ; सम्पा० एफ्० कीलहॉर्न्, तृतीयसंस्करणपरिष्कर्ता के० वी० अभ्यङ्करः, प्रथमखण्डः, पुणे—भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९६२, पृ० ३४१, पङ्क्तयः २–९ ।

[५] पाणिनिः, अष्टाध्यायी, १.४.५७ ।

[६] पाणिनिः, अष्टाध्यायी, १.४.५८—"प्रादयः" ।

[७] पतञ्जलिः, व्याकरणमहाभाष्यम्, १.४.५७ ; पूर्वोक्तं कीलहॉर्न्–अभ्यङ्करसंस्करणम्, प्रथमखण्डः, पृ० ३४१ ; कैयटः, महाभाष्यप्रदीपः,

पशुशब्दो द्रव्यवाचित्वे व्यावर्त्यः, सम्यगर्थवाचित्वे तु चादिगणपठितत्वाद् लक्ष्यः। एवमेव 'प्रादयः' इत्यत्र पक्षिवाचको विशब्दो व्यावर्त्यः, विशेषार्थवाची तु लक्ष्यः। अतो लिङ्गसंख्याकारकान्वितद्रव्यबोधतात्पर्याभावविशिष्टं चादिगणपठितत्वं निपातसंज्ञानिमित्तमिति परिष्कारः। सूत्रवृत्तिषु 'समुच्चयादिवाचकाः' इति व्यवहारात् सूत्रकारस्य वाचकतापक्षे प्रथमदृष्ट्या पक्षपातः प्रतीयते; तथापि वाचकत्वद्योतकत्वयोः तात्त्विकनिर्णयः केवलसंज्ञासूत्रेण न परिसमाप्यते।

## २. गत्युपसर्गसंज्ञाविशिष्टनिपाताः

"उपसर्गाः क्रियायोगे"[१] "गतिश्च"[२] इत्याभ्यां क्रियायोगे प्रादीनां निपातसंज्ञापूर्वकमुपसर्गगतिसंज्ञे विधीयेते। क्रियायोगः केवलं समीपस्थितिः न, अपि तु द्योत्यद्योतकभावो वाच्यवाचकभावो वा। संज्ञात्रयसमावेशस्य फलभेदः 'प्रति प्रणयति' इत्यादौ स्पष्टः—उपसर्गत्वेन णत्वादिकार्यम्, गतित्वेन "गतिर्गतौ" इत्यादिस्वरकार्यम्, निपातत्वेन च स्वरसिद्धिः। [३] अतः एकस्मिन् शब्दरूपे संज्ञाबहुत्वं विरोधाय न, भिन्नकार्यावच्छेदकतया शास्त्रलाघवायैव।

## ३. गतिसंज्ञामिश्रितनिपाताः

"ऊर्यादिच्विडाचश्च"[४] इत्यादिसूत्रैरूरीप्रभृतयः क्रियायोगे गतिसंज्ञां लभन्ते। 'ऊरी', 'उररी' इमौ स्वीकारार्थकौ; भूषायामलम्,[५] आदरानादरयोः सदसती,[६] अपरिग्रहे अन्तर्,[७] श्रद्धातिशये कणेमनसी,[८] च्व्यर्थे साक्षात्प्रभृतयश्च[९] कृभ्वस्तियोगे गतिसंज्ञकाः। गतिसंज्ञया "कुगतिप्रादयः" इति नित्यसमासः,[१०] निपातसंज्ञया स्वरकार्यं च सिध्यति। एते स्वीकाराद्यर्थस्य क्वचिदभिधायकाः, क्रियाविशेषस्य तु नियामका इति वाचकद्योतकव्यापारयोः समुच्चयो दृश्यते।

## ४. कर्मप्रवचनीयसंज्ञायुक्तनिपाताः

"कर्मप्रवचनीयाः" इत्यधिकारानन्तरम् "अनुर्लक्षणे" प्रभृतिसूत्रैः केषाञ्चिन्निपातानां कर्मप्रवचनीयसंज्ञा विधीयते। कर्म क्रियां प्रोक्तवन्त इति भूतपूर्वगत्या व्युत्पत्तिः; सम्प्रति ते क्रियां न वदन्ति, क्रियानिरूपितसम्बन्धविशेषं द्योतयन्तीति भाष्यपरम्परा। [११] 'वनमनु अशनिर्गतः' इत्यत्र वनं लक्षणम्, अशनिगमनं लक्ष्यम्; तयोर्लक्ष्यलक्षणभावसम्बन्धस्य द्योतकोऽनुः "अनुर्लक्षणे" इति कर्मप्रवचनीयसंज्ञां लभते। [१२] तत्फलं "कर्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया; निपातत्वस्य तु स्वरकार्यादिकम्। इति पाणिन्यभिमता निपाताः संक्षेपेण विचारिताः।

---

तत्रैव।

[१]पाणिनिः, अष्टाध्यायी, १.४.५९—"उपसर्गाः क्रियायोगे"।

[२]पाणिनिः, अष्टाध्यायी, १.४.६०—"गतिश्च"।

[३]पाणिनिः, अष्टाध्यायी, ८.१.७०—"गतिर्गतौ"; गतिसंज्ञानिमित्तनिघातविधिः।

[४]पाणिनिः, अष्टाध्यायी, १.४.६१—"ऊर्यादिच्विडाचश्च"।

[५]पाणिनिः, अष्टाध्यायी, १.४.६४—"भूषणेऽलम्"।

[६]पाणिनिः, अष्टाध्यायी, १.४.६३—"आदरानादरयोः सदसती"।

[७]पाणिनिः, अष्टाध्यायी, १.४.६५—"अन्तरपरिग्रहे"।

[८]पाणिनिः, अष्टाध्यायी, १.४.६६—"कणे मनसी श्रद्धाप्रतीघाते"।

[९]पाणिनिः, अष्टाध्यायी, १.४.७४—"साक्षात्प्रभृतीनि च"।

[१०]पाणिनिः, अष्टाध्यायी, २.२.१८—"कुगतिप्रादयः"।

[११]पतञ्जलिः, व्याकरणमहाभाष्यम्, १.४.८३—"कर्मप्रवचनीयाः"; कैयटप्रदीप-नागेशोद्योतसहितसंस्करणेषु तदाह्निकं द्रष्टव्यम्।

[१२]पाणिनिः, अष्टाध्यायी, १.४.८४—"अनुर्लक्षणे"।


ISSN : 2249-538X

## ५. द्योतकत्व–वाचकत्वविवादस्य नव्यपरिष्कारः

अथ निपातस्यार्थसम्बन्धे महती विप्रतिपत्तिः । किं चादयः समुच्चयाद्यर्थस्य स्वतन्त्रवाचकाः, उत समभिव्याहृतनामाख्यातनिष्ठां शक्तिमुद्बोधयन्तो द्योतकाः, आहोस्विदुभयथेत्यस्य निर्णयः संज्ञासूत्रमात्रेण न सिध्यति । पूर्वपक्षिणो नैयायिकाः प्रायः चादीनां वाचकत्वं प्रादीनां द्योतकत्वं च मन्यन्ते । 'चैत्रो मैत्रश्च' इत्यत्र चकारव्यतिरेके समुच्चयप्रतीत्यभावात्, चकारान्वये तत्प्रतीतिसद्भावाच्च समुच्चयविषयकशक्तेः चकारनिष्ठत्वमन्वयव्यतिरेकाभ्यां सिध्यतीति तेषामाशयः । प्रादिषु तु 'हरति—प्रहरति—संहरति' इति धातोरेव अर्थान्तरप्रतीतेः प्रादयस्तदर्थशक्त्युत्तम्भका न तु स्वतन्त्रवाचका इति विभागः । अत्र वाचकत्वं समुच्चयत्वाद्यवच्छिन्नप्रकारकशाब्दबोधं प्रति निपातपदज्ञानस्य शक्तिसम्बन्धेन कारणत्वम्; द्योतकत्वं तु स्वसमभिव्याहृतपदनिष्ठशक्तिग्रहं प्रति निपातोपस्थितेः कारणत्वमिति नव्यपरिभाषा ।

**उत्तरपक्षिणो वैयाकरणा आहुः**—येन हेतुना प्रादयो द्योतकाः, तेनैव चादयोऽपि । कौण्डभट्टस्य **"द्योतकाः प्रादयो येन निपाताश्चादयस्तथा"** इति कारिका तदेव समतन्त्रतया प्रतिपादयति ।[1] यदि चकारः समुच्चयस्य पृथग्वाचकः स्यात्, 'चैत्रश्च मैत्रश्च' इत्यत्र नामार्थाभ्यां भिन्नस्य समुच्चयस्य विशेषणत्वादिना अन्वयः कल्पनीयः; स च नामार्थानां समुच्चयाश्रयत्वाभावात् दुर्निरूपः । यदि समुच्चयः चकारार्थयोः संसर्गः, तर्हि तस्य सम्बन्धत्वेन प्रतियोग्यनुयोगिनोरपेक्षा अनिवार्या; नामार्थोपस्थितिमन्तरेण स्वतन्त्रचकारे तदनुपपत्तिः । अतः चकारः चैत्रमैत्रपदार्थयोः साहित्यरूपसंसर्गतात्पर्यं ग्राहयति; एवकारः प्रकृतपदार्थे अन्ययोगव्यवच्छेदरूपतात्पर्यम्; इवशब्दः सादृश्यसम्बन्धं समभिव्याहृतार्थयोः प्रबोधयतीति द्योतकत्वे लाघवम् । द्योतकत्वं निरर्थकत्वं न; दीपस्य घटप्रकाशकत्वेऽपि घटवाचकत्वाभाववद् निपातस्य अर्थप्रकाशकत्वे स्वतन्त्राभिधानाभावमात्रम् ।

**अत्रान्यः पूर्वपक्षः**—तात्पर्यग्राहकत्वं यदि द्योतकत्वम्, तर्हि प्रकरणं, वक्तृज्ञानं, देशकालौ, हस्तचेष्टा च तात्पर्यग्राहकाणि सन्तीति तेषामपि निपातत्वं स्यात्; निपातलक्षणस्यातिव्याप्तिरिति । समाधानम्—द्योतकत्वसामान्यं तेष्वपि सम्भवति, निपातत्वं तु शब्दरूपत्वचादिगणपठितत्वासत्त्वार्थवृत्तित्वादिभिरवच्छिद्यते । यथा धूमो वह्निज्ञानहेतुः, दीपो घटज्ञानहेतुः, चक्षुश्च रूपज्ञानहेतुः सन्नपि तेषां कारणतावच्छेदकानि भिन्नानि, तथा प्रकरणादेर्निपातस्य च तात्पर्यग्राहकत्वे सत्यपि शब्दशक्त्युद्बोधकत्वरूपो विशेषो निपाते एव । अतिव्याप्तिः सामान्यधर्मे न दोषः; लक्षितविशेषावच्छेदाभाव एव दोषः ।

वाचकत्ववादिनः पुनः शक्तिलक्षणां विनैव चकारश्रवणानन्तरं समुच्चयबोधो जायते इति प्रत्यक्षानुभवं प्रमाणयन्ति । द्योतकत्ववादी तु तदनुभवं न प्रत्याचष्टे; केवलं 'समुच्चयबोधस्य करणं चकारनिष्ठाभिधाशक्तिः' इति मध्यस्थकल्पनां निरस्यति । कारणत्वस्य विषयताभेदेन परीक्षणीयत्वात् चकारज्ञानं समुच्चयबोधे कारणमिति उभाभ्यामङ्गीकृतम्; विवादस्तस्य कारणतायाः शक्तिसम्बन्धावच्छिन्नत्वे वा समभिव्याहृतपदशक्त्युद्बोधकत्वावच्छिन्नत्वे वा । एवं फलैक्येऽपि व्यापारभेदेन मतभेदः; अतः 'चकारात् समुच्चयबोधो भवति' इत्येकवाक्येन वाचकत्वं निर्णेतुं न शक्यम् ।

ननु 'इव' इत्यादौ विभक्तिश्रवणाभावः वाचकत्वविरोधी न भवति, अव्ययत्वेन सुपो लुक्सम्भवात्; तथा च वाचकत्वमेव सरलमिति चेत् । न; विभक्तेः प्रकृत्यर्थगतसंख्याकारकादिद्योतनव्यापारः, न च सादृश्यसंसर्गस्य

[1]कौण्डभट्टः, वैयाकरणभूषणसारः, निपातार्थनिर्णयः, कारिका ४२—"द्योतकाः प्रादयो येन निपाताश्चादयस्तथा"; दर्पण-परीक्षा-लघुव्याख्यात्रयोपेतः, सम्पा० सदाशिवशास्त्री जोशी, काशी-संस्कृत-ग्रन्थमाला १३३, बनारस—चौखम्बा संस्कृत सीरीज् आफिस्, १९३९, पृ० ३२२–३२५ ।

द्रव्यवत् कारकान्वयः। कौण्डभट्टोऽपि **"निपातानां वाचकत्वमन्वयव्यतिरेकयोः। युक्तं वा..."** इत्युक्त्वा वाचकत्वपक्षस्य सर्वथा असम्भवं न ब्रूते; किन्तु प्रादिद्योतकत्वचादिवाचकत्वरूपं नियतराशिद्वैविध्यं निराकरोति। [1] भर्तृहरिरप्युपसर्गं **"स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा। शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते"** इति विकल्पचतुष्टयेन विवृणोति; अतो विकल्पोपन्यास एव परम्परायाः सूक्ष्मता, एकान्तवादो न। [2]

इवशब्दविषये भूषणसारे विशेषो दोषः प्रदर्शितः। यदि सादृश्यं तस्य स्वतन्त्रपदार्थः, तर्हि **'शरैरुस्रैरिवोदीच्यान्'** इत्यादौ इवशब्दार्थस्य नामार्थाभ्यां कस्य विभक्त्यन्तस्येव सम्बन्धः स्यादिति वक्तव्यम्। सुपः श्रवणं नास्ति; अध्याहारकल्पनायां गौरवम्; अव्ययत्वाद् लुगिति चेत्, लुकः पूर्वं विभक्त्यर्थनिर्णयः करणीयः। द्योतकपक्षे तु शरोस्रादिपदार्थयोः पूर्वोपस्थितयोः सादृश्यसंसर्ग एव इवेन प्रकाश्यते, न कश्चित् पृथग् विभक्त्यपेक्षी पदार्थः। [3] तथापि सर्वत्र सुपोऽनुपलब्धिरेव निर्णायकमिति न; मुख्यं प्रमाणं नामार्थसंसर्गस्य लाघवेन निरूपणम्।

शक्तिलक्षणाव्यञ्जनानां परस्परसीमाऽपि अत्र निर्णेया। मुख्यार्थबाधतद्योगरूढिप्रयोजनैर्लक्षणा प्रवर्तते; निपाते तु प्रत्येकप्रयोगे मुख्यार्थबाधकल्पना न दृश्यते। व्यञ्जना काव्यगतध्वन्यर्थमात्रे नियता चेत् द्योतकत्वं ततो भिन्नम्; शब्दशक्त्युद्बोधनरूपव्यञ्जना व्यापकत्वेन स्वीकृता चेत् द्योतकत्वं तस्याः शास्त्रीयविशेषः। 'च'श्रवणेन समुच्चयस्य, 'एव'श्रवणेन व्यवच्छेदस्य, 'हि'श्रवणेन प्रकरणसम्बन्धस्य उद्बोधः न मुख्यार्थबाधपूर्वकः, अपि तु सहप्रयुक्तपदार्थानां विशिष्टान्वयपूर्वकः। तस्मात् निपातव्यापारं सर्वत्र लक्षणायां निक्षिप्य समाधानं न; तथा कृते बाधज्ञानाभावादसम्भवः, अनन्तलक्षितार्थकल्पनया गौरवं च स्यात्।

सिद्धान्तस्तु नागेशोक्तलक्षणेन परिष्क्रियते—**"द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वम्"** इति। [4] अत्र समभिव्याहारोऽवच्छेदकः, नामाख्यातनिष्ठा शक्तिरवच्छिन्ना, निपातोपस्थितिर्व्यञ्जिका, तदुद्बुद्धशक्तिजन्यः संसर्गविशिष्टबोधः फलम्। शब्दकोशे निपातस्य समुच्चयाद्यर्थसूचना वर्तत इति कारणेन तस्य वाचकत्वमेवेत्यवधारणं न युक्तम्; कोशो हि प्रयोगसामान्यं दर्शयति, शक्तेः आश्रयं न निर्णेति। तथापि रूढप्रयोगेषु निपातनिष्ठपरम्परासिद्धार्थस्मरणं स्वीकृत्य द्योतकत्वावच्छिन्नवाचकत्वं वा वाचकत्वोपहितद्योतकत्वं वा कल्पयितुं शक्यते; उभयत्र स्वतन्त्रद्रव्याभिधानं तु नास्ति।

निर्णयः—अन्वयव्यतिरेकौ निपातस्य अर्थोपयोगं साधयतः, न तु शक्त्याश्रयस्य निश्चयम्। वाक्यघटकपदानां संसर्गविशेषे तात्पर्यग्रहणं प्रति निपातस्य नियामकत्वाद् द्योतकत्वं प्रधानसिद्धान्तः; रूढिस्मरणरूपं गौणवाचकत्वं तेन न विरुध्यते। प्रादीनां द्योतकत्वं चादीनां वाचकत्वमिति जातिनियतविभागस्तु व्याप्तिभङ्गादुपेक्षणीयः।

### ६. वाक्यार्थनिर्माणे निपातानां विषयताप्रकारतासंसर्गतानियामकत्वम्

वाक्यार्थो न पदार्थानां निरपेक्षराशिः, किन्तु आकाङ्क्षायोग्यतासन्निधितात्पर्योपबृंहितः संसर्गविशिष्टः समुदायबोधः। तत्र निपाताः कस्मिन् पदे विषयताम्, कस्मिन् धर्मे प्रकारताम्, कस्य सम्बन्धस्य संसर्गतां च नियच्छन्तीति पृथगनुसन्धानमपेक्ष्यते। पूर्वपक्षः—यदि निपाता न द्रव्यं न क्रियां न गुणं चाभिदधति, तर्हि वाक्यार्थस्य नामाख्याताभ्यामेव सिद्धत्वात् तेषां पदपूरणमात्रत्वं स्यात्। 'रामः कृष्णश्च गच्छतः' इत्यत्र रामकृष्णयोर्गमनं द्विवचनादेव ज्ञायते; चकारः केवलं श्रुतिसौष्ठवाय। 'राम एव गच्छति' इत्यत्र रामकर्तृकगमनं

---

[1] कौण्डभट्टः, वैयाकरणभूषणसारः, निपातार्थनिर्णयः, कारिके ४७–४८; पूर्वोक्तजोशीसंस्करणम्, १९३९, पृ० ३३६–३४२।

[2] भर्तृहरिः, वाक्यपदीयम्, द्वितीयकाण्डम्, कारिका १८८—"स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा। शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥" संस्करणभेदेन पृष्ठसंख्या भिद्यते।

[3] कौण्डभट्टः, वैयाकरणभूषणसारः, निपातार्थनिर्णयः, कारिके ४४–४५ तथा तद्व्याख्या; पूर्वोक्तजोशीसंस्करणम्, पृ० ३३०–३३४।

[4] नागेशभट्टः, वैयाकरणसिद्धान्तपरमलघुमञ्जूषा, किरणावलीव्याख्योपेता, व्यञ्जनानिरूपणम्, अनुच्छेदः ३९—"द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठ-शक्तिव्यञ्जकत्वम्"। मुद्रितसंस्करणभेदात् पृष्ठसंख्या न प्रदत्ता।

 ISSN : 2249-538X

चैवकारमन्तरेणापि सिद्धम्। अतः निपातप्रयोगो वाक्यार्थे न कश्चिदनिवार्यमतिशयं जनयतीति।

उत्तरम्—उक्तस्थले क्रियामात्रस्य बोधः इति सत्यम्, परन्तु विवक्षितसंसर्गस्य परिमाणं न सिद्धम्। चकाराभावे रामकृष्णयोः एकक्रियासम्बद्धसाहित्यं न नियतम्; द्विवचनं केवलं कर्तृसंख्यां बोधयति, न समुच्चयतात्पर्यम्। एवकाराभावे रामे अन्ययोगव्यवच्छेदो नास्ति; 'राम एव' इत्यत्र रामनिष्ठकर्तृत्वस्य विषयता, तदन्यनिष्ठकर्तृत्वाभावस्य प्रकारता, गमनक्रियायां तस्यावच्छेदकत्वं च निपातेन नियन्त्र्यते। 'रामोऽपि गच्छति' इत्यत्र रामस्य पूर्वोपस्थितसमुच्चये प्रवेशः; 'रामस्तु गच्छति' इत्यत्र पूर्वप्रस्तुताद् विषयान्तराद् व्यावृत्तिः; 'रामो हि गच्छति' इत्यत्र उत्तरवाक्यस्य हेतुत्वप्रसिद्धत्वप्रत्यभिज्ञापनादिषु प्रकरणानुगुणः सम्बन्धः; 'राम इव श्यामः' इत्यत्र रामश्यामयोः सादृश्यं च। निपातव्यतिरेके एतेषां संसर्गाणामभावः, अन्वये सद्भावश्च तेषां वाक्यार्थोपकारकत्वे प्रमाणम्।

नञो व्यापारोऽत्र विशेषतो द्रष्टव्यः। 'रामो न गच्छति' इत्यत्र नञ् रामस्य वा गमनस्य वा नाशं न वदति; रामनिष्ठगमनसंसर्गस्य अभावं बोधयति। अतः प्रतियोगी गमनसंसर्गः, अनुयोगी रामः, अभावत्वं प्रकारः, नञ् तदभावतात्पर्यग्राहकः। समासे 'अब्राह्मणः' इत्यत्र तु उत्तरपदार्थनिष्ठब्राह्मणत्वप्रतियोगिकाभावो विशेषणतया प्रविशति; वाक्यनञः संसर्गनिषेधः, समासनञः पदार्थविशेषणमिति कार्यभेदः। कौण्डभट्टस्य नञ्समासविचारे द्योत्यमर्थमादाय नामतः सुप उत्पद्यन्त इति प्रतिपादनं निपातद्योत्यस्य नामार्थान्तर्भावसम्भवं दर्शयति।[1] एतेन द्योत्यत्वं वाक्यार्थाद् बहिष्कृतत्वं न, अपि तु प्रवेशप्रकारभेदः।

कारकसम्बन्धे निपातानां योगदानमपि प्रत्यक्षकारकवाचकत्वेन न ग्राह्यम्। कर्तृत्वकर्मत्वादयः क्रियान्वयिनः शक्तयः विभक्तिभिर्द्योत्यन्ते; निपातास्तु तेषामन्वयस्य समुच्चयाद्युपाधिं नियच्छन्ति। 'रामश्च कृष्णश्च फलानि खादतः' इत्यत्र चकारः पृथक् कर्तृत्वं न जनयति, रामकृष्णयोः तुल्यक्रियान्वयिसाहित्यं बोधयति। 'राम एव फलमखादत्' इत्यत्र एवकारः कर्तृकारकं न विधत्ते, तत्कारकत्वस्य अन्यनिष्ठतां व्यवच्छिनत्ति। अतः कारकत्वं निपातार्थस्य प्रतियोगि वा अनुयोगि वा भवेत्, न तु निपातस्य स्वार्थः। एष भेदो विस्मृतश्चेत् निपातविभक्त्योः कार्यसंकरः प्रसज्येत।

भर्तृहरिमते अखण्डवाक्यस्फोट एव मुख्या प्रतिभा; पदप्रकृतिप्रत्ययादिविभागो व्याख्यानोपायः। नागेशोऽपि उपसर्गनिपातधात्वादिविभागं काल्पनिकमिति मन्यमानोऽखण्डवाक्यार्थे शास्त्रीयविश्लेषणस्योपयोगं न निरस्यति।[2] अस्मिन् पक्षे निपाताः स्वातन्त्र्येण पृथगर्थखण्डं न योजयन्ति, किन्तु अखण्डप्रतिभायाः प्रकाशने श्रोतृबुद्धेः मार्गनिर्देशकाः। नव्यन्यायरीत्या तु शाब्दबोधस्य विश्लेषणे निपातोपस्थापितो धर्मः क्वचित् प्रकारतावच्छेदकः—यथा एवकारे अवधारणम्; क्वचित् संसर्गतावच्छेदकः—यथा चकारे समुच्चयः; क्वचित् विषयतावच्छेदकः—यथा तुशब्दे विषयान्तरपरिवर्तनम्; क्वचित् प्रकरणबोधस्य सहकारी—यथा हि, खलु, ननु इत्यादयः।

पूर्वपक्षी पुनराह—एकस्य निपातस्य बह्वर्थत्वे शक्त्यानन्त्यं प्रसज्येत। समाधिः—सर्वत्र पृथक् शक्तिकल्पना न; सामान्यरूपेण प्रकरणसम्बन्धसूचनशक्तिः, विशेषार्थस्तु समभिव्याहारदेशकालवक्तृप्रयोजनैर्निर्णीयते। यथा एक एव सप्तमीप्रत्ययः अधिकरणविषयभावलक्षणादिषु प्रकरणात् विशिष्यते, तथा निपातोऽपि मूलव्यापारं रक्षन् प्रयोगविशेषे फलभेदं जनयति। एवं शक्त्यानन्त्यकल्पनागौरवं निवर्तते, अर्थवैचित्र्यमपि उपपद्यते।

[1] कौण्डभट्टः, वैयाकरणभूषणसारः, निपातार्थनिर्णयः, कारिका ४६ तथा तद्व्याख्या; पूर्वोक्तजोशीसंस्करणम्, पृ० ३३२–३३६।

[2] नागेशभट्टः, वैयाकरणसिद्धान्तपरमलघुमञ्जूषा, स्फोटनिरूपणम्, अनुच्छेदः ५—उपसर्गनिपातधात्वादिविभागस्य काल्पनिकत्वविचारः; किरणावलीव्याख्योपेतम्।

एकस्मिन् वाक्ये बहूनां निपातानां सम्भूयप्रयोगे क्रमोऽपि अर्थवान्। 'राम एव हि गच्छति' इत्यत्र एवकारः रामनिष्ठकर्तृत्वमवधारयति, हिशब्दस्तस्य प्रसिद्धिं हेतुं वा सूचयति; द्वयोः व्यापारौ समानाधिकरणौ न। 'अथ तु' इत्यत्र अथशब्दो विषयक्रमपरिवर्तनस्य, तुशब्दो विरोधस्य च सूचकः। यदि सर्वे निपाताः एकमेव पदपूरणं कुर्युः, क्रमपरिवर्तने अर्थभेदो न स्यात्; दृश्यते च क्वचित् 'एवापि' 'अप्येव' इत्यनयोः व्याप्तिक्षेत्रभेदः। अतः सम्भूयार्थसाधकत्वं निरवयवसमूहव्यापारो न, क्रमावच्छिन्नानां पृथग्व्यापाराणां समन्वयः।

निर्णयः—निपाताः पदार्थान्तरस्य केवलं संयोजका न, वाक्यार्थगतानां विषयताप्रकारतासंसर्गतानां विन्यासकाः। तेषामभावे मूलक्रियाबोधः क्वचित् स्यादपि, विवक्षितावधारणसमुच्चयविरोधहेतुसादृश्यनिषेधादिसंरचना न सिध्यति। अतः निपातानां योगदानं परिमाणतः अल्पम्, संरचनया तु प्रधानं न्याय्यम्।

**७. निपात–उपसर्ग–कर्मप्रवचनीयसंज्ञानां सीमाविनिर्णयः**

प्राद्यादिशब्दरूपेषु निपातत्वोपसर्गत्वगतित्वकर्मप्रवचनीयत्वानां समावेशाद् बाह्यदृष्ट्या संकरो दृश्यते। किं पुनरेतानि परस्परविरुद्धानि पदजातित्वानि, अथ प्रयोगनिमित्तभेदेन विधीयमानाः कार्योपाधय इति प्रश्नः। पूर्वपक्षः—उपसर्गः क्रियाविशेषवाचकः, कर्मप्रवचनीयः सम्बन्धवाचकः, निपातः समुच्चयादिवाचक इति त्रयाणां स्वार्थभेदात् शब्दभेद एव स्वीकार्यः। 'प्रहरति' इत्यत्र प्र इति रूपं, 'प्र पर्वतात्' इत्यत्र प्र इति रूपं च श्रुतिसाम्येऽपि शक्तिभेदाद् भिन्नशब्दौ; अन्यथा एकस्य शब्दस्य युगपदनेकसंज्ञकत्वे विरोधिकार्यप्रसङ्गः।

**सिद्धान्ती ब्रूते**—पाणिनीयसंज्ञा वस्तुनः स्वाभाविकजातिर्न, शास्त्रीयकार्योपयोगिनिमित्तवती परिभाषा। 'प्र' इत्यस्य निपातत्वं गणपाठासत्त्वार्थवृत्तिभ्याम्, उपसर्गत्वं क्रियायोगेन, गतित्वं विशिष्टकार्यप्रसङ्गेन; एतेषां निमित्तानि भिन्नानि, कार्याण्यपि भिन्नानीति समावेशे विरोधो नास्ति। एकस्य देवदत्तस्य ब्राह्मणत्वपाचकत्वगुरुत्वानां भिन्नावच्छेदकतया सहावस्थानवत् एकस्य शब्दस्य निपातत्वादीनां सहावस्थानम्। विरोधस्तदा स्यात् यदि समानकार्यं प्रति परस्परविरुद्धौ विधिनिषेधौ स्याताम्; अत्र तु स्वरणत्वसमासविभक्त्यादीनि पृथक् फलानि।

उपसर्गकर्मप्रवचनीययोः मुख्यसीमा क्रियायोगमात्रे न, सम्बन्धप्रकारे। उपसर्गः धात्वर्थस्य विशेषकः—'हरति' इत्यस्य ग्रहणनयनाद्यर्थे 'प्रहरति' इति प्रपूर्वत्वेन प्रहाररूपो विशेषो जायते। कर्मप्रवचनीयस्तु धात्वर्थं न परिवर्तयन् क्रियासम्बद्धयोः पदार्थयोः प्राचीनक्रियाजनितं लक्ष्यलक्षणहीनाधिकमर्यादाप्रतिनिध्यादिसम्बन्धं प्रकाशयति। भर्तृहरिणा

**"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।**
**नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः॥"**

इति कर्मप्रवचनीयस्य सम्बन्धभेदकत्वं सूक्ष्मतया निरूपितम्।[1] अर्थात् स सम्बन्धं नूतनं नाभिदधाति; उपस्थितसामान्यसम्बन्धे लक्षणत्वादिविशेषस्य अवच्छेदकः।

कर्मप्रवचनीयसंज्ञाया विधानेन गतिसंज्ञोपसर्गसंज्ञयोः कार्यप्रसङ्गो यथास्थानं बाध्यते। 'अधि ब्रह्मदत्ते पञ्चालाः' इत्यत्र अधिशब्दः ईश्वरसम्बन्धभेदकः; स धात्वर्थस्योपसर्गो न, अतः उपसर्गनिमित्तषत्वणत्वादिकं न प्रवर्तते। **"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"** इति सप्तमी सम्बन्धस्य आश्रयपक्षं चिह्नयति।[2] 'अति देवान् कृष्णः' इत्यत्र अतिक्रमणसम्बन्धे अतिः कर्मप्रवचनीयः, देवशब्दस्य द्वितीया तद्योगात्; कृष्णस्य देवकर्मकक्रिया नास्ति। अतः विभक्तिरूपसाम्यात् कारकार्थसाम्यनिश्चयो बाधितः।

[1]भर्तृहरिः, वाक्यपदीयम्, द्वितीयकाण्डम्, कारिका २०४—"क्रियाया द्योतको नायं न सम्बन्धस्य वाचकः। नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः॥"

[2]पाणिनिः, अष्टाध्यायी, १.४.९७—"अधिरीश्वरे"; २.३.९—"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"।


ISSN : 2249-538X

उपसर्गस्य धात्वर्थविशेषकत्वेऽपि सर्वत्र नूतनधात्वर्थस्य अभिधानं कल्पनीयमिति न। क्वचित् दिशामात्रं, क्वचित् आरम्भसमाप्तितीव्रता, क्वचित् रूढार्थान्तरं च प्रतीयते। 'प्रस्थितः' इत्यत्र आरम्भः, 'पर्याप्तम्' इत्यत्र परिपूर्णता, 'उपविशति' इत्यत्र समीपगतिपूर्वकासनं, 'प्रहरति' इत्यत्र रूढप्रहारक्रिया। एतेषु प्रादेः व्यापारः समानो न; तथापि धातुना सह एकक्रियापदनिर्माणं सामान्यलक्षणम्। कर्मप्रवचनीये तु नामपदस्य पृथगुपस्थितिः, तदर्थेन सह सम्बन्धविशेषः, तद्योगनिमित्तविभक्तिश्च त्रयमवश्यं दृश्यते।

एकस्यैव रूपस्य साधारणनिपातत्वात् कर्मप्रवचनीयत्वपर्यन्तं गमनं प्रयोगक्रमेण दर्शयितुं शक्यते। 'आ एवं मन्यसे' इत्यत्र आकारः वाक्योपस्कारकः; 'आ कैलासात्' इत्यत्र मर्यादासम्बन्धभेदकः; 'आगच्छति' इत्यत्र धातुना सहोपसर्गः। प्रथमस्थले नामपदस्य तद्योगनिमित्तविभक्तिर्नास्ति, द्वितीये मर्यादावाचिनः पदस्य विभक्तिनियमनम्, तृतीये धात्वर्थस्य दिशाविशेषे परिणामः। यदि त्रयः पृथक् शब्दाः कल्प्येरन्, श्रुतिसाम्यं रूढिसातत्यं च आकस्मिकं स्यात्; एकरूपस्य प्रयोगोपाधिभेदे व्यापारभेदे तु लाघवम्। तथापि सर्वत्र एकैव अभिधाशक्तिरिति नावधार्यते; शास्त्रीयसंज्ञैक्यं लौकिकशक्त्यैक्यस्य नियतप्रमाणं न। अयं मध्यमपक्षः रूपैक्यं रक्षति, अर्थव्यापारवैचित्र्यमपि न निरस्यति।

'वनमनु अशनिर्गतः' इत्यत्र अशनिगमनक्रिया वनस्य कर्मत्वं न जनयति; वनं न गमनस्य निर्वर्त्यं न विकार्यं न प्राप्यं च। तथापि वनाशनिगमनयोर्लक्ष्यलक्षणभावं प्रतिपादयितुमनुशब्दः प्रयुज्यते, तत्सम्बद्धस्य वनशब्दस्य द्वितीया **"कर्मप्रवचनीययुक्ते द्वितीया"** इति नियमात्। [1] अतः कर्मप्रवचनीययुक्तद्वितीया कारककर्मद्वितीयया समानरूपा, न समानार्था। नव्यरीत्या वनार्थोऽनुयोगी, अशनिगमनं प्रतियोगि, लक्ष्यलक्षणभावः संसर्गः, अनुशब्दः तद्भेदावच्छेदकः, द्वितीया अनुयोगित्वस्य द्योतिका। एतादृशेऽकारकसम्बन्धे कारकसंज्ञां कल्पयितुमनुपपत्तेः पाणिनिना पृथग्विभक्तिविधिः कृतः।

ननु **"आङ् मर्यादावचने"**, **"प्रतिः प्रतिनिधिप्रतिदानयोः"**, **"अधिरीश्वरे"** इत्यादौ आङादयः सम्बन्धविशेषं स्पष्टं बोधयन्ति; तर्हि 'न सम्बन्धस्य वाचकः' इति कारिका विरुध्येत। न; सामान्यसम्बन्धस्य नामविभक्त्यादिभ्य एव प्राप्तौ कर्मप्रवचनीयः तस्य मर्यादात्वप्रतिनिधित्वेश्वरत्वादिभेदं नियच्छति। भेदकत्वं तात्पर्यग्राहकत्वरूपं द्योतकत्वमेव, सम्बन्धसामान्यस्य स्वतन्त्राभिधानं न। यत्र तु रूपमेव क्रियापदेन घनीभूय धात्वर्थान्तरमुत्पादयति तत्रोपसर्गत्वम्; यत्र नामार्थयोः प्रकरणसम्बन्धं नियच्छति तत्र कर्मप्रवचनीयत्वम्; यत्र वाक्यविषयावधारणसमुच्चयादिकं सूचयति तत्र विशुद्धनिपातत्वम्।

अतः संज्ञाक्रमोऽपि अर्थनिर्णयस्य निदर्शकः—सामान्यनिपातत्वे लब्धे क्रियायोगादुपसर्गत्वं, सम्बन्धविशेषयोगात् कर्मप्रवचनीयत्वं च प्रवर्तते। सामान्यस्य विशेषेऽनुवृत्तिः भवति, न तु विशेषेण सामान्यस्य नाशः। कर्मप्रवचनीयः निपात एव सन् तद्विशेषकार्यं करोति; उपसर्गोऽपि निपात एव सन् धातुसम्बन्धे विशेषव्यापारवान्। जातिविशेषभावसदृशोऽयं संज्ञासम्बन्धः, यद्यपि संज्ञाः शास्त्रकृताः। एतेन सामान्यविशेषयोः सहावस्थानं निर्विरोधं सुस्पष्टं च भवति। शास्त्रकार्याणां पृथगवच्छेदोऽपि अनेनैव सर्वथा सम्यगुपपद्यते।

निर्णयः—निपातोपसर्गकर्मप्रवचनीयभेदः शब्दरूपभेदो न, वाक्यगतव्यापारभेदः। संज्ञासमावेशोऽत्र दोषो न, अपि तु पाणिनीयकार्यव्यवस्थायाः सूक्ष्मता। उपसर्गः धात्वर्थविशेषनियामकः, कर्मप्रवचनीयः अकारकसम्बन्धभेदावच्छेदकः, विशुद्धनिपातः वाक्यतात्पर्यसंसर्गनियामक इति सीमात्रयं स्वीकार्यम्।

[1] पाणिनिः, अष्टाध्यायी, २.३.८—"कर्मप्रवचनीययुक्ते द्वितीया"।

## उपसंहारः

समग्रविमर्शेन सिद्धं यत् पाणिनीयनिपातसंज्ञा शब्दजातिनिर्देशमात्रं न, अर्थोपाधिसंज्ञासमावेशकार्यविन्यासवाक्यार्थनियमनानां सङ्गमस्थानम् । असत्त्वं द्रव्यव्यावृत्तेः निमित्तम्; तेन निपातस्य निरर्थकत्वं न सिध्यति । द्योतकत्ववाचकत्वयोर्विवादे समभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वं प्रधानम्, रूढार्थस्मरणरूपवाचकत्वं गौणतया सम्भवति । वाक्यार्थे निपाताः विषयताप्रकारतासंसर्गतावच्छेदकाः ; उपसर्गाः धात्वर्थविशेषनियामकाः ; कर्मप्रवचनीयाः अकारकसम्बन्धभेदकाः । आधुनिकभाषाविज्ञानस्य प्रक्रियार्थविमर्शचिह्नकेन्द्रव्याप्तिक्षेत्ररूपाणि प्रतिमानानि परम्परागतद्योतकत्वस्य परीक्षणोपयोगीनि, न तु तस्य प्रतिस्थापकानि । एवं निपातः स्वल्परूपोऽपि वाक्यार्थरचनायां महाव्यापारवानिति शास्त्रीयः निर्णयः ।

## परामृष्टाः ग्रन्थाः


१. अभयनन्दिः—जैनेन्द्रमहावृत्तिः, देवनन्दिकृतजैनेन्द्रव्याकरणोपेता, सम्पा० शम्भुनाथत्रिपाठी–महादेवचतुर्वेदी, भारतीय ज्ञानपीठ, १९५६ ।

२. उव्वटः—ऋग्वेदप्रातिशाख्यभाष्यम्, व्याख्या/सम्पा० वीरेन्द्रकुमारवर्मा, चौखम्बा संस्कृत प्रतिष्ठान, २०२२ ।

३. कौण्डभट्टः—वैयाकरणभूषणसारः, दर्पण-परीक्षा-लघुव्याख्यात्रयोपेतः, सम्पा० सदाशिवशास्त्री जोशी, काशी-संस्कृत-ग्रन्थमाला १३३, चौखम्बा संस्कृत सीरीज् आफिस, १९३९ ।

४. नागेशभट्टः—वैयाकरणसिद्धान्तपरमलघुमञ्जूषा, किरणावलीव्याख्योपेता ।

५. पतञ्जलिः—व्याकरणमहाभाष्यम्, सम्पा० एफ़्० कीलहॉर्न्, परिष्कर्ता के० वी० अभ्यङ्करः, भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९६२ ।

६. पाणिनिः—अष्टाध्यायी, काशिका-सिद्धान्तकौमुदीप्रौढमनोरमादिव्याख्यासन्दर्भसहिता ।

७. भर्तृहरिः—वाक्यपदीयम्, द्वितीयकाण्डम् ।

८. भोजदेवः—सरस्वतीकण्ठाभरणम् ।

९. यास्कः—निरुक्तम्, दुर्गवृत्तिसहितम्, सम्पा० डॉ० उमाशङ्कर ऋषिः, चौखम्बा विद्याभवन, २०२२ ।

१०. शर्ववर्मा—कातन्त्रव्याकरणम्, दुर्गवृत्त्यादिव्याख्याचतुष्टयोपेतम्, सम्पा० जानकीप्रसादद्विवेदः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९७ ।

१०. शौनकः—बृहद्देवता, सम्पा० आर्थर् आन्थोनी मॅक्डोनेल्, हार्वर्ड्-ओरिएण्टल्-सीरीस् ५–६, हार्वर्ड् विश्वविद्यालयः, १९०४ ।

१०. हेमचन्द्रः—सिद्धहेमशब्दानुशासनम्, स्वोपज्ञवृत्तिसहितम् ।

१०. फ्रेजर्, ब्रूस्—“व्हाट् आर् डिस्कोर्स् मार्कर्स्?”, जर्नल् ऑफ् प्रॅग्मॅटिक्स् ३१, १९९९, पृ० ९३१–९५२ ।

१०. शिफ्रिन्, डेबरा—डिस्कोर्स् मार्कर्स्, केम्ब्रिज् यूनिवर्सिटी प्रेस्, १९८७ ।



ISSN : 2249-538X

# दुर्घटवृत्तिग्रन्थोक्तदिशा "प्रक्लृप्यमानः" इत्यस्य शब्दस्य साधुत्वविमर्शः

श्री आत्मारामभट्टः के*
शोधच्छात्रः, व्याकरणविद्याशाखा,
के.सं.वि., देवप्रयागः

***लेखसारः*** *– अष्टाध्याय्याः वृत्तिग्रन्थेषु "दुर्घटवृत्तिः" इति अयं अन्यतमः ग्रन्थः । श्रीशरणदेवः अस्य ग्रन्थस्य कर्ता । अस्मिन् ग्रन्थे बहूनां प्रयोगाणां साधुत्वविमर्शः कृतः ग्रन्थकारेण । दुर्घटानां वृत्तिः दुर्घटवृत्तिः इति ग्रन्थनाम्नः विग्रहः । येषु प्रयोगेषु पाणिनीयं लक्षणं न समन्वितम् इत्युक्तौ ये प्रयोगाः पाणिनीयसूत्रानुसारेण न घटन्ते ते कथं साधुप्रयोगाः भवितुमर्हन्ति इति प्रतिपादयति ग्रन्थकारः ।*

*मया अस्मिन् लेखे* ***प्रक्लृप्यमानः*** *इत्यस्य शब्दस्य विषये चर्च्यते । दुर्घटवृत्तिग्रन्थे अयं शब्दः ग्रन्थकर्त्रा विमृष्टः प्रथमे अध्याये । ऋलृवर्णयोः सावर्ण्यात्* ***प्रक्लृप्यमानः*** *इत्यत्र "ऋवर्णान्नस्य णत्वं वाच्यम्, अड्व्यवाये" इत्यस्मात् णत्वं स्यात् । तथा सति णत्वसहितम् अनिष्टं रूपं श्रूयेत । अतः अत्र ग्रन्थकर्त्रा द्विधा समाधानं निरूपितम् ।*

*ग्रन्थकर्त्रा दत्तं समाधानद्वयं युक्तमस्ति उत न? अयुक्तं चेत् कुतः अयुक्तम्? इत्येतत् लेखेऽस्मिन् मया विमृष्टम् । ग्रन्थस्थंमूलमपि लेखे उद्धृतं वर्तते ।*

***कूटशब्दाः*** *– प्रक्लृप्यमानः, णत्वम्, सावर्ण्यम्, ग्रहणपक्षः, अग्रहणपक्षः, लृकारोपदेशः, वार्त्तिकम्, अनित्यत्वम् ।*

## उपोद्घातः

कृपूँ (सामर्थ्ये) इति धातोः कर्मणि भावे वा लटः शानच्-प्रत्यये प्रक्लृप्यमानः इति शब्दः सिध्यति । कल्पना, सज्जता, निर्माणम् इत्यादिषु अर्थेषु अयं शब्दः प्रयुज्यते । यथा – मया एकः लेखः प्रक्लृप्यमानः (कल्प्यमानः), ऋत्विग्भिः मण्डपे वेदी प्रक्लृप्यमाना (सज्जीक्रियमाणा), विश्वविद्यालयेन नूतना योजना प्रक्लृप्यमाना (निर्मीयमाणा) । एवं बहवः प्रयोगाः ।

## शब्दसिद्धिप्रक्रिया

प्र + कृप् + लट् - वर्तमाने लट् । [१]
प्र + कृप् + शानच् - लटः शतृशानचावप्रथमासमानाधिकरणे । [२]
प्र + कृप् + यक् + आन - सार्वधातुके यक् । [३]
प्र + कृप् + य + मुक् + आन - आने मुक् । [४]
प्र + क् लृ प् + य + म् + आन - कृपो रो लः । [५]
प्रक्लृप्यमान + सु - स्वौजसमौट्... । [६]
प्रक्लृप्यमानः

*सम्पर्कसूत्रम् -8147842610 , Email- atmarambhat04@gmail.com

[१]अष्टाध्यायी – ३.२.१२३
[२]अष्टाध्यायी – ३.२.१२४
[३]अष्टाध्यायी – ३.२.६७
[४]अष्टाध्यायी – ७.२.८२
[५]अष्टाध्यायी – ८.२.१८
[६]अष्टाध्यायी – ४.१.२

अत्र "ऋऌवर्णयोः मिथः सावर्ण्यं वाच्यम्"[१] इति वार्त्तिकानुरोधेन ऋकार-ऌकारयोः सावर्ण्ये "ऋवर्णाच्च"[२] इति वार्त्तिकेन ऌकारात् अग्रे विद्यमानस्य शानचः नकारस्य णत्वं स्यात् इति शङ्का उदेति । तस्य परिहारः श्री शरणदेव-विरचित-दुर्घटवृत्ति-ग्रन्थानुरोधेन महाभाष्यानुरोधेन च विमृश्यते अत्र लेखे ।

## दुर्घटवृत्तौ मूलम् ।

**तुल्यास्यप्रयत्नं सवर्णम् ॥ १ । १ । ९ ॥**

**कथं प्रक्ऌप्यमानः, 'ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या' इति 'ऋवर्णाच्च' इति णत्वप्रसङ्गात् ? उच्यते । उरिति वक्तव्ये वर्णग्रहणमस्या नित्यत्वार्थम् । तेन । यद्वा 'ऋऌक्' इत्यत्र प्रत्याहारे ऌग्रहणं शक्यम् अकर्तुम् । यथा सावर्ण्यादिकारः ऋकारं गृह्णाति, तथा ऌकारमपि ग्राहयिष्यति, किं ऌकारेण । तज्ज्ञापयति ऋकारऌकारयोः सावर्ण्यमनित्यमिति । तेन यथा क्ऌप्तशिख इति 'गुरोरनृतः' (८ । २ । ८६) इति प्लुतो भवति, न त्वनृत इति प्रतिषेधः, तथा प्रक्ऌप्यमान इति णत्वाभावः ॥**[३]

'मातॄणाम्, पितॄणाम्' इत्यादौ णत्वसिद्ध्यर्थं "रषाभ्यां नो णः समानपदे"[४] इत्यत्र भाष्ये रषाभ्यां णत्वे ऋकारग्रहणम् कर्तव्यम् इत्युक्तम् । "ऋवर्णाच्च" इति वार्त्तिकम् । अस्यैव तात्पर्यभूतं वार्त्तिकम् – "ऋवर्णात् नस्य णत्वं वाच्यम्" समानपदे ऋकारात् परस्य नकारस्य णत्वं वक्तव्यम् इत्यर्थः । "प्रक्ऌप्यमानः" इत्यत्र "ऋवर्णाच्च, अड्व्याये" इत्यनेन वार्त्तिकेन ऌकारात् उत्तरस्य अट्-पवर्गाभ्यां व्यवहितस्य नकारस्य णत्वं स्यात् ऋऌवर्णयोः मिथः सावर्ण्यात् इति प्रश्नः ।

## दुर्घटवृत्तौ शरणदेवेन अत्र समाधानद्वयं दीयते ।

### प्रथमं समाधानम् -

"ऋवर्णाच्च" इत्यत्र वार्त्तिके लाघवात् "उः च" इत्येव पठ्यताम् । ऋ-शब्दस्य पञ्चमी-एकवचनम् उः । एवं च लाघवेन "उः च" इति पठनीये ऋकारग्रहणं ज्ञापयति यत् ऋवर्णात् परस्य नकारस्य णत्वविधानम् अनित्यम् इति । अनित्यत्वात् 'प्रक्ऌप्यमानः' इत्यत्र णत्वं न भवति इति । एवं प्रथमं समाधानं दुर्घटवृत्तौ । किन्त्वत्र चिन्त्यं यत् वार्त्तिके कारग्रहणेन एवं ज्ञापनं युक्तम् वा न वा इति ।

**"ऋति सवर्णे ऋ वा" "ऌति सवर्णे ऌ वा"**[५] इत्यनयोः वार्त्तिकयोः विधेयौ द्वौ वर्णौ द्विमात्रिकौ । 'ॠ' इत्यत्र द्वौ रेफौ, अभितः अज्भक्तिः । 'ॡ' इत्यत्र अपि द्वौ लकारौ । अभितः अज्भक्तिः । एवमत्र ऋकारे रेफस्य सत्वात् तदाश्रित्य "रषाभ्यां नो णः समानपदे" इति सूत्रेणैव णत्वविधानं शक्यं मातॄणाम्, पितॄणाम् इत्यादौ । तस्मात् "ऋकाराच्च" इति वार्त्तिकं नापेक्षितम् इति ।

महाभाष्ये प्रत्याहाराह्निके **"ए ओ ङ् ॥ ऐ औ च् ॥"**[६] इत्यत्र एवं विचारः दृश्यते ।

**"वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते" "वर्णैकदेशाः वर्णग्रहणेन न गृह्यन्ते"**[७] इति इति पक्षद्वयम् । उभयथा

[१] तुल्यास्यप्रयत्नं सवर्णम् । वैयाकरणसिद्धान्तकौमुदी ।

[२] रषाभ्यां नो णः समानपदे । व्याकरणमहाभाष्यम् ।

[३] दुर्घटवृत्तिः । प्रथमाध्यायस्य प्रथमपादः ।

[४] अष्टाध्यायी – ८.४.१

[५] अकः सवर्णे दीर्घः । वैयाकरणसिद्धान्तकौमुदी ।

[६] महाभाष्यम् । प्रत्याहाराह्निकम् ।

[७] एओङ् । ऐऔच् । प्रत्याहाराह्निकम् । व्याकरणमहाभाष्यम् ।

विचाराः कृताः। सिद्धान्तितस्तु अग्रहणपक्षः एव।

इदानीम् ऋकारे चिन्तयामः। यदि वर्णैकदेशः वर्णग्रहणेन गृह्यते तर्हि मातृणाम्, पितृणाम् इत्यादौ "ऋकाराच्च" इति वार्त्तिकेन णत्वं न सिध्यति अज्भक्तेः व्यवधानात्। अतः तत्र "अड्-व्यवाये"[१] इत्यनेन णत्वं विधेयम्। किन्तु इदमयुक्तम्, यतः ये वर्णाः व्यपवृक्ताः भवन्ति तत्रैव वर्णैकदेशस्य वर्णग्रहणेन वर्णग्रहणम्। प्रकृतः ऋकारः अव्यपवृक्तः इत्यतः अत्र "अड्-व्यवाये" इत्यनेनापि णत्वविधानम् अयुक्तम् ग्रहणपक्षे।

अतः अग्रहणपक्षे उपायः एवमुच्यते – क्षुभ्नादिषु च॥[२] क्षुभ्नादिगणे "नृनमन" "तृप्नोति" इत्यनयोः शब्दपाठात् आचार्यप्रवृत्तिर्ज्ञापयति "ऋवर्णान्नस्य णत्वं भवति" इति वार्त्तिकम् अपेक्षितमिति। अन्यथा अत्र केनापि सूत्रेण णत्वस्य अप्राप्तौ णत्वाभावार्थः गणे पाठः व्यर्थः स्यात्। अग्रे "अथवा..." इति कथयन् अपरम् उपायं कथयति भाष्यकारः –

"छन्दस्यृदवग्रहात्" इत्यत्र "ऋतः" "छन्दस्यवग्रहात्"[३] योगविभागं करोति। प्रथमयोगस्य "ऋतः" इत्यस्य अयमर्थः – ऋवर्णात् अग्रे विद्यमानस्य नकारस्य णत्वं भवति इति। एवं भाष्यकारः अग्रहणपक्षे वार्त्तिकज्ञापनं त्यक्त्वा "ऋतः" "छन्दस्यवग्रहात्" इति योगस्य विभागेन ऋकारात् परस्य नकारस्य णत्वं भवति इति अर्थकथनात् तत् वार्त्तिकं विना एव परिहारः कर्तुं शक्यः इति विज्ञायते। तस्मात् वार्त्तिकस्य एव अभावे "प्रक्लृप्यमानः" इत्यस्य सिद्ध्यर्थं "उः च" इति वक्तव्ये "ऋवर्णाच्च" इत्यत्र वर्णग्रहणात् वर्त्तिकस्य अनित्यत्वज्ञापनम् अयुक्तम्।

**द्वितीयं समाधानम् –**

माहेश्वरसूत्रे "ऋऌक्" इत्यत्र ऌकारग्रहणमेव "ऋऌवर्णयोः मिथः सावर्ण्यं वाच्यम्" इति वार्त्तिकस्य अनित्यत्वं ज्ञापयति। यथा सावर्ण्यात् ऋकारः स्वस्य ऋकारभेदान् गृह्णाति तथैव ऌकारेण सावर्ण्यात् ऋकारः ऌकारभेदान् अपि गृह्णाति। तस्मात् ऌकारग्रहणमेव व्यर्थम्। तत् व्यर्थं सत् ज्ञापयति ऋऌवर्णयोः मिथः सावर्ण्यम् अनित्यम्। अनित्यत्वात् ऋकार-ऌकारयोः भेदे "क्ऌ३प्तशिखः" इत्यत्र "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्"[४] इत्यनेन विहितस्य 'अनृतः' इति निषेधस्य ऌकारे अप्राप्तौ गुरुसंज्ञकस्य ऌकारस्य प्लुतविधानं भवितुमर्हति।

एवमेव ऋऌवर्णयोः सावर्ण्यस्य अनित्यत्वात् क्वचित् सावर्ण्याभावे "प्रक्लृप्यमानः" इत्यत्र "ऋवर्णाच्च" इति वार्त्तिकेन णत्वं न प्राप्यते। एवं द्वितीयसमाधानेन णत्वाभावः साधितः दुर्घटवृत्तौ।

किन्तु इदमपि भाष्यविरुद्धमेव।

"ऋऌक्॥" इति सूत्रे भाष्ये ऌकारोपदेशस्य प्रयोजननिरूपणावसरे तृतीयं प्रयोजनमुच्यते **"प्लुत्याद्यर्थश्च"**[५] इति। "क्लृप्तशिखः" इत्यत्र क्लृप्ता शिखा यस्य सः इति विग्रहः। कृपूँ धातोः "कृपो रो लः" इत्यनेन लत्वम् विधीयते। तस्य असिद्धत्वात् अच्-कार्यं "गुरोरनृतः..॥" इति प्लुतविधानं न स्यात्। अतः ऌकारोपदेशः कर्तव्यः। तस्मात् ऌकारस्य प्लुतः अवश्यं भवति। अग्रे भाष्ये **"एकदेशविकृतस्य अनन्यत्वात् प्लुत्यादयः"** **"रवत्प्रतिषेधाच्च"**[६] इत्यादिभिः प्रयत्नैः ऌकारोपदेशस्य अनपेक्षितत्वं निरूपितम्। किन्तु **"सैषा महतः वंशस्तम्बात्**

---

[१]अष्टाध्यायी – ८.४.२
[२]अष्टाध्यायी – ८.४.३९
[३]अष्टाध्यायी – ८.४.२६
[४]अष्टाध्यायी - ८.२.८६
[५]व्याकरणमहाभाष्यम्। प्रत्याहाराह्निकम्। ऋऌक्॥
[६]व्याकरणमहाभाष्यम्। प्रत्याहाराह्निकम्। ऋऌक्॥

**लद्वा अनुकृष्यते"**[१] इति भाष्यवचनेन अत्यधिकस्य परिश्रमस्य करणापेक्षया ऌकारोपदेशः एव लघीयान् परिहारः ज्यायान् च । एवं भाष्ये ऌकारोपदेशस्य क्लृप्त्यादिषु प्रयोजनस्य कथनात् अन्यत्र चरितार्थः ऌकारोपदेशः वार्त्तिकस्य अनित्यत्वं ज्ञापयितुं न शक्नोति । अतः दुर्घटवृत्तौ ऌकारोपदेशात् वार्त्तिकस्य अनित्यत्वनिरूपणम् अयुक्तम् ।

**"न हि वार्त्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्तिः"**[२] इति न्यायानुरोधेन वार्त्तिकेन सूत्रखण्डनम्, सूत्रस्य अनित्यत्वज्ञापनं युक्तं न भवति । यतः क्रमानुसारम् आदौ सूत्रम्, ततः वार्त्तिकम् । औचित्यानुसारं परवर्त्तिनः वार्त्तिकेन पूर्वमुक्तस्य सूत्रस्य खण्डनम् अयुक्तम् । प्रायः अयं न्यायः "यथोत्तरं मुनीनां प्रामाण्यम्" इति आभाणकस्य विरोधी इति वक्तुं शक्यते ।

"तुल्यास्यप्रयत्नं सवर्णम्" इति सूत्रे भाष्ये ऋऌवर्णयोः सावर्ण्याधिकरणे अपि इदं चर्चितम् । "रषाभ्यां नो णः समानपदे" इत्यत्र 'पितृणाम्' इत्यादौ णत्वसिद्ध्यर्थं "ऋवर्णाच्च" इति चोदितम् । तदनुसारं ऋऌवर्णयोः सावर्ण्ये "क्लृप्यमानं पश्य" इत्यत्र अपि "ऋवर्णाच्च" इति वार्त्तिकेन णत्वं स्यात् खलु इति ।

वस्तुतः "प्रक्लृप्यमानः" इत्यत्र "कृत्यचः"[३] इति सूत्रेण णत्वप्रसङ्गः । रेफयुक्तेन उपसर्गेण सह प्रयुज्यमानात् धातोः विहितस्य कृत्-प्रत्ययस्य अच्-वर्णात् परस्य नकारस्य णत्वं भवति इति सूत्रार्थः । तदनुसारं प्रक्लृप्यमानः इत्यत्र "कृत्यचः" इत्यनेन णत्वप्राप्तिः । क्लृप्यमानः इत्यत्र "ऋवर्णाच्च" इत्यनेन णत्वप्राप्तिः ।

**"आदौ धातुः साधनेन युज्यते, पश्चादुपसर्गेण"**[४] **"उपसर्गाणां द्योतकत्वम्"**[५] इत्यस्मिन् पक्षे प्रक्लृप्यमानः इत्यत्रापि क्लृप्यमानः इति आदौ साधनेन योगे "ऋवर्णाच्च, अड्-व्यवाये" इत्यनेन णत्वप्राप्तिः । ततः उपसर्गयोगे "कृत्यचः" इत्यनेन णत्वप्राप्तिः इति वक्तुं शक्यते ।

**"चुटुतुलशर्व्यवाये न"**[६] इति वार्त्तिकेन लकारव्यवाये णत्वनिषेधः क्रियते । तत्र "वर्णैकदेशस्य वर्णग्रहणेन ग्रहणम्" इति पक्षे ऌकारावयवस्य लकारस्य सत्वात् तदाश्रयः प्रतिषेधः प्राप्नोति । किन्तु सिद्धान्तः तु "वर्णैकदेशस्य वर्णग्रहणेन अग्रहणम्" इत्येव । अतः अग्रहणपक्षे तत्र प्रदीपे कैयटेन क्लृप्यमान-प्रक्लृप्यमानशब्दयोः णत्वाभावार्थः क्षुभ्नादिषु पाठः कर्तव्यः । क्षभ्नादेः आकृतिगणात्वात् णत्वाभावः । एवं भाष्ये णत्वाभावः वारितः न तु "ऋऌक्" इति माहेश्वरसूत्रे ऌकारोपदेशात् वार्त्तिकस्य अनित्यत्वज्ञापनेन । तस्मात् दुर्घटवृत्तिस्थं द्वितीयं समाधानमपि अयुक्तम् ।

धातुपाठे "ओणृ" "गम्ऌ" इति ऋकार-ऌकारभेदानुबन्धनिर्देशात् "नाग्लोपिशास्वृदिताम्"[७] "पुषादिद्युताद्यॢदितः परस्मैपदेषु"[८] इत्यत्र ऋकार-ऌकारभेदानुबन्धनिर्देशाच्च "ऋऌवर्णयोः मिथः सावर्ण्यं वाच्यम्" इत्यस्य वार्त्तिकस्य अनित्यत्वं साधयितुं शक्यते न तु "ऋऌक्" सूत्रे ऌकारोपदेशेन । इदमेव तत्रैव महाभाष्ये उद्योतटीकायां लघुशब्देन्दुशेखरे च उक्तं नागेशभट्टैः । एवं भेदानुबन्धनिर्देशात् वार्त्तिकस्य अनित्यज्ञापनं युक्तम् ।

**उपसंहारः**

दुर्घटवृत्तिग्रन्थोक्तरीत्या "प्रक्लृप्यमानः" इत्यत्र् णत्वाभावस्य साधनार्थं उपायद्वयं प्रदर्शितम् । "ऋवर्णाच्च"

[१] व्याकरणमहाभाष्यम् । प्रत्याहाराह्निकम् । ऋऌक् ॥
[२] व्याकरणशास्त्रीयलोकन्यायरत्नाकरः ॥३० । पृ.सं – ५६१ ।
[३] अष्टाध्यायी - ८.४.२९
[४] परिभाषेन्दुशेखरः । असिद्धं बहिरङ्गमन्तरङ्गे – ५० ।
[५] वैयाकरणभूषणसारः । निपातार्थनिर्णयः ।
[६] व्याकरणमहाभाष्यम् । तुल्यास्यप्रयत्नं सवर्णम् । ऋऌवर्णयोः सावर्ण्याधिकरणम् ।
[७] अष्टाध्यायी - ७.४.२
[८] अष्टाध्यायी - ३.१.५५


ISSN : 2249-538X

इत्यत्र वर्णग्रहणात् "ऋवर्णात् नस्य णत्वम् अनित्यम्" तथा माहेश्वरसूत्रस्थस्य "ऋऌक्" सूत्रस्थस्य ऌकारोपदेशसामर्थ्यात् ऋऌवर्णयोः सावर्ण्याभावात् ऌकारात् परस्य णत्वं न भवति इति। उपायद्वयमपि भाष्यविरुद्धमेव ।

"वर्णैकदेशस्य वर्णग्रहणेन अग्रहणम्" इत्यस्य पक्षस्य सिद्धान्तितत्वात् ऋऌवर्णायोः सावर्ण्ये "छन्दस्यृद-वग्रहात्" इत्यत्र "ऋतः" इति विभक्तेन योगेन णत्वप्राप्तिः "प्रक्लृप्यमानः" इत्यत्र । क्षुभ्नादेः आकृतिगणत्वात् तत्र णत्वाभावार्थः पाठः कर्तव्यः । एवं णत्वाभावसाधनं भाष्यानुसारि भवति । अयमेव युक्तः पन्थाः ।

## परामृष्टाः ग्रन्थाः


१. दुर्घटवृत्तिः । श्री नारायणमिश्रकृता विवृतिटीकया सहिता । (1985) Ratna Publications, Varanasi.

२. व्याकरणमहाभाष्यम् । प्रदीप-उद्योत-भावबोधिनी-व्याख्योपेतम् । (2022) Choukhamba Krishna-das Academy, Varanasi

३. व्याकरणशास्त्रीयलोकन्यायरत्नाकरः । (2001) Penman Publishers, Delhi.

४. परिभाषेन्दुशेखरः । चन्द्रिका-बालबोधिनी-व्याख्योपेतः । (2004) National Samskrit Unive-rsity, Tirupati.

५. लघुशब्देन्दुशेखरः । बालबोधिनीब्याख्यासहितः । (2007) National Samskrit University, Tirupati.

६. वैयाकरणसिद्धान्तकौमुदी । बालमनोरमा-तत्त्वबोधिनी-व्याख्योपेता । (1995) Motilal Banarasi-das. Delhi.


**आन्तर्जालिकसन्दर्भः** ashtadhyayi.com

# "गाङ्कुटादिभ्योऽञ्णिन् ङित्" इति सूत्रे अतिदेशचतुष्टयविमर्शः (शाब्दिकचिन्तामणिग्रन्थानुसारेण)

श्री गुरुप्रसादः के. एस्.*
शोधच्छात्रः, भा.ती.शा.स.केन्द्रम्,
शृङ्गेरी

***लेखसारः*** *– अस्मिन् शोधपत्रे अष्टाध्याय्याः "गाङ्कुटादिभ्योऽञ्णिन् ङित्"*[१] *इति सूत्रादारभ्य "ऊकालोऽज्झ्रस्वदीर्घप्लुतः"*[२] *इति सूत्रं यावत् विद्यमानस्य अतिदेशप्रकरणस्य वैचारिकी समीक्षा वर्तते । गाङ्कुटादिभ्यः परेषु प्रत्ययेषु ङिद्वद्भावस्य फलम्, व्यच्लिख् धात्वोः विशेषविचारः, महाभाष्योक्तानां चतुर्णां पक्षाणाम् (अनुबन्धसंसर्ग-आदेश-संज्ञा-अतिदेशपक्षाणाम्) खण्डनमण्डनपूर्वकं सिद्धान्तप्रतिपादनम्, तथा च पृथक् क् – ङ् – अनुबन्धकरणस्य प्रयोजनानि इति सर्वेषाम् अपि विषयाणां सोदाहरणम् अत्र विवेचनं क्रियते ।*

***कूटशब्दाः*** *– गाङ्कुटादिः, अतिदेशः, महाभाष्यम्, सम्प्रसारणम्, अनुबन्धभेदः ।*

**प्रस्तावना (Introduction)**

पाणिनीयतन्त्रे अतिदेशसूत्राणां क्षेत्रं बहु विस्तृतं वर्तते। "गाङ्कुटादिभ्योऽञ्णिन् ङित्" इति सूत्रं प्रकृतप्रकरणस्य आदिमम् अस्ति । अस्य अधिकारः "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" इति सूत्रपर्यन्तं प्रचलति । एषः सर्वः अपि सन्दर्भः अतिदेशपरः अस्ति । अस्मिन् सूत्रे गाङ् – आदेशात् कुटादिभ्यश्च विहितान् अञ् – णित् – प्रत्ययान् आश्रित्य ङिद्वद्भावो विधीयते । अस्य प्रक्रियागतं रहस्यं महाभाष्य-प्रदीप-पदमञ्जर्यादिषु प्रौढग्रन्थेषु विचारितम् अस्ति ।

**व्यच् – लिख् – धात्वोः विशेषविवेचनम् "व्यचेः कुटादित्वम्" इत्यादि वार्तिकविमर्शः**

"व्यचेः कुटादित्वमनसीति वक्तव्यम्" इति वार्तिकं वस्तुतः "लिट्यभ्यासस्योभयेषाम्" इति सूत्रे भाष्ये पठितम् ।[३] परन्तु वृत्तिकृता (काशिकादिभिः) सन्दर्भशुद्ध्यर्थम् इहैव तुदादिगणे, कुटादिभ्यः प्राक् पठितस्य व्यच्धातोः कुटादित्वम् अतिदिष्टम् । तेन विचिता, विचितुम् इत्यत्र "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च"[४] इति सूत्रेण सम्प्रसारणं भवति । "अनसि" इति पर्युदासात् उरुव्याः इत्यत्र न सम्प्रसारणम् । हरदत्तानुसारं[५] कृत्यादिप्रत्ययेष्वेव इदं भवति । तेन "विव्यचिथ" इत्यत्र थलि कुटादित्वं न । केचित्तु प्रसज्यप्रतिषेधं स्वीकृत्य थलादिष्वपि ङित्त्वं वदन्ति । परन्तु माधवादिभिः[६] वाक्यभेददोषावयवासमर्थसमासाच्च एतद् दूषितम् ।

**लिख् – धातुविचारः**

लिखितुम्, लिखिष्यति इत्यादिषु प्रयोगेषु गुणाप्रवृत्तिः "संज्ञापूर्वको विधिरनित्यः"[७] इति परिभाषामाश्रित्य

---

***सम्पर्कसूत्रम्** - 06360826384, Email- gp9592526@gmail.com

[१]. गाङ्कुटादिभ्योऽञ्णिन् ङित् – अष्टाध्यायी १ – २ – १

[२]. ऊकालोऽज्झ्रस्वदीर्घप्लुतः – अष्टाध्यायी १ – २ – २७ ।

[३]. वस्तुतः इदं वार्तिकं "लिट्यभ्यासस्योभयेषाम्" (अष्टाध्यायी ६ – १ – १७) इति सूत्रस्य महाभाष्ये पठितम्, न तु प्रकृतसूत्रस्य भाष्ये । वृत्तिकारैः सन्दर्भशुद्ध्यर्थम् इह उद्धृतम् ।

[४]. ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च – अष्टाध्यायी ६ – १ – १६ ।

[५]. हरदत्तः – पदमञ्जरीकारः, काशिकावृत्तेः व्याख्याता (आचार्यः, दाक्षिणात्यः, द्वादशशतकपूर्वार्धे) ।

[६]. माधवाचार्यः (विद्यारण्यस्वामी) - माधवीयधातुवृत्तेः कर्ता, चतुर्दशशतकीयः वेदान्ती वैयाकरणाचार्यः च ।

[७]. इयं पारिभाषिकी उक्तिः स्वतन्त्रम् अष्टाध्यायीसूत्रं न, अपितु परिभाषेन्दुशेखरादिपरिभाषाग्रन्थेषु सङ्कलिता एका सुप्रसिद्धा परिभाषा वर्तते ।

साध्यते। तुदादौ कुटादिभ्यः प्रागेव लिख् – धातोः पाठात् तस्य ङित्त्वाप्रसक्तिः। प्रमाणम् १ – "अचतुष्पाचक्रनिर्लेखने" [1] इति सौत्रनिर्देशे गुणेन ज्ञायते लिखिः कुटादौ न। प्रमाणम् २ – वृत्तिग्रन्थे "रलो व्युपधाद्धलादेः संश्च" [2] इत्यत्र लिखित्वा – लेखित्वा, लिलिखिषति – लिलेखिषति, लेखितुम् इति रूपद्वयोपन्यासः अपि अस्य अकुटादित्वं ज्ञापयति।

**महाभाष्योक्तानां चतुर्णां पक्षाणां समीक्षा**

भाष्यकृता न्यायव्युत्पादनार्थं कृत्स्नं प्रकरणं विषयीकृत्य चतुरः पक्षान् उपक्षिप्य वार्तिकोपन्यासेन दोषम् उद्भाव्य सिद्धान्तः प्रतिपादितः। महाभाष्ये चर्चिताः चत्वारः पक्षाः क्रमशः इमे – (१) अनुबन्धसंसर्गपक्षः, (२) आदेशपक्षः, (३) संज्ञापक्षः, (४) अतिदेशपक्षः। एतेषु प्रथमास्त्रयः पक्षाः दोषग्रस्ततया अन्ततः त्यक्ताः। चतुर्थः अतिदेशपक्षः एव अन्ते सिद्धान्ततया स्वीकृतः।

**पक्षः १ – इत्संज्ञक-ङकार-ककार-सम्बन्धपक्षः**

स्वरूपम् – प्रत्ययाः साक्षाद् इत्संज्ञकङकारवन्तः ककारवन्तः च भवन्ति। खण्डनम् – "ङित्किद्वचने तयोरभावादप्रसिद्धिः" इति वार्तिकेन। तृजादिषु प्रत्ययेषु लिडादिषु च तयोरभावात् व्यपदेशो न सिद्ध्यति। "सत्ता ह्यभिसम्बन्धः शक्यते कर्तुम्", नाविद्यमानेन। यथा "चित्रगुर्देवदत्तः" इत्यत्र विद्यमानाः एव गावः सम्बद्धाः भवन्ति।

**पक्षः २ – आदेशपक्षः (ङ – क – आदेशविधानम्)**

स्वरूपम् – प्रत्ययानां देशविशेषम् अनादृत्य इत्संज्ञकौ ङककारौ विधीयेते। खण्डनम् – "भवतीति चैतादृशप्रतिषेधः" इति वार्तिकेन। तयोः आगमलिङ्गाभावात्, अनन्तरार्थे बहुव्रीह्यभावाच्च आदेशत्वं स्यात्। "तस्मादित्युत्तरस्य" [3] परिभाषया पञ्चम्याः षष्ठीप्रकल्पनात् "आदेः परस्य" [4] इति प्रत्ययादेः आदेशौ स्याताम्। ङ् इत् ङित् इति विग्रहाश्रयणात् (बहुव्रीह्यपेक्षया अन्तरङ्गत्वात्) आदेशत्वे सति, कुटादिभ्यः चङादयः यद्यादेशाः स्युः, तदा मूलार्थाभिधाने असमर्थाः स्युः। आन्तरतम्याद् ङाद्यादेशकल्पने शास्त्रे अप्रसिद्धत्वाद् "ङिच्च" इत्यन्त्यादेशत्वं वा स्यात्।

**पक्षः ३ – संज्ञापक्षः (कृत्रिमा संज्ञा)**

स्वरूपम् - एतत् प्रकरणं प्रत्ययानां "ङित्" "कित्" इति पारिभाषिकीं संज्ञां करोति। खण्डनम् "संज्ञाकरणे किङिद्ग्रहणे असम्प्रत्ययः शब्दभेदात्" [5] इति वार्तिकेन। "क्ङिति च" इत्यादिषु यौगिकशब्देषु संज्ञास्वरूपानुपलम्भाद् संज्ञिनां बोधो न स्यात्। "कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः" इति न्यायाद् उपदेशे इत्संज्ञावतां ग्रहणं न स्यात्। कैयटानुसारं [6] संज्ञापक्षे सूत्राणाम् आनर्थक्यं प्रसज्येत।

**पक्षः ४ – अतिदेशपक्षः (सिद्धान्तपक्षः)**

स्वरूपम् – सूत्रे "वति" प्रत्ययस्य अभावेऽपि "एष वसिष्ठः, एष ब्रह्मदत्तः" इतिवद् भेदग्रहेऽपि तद्रूपारोपाद्

---

[1]. अचतुष्पाचक्रनिर्लेखने – उणादि/गणपाठसूत्रम्, यत् लिख् – धातोः गुणं दर्शयति। सूत्रसंख्या ग्रन्थभेदेन भिद्यते, अतः इह न निर्दिश्यते।

[2]. रलो व्युपधाद्धलादेः संश्च – अष्टाध्यायी १ – २ – २६।

[3]. तस्मादित्युत्तरस्य – अष्टाध्यायी १ – १ – ६७।

[4]. आदेः परस्य – अष्टाध्यायी १ – १ – ५४।

[5]. संज्ञाकरणे किङिद्ग्रहणे असम्प्रत्ययः शब्दभेदात् - महाभाष्ये प्रकृतसूत्रस्य वार्तिकम्।

[6]. कैयटः - महाभाष्यप्रदीपस्य कर्ता, एकादशशतकीयः वैयाकरणाचार्यः।

अतिदेशो जायते । आपादितदोषः – "तद्वदतिदेशे अकिद्विधिप्रसङ्गः" [१] इति (यथा क्षत्रिये ब्राह्मणवद्वर्तनेऽपि स्वाश्रयं युद्धकार्यं न निवर्तते, तथा सिसृक्षति – दिदृक्षति इत्यत्र कित्त्वातिदेशेऽपि स्वाश्रयाकित्त्वानिवर्तनाद् "सृजिदृशोर्झल्यमकिति" [२] इत्यमागमः प्रसज्येत) । परिहारः – "सिद्धं तु प्रसज्यप्रतिषेधात्" [३] इति वार्तिकेन । अत्र प्रसज्यप्रतिषेधाश्रयणाद् अमागमप्रतिषेधोऽपि सिद्धो भवति ।

**सर्वपक्षसाधारणदोषः "पूर्वस्य कार्यातिदेश" न्यायश्च**

दोषोद्भावकं वार्तिकम् – "सर्वत्र सन्नन्तादात्मनेपदप्रतिषेधः" [४] इति । कुटादिभ्यः परस्य सनः ङित्त्वाद् चुकुटिषति इत्यत्र यङन्तादिव "अनुदात्तङित आत्मनेपदम्" [५] इति आत्मनेपदं प्राप्नोति । परिहारवार्तिकम् – "सिद्धं तु पूर्वस्य कार्यातिदेशात्" [६] इति । ङिति परतः यत् पूर्वस्य कार्यं (गुणवृद्धिनिषेधसम्प्रसारणादि) तस्यैव अत्र अतिदेशाद् आत्मनेपदप्रसक्तिः नास्ति । सप्तम्यन्तवतिविमर्शः – भाष्ये "सप्तम्यर्थेऽपि वतिर्भवति (मथुरावत् पाटलिपुत्रवत्)" इति उक्तम् । कैयटानुसारं "ङिति पूर्वस्य यत्कार्यं तद्वदिह" इति अर्थः । तृतीयान्तवतिपक्षः प्रथमानिर्देशानुपपत्तिश्च – यदि सप्तम्यन्ताद् वतिः स्यात्, तर्हि "गाङ्कुटादिभ्योऽञ्णिन् ङित्" इत्यत्र अञ् णित् इति प्रथमानिर्देशो न स्यात् । उपमेये सप्तमीनिर्देशस्यैव कर्तव्यत्वात् । अपि च, केवलं पूर्वस्य कार्यातिदेशे पचेते, पचेथे इत्यादिषु प्रत्ययकार्यस्य (आतो ङितः इति इयादेशस्य) अतिदेशो न स्यात् । तस्माद् प्रतियोगिनिर्देशात् कल्प्यमानो वतिः तृतीयान्ताद् (ङिता तुल्यं ङिद्वत्) एव ग्राह्यः । भाष्ये "पूर्वस्य" इति कथनं तु केवलम् उपलक्षणम् अस्ति । येन प्रत्ययकार्यमपि सङ्गृहीतं भवति । कैयटोक्तरीत्या विशिष्टकार्यातिशार्थमेव (गुणवृद्धिनिषेधार्थमेव) एषः तद्रूपासङ्गः ।

**पृथक् क्ङ्-अनुबन्धकरणस्य प्रयोजनविचारः**

लाघवाद् एकस्यैव अनुबन्धस्य कर्तव्यत्वे प्राप्ते, पृथक्करणे इमानि प्रयोजनानि वार्तिकोक्तानि सन्ति –

**१. वचिस्वपियजादीनां सम्प्रसारणम्**

यदि सर्वत्र एकः एव अनुबन्धः स्यात्, तर्हि सुप्तः इत्यत्र इव स्वपितः, स्वपिवः इत्यत्रापि सम्प्रसारणं प्रसज्येत । चङि अशिश्वियत् ("विभाषा धेट्श्व्योः" [७] इति), अङि अश्वत् ("जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च" [८] इति), अङि अवोचत् ("अस्यतिवक्तिख्यातिभ्योऽङ्" [९] इति), नजिङ् – प्रत्यये स्वप्नक् ("स्वपितृषोर्नजिङिति"), ङ्वनिपि यज्वा ("सुयजोर्ङ्वनिप्" [१०]), अथि आवसथः (उपसर्गे वसेः इत्यत्र रुदादिभ्यः परत्वेन ङित्त्वानुवृत्तेः), नङ् – प्रत्यये यज्ञः ("यजयाचयतविच्छप्रच्छरक्षो नङ्" [११] इति) – इत्यादिषु अनिष्टेषु सम्प्रसारणप्रसङ्गः स्यात्, सः पृथगनुबन्धेन वार्यते ।

**२. जाग्रो गुणविधिः**

---

[१]. तद्वदतिदेशे अकिद्विधिप्रसङ्गः – महाभाष्ये प्रकृतसूत्रस्य आक्षेपवार्तिकम् ।
[२]. सृजिदृशोर्झल्यमकिति – अमागमविधायकसूत्रम् ।
[३]. सिद्धं तु प्रसज्यप्रतिषेधात् – महाभाष्ये प्रकृतसूत्रस्य परिहारवार्तिकम् ।
[४]. सर्वत्र सन्नन्तादात्मनेपदप्रतिषेधः – महाभाष्ये प्रकृतसूत्रस्य आक्षेपवार्तिकम् ।
[५]. अनुदात्तङित आत्मनेपदम् – अष्टाध्यायी १ – ३ – १२ ।
[६]. सिद्धं तु पूर्वस्य कार्यातिदेशात् – महाभाष्ये प्रकृतसूत्रस्य परिहारवार्तिकम् ।
[७]. विभाषा धेट्श्व्योः – अष्टाध्यायी ३ – १ – ४९ ।
[८]. जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च – अष्टाध्यायी ३ – १ – ५८ ।
[९]. अस्यतिवक्तिख्यातिभ्योऽङ् – अष्टाध्यायी ३ – १ – ५२ ।
[१०]. सुयजोर्ङ्वनिप् – अष्टाध्यायी ३ – २ – १०३ ।
[११]. यजयाचयतविच्छप्रच्छरक्षो नङ् – अष्टाध्यायी ३ – ३ – ९० ।


ISSN : 2249-538X

"जाग्रोऽविचिण्णल्ङित्सु" [1] इति ङित्पर्युदासाद् जागृतः, जागृथः इत्यत्र गुणाभावः, किति तु जागरितः, जागरितवान् इत्यत्र गुणो भवति । अयं विषयविभागः पृथगनुबन्धकरणे सत्येव लभ्यते ।

**३. कुटादीनाम् इड्प्रतिषेधः**

"श्र्युकः किति" [2] इति इड्प्रतिषेधः नुविता, धुविता (णु – स्तवने, धू – विधूनने इत्येताभ्यां तृचि) इत्यत्र मा भूत् इति । यतो हि एतयोः परस्य प्रत्ययस्य "ङित्त्वम्" अस्ति, न तु "कित्त्वम्" ।

**४. क्त्वाप्रत्यये कित्त्वप्रतिषेधः**

देवित्वा – सेवित्वा इत्यत्र "न क्त्वा सेट्" [3] इति कित्त्वनिषेधः । सः च कुटित्वा – पुटित्वा इत्यत्र मा भूत् इति । "येन नाप्राप्ति" न्यायविरोधपरिहारः – कुटिता इत्यादौ कित्त्वाप्राप्तिस्थलेऽपि ङित्त्वप्रवृत्त्या (ङित्त्वरागेण) "येन नाप्राप्तिन्यायः" अत्र न प्रवर्तते । अतः आतिदेशिकेन ङित्त्वेन औपदेशिकं कित्त्वं न बाध्यते । एतदर्थमेव "च" शब्दः भिन्नक्रमः आश्रितः ।

**उपसंहारः**

अनेन प्रबन्धेन प्रतिपादितं यत् गाङ्कुटादिसूत्रस्य व्याख्याने चतुर्थः अतिदेशपक्षः एव भाष्यकृद्भिः सिद्धान्तितः, यतो हि सः एव मूलप्रत्ययस्वरूपाविकृतिं, कार्यसामर्थ्यं च युगपत् साधयति । पृथक् ककार – ङकारानुबन्धकरणं च न केवलं प्रक्रियालाघवाय, अपि तु सम्प्रसारण – गुण – इड्प्रतिषेधादीनां व्यवस्थापनाय अनिवार्यं वर्तते – यत् चतुर्भिः प्रयोजनवर्गैः (वचिस्वपियजादिसम्प्रसारणम्, जाग्रो गुणः, श्र्युक् – इड्प्रतिषेधः, क्त्वा – कित्त्वप्रतिषेधः) अत्र सोपपत्तिकं दर्शितम् । अन्ततः महाभाष्यकाराणां चतुष्पक्षविमर्शपद्धतिः स्वयमेव पाणिनीयव्याकरणस्य सूक्ष्मतमां तर्कशुद्धिं, तथा अतिदेशसंज्ञकानां प्रक्रियातत्त्वानां प्रयोजनवत्तां च उद्घाटयति ।

## परामृष्टाः ग्रन्थाः


१. व्याकरणमहाभाष्यम् (प्रदीप – उद्योतसहितम्), मोतीलाल बनारसीदास, दिल्ली ।

२. काशिकावृत्तिः (पदमञ्जरी – न्याससहिता), चौखम्बा संस्कृत प्रतिष्ठानम् ।

३. माधवीयधातुवृत्तिः, सायणाचार्यविरचिता ।

४. श्रीगोपालकृष्णशास्त्रिविरचितः शाब्दिकचिन्तामणिः (महाभाष्यव्याख्यानग्रन्थः) ।


[1]. जाग्रोऽविचिण्णल्ङित्सु – अष्टाध्यायी ७ – ३ – ८५ ।

[2]. श्र्युकः किति – इति इडागमनिषेधकसूत्रम् ।

[3]. न क्त्वा सेट् – अष्टाध्यायी १ – २ – १८ ।

# ‘पश्य मृगो धावति’ इति वाक्यात् शाब्दबोधः

**(न्यायमतदृष्ट्या वाक्यार्थनिर्वहणम्)**

डा. राघवेन्द्रः पी. आरोल्ली*
सहायकाचार्यः(सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***कूटशब्दाः*** *– पश्य मृगो धावति, भावप्रधानमाख्यातम् , प्रथमान्तार्थमुख्यविशेष्यकः, धात्वर्थव्यापारमुख्यविशेष्यकः, जानामि सीता, पश्य मृगो आनय, शाब्दबोधः ।*

***लेखसारः*** *– प्रथमान्तार्थमुख्यविशेष्यत्ववादिनां नैयायिकानां मतस्य दूषणार्थं वैयाकरणैः ‘पश्य मृगो धावति’ इति स्थलं प्रदर्श्यते । तत्र च मृगरूपप्रथमान्तार्थस्य मुख्यविशेष्यत्वं न सम्भवति, स्वीकारे वा वाक्यभेदापत्तिरिति अभिप्रायः । नैयायिकानां तत्र धावनकृतिविशिष्टस्य शुद्धस्य वा मृगस्य कर्मतासम्बन्धेन दर्शनक्रियायामन्वयः इत्येकं समाधानम् । तेन च पदैकवाक्यतापि उपपादिता भवति । धावनस्यैव दर्शनं यदि बोधनीयं तदा धावनक्रियाविशिष्टकृतेः आख्यातान्तार्थस्य विषयितासम्बन्धेन दर्शनक्रियायामन्वयम् उपगम्य विशेष्यीभूतायाः परकीयकृतेः दर्शनासम्भवात् दर्शनविषयत्वं धावने एव पर्यवस्यतीति माहाभाष्यकारपक्षोऽपि उपपद्यते । धात्वर्थक्रियामुख्यविशेष्यकशाब्दबोधाङ्गीकर्तृभिरपि ‘धवति मृगो आनय’ इत्यत्र धावनकर्मकानयनस्य बाधितत्वात् विशेषणीभूतस्य प्रथमान्तार्थस्य मृगस्यैव दर्शनकर्मत्वाभ्युपगमादिति ।*

अस्मिन् जगतीतले भगवतः परमेश्वरेण स्रष्टानां पदार्थानाम् उपभोक्ता युक्तायुक्तविवेकज्ञः मानवः उत्कृष्टं स्थानं भजते । तस्य विचारचातुर्यं नान्यत्र प्राणिषु दृश्यते । अत एव सः विशिष्टया भाषया व्यवहरति, स्वविचारान् प्रकटीकरोति च । भाषा च ज्ञानसाधनेषु अन्यतमा वर्तते । आकाङ्क्षादिविशिष्टपदसमूहात्मकानां वाक्यानां श्रवणे सति तत्तद्वाक्यघटकपदानाम् अर्थाः स्मर्यन्ते । तेन च विशिष्टः कश्चन बोधो जायते । स एव शाब्दबोध इत्युच्यते । तत्र च पदज्ञानं करणम् , पदार्थोपस्थितिः अवान्तरव्यापारः । उपस्थितानां पदार्थानां संसर्गविषयकः शाब्दबोधः फलम् । तदुक्तं - पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥[१] इति ।

**शाब्दबोधे मुख्यविशेष्यत्वविषये विप्रतिपत्तयः**

शाब्दबोधे विशेष्यविशेषणभावापन्नाः नैके पदार्थाः भासन्ते । तेषु मुख्यविशेष्यं[२] किम् ? इत्यत्र शास्त्रकारेषु विप्रतिपत्तिरस्ति । तेषु ‘भावप्रधानमाख्यातम्’ इति निरुक्तस्मृतिप्रमाणमाश्रित्य मीमांसकाः भावशब्दस्य भावनार्थकत्वं च स्वीकृत्य आख्यातार्थभावनायाः मुख्यविशेष्यत्वं कथयन्ति । अतः ‘ज्योतिष्टेमेन स्वर्गकामो यजेत’ इत्यादिवाक्यात् ‘ज्योतिष्टोमयागकरणिका स्वर्गसाध्यिका भावना’ इति सामान्यतया शाब्दबोधं वर्णयन्ति । वैयाकरणास्तु तत्र स्मृतौ आख्यातपदस्य धातुरित्यर्थः इति व्याख्याय तेनैव प्रमाणेन धात्वर्थमुख्यविशेष्यकशाब्दबोधम् अभ्युपगच्छन्ति । अतः ‘चैत्रः ग्रामं गच्छति’ इति वाक्यात् ‘चैत्राभिन्नकर्तृकं ग्रामकर्मकं गमनम्’ इति व्याकरणमतानुसारं शाब्दबोधः । परन्तु नैयायिकास्तावत् अनुभवानुरोधेन प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति । अतः निरुक्तवाक्यात् न्यायमतानुसारं ‘ग्रामकर्मकगमनानुकूलकृतिमान् चैत्रः’ इति बोधः सिध्यति ।

**‘पश्य मृगो धावति’ इत्यत्र प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधानुपपत्तिः**

***सम्पर्कसूत्रम्** - 9964582616, Email- r.arolli@sanskrit.ac.in

[१]न्यायसिद्धान्तमुक्तावली

[२]विशेषणत्वानवच्छिन्नविशेष्यत्वं मुख्यविशेष्यत्वम् ।

ननु प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधाभ्युपगमे 'पश्य मृगो धावति', 'पचति भवति' इत्यादौ महाभाष्यकारोक्तविशिष्टैकार्थावगाही प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधो नोपपद्यते। तत्र हि 'पाको भवति' इत्यर्थे 'पचति भवति' इति प्रयोगः महाभाष्यकारसम्मतः, परन्तु तत्र प्रथमान्तपदाभावात् तदर्थमुख्यविशेष्यकशाब्दबोधानुपपत्तिः। 'पश्य मृगो धावति' इत्यत्र तु नैयायिकेन प्रथमान्तमुख्यविशेष्यकशाब्दबोधोपपादनार्थं 'धावनानुकूलकृतिमान् मृगः, दर्शनाश्रयः त्वम्' इति अनेकमुख्यविशेष्यकशाब्दबोधो वर्णनीयः। तथा सति वाक्यभेदः स्यात्। न च वाक्यभेदपरिहारार्थं धावनकृतिविशिष्टस्य मृगस्य कर्मताख्येन भेदसम्बन्धेन दर्शनरूपे धात्वर्थे अन्वयं स्वीकृत्य एकवाक्यत्वम् उपपादयिष्यते इति वाच्यम्। एवं सति 'नामार्थधात्वर्थयोः साक्षात् भेदेन अन्वयः अव्युत्पन्नः' इति व्युत्पत्तिविरोधः स्यात्, मृगस्य नामार्थत्वात् दर्शनक्रियायाः धात्वर्थत्वात्। न च नामार्थस्य शुद्धस्य भेदसम्बन्धेन धात्वर्थे अन्वयः अव्युत्पन्न इत्येव व्युत्पत्तेराशयः। प्रकृते च केवलस्य मृगस्य दर्शनक्रियायां नान्वयः, अपि तु धावनकृतिविशिष्टस्यैव। तस्मान्न व्युत्पत्तिविरोधः। नापि मृगपदोत्तरं द्वितीया। विशिष्टमृगबोधकस्य धावति मृगेत्यन्तभागस्य प्रातिपदिकत्वविरहादिति वाच्यम्। एवमपि नीलविशिष्टघटं जानाति इति बोधयितुं 'नीलो घटो जानाति' इति प्रयोगापत्तिः, अनुपपत्तिश्च 'नीलं घटं जानाति' इति प्रयोगस्य। तत्र च नीलपदोत्तरद्वितीयाविभक्तिप्रत्ययघटितस्य घटान्तभागस्य प्रादिपदिकसंज्ञाविरहात् घटपदोत्तरं द्वितीयानुपपत्तिः। नीलपदस्य तु विशेषणत्वात् विशेष्यवाचकपदसमानविभक्तकत्वेन द्वितीयानुपपत्तिः इति चेत्, मैवम्।

**तत्र नैयायिकानां समाधानम्**

नीलविशिष्टघटं जानाति इति तात्पर्येण 'नीलो घटो जानाति' इति प्रयोगस्तु इष्यते एव। अतः तत्र नीलविशिष्टघट एव धात्वर्थज्ञाने विषयितासम्बन्धेन विशेषणमित्यतः एतादृशवाक्यात् विशिष्टवैशिष्ट्यावगाहिबोधो जायते। 'नीलं घटं जानाति' इति वाक्यात्तु नीलवैशिष्ट्यं घटे, तस्य च घटस्य ज्ञाने विशेषणत्वमितिरीत्या शाब्दबोधो भवति। यदि 'नीलं घटं जानाति' इति वाक्यात् विशिष्टवैशिष्ट्यावगाहिबोधः उपपादनीयः तर्हि घटपदस्य नीलविशिष्टघटे लक्षणा स्वीकरणीया। नीलपदन्तु तदा तात्पर्यग्राहकं भवति। तथा च लक्षणया विशिष्टघटबोधकस्य घटेत्यस्य प्रादिपदिकत्वसम्भवात् तदुत्तरं द्वितीयोत्पत्तिरपि सम्भवति। अत एव विशिष्टस्य कर्मत्वविवक्षया 'जानामि सीता जनकप्रसूता', 'श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः'[१] इत्यादयः प्रयोगाः साधवः सम्पद्यन्ते। अन्यथा ज्ञाननिरूपितकर्मत्वस्य सीतायाम्, श्रवणनिरूपितकर्मत्वस्य शुभायाः उत्पत्तौ सत्त्वात् तत्तत्पदोत्तरं द्वितीया स्यात्। तस्मात् एतेषु प्रयोगेषु जनकप्रसूतृत्वविशिष्टसीतायाः, शुभविशिष्टोत्पत्तेश्च कर्मत्वं विवक्षित्वा उत्सर्गतः प्रथमा उपपादनीया इति। इत्थं च 'पश्य मृगो धावति' इत्यत्रापि विशिष्टमृगकर्मकदर्शनमित्यादिरीत्या वाक्यैकवाक्यता सिद्धा भवति।

**पदैकवाक्यत्वोपपादनम्**

ननु विशिष्टस्य मृगादेः कर्मतासम्बन्धेन दर्शनादौ अन्वये तु वाक्यैकवाक्यता स्वीकृता स्यात्। परन्तु महाभाष्यकारादिभिः 'धावति पश्य' इत्यत्र धावनस्य कर्मतासम्बन्धेन दर्शने अन्वयः स्वीकृत इत्यतः पदैकवाक्यतैव तैरभिप्रेता। सा तु न सिद्ध्यति इति चेन्न। केवलस्य मृगस्यैव दर्शनक्रियायां विषयताख्यकर्मतासम्बन्धेन अन्वयोपगमात्। न च नामार्थधात्वर्थयोः साक्षाद् भेदेनान्वयः अव्युत्पन्न इति नियमविरोधः। अन्यथा तण्डुलस्य कर्मतासम्बन्धेन पाकक्रियायामन्वयविवक्षया 'तण्डुलः पचति' इति प्रयोगापत्तिः इति वाच्यम्। धात्वर्थाविशेषितनामार्थस्यैव धात्वर्थे साक्षाद्भेदेनान्वयस्य अनभ्युपगमात्। 'तण्डुलं पचति' इत्यत्र तु तण्डुलस्य धात्वर्थाविशेषितत्वात् तत्र

[१] देवीमाहात्म्यम् १२.१

तण्डुलादेः नामार्थस्य साक्षाद्भेदेनान्वयः अव्युत्पन्नः इत्यतः तण्डुलपदोत्तरं द्वितीयैव । 'पश्यमृगो धावति' इत्यत्र च धावनक्रियारूपधात्वर्थविशेषितत्वात् मृगस्य कर्मतासम्बन्धेन दर्शनक्रियायाम् अन्वये न व्युत्पत्तिविरोध इति । अत एव 'पश्य लक्ष्मण पम्पायां बकः परमधार्मिकः' इत्यत्र दर्शनक्रियाकर्मत्वापन्नानस्य बकस्य बोधनार्थं प्रथमान्तं बकपदम् उपपद्यते । तत्र अस्ति इति पदाध्याहारेण बकस्य धात्वर्थविशेषितत्वसम्पादनात् । न च तण्डुलप्रकारककर्मतासंसर्गकपाकविशेष्यकशाब्दबोधस्यैव अप्रसिद्ध्या तण्डुलः पाक इत्यादिप्रयोगापादनासम्भवात् न नामार्थस्येत्यादिव्युत्पत्तिः कल्पनीया । अतः मृगस्य कर्मतासम्बन्धेन दर्शनान्वये न कोऽपि व्युत्पत्तिविरोध इति वाच्यम् । 'तण्डुलः पचति' इति वाक्यात् कस्यचित् पुरुषस्य तण्डुलस्य कर्मतासम्बन्धेन पाके विशेषणतया अन्वयबोधसम्भवात् । तदनुरोधेन प्रथमान्ततण्डुलपदघटितस्यापि वाक्यस्य तादृशान्वयबोधजनकत्वम् अवश्यमभ्युपगन्तव्यम् । तत्र तण्डुलपदोत्तरं प्रथमा साधुर्नवेत्यन्यदेतत् ।

**धावनक्रियायां दर्शनक्रियाकर्मत्वोपपादनम्**

ननु मृगपदार्थस्य केवलस्य मृगस्य कर्मतासम्बन्धेन दर्शने अन्वयमभ्युपगम्य पदैकवाक्यता सम्पादनेऽपि महाभाष्यकाराभिप्रेतं[1] दर्शनक्रियानिरूपितकर्मत्वं धावनस्य नोपपादितं स्यात् । तत्र हि - महाभाष्यकारैः 'मृगकर्तृकधानवकर्मकं दर्शनम्' इति बोधः इष्टः । न तु मृगस्य दर्शनक्रियायाम् अन्वयः इति चेन्न । मृगनिष्ठायाः धावनानुकूलकृतेः दर्शनक्रियायाम् अन्वयोपगमात् । तथा हि - 'पश्य मृगो धावति' इत्यत्र प्रथमान्तपदार्थस्य मृगस्य आख्यातार्थे कृतौ अन्वयः, धात्वर्थधावनविशिष्टायाः कृतेश्च कर्मता सम्बन्धेन पश्येत्यत्र धात्वर्थे दर्शने अन्वयः । तथा च परकीयकृतेः दर्शनस्य बाधितत्वात् सविशेषणे हीति न्यायेन तद्विशेषणीभूतस्य धावनस्य दर्शनकर्मत्वं पर्यवस्यति । नच प्रथमान्तार्थमुख्यविशेष्यकत्वं शाब्दबोधस्य परित्यक्तमिति वाच्यम् । प्रथमान्तपदार्थस्य अन्यत्र विशेषणतया अन्यवयबोधे सामग्र्यभावादेव मुख्यविशेष्यत्वाभ्युपगमात् । यदि प्रथमान्तार्थस्यापि अन्यत्रान्वये सामग्री स्यात् तदा प्रथमान्तार्थमुख्यविशेष्यकत्वमपि परित्यक्तं स्यात् । अत एव गदाधरभट्टाचार्यैः 'अत एव यत्र समानविभक्तिकं विशेष्यवाचकपदं निपातपदं वा नास्ति, तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावादसौ मुख्यविशेष्यतया भासते'[2] इत्युक्तम् । तथा च 'पश्य मृगो धावति' इत्यत्र मृगनिष्ठधावनानुकूलकृतिविषयकदर्शनाश्रयः त्वम्' इति त्वम्पदार्थैकमुख्यविशेषकः धावने दर्शनकर्मत्वावगाही पदैकवाक्यतापन्नवाक्यजन्यः शाब्दबोधः एव पश्य मृगो धावतीति वाक्यात् अभ्युपगन्यव्यः ।

**उपसंहारः**

वैयाकरणैरपि अवश्यमिदम् अभ्युपेयम् । अन्यथा 'मृगो धावति आनय' इत्यत्र शाब्दबोधानुपपत्तिः । तत्र हि आनयनरूपक्रियानिरूपितकर्मत्वं धावनक्रियायां बाधितत्वात् न अन्वेति । मृगे च अन्वयोपगमे धात्वर्थव्यापारमुख्यविशेष्यकत्वं परित्यक्तं स्यात् । अतः मृगकर्तृकधावने दर्शनकर्मत्वं बाधितं सत् विशेषणीभूतमृगे भासते इति अगत्या स्वीकरणीयम् इति ।

## परामृष्टाः ग्रन्थाः


१. न्यायसिद्धान्तमुक्तावली - विश्वनाथन्यायपञ्चाननः
२. व्युत्पत्तिवादः - गदाधरभट्टाचार्यः
३. शाब्दतरङ्गिणी - वेपत्तूरुश्रीसुब्रह्मण्यशास्त्री
४. शाब्दबोधमीमांसा - श्रीरामानुजताताचार्यः
५. व्याकरणमहाभाष्यम् - पतञ्जलिमहर्षिः
६. देवीमाहात्म्यम् - व्यासमहर्षिः


[1] न हि वाक्यस्य वाक्येन कर्मभावः न सम्भवति । (महाभाष्यम् २.१.१)

[2] व्युत्पत्तिवादः


ISSN : 2249-538X

# वैशेषिकसूत्रेषु अभावनिरूपणम्

श्री शशांक शिवराम भट्टः*
सहायकाचार्यः(अ.), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः** – वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः स्वीकृताः सन्ति । तेषु अन्तिमः पदार्थः भवति अभावः । तत्राभावत्वं नाम षड्भावभिन्नत्वम् । स चाभावः प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदात् चतुर्विधः । तत्र अनादिः सान्तः प्रागभावः, सादिरनन्तः प्रध्वंसः, त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकः अत्यन्ताभावः, तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः अन्योन्याभावः । स चायं सर्वोऽपि अभावप्रपञ्चः वैशेषिकसूत्रेषु कथं प्रतिपादित इति लेखेस्मिन् प्रस्तूयते ।*

***कूटशब्दाः** – अभावः, सप्तमपदार्थः, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः*

द्रव्यादिषु सप्तसु पदार्थेषु अन्तिमः पदार्थः अभावः । स च षड्भावपदार्थभिन्नः अतिरिक्त एव । स चाभावो द्विविधः, संसर्गाभावोऽन्योन्याभावश्चेति । तत्र संसर्गाभावः पुनस्त्रिविधः, प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात् । संसर्गाभावत्वं चान्योन्याभावभिन्नाभावत्वम् । भविष्यतीति प्रतीतिसाक्षिको विनाशी अभावः प्रागभाव इति प्राञ्चः । नास्त्येव प्रागभाव इति नव्याः वेदान्तिनश्च । घटो नश्यतीति प्रतीतिसाक्षिक उत्पत्तिमानभावः प्रध्वंसाभावः । वेदान्तिनस्तु सर्वकार्यस्य चरमक्षणसम्बन्ध एव ध्वंस इति प्राहुः । अनादिरनन्त इदमिह नास्तीति प्रतीतिसाक्षिकः संसर्गाभावः अत्यन्ताभावः । इदमिदं नेति प्रतीतिसाक्षिकः अन्योन्याभावः । अत्र हि तादात्म्यसम्बन्धः प्रतियोगितावच्छेदकः । तथाहि - घटः पटो न भवतीति घटे पटतादात्म्यं प्रसज्य पश्चात् पटो निषिध्यते । येने सम्बन्धेन प्रतियोगी निषिध्यते, स सम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः । अत एव भूतले घटो नास्तीत्यादौ संयोगसम्बन्धेन भूतले घटो निषिध्यत इति भूतलवृत्तिघटात्यन्ताभावप्रतियोगितावच्छेदकसम्बन्धः संयोगः।

वैशेषिकसूत्रेषु नवमाध्याये प्रथम एवाह्निके अभावः निरूपितः विद्यते भगवता सूत्रकारेण । तत्रादौ प्रागभावं निरूपयति सूत्रकारः कणादः यथा - क्रियागुणव्यपदेशाभावात् प्रागसत्[१] इति । सूत्रे प्रागिति कार्योत्पत्तेः प्राक् इत्यर्थः, कार्यं घटपटादि, असत्तत्कालीनस्वजनकाभावप्रतियोगीत्यर्थः । अत्र हेतुः उपन्यस्तः यत् क्रियागुणव्यपदेशाभावात् इति । यदि तदानीमपि इत्युक्ते कार्योत्पत्तेः प्रागपि कार्यं घटादि सदेव स्यात्तदा क्रियावत्वेन गुणवत्त्वेन च व्यपदिश्येत, यथोत्पन्ने घटे घटस्तिष्ठति, घटः चलति, रूपवानयं दृश्यते घट इत्यादिप्रकारेण व्यपदिश्यते, न हि तथा उत्पत्तेः प्रागपि व्यपदेशोऽस्ति, तेन गम्यते तदानीमसन्निति । स चायं प्रागभावः प्रतियोगिजनकः, व्यूह्यमानेषु वीरणेषु, योज्यमानेषु तन्तुषु, चक्रारूढायां मृदि कुलालादिव्यापारेषु अनुवर्तमानेषु, भविष्यत्यत्र कटः पटो घटो वेति प्रत्यक्षप्रतीत्या विषयीक्रियते । यतो हि चक्षुर्विस्फारणानन्तरं सर्वेषां तथाप्रतीतेः जायमानत्वात् । तथा च ईदृशी प्रत्यक्षप्रतीतिरेव प्रागभावसत्त्वे प्रमाणं भवति इति ।

प्रागभावं निरूप्य ध्वंसः तदग्रिमसूत्रेण निरूप्यते यथा – सदसत्[२] इति । यथा कारणव्यापारात्पूर्वं प्रत्यक्षानुमानाभ्यां कार्यस्यासत्त्वं प्रमीयते, तथा विनाशकस्य मुद्गरादेः व्यापारानन्तरं सदेव कार्यं घटादि इदानीमसदिति प्रत्यक्षानुमानाभ्यामेव प्रमीयते, स चायमभावो ध्वंस इति गीयते । भवति हि घटो नष्टो ध्वस्तः, इदानीं श्रुतपूर्वो गकारो नास्तीत्यादिधीः, तदेतत्सर्वं प्रध्वंसाभावे प्रमाणमिति भावः । एवं निरूप्य प्रध्वंसाभावे

***सम्पर्कसूत्रम्** - 9480037151, Email- shashank@sanskrit.ac.in

[१]वैशेषिकसूत्रम् 9.1.1

[२]वैशेषिकसूत्रम् 9.1.2

हेत्वन्तरमपि सूत्रान्तरेणाह सूत्रकारः यथा – असतः क्रियागुणव्यपदेशाभावात् अर्थान्तरम्[१] इति । न हि प्रध्वंसकालेऽपि वर्तते घटः, अस्ति घटः, इदानीं रूपवान् घटः, घटमानयेत्यादिव्यपदेशः, तस्मात् प्रध्वंसाभावः व्यतिरिच्यत एव इति ।

अयञ्च ध्वंसः प्रत्यक्षसिद्ध एवेति निरूपयितुं सूत्रान्तरमाह सूत्रकारः यथा - असदिति भूतप्रत्यक्षाभावाद्भूत-स्मृतेर्विरोधिप्रत्यक्षवत्[२] इति । असन् घट :, नष्टो घटः, ध्वस्तः इदानीं घट इति प्रत्यक्षा प्रतीतिरस्ति । तत्र दृष्टान्तः अपि दीयते यथा विरोधिप्रत्यक्षवदिति । विरोधिनो घटादेर्यथा स्पष्टं प्रत्यक्षं तथा तत्प्रध्वंसस्यापि प्रत्यक्षमेव इत्य-र्थः ।

तदग्रिमसूत्रे अन्योन्याभावं निरूपयितुं सूत्रमाह – सच्चासत्[३] इति । यत्र सदेव घटादि असदिति व्यवह्रियते तत्र तादात्म्याभावः प्रतीयते । भवति हि असन्नश्वो गवात्मना, असन् गौरश्वात्मना, असन्पटो घटात्मना, अघट : पटः, अनश्वो गौः, अगौरश्वः इत्यादिप्रतीतिः । तदस्यामश्वान्योन्याभाववान् गौः, पटान्योन्याभाववान् घट इत्यन्योन्याभाव एव तादात्म्याभावापरनामा भासते । स चायं नित्यः, यतो हि कदाचिदपि घटपटयोः तादात्म्यस्य असम्भवात् ।

अग्रे अत्यन्ताभावं निरूपयितुं सूत्रमाह – यच्चान्यदसतस्तदसत्[४] इति । अतः -पूर्वोक्तादभावत्रयात् , यदन्यदसत् तदसत् , तदत्यन्तासत्त्वम् । असदित्युभयत्र भावप्रधानो निर्देश : तत्रैकमसदुद्देश्यमपरमसद्विधेयम् । तथा च उक्ताभावत्रयभिन्नो योऽभावः सोऽत्यन्ताभाव इति पर्यवसन्नोऽर्थः । तत्र प्रागभावस्य उत्तरावधिकत्वम्, प्रध्वंसस्य पूर्वावधिकत्वम् , अन्योन्याभावस्य प्रतियोगिसमानाधिकरणत्वम्, अत्यन्ताभावम्य तु त्रितयवैधर्म्यम् अतः चतुर्थोऽयमभावः इति ।

अत्यन्ताभावस्य प्रत्यक्षतां निरूपयितुं सूत्रान्तरं वदति सूत्रकारः यथा – अभूतं नास्तीत्यनर्थान्तरम्[५] इति । भूतम् इदानीं नास्तीति प्रतीतिः ध्वंसमालम्बते, किन्तु भूतत्वं नोल्लिखति । किन्तु इदं नास्तीति मात्रोल्लेखिनी प्रत्यक्षप्रतीतिः अत्यन्ताभावमालम्बते, अभूतमित्युत्पादविनाशानालम्बनत्वं द्योतयति, अनर्थान्तरत्वमपि तदभिप्रायकमेव । यथा जले पृथिवीत्वं नास्ति पृथिव्यां न जलत्वमिति । यदि हि जलावयविनि पृथिवीत्वं स्यात् उपलभ्येत, न चोपलभ्यते तस्मान्नास्तीति तर्कपुरस्कारः अत्रापि द्रष्टव्य :। एवञ्च यद्वस्तु यत्र न कदापि भविष्यति न च कदाचिद्भूतं तस्य वस्तुनस्तत्रात्यन्ताभावो मन्तव्यः । तदुक्तं न्यायकन्दल्यां श्रीधरभट्टैः अभावनिरूपणावसरे यथा - स च चतुर्व्यूहः प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावश्चेति इति ।

**परामृष्टाः ग्रन्थाः**


१. प्रशस्तपादभाष्यम् – Sri Satguru Publications, Indological and oriental Publishers, Delhi, 110007
२. वैशेषिकसूत्रोपस्कारः - Vyasa Prakashan, D16/13, Manmandir, Varanasi 221001
३. वैशेषिकरसायनम् - Sri Uttamur Viraraghavacharya, 5, Wason st, madras
४. न्यायसिध्दान्तमुक्तावली ( दिनकरी-रामरुद्री-प्रभासहिता) - Sri Balamanorama Press, Madras
५. तर्कसङ्ग्रहः ( दीपिकाप्रकाशिका ) Elago Achukoodam, Mylapore, Madras 600004


[१] वैशेषिकसूत्रम् 9.1.3
[२] वैशेषिकसूत्रम् 9.1.6
[३] वैशेषिकसूत्रम् 9.1.4
[४] वैशेषिकसूत्रम् 9.1.5
[५] वैशेषिकसूत्रम् 9.1.9


ISSN : 2249-538X

# स्वतःप्रामाण्यवादविमर्शः

**(ज्ञानस्य प्रामाण्यनिश्चये मीमांसासिद्धान्तस्य विमर्शः ।)**

श्री जैमिनः जयेशभाई दवे*
सहायकाचार्यः, भारतीयज्ञानपरम्परा,
डा. बाबासाहेब अम्बेड्कर मुक्तविश्वविद्यालयः,
अहमदाबाद

***लेखसारः*** *– अस्मिन् शोधपत्रे भारतीयज्ञानमीमांसायाः प्रमुखस्य विषयस्य—**'स्वतःप्रामाण्यवादस्य'** शास्त्रीय-पद्धत्या तार्किकी समीक्षा विहिता अस्ति । मीमांसादर्शनमनुसारं ज्ञानस्य प्रामाण्यम् उत्पत्तौ ज्ञप्तौ च स्वतः एव सिध्यति । यथोक्तं श्लोकवार्तिके— **"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।"***

*एतेन सिद्धान्तेन मीमांसकाः अनवस्थादोषं वारयन्तः वेदानाम् 'अपौरुषेयत्वं' स्थापयन्ति । भट्टमते 'ज्ञाततावादेन' प्रभाकरमते च 'त्रिपुटीप्रत्यक्षवादेन' अस्य उपपत्तिः क्रियते ।*

*परन्तु नैयायिकाः अस्य खण्डनं कृत्वा 'परतःप्रामाण्यवादं' समर्थयन्ति । तेषां मते ज्ञानं तटस्थं भवति; प्रामाण्यं तु गुणैः (उत्पत्तौ) संवादिप्रवृत्त्या च (ज्ञप्तौ) परतः एव गृह्यते । यदि सर्वं ज्ञानं स्वतःप्रमाणं स्यात्, तर्हि लोके संशयज्ञानस्य भ्रमज्ञानस्य च अनुपपत्तिः प्रसज्येत ।*

*प्रस्तुतप्रबन्धः मीमांसायाः स्वतःप्रामाण्यस्य मनोवैज्ञानिकपक्षं स्वीकुर्वन्नपि, न्यायशास्त्राधारेण संशयोत्पत्ति-भ्रमविवेक-प्रवृत्तिसामर्थ्यादिभिः तर्कैः तस्य सीमाः निरूपयति । अयं विमर्शः प्रमाणानां तुलनात्मकमूल्याङ्कनाय एकः सार्थकः प्रयासः अस्ति ।*

***कूटशब्दाः*** *– स्वतःप्रामाण्यवादः, मीमांसादर्शनम्, परतःप्रामाण्यवादः, न्यायशास्त्रम्, श्लोकवार्तिकम्, उत्पत्तिः, ज्ञप्तिः, संवादिप्रवृत्तिः, अनवस्थादोषः ।*

## १.१ भारतीयदर्शनस्य ज्ञानमीमांसा

अस्मिन् अनुच्छेदे भारतीयदर्शनस्य चरमोद्देश्यत्वेन निःश्रेयससिद्धिः पुरुषार्थचतुष्टयप्राप्तिश्च दर्शिता, यस्याः मूलं तत्त्वज्ञाने ज्ञानमीमांसायां च निहितमस्ति । न्यायसूत्रभाष्यस्य प्रमाणेन —

**"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिकाम्यत्वादर्थवत्प्रवृत्तिः"**

(न्यायसूत्र-१.१.१ वात्स्यायनभाष्यम्)

इति रीत्या निखिलः व्यावहारिकः पारमार्थिकश्च व्यवहारः प्रमाणाधीनः एव सिध्यति । अत्र ज्ञानस्य द्वैविध्यं (प्रमा अप्रमा च) प्रतिपाद्य, मीमांसक-नैयायिकयोः प्रमाणलक्षणभेदसहितं (अनधिगतातत्त्वावेदकत्वं यथार्थानुभवसाधनत्वञ्च) एतद् स्पष्टीकृतं यद् प्रमाणस्य सत्यत्वनिश्चयं विना प्रमेयसिद्धिः असम्भवा भवति ।

## १.२ प्रामाण्यवादस्य अवधारणा

ज्ञानस्य उत्पत्तौ प्रकाशे च कश्चन महान् संशयः दार्शनिकजगति समुत्पद्यते— यद् अस्माभिः अनुभूयमानं ज्ञानं स्वतः एव यथार्थं भवति उत तस्य यथार्थत्वसाधनाय कस्यापि बाह्यसाधनस्य आवश्यकता वर्तते? एष एव विचारः भारतीयदर्शनशास्त्रेषु 'प्रामाण्यवादः' इति नाम्ना प्रसिद्धः अस्ति । अस्मिन् विषये मुख्यरूपेण द्वौ

***सम्पर्कसूत्रम्** - 9979198954, Email- Jaimindave991@gmail.com

पक्षौ दृश्येते— 'स्वतःप्रामाण्यवादः' तथा 'परतःप्रामाण्यवादः'। अयमेव विमर्शः माधवाचार्येण सर्वदर्शनसङ्ग्रहे बहुधा स्पष्टीकृतः अस्ति— **"प्रमाणत्वं स्वतः सिद्धं परतः चेति चिन्त्युते"** (सर्वदर्शनसङ्ग्रहः, जैमिनीयदर्शनम्)। स्वतःप्रामाण्यवादिनां मते ज्ञानं स्वकीयेन जन्मना सहैव प्रामाण्यमपि प्राप्नोति, तस्य निश्चयाय ज्ञानान्तरं न अपेक्ष्यते। यथा घटज्ञाने जाते सत्यपि 'इदं घटज्ञानं यथार्थं न वा' इति जिज्ञासा सामान्यतः न जायते, पुरुषश्च जलानयनाय प्रवर्तते। परतःप्रामाण्यवादिनस्तु कथयन्ति यत् ज्ञानं केवलं वस्तुं प्रकाशयति, परन्तु तस्य प्रामाण्यं तु उत्तरकालीनेन व्यावहारिकसामर्थ्येन (संवादिप्रवृत्त्या) एव सिद्ध्यति। एषः प्रामाण्यनिश्चयस्य प्रश्नः केवलं तार्किककुतूहलं नास्ति, अपितु निखिलस्यापि व्यावहारिकसत्यस्य व्यावहारिकविश्वासस्य च मेरूदण्डः वर्तते।

## १.३ मीमांसादर्शनस्य मुख्योद्देश्यम्

अस्मिन् अनुच्छेदे मीमांसादर्शनस्य मुख्यमुद्देश्यं वेदानाम् 'अपौरुषेयत्वं' नित्यत्वञ्च रक्षितुम् उद्दिष्टमस्ति। वेदेषु वक्तुः पुरुषाभावत्वात् मानवीय-भ्रान्ति-प्रमादादिदोषाणाम् आशङ्का एव न सम्भवति। एतदर्थमेव आचार्यकुमारिलभट्टेन श्लोकवार्तिकस्य कारिकया (४७) ज्ञानस्य 'स्वतःप्रामाण्यवादः' समर्थितः, यस्य तुलना अग्नेः स्वाभाविक्या दाहिकशक्त्या सह कृता। अतः ज्ञानसामग्र्यामेव प्रामाण्यस्यापि शक्तिः अन्वर्तिनी वर्तते इति कृत्वा वेदमन्त्राणाम् अर्थज्ञानं स्वतःप्रमाणमेव सिद्धं भवति।

## १.४ शोधपत्रस्य समस्या उद्देश्यं च

अस्मिन् भागे मीमांसाभिमत-स्वतःप्रामाण्यवादस्य खण्डनार्थं नैयायिकानां मरुमरीचिका-संशयादि-तर्काणां सप्रमाणं निरूपणं कृतमस्ति। न्यायकुसुमाञ्जलिसङ्केतेन (४.१) ज्ञप्तौ उत्पत्तौ च स्वतःप्रामाण्यस्य सीमाः प्रदर्श्य, अस्य शोधपत्रस्य मुख्यमुद्देश्यं मीमांसा-न्याययोः निष्पक्षं, प्रौढं, तार्किकञ्च मूल्याङ्कनं प्रतिपादितम्।

## २. स्वतःप्रामाण्यवादस्य तात्त्विकं स्वरूपम्

## २.१ उत्पत्तौ स्वतःप्रामाण्यम्

मीमांसादर्शनस्य सम्यगवलोकनेन इदं स्पष्टं भवति यद् ज्ञानस्य प्रामाण्यं सर्वथा स्वाभाविकं वर्तते, न तु आगन्तुकम्। उत्पत्तौ स्वतःप्रामाण्यस्य अयमभिप्रायः यद् यानि कारणानि सामान्यरूपेण ज्ञानं जनयन्ति, तान्येव कारणानि ज्ञानस्य यथार्थत्वमपि (प्रमात्वमपि) जनयन्ति। ज्ञानसामग्र्याः अतिरिक्तं कस्यापि बाह्यगुणस्य उपेक्षा अत्र न विधीयते। न्यायमते तु ज्ञानस्य प्रामाण्यं जनयितुं गुणानाम् अपेक्षा भवति (यथा चक्षुरिन्द्रियस्य स्वच्छत्वं पित्तरहितत्वं च गुणः), परन्तु मीमांसकाः एतद् नाङ्गीकुर्वन्ति। तेषां मते कारणसामग्र्यां दोषाणाम् अभाव एव पर्याप्तः अस्ति, न तु कस्यापि अतिरिक्तगुणस्य सद्भावः। यथोक्तं माधवाचार्येण सर्वदर्शनसङ्ग्रहे— **"ज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेतुजन्यत्वाभावः उत्पत्तौ स्वतःप्रामाण्यम्"** (सर्वदर्शनसङ्ग्रहः, जैमिनीयदर्शनम्)। यदि ज्ञानजननाय गुणान्तरम् अपेक्षते, तर्हि तस्य गुणस्य यथार्थत्वसाधनाय अन्यः गुणः, तस्यापि अन्यः इति कृत्वा अनवस्थादोषः दुर्वारः स्यात्। अस्मिन् विषये एकं सत्यं निदर्शनं द्रष्टुं शक्यते— यथा लोके स्वच्छघटे चक्षुषा संयुक्ते सति यत् 'अयं घटः' इति रूपज्ञानं जायते, तत्तु केवलं चक्षुः-घट-संयोगमात्रेणैव उत्पद्यते (अत्र घटज्ञानस्य प्रमात्वं जनयितुं ईश्वरेच्छादयः वा अन्ये अलौकिकाः गुणाः पृथक्तया न अपेक्ष्यन्ते)। अतः प्रमात्वं ज्ञानस्य नैसर्गिकः धर्मः अस्ति, यः ज्ञानोत्पादक-सामग्रीतः स्वतः एव प्रादुर्भवति।


ISSN : 2249-538X

## २.२ ज्ञप्तौ स्वतःप्रामाण्यम्

ज्ञप्तौ स्वतःप्रामाण्यस्य अयं सिद्धान्तः वर्तते यद् येन ज्ञानेन स्वप्रकाशरूपेण वा अनुमानेन वा मुख्यं ज्ञानं गृह्यते, तेनैव ज्ञानेन तस्य ज्ञानस्य प्रामाण्यमपि गृह्यते। ज्ञानस्य निश्चयार्थं कस्यापि उत्तरकालीनस्य द्वितीयज्ञानस्य (ज्ञानान्तरस्य) अपेक्षा न भवति। यदा अस्माकं बुद्धौ किमपि ज्ञानं समुदेति, तदैव वयं तस्य ज्ञानस्य सत्यत्वमपि स्वीकुर्मः, न तु तस्य प्रामाण्यं परीक्षितुं प्रवृत्ताः भवामः। अत्र प्रसिद्धं शास्त्रीयवचनं श्लोकवार्तिकस्य व्याख्यायां न्यायकरिकायां दृश्यते— **"तद्द्ज्ञानविषयक-ज्ञानसामग्रीग्राह्यत्वं ज्ञप्तौ स्वतःप्रामाण्यम्"** (न्यायकरिका, प्रामाण्यवादः)। अयमभिप्रायः यद् ज्ञानग्राहकसामग्री एव प्रामाण्यस्यापि ग्राहिका भवति। यदि ज्ञप्तौ प्रामाण्यं स्वतः न स्यात्, अपितु परतः (ज्ञानान्तरेण) स्यात्, तर्हि महती तार्किकी विपत्तिः सम्भवेत्। यथा— प्रथमं ज्ञानं जातं 'अयं घटः', तस्य प्रामाण्यं निश्चितं द्वितीयेन ज्ञानेन 'अहं घटज्ञानवान्', तस्यापि द्वितीयज्ञानस्य प्रामाण्यं निश्चेतुं तृतीयज्ञानं, चतुर्थज्ञानम् इति क्रमेण बुद्धेः विश्रान्तिः क्वापि न भवेत्, लोके च कस्यापि वस्तुनः निश्चयः एव न स्यात्। अत्र प्रत्यक्षमुदाहरणं वर्तते यद् यदा पिपासुः पुरुषः पुरतः स्वच्छं जलं पश्यति, तदा सः 'इदं जलज्ञानं प्रमारूपं न वा' इति विचार्य समयं नष्टं न करोति, अपितु जलज्ञानक्षणे एव तस्य यथार्थत्वं निश्चित्य झटिति जलपानार्थं प्रवृत्तो भवति। एषा अच्युता प्रवृत्तिः एव ज्ञप्तौ स्वतःप्रामाण्यं द्रढयति।

## २.३ मीमांसा-उपशाखाणां दृष्टिकोणभेदः

### प्रभाकरमीमांसा (त्रिपुटीप्रत्यक्षवादः)

गुरुप्रभाकरमिश्रस्य मते ज्ञानं स्वप्रकाशकं वर्तते। सः 'त्रिपुटीप्रत्यक्षवादं' प्रतिपादयति, यस्यानुसारं कस्मिन्नपि एकस्मिन् ज्ञानक्षणे त्रीणि तत्त्वानि युगपदेव भासन्ते— ज्ञाता, ज्ञेयम् , ज्ञानं च। यथोक्तं शालिकनाथमिश्रेण प्रकरणपञ्चिकायाम्— **"मातृ-मेय-मितिरूपा त्रिपुटी युगपदेव भासते, ज्ञानं च स्वतःप्रकाशम्"** (प्रकरणपञ्चिका, प्रमारूपनिरूपणम्)। यथा दीपः घटं प्रकाशयन् स्वात्मानमपि स्वतः एव प्रकाशयति, तद्वदेव 'अहं घटं जानामि' इत्यत्र घटः (ज्ञेयम्), अहं (ज्ञाता), तथा एतदुभयावभासकं ज्ञानं स्वतः एव गृह्यते। अतः प्रभाकरमते ज्ञानस्य ग्राहकं ज्ञानं स्वतः एव अस्ति, तेनैव च प्रामाण्यस्यापि ग्रहणं स्वतः सिध्यति।

### भट्टमीमांसा (ज्ञाततावादः)

आचार्यकुमारिलभट्टपादानां दृष्टिकोणः प्रभाकरमतात भिन्नः अस्ति। भट्टमते ज्ञानं न तु प्रत्यक्षं भवति, नापि स्वप्रकाशम्, अपितु तत् अतीन्द्रियं (विषयगतव्यापारात्मकं) वर्तते। यदा इन्द्रियेण सह विषयस्य संयोगः भवति, तदा विषये 'ज्ञातता' अथवा 'प्रकटता' नाम कश्चन नवीनः अतिशयः (धर्मः) उत्पद्यते। अमुं ज्ञाततधर्मं दृष्ट्वा एव ज्ञानस्य अनुमानं विधीयते। श्लोकवार्तिके एतद् समर्थितम्— **"ज्ञानेन जनितो विषये कश्चिदतिशयो ज्ञातता नाम, तया च ज्ञानमनुमीयते"** (श्लोकवार्तिकम्, शून्यप्रवादः)। यथा तण्डुलस्य पाकेन तस्मिन् 'पक्वत्वं' दृश्यते, तेन च पाकक्रिया अनुमीयते, तथैव घटे 'ज्ञातता' दृष्ट्वा 'मया घटो ज्ञातः' इति ज्ञानस्य अनुमानं भवति। यया सामग्र्या अयं ज्ञाततालिङ्गकः ज्ञानस्यानुमानः क्रियते, तया एव सामग्र्या तस्य प्रामाण्यमपि स्वतः एव निश्चीयते।

### मुरारिमिश्रमतम् (अनुव्यवसायवादः)

मीमांसायाः तृतीयः सम्प्रदायः मुरारिमिश्रस्य वर्तते, यः 'मिश्रमतम्' इति नाम्ना प्रसिद्धः। मिश्रपादैः ज्ञानस्य प्रत्यक्षत्वं नैयायिकानामिव स्वीकृतम्, परन्तु प्रामाण्यविषये ते मीमांसासिद्धान्तमेव रक्षन्ति। तेषाम् अनुसारेण

प्रथमं व्यवसायात्मकं ज्ञानं जायते 'अयं घटः' । तदनन्तरं तस्य ज्ञानस्य प्रकाशकः कश्चन मानसप्रत्यक्षः भवति, यः 'अनुव्यवसायः' उच्यते (यथा— 'अहं घटज्ञानवान्')। मुरारिमिश्रस्य वैशिष्ट्यम् इदम् अस्ति यद् अयं अनुव्यवसायः केवलं ज्ञानं न गृह्णाति, अपितु ज्ञानसहितं तस्य प्रामाण्यमपि तस्मिन्नेव क्षणे स्वतः एव गृह्णाति । यथोक्तं दार्शनिकपरम्परायाम्— **"व्यवसाये न, किन्तु अनुव्यवसायेन एव ज्ञानं प्रामाण्यं च युगपद् गृह्यते"** (मिश्रमतविमर्शः) । अतः ज्ञानग्राहक-अनुव्यवसायेनैव प्रामाण्यस्य ग्रहणात् अत्रापि स्वतःप्रामाण्यस्य मर्यादा अक्षुण्णा एव तिष्ठति ।

## ३. अप्रामाण्यस्य परतः स्वरूपम्

### ३.१ दोषज्ञानेन अप्रामाण्यनिश्चयः

मीमांसादर्शने यत्र ज्ञानस्य प्रामाण्यं सर्वथा स्वाभाविकं स्वतःसिद्धं च अभ्युपगतं वर्तते, तत्रैव अप्रामाण्यं सर्वथा परतः आगन्तुकं च मन्यते। अस्य अयमभिप्रायः यद् ज्ञानं स्वरूपतः कदापि मिथ्या न जायते, अपितु कारणसामग्र्याः विकृत्या एव तत्र अप्रमात्वं प्रविशति । ज्ञानस्य उत्पत्तौ अप्रामाण्यं कारणदोषैः जन्यते, तथा च ज्ञप्तौ (निश्चये) तद् बाह्यसाधनेन एव परिच्छिद्यते । यथोक्तं भट्टकुमारिलपादैः श्लोकवार्तिके— **"तस्माद् वक्तुरभावेन न स्युर्दोषा निरासदाः । स्वतःसिद्धं च प्रामाण्यमप्रामाण्यं च परतः ॥"** (श्लोकवार्तिकम्, चोदनासूत्रम्, कारिका ८५) । अस्य अयमर्थः यद् ज्ञाने भासमानं मिथ्यात्वं तु कारणगतान् दोषान् ज्ञात्वा एव परतः निश्चीयते ।

अस्मिन् अनुच्छेदे मीमांसकाभिमतस्य 'अप्रामाण्यस्य परतः निश्चयात्मकस्य' पक्षस्य समर्थनं शास्त्रीयेण दृष्टान्तेन कृतमस्ति । कामलारोगग्रस्तः पुमान् पित्तदोषवशात् श्वेतशङ्खे 'पीतः शङ्खः' इति भ्रमं प्राप्नोति । अत्र ज्ञानस्य अप्रामाण्यं न स्वतः, अपितु नेत्रे विद्यमान-पित्तदोषस्य परिज्ञानेन (कारणदोषज्ञानेन) परतः एव सिद्धं भवति ।

### ३.२ बाधकज्ञानेन अप्रामाण्यम्

ज्ञप्तिपक्षे अप्रामाण्यस्य निश्चयाय अपरः प्रमुखः हेत्वाभासपरिहारकः तर्कः 'बाधकज्ञानम्' इति वर्तते। यदा पूर्वमुत्पन्नं ज्ञानं बलवता उत्तरकालीनेन ज्ञानेन सर्वथा बाध्यते, तदा पूर्वज्ञानस्य अप्रामाण्यं निश्चीयते॥ यत् जागतिकव्यवहारे भ्रमात्मकं ज्ञानं भवति, तत् तावत्पर्यन्तं सत्यमिव भासते, यावत्पर्यन्तं तद्विरोधि किमपि प्रबलावेद्यं बाधकज्ञानं नोत्पद्यते । अस्मिन् सन्दर्भे शास्त्रप्रमाणं सर्वदर्शनसङ्ग्रहे समुद्धृतं वर्तते— **"उत्तरमुत्पद्यमानं बाधकज्ञानं पूर्वज्ञानस्य अप्रामाण्यं ज्ञापयति, यथा शुक्तिरजतज्ञाने"** (सर्वदर्शनसङ्ग्रहः, जैमिनीयदर्शनम्) ।

अत्र अच्युतम् उदाहरणं वर्तते शुक्तिकायाम् रजतस्य भ्रमः । यदा कश्चन जनः दूरात् प्रकाशमानां शुक्तिकां पश्यति, तदा तस्य बुद्धौ 'इदं रजतम्' इति यथार्थवद् ज्ञानं जायते, स च तं क्रेतुं प्रवर्तते । परन्तु यदा सः समीपं गत्वा सम्यक् निरूपयति, तदा तस्य 'नेदं रजतं, शुक्तिकेयम्' इति नवीनं दृढं च बाधकज्ञानं समुत्पद्यते । एतद् उत्तरकालीनं बाधकज्ञानं पूर्वतनस्य रजतज्ञानस्य मिथ्यात्वं परतः एव स्फुटं करोति । अतो मीमांसकाः वदन्ति यद् बाधकज्ञानाद् एव जगतः सर्वेषां भ्रमाणां परीक्षणं परतः भवति, येन स्वतः सिद्धस्य ज्ञानप्रामाण्यस्य व्याघातः न भवति ।


ISSN : 2249-538X

## ४. नैयायिकानां पूर्वपक्षः :- परतःप्रामाण्यवादः

### ४.१ परतःप्रामाण्यवादस्य लक्षणम्

न्यायवैशेषिकदर्शने मीमांसकाभिमतस्य स्वतःप्रामाण्यवादस्य सर्वथा खण्डनं कृत्वा 'परतःप्रामाण्यवादः' प्रतिष्ठापितः । नैयायिकानां मते ज्ञानं स्वभावतः उदासीनं भवति, तस्य प्रामाण्यं वा अप्रामाण्यं वा उभयमपि स्वोत्पादक-सामग्रीतः बहिः अन्यैः आगन्तुकैः कारणैः एव उत्पद्यते ज्ञायते च। ज्ञानग्राहिका सामग्री केवलं ज्ञानस्वरूपं गृह्णाति, न तु तस्य यथार्थत्वम्। यथोक्तं गङ्गेशोपाध्यायैः तत्त्वचिन्तामणौ— **"तद्वति तत्प्रकारकानुभवत्वं प्रमात्वम्, तत् च परतः एव उत्पद्यते ज्ञायते च"** (तत्त्वचिन्तामणी, प्रामाण्यवादः) । अस्य अयमर्थः यद् ज्ञानस्य यथार्थत्वं सर्वदा बाह्यसाधनाधारितं भवति । यदि ज्ञानं स्वतः एव प्रमाणं स्यात्, तर्हि लोके सत्य-असत्ययोः विवेकः एव विनश्येत् । अतः परतः एव प्रामाण्यस्य उत्पत्तिः ज्ञप्तिश्च अङ्गीकर्तव्या, येन व्यावहारिकजगतः सत्यता सुरक्षिता तिष्ठति ।

### ४.२ उत्पत्ति-ज्ञप्त्योः परतः निरूपणम्

उत्पत्तिपक्षे न्यायदर्शनस्य अयं दृढः सिद्धान्तो वर्तते यद् ज्ञानस्य प्रामाण्यं केवलं ज्ञानसामान्यसामग्रीतः न जायते, अपितु कारणेषु विद्यमानैः 'गुणैः' जन्यते । यथा प्रत्यक्षज्ञाने चक्षुरादीनां काच-कमलादिदोषरहितत्वं, सादृश्यादिज्ञानं च 'गुणः' उच्यते। यथोक्तं विश्वनाथपञ्चाननेन कारिकावल्याम्— **"प्रमाया गुणजन्यत्वं सर्वैरेव इष्यते"** (कारिकावली, गुणनिरूपणम्) । यदि गुणातिरिक्तं केवलं ज्ञानत्वमात्रेण प्रामाण्यं स्यात्, तर्हि भ्रमात्मकज्ञानेऽपि ज्ञानत्वस्य सत्त्वात् तत्रापि प्रामाण्यं प्रसज्येत ।

ज्ञप्तिपक्षे अपि ज्ञानस्य प्रामाण्यं स्वतः न ज्ञायते, अपितु 'संवादिप्रवृत्त्या' अर्थात् कार्यसफलतालिङ्गकेन अनुमानेन एव निश्चीयते । यथोक्तं वात्स्यायनमुनिना न्यायभाष्ये— **"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिकाम्यत्वादर्भवत्प्रवृत्तिः, सा च संवादिप्रवृत्तिरुच्यते"** (न्यायसूत्रभाष्यम्, १.१.१) । अत्र एकं यथार्थं वैज्ञानिकं च उदाहरणं वर्तते यद् यदा कश्चन तृषार्तः पुरुषः पुरतः नदीतीरे जलं पश्यति, तदा तस्य बुद्धौ प्रथमतः 'इदं जलम्' इति ज्ञानं भवति । तस्मिन् क्षणे तस्य ज्ञानस्य प्रामाण्यं स्वतः न भासते । यदा सः तत्र गत्वा जलं पिबति, तस्य पिपासा च शाम्यति (सफला प्रवृत्तिः भवति), तदा सः अनुमिनोति यद् 'मम पूर्वतनं जलज्ञानं प्रमाणम् आसीत्, सफलप्रवृत्तिजनकत्वात्' । अनेन प्रकारेण उत्पत्तौ गुणजन्यत्वं ज्ञप्तौ च सफलप्रवृत्तिजन्यत्वं परतः एव सिद्धं भवति ।

### ४.३ मीमांसासिद्धान्तस्य खण्डनम्

नैयायिकाः मीमांसकाभिमतं स्वतःप्रामाण्यं खण्डयितुं 'संशयज्ञानस्य' अकाट्यं तर्कम् उपस्थापयन्ति । यदि मीमांसासिद्धानुसारं सर्वं ज्ञानं उदयक्षणे एव स्वतःप्रमाणं निश्चितं स्यात्, तर्हि लोके कदापि, कस्यापि वस्तुनः दर्शने 'संशयः' एव न उत्पद्येत् । यथोक्तं जयन्तभट्टेन न्यायमञ्जर्याम्— **"यदि च ज्ञानसामग्रीतः एव प्रामाण्यनिश्चयः स्वतः स्यात्, तर्हि मरुमरीचिकादौ संशयानुपपत्तिः"** (न्यायमञ्जरी, प्रामाण्यवादः) ।

अस्मिन् अनुच्छेदे न्यायदर्शनाभिमतः 'संशयोत्पादकः' तर्कः मरुमरीचिकायाः दृष्टान्तेन सङ्क्षेपतः उपस्थापितः अस्ति । मध्याह्ने मरुभूमौ सूर्यकिरणान् दृष्ट्वा पथिकस्य मनसि 'किमिदं जलं नु भ्रमः' इति जायमानः संशयः एव एतद् साधयति यद् ज्ञानस्य स्वतःप्रामाण्यं न सर्वत्र घटते, अपितु प्रामाण्यनिश्चयार्थं परतः परीक्षेव एकमात्रं तार्किकं साधनं वर्तते ।

## ५. मीमांसासिद्धान्तस्य तार्किकी समीक्षा

### ५.१ संशयस्यानुपपत्तिः

मीमांसाभिमतस्य स्वतःप्रामाण्यवादस्य निकषे स्थापने सर्वतः प्रबला तार्किकी बाधा 'संशयस्यानुपपत्तिः' इति वर्तते । यदि मीमांसकानां मतेन सर्वमेव ज्ञानं स्वकीयोत्पत्तिलोके ग्राहकांशे च प्रामाण्यं स्वतः एव निश्चिनोति, तर्हि प्रामाण्यविषये मनुष्याणां 'किमिदं ज्ञानं यथार्थं न वा' इति संशयावभासो न भवेत् । यथोक्तं उदयनाचार्यैः न्यायकुसुमाञ्जलौ— **"न च स्वतः परिच्छेदे संशयो भवेत्"** (न्यायकुसुमाञ्जलिः, ४.३) ।

अत्र यथार्थं निदर्शनं वर्तते यद् यदा कश्चन जनः मन्दान्धकारे पुरः किमपि दीर्घं वस्तु पश्यति, तदा तस्य बुद्धौ 'अयं स्थाणुः वा पुरुषो वा' इति संशयः जायते । यदि तस्य दर्शनज्ञानस्य प्रामाण्यं तस्मिन्नेव क्षणे स्वतः एव अगृहीष्यत, तर्हि संशयस्य उगमः एव सर्वथा असम्भवः अभविष्यत् । अतः संशयप्रतीतिः स्वतःप्रामाण्यस्य व्यापकतायाम् एकं दृढं तार्किकं प्रतिबन्धं जनयति, परतःपरीक्षणस्य च मार्गं प्रशस्तं करोति ।

### ५.२ भ्रमस्य (ख्यातिवादस्य) समीक्षा

भ्रमस्य व्याख्याने अपि मीमांसायाः उपशाखाणां ख्यातिवादाः तार्किकसङ्कटग्रस्तत्वेन समीक्षणीयाः सन्ति । प्रभाकरस्य 'अख्यातिवादः' भ्रमं पृथक् ज्ञानं न मन्यते, अपितु तं ग्रहण-स्मरणरूपं 'ज्ञानद्वयम्' इति वदति, यत्र 'विवेकाग्रहः' भवति । अपरपक्षे कुमारिलस्य 'विपरीतख्यातिवादः' अन्यस्य वस्तुनः अन्यथारूपेण भासनं स्वीकरोति । नैयायिकाः अस्य सर्वस्य ख्यातिजालस्य खण्डनं कृत्वा 'अन्यथाख्यातिवादम्' प्रतिष्ठापयन्ति । यथोक्तं गङ्गेशोपाध्यायैः— **"अख्यातिबाधेन अन्यथाख्यातिरेव न्याय्या, असतस्तभाने विरोधात्"** (तत्त्वचिन्तामणी, ख्यातिवादः) ।

अत्र प्रत्यक्षमुदाहरणं वर्तते यद् रङ्गभूमौ शुक्तिकां रजतत्वेन पश्यन् पुरुषः झटिति प्रवृत्तो भवति । यदि प्रभाकरमतमनुसृत्य अत्र केवलं स्मरण-ग्रहणयोः विवेकस्याभावः स्यात्, तर्हि विवेकस्याभावेन मनुष्यस्य 'रजतार्थिनी' प्रवृत्तिः कथं सम्भवति? अभावः कदापि प्रवृत्तेः कारणं न भवितुमर्हति । अतः भ्रमज्ञानं केवलं ज्ञानाभावो न भूत्वा एकं विशिष्टं विपर्ययज्ञानमेव अस्ति, यस्य अप्रामाण्यं बाधकेन परतः एव सिध्यति ।

### ५.३ अनवस्थादोषस्य विमर्शः

मीमांसकाः न्यायमते 'अनवस्थादोषं' उद्भावयन्ति यद् यदि प्रथमज्ञानस्य प्रामाण्यं द्वितीयेन सफलप्रवृत्तिज्ञानेन गृह्यते, तर्हि द्वितीयज्ञानस्यापि प्रामाण्यं निश्चेतुं तृतीयं ज्ञानम् अपेक्षते, एवं प्रकारेण बुद्धिः क्वापि न विश्राम्येत् । परन्तु अस्य दोषस्य परिहाराय मीमांसकैः यः स्वतःप्रामाण्यस्य आश्रयः गृहीतः, सः केवलं 'हठाग्रहः' एव प्रतीयते । नैयायिकाः अस्य उत्तरं ददति यद् सर्वत्र ज्ञानपरम्परायाः अपेक्षा न भवति । यथोक्तं वरदराजेन तार्किकरक्षायाम्— **"न च सर्वत्र प्रमाणापेक्षा, अनाभ्यासप्रवृत्तौ एव तस्याः उपयोगात्, अभ्यासदशायां च स्वतःसिद्धवद् व्यवहारात्"** (तार्किकरक्षा, प्रामाण्यनिरूपणम्) ।

अत्र लोकप्रसिद्धं निदर्शनं वर्तते यद् यः पुरुषः प्रतिदिनं स्वगृहे कूपजलं पिबति (अभ्यासदशा), तस्य तत्र जलज्ञाने प्रामाण्यसंशयो न जायते, अतः तत्र ज्ञानान्तरापेक्षा न भवति । केवलं यत्र नूतनजलादौ (अनाभ्यासदशा) सन्देहो भवति, तत्रैव परतः परीक्षा अपेक्ष्यते । अतः न्यायमते अनवस्था नास्ति, मीमांसकास्तु अनवस्थाभयेन स्वतःप्रामाण्यं बलाद् अङ्गीकृत्य तार्किकसत्यतायाः अपलापं कुर्वन्ति ।


ISSN : 2249-538X

## ५.४ व्यावहारिक-पारमार्थिक-पक्षयोः द्वन्द्वः

एतस्य सर्वस्य विमर्शस्य अन्ते एषः मूलभूतः प्रश्नः समुत्तिष्ठति यद् मीमांसाभिमतः स्वतःप्रामाण्यवादः किं लौकिकव्यवहारस्य यथार्थं रूपं उपस्थापयति, उत अयं केवलं वेदानां नित्यत्वं अपौरुषेयत्वं च रक्षितुं कल्पितः एकः 'दार्शनिकः सेतुः' अस्ति? शास्त्रदृष्ट्या अवलोकनेन स्पष्टं भवति यद् मीमांसायाः मुख्योद्देश्यं वेदानां स्वतःप्रामाण्यस्थापनमेव आसीत्। यथोक्तं शबरस्वामिना शाबरभाष्ये— **"चोदनालक्षणोऽर्थो धर्मः, तस्य च प्रामाण्यं न वक्तुरपेक्षते"** (मीमांसासूत्रभाष्यम्, १.१.२)।

यदि लौकिकव्यवहारे परीक्षां विना वयं सर्वं ज्ञानं स्वतःप्रमाणं स्वीकुर्मः, तर्हि स्वर्ण-लोहयोः, दुग्ध-जलयोः च भेदमज्ञात्वा जगति महती वञ्चना प्रसज्येत। विज्ञानमपि परीक्षण-निरीक्षणपद्धत्या एव प्रचलति, यत् न्यायस्य परतःप्रामाण्यवादस्य एव अनुकूलं वर्तते। अतः स्वतःप्रामाण्यवादः पारमार्थिक-वैदिकव्यवहारे वेदरक्षणार्थं यद्यपि एका महती प्रतिष्ठा अस्ति, तथापि व्यावहारिकजगति वैज्ञानिकनिकषे च न्यायस्य परतःप्रामाण्यवादः एव अधिकः समीचीनः, तार्किकश्च सिद्धो भवति।

## ६.१ शोधस्य निष्कर्षः

मीमांसादर्शनस्य स्वतःप्रामाण्यवादः मनोवैज्ञानिकदृष्ट्या अतीव श्लाघनीयः व्यावहारिकश्च वर्तते। मानवः स्वभावतः आदौ प्राप्यमाणं सर्वमपि ज्ञानं सत्यत्वेनैव स्वीकरोति, न हि कोऽपि जन्तुः जन्मतः एव सर्वत्र संशयानः प्रवृत्तो भवति। परन्तु यदा तार्किक-वैज्ञानिकपरीक्षणपद्धतेः निकषोपले अस्य सिद्धान्तस्य परीक्षणं विधीयते, तदा न्यायदर्शनस्य परतःप्रामाण्यवादः एव अधिकः सुसङ्गतः प्रतीयते। यथोक्तं मम्मटाचार्यैः काव्यप्रकाशे अपि मीमांसान्याययोः मतभेदं सङ्केतयद्भिः— **"ज्ञानस्य प्रामाण्यं स्वतः परतः चेति विचारप्रस्थानं भिन्नं दृश्यते"** (काव्यप्रकाशः, सङ्केतटीका)। अत्र एकं सत्यं निदर्शनं वर्तते यद् वयं मार्गे गच्छन्तः पुरोवर्तिनं सेतुं दृष्ट्वा आदौ स्वतः एव तस्य दृढत्वं मन्महे (मनोवैज्ञानिकः स्वतःपक्षः), परन्तु यदा तस्य उपरि गुरुभारयुक्तं वाहनं नेणीतव्यं भवति, तदा तस्य भारवहनक्षमतायाः यान्त्रिकी परीक्षा क्रियते (तार्किकः वैज्ञानिकश्च परतःपक्षः)। अतः सत्यान्वेषणाय उभयोरपि दर्शनयोः सम्यक् समन्वयः आवश्यकः अस्ति।

## परामृष्टाः ग्रन्थाः


१. भट्टः, कुमारिलः। श्लोकवार्तिकम्। प्रथमो भागः। तिरुवनन्तपुरम्: राजकीयमुद्रणालयः; १९४३।
२. मिश्रः, शालिकनाथः। प्रकरणपञ्चिका। वाराणसी: बनारस हिन्दू यूनिवर्सिटी; १९६१।
३. उपाध्यायः, गङ्गेशः। तत्त्वचिन्तामणिः। भागः १ (प्रामाण्यवादः)। कलकत्ता: एशियाटिक सोसाइटी; १९०१।
४. भट्टः, जयन्तः। न्यायमञ्जरी। वाराणसी: चौखम्बा संस्कृत सीरीज ऑफिस; १९७१।
५. मुनिः, गोतमः (वात्स्यायनभाष्यसहित)। न्यायदर्शनम्। वाराणसी: सुधामुद्रणालयः; १९८४।
६. उदयनाचार्यः। न्यायकुसुमाञ्जलिः। वाराणसी: चौखम्बा संस्कृत संसथान; १९१२।
७. माधवाचार्यः। सर्वदर्शनसङ्ग्रहे। कलकत्ता: एशियाटिक सोसाइटी; १८५८।
८. मिश्रः, वाचस्पतिः। न्यायवार्तिकतात्पर्यटीका। वाराणसी: चौखम्बा संस्कृत सीरीज; १९२५।
९. विश्वनाथ-पञ्चानन-भट्टाचार्यः। कारिकावली। मद्रास: बालमनोरमा प्रेस; १९२३।
१०. पार्थसारथिमिश्रः। शास्त्रदीपिका। वाराणसी: चौखम्बा संस्कृत सीरीज; १९१६।

# "सिद्धान्तलक्षणदीधितिग्रन्थोक्तदिशा द्रव्ये संयोगसामान्याभावसिद्धिः"

**(एकमनुशीलनम्)**

श्री सुशोभनसिंहमहापात्रः*
शोधच्छात्रः, के.सं.वि.,
देवप्रयागः

***लेखसारः*** *– सर्वेषां दर्शनानां परमं प्रयोजनं भवति मोक्षः । मोक्षसाधनत्वेन सर्वेऽपि दार्शनिकाः तत्त्वज्ञानमेव अभ्युपगच्छन्ति । यदुक्तं न्यायसूत्रकारैः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[१] । नव्यनैयायिकाः तु प्रमाणादिषोडशपदार्थान् वैशेषिकसम्मतसप्तपदार्थेष्वन्तर्भावयित्वा सप्तपदार्थानेव अङ्गीकृतवन्तः । प्रस्तुतशोधप्रबन्धे तेषु सप्तपदार्थेषु द्रव्याख्ये पदार्थे संयोगाख्यगुणपदार्थस्य सामान्याभावसिद्धिः विचारिता विद्यते । तत्र द्रव्ये संयोगसामान्याभावसिद्धौ यत्तुवादिनामाशयः तेषां मतखण्डनं तथा चान्ते मूलसिद्धान्तः दीधितिकृदुक्तदिशा उपस्थापिता विद्यते ।*

***कूटशब्दाः*** *– तत्त्वज्ञानम्, अवच्छेदकम्, अवच्छिन्नम्, प्रतियोगिता, अनुयोगिता, सामान्याभावः, विशेषाभावः, अनुगमश्चेति ।*

## भूमिका

मुमुक्षूणां परममोक्षकारणं भवति पदार्थ तत्त्वज्ञानम् । यदुक्तं दीपिकायां "पदार्थतत्त्वज्ञानस्य परमप्रयोजनं मोक्षः"[२] तादृशपदार्थतत्त्वज्ञानं विना केनापि अन्येन मोक्षः नोपलभ्यते । पदार्थेष्वपि परमात्मनः तत्त्वज्ञानं भवति तादृशमोक्षप्राप्तिं प्रति परमकारणम् । यदुक्तमुपनिषदि "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" मननं तावत् परमात्मनि तदितरयावत्पदार्थभेदसाधनम् । तादृशानुमानं भेदप्रतियोगियावत्पदार्थज्ञानं विना न भवति । अभावबुद्धिं प्रति प्रतियोगिज्ञानस्य कारणत्वात् । यदुक्तं अभावलक्षणप्रसङ्गे "प्रतियोगिज्ञानाधीनज्ञानविषयत्वं अभावस्य लक्षणम्"[३] । तदर्थमेव नैयायिकाः वैशेषिकाश्च सर्वेषां पदार्थानां तत्त्वज्ञानार्थं तेषां सोद्देशं लक्षणपरीक्षे निरूपयामासुः । तत्र नैयायिकाः यद्यपि षोडशपदार्थवादिनः । तथापि द्रव्यादिसप्तपदार्थानां विषयेऽपि तेषां सम्मतिः इति भाष्यवचनात् सिद्ध्यति । तथैव केचन नैयायिकाः न्यायसम्मतषोडशपदार्थान् सप्तपदार्थेषु अन्तर्भावयन्तः सप्तपदार्थेषु स्वसम्मतिं संरक्षितवन्तः । ते च पदार्थाः द्रव्यगुणकर्मसामान्यविशेषसमवायाभाव-संज्ञकाः । यदुक्तं भाषापरिच्छेदे -

"द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् । समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥"[४]

**सिद्धान्तलक्षणकारस्य परिचयः**

मानाधीना मेयसिद्धिरिति भवति सर्वतन्त्रसिद्धान्तः । सर्वेऽपि दार्शनिकाः पदार्थतत्त्वज्ञानार्थं कानिचन प्रमाणानि अवश्यमङ्गीकुर्वन्ति । तदर्थमेव सांख्यकारिकायामपि कारिकांशः अवलोक्यते यत् "प्रमेयसिद्धिः प्रमा-

---

***सम्पर्कसूत्रम्** - 8101312824, Email- susobhansinhamahapatra@gmail.com

[१]न्यायसूत्रम्(१.१.१)
[२]तर्कदीपिका(पृ.१८८)
[३]बालव्युत्पत्तिः(पृ.२)
[४]भाषापरिच्छेदः(का.२)

णाद्धि[१]" इति । न्यायसूत्राणां भाष्यारम्भे वात्स्यायनः कथितवान् यत् "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्[२]" । अनेन भाष्यवचनेन तु प्रमाणानां सार्थक्यमपि सिद्धं भवति । तेषां न्यायाभिमतप्रमाणानां पृथग्विवेचनार्थं स्वनिर्मित-अपूर्वग्रन्थरचनशैल्या बौद्धानां खण्डनाय मिथिलागर्भसम्भूतेन गङ्गेशोपाध्यायेन तत्त्वचिन्तामण्याख्यः प्रमाणविवेचनपरकः नव्यन्यायग्रन्थः रचितः । तत्र सर्वेषां प्रमाणसम्बद्धमतानां पर्यालोचनं कृत्वा स्वसिद्धान्तं प्रतिष्ठापयामास । तत्त्वचिन्तामणिशास्त्रं तु प्रत्यक्षादिचतुर्भिः खण्डैः विभक्तम् । "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति वाचस्पतिवचनमनुध्यानेन गङ्गेशोपाध्यायः अनुमानप्रमाणं विशेषेण विचारितवान् । अनुमानप्राणभूतायाः व्याप्तेः निरूपणप्रसङ्गे गङ्गेशः नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिरिति व्याप्तिजिज्ञासामुद्भाव्य व्याप्तेः साध्याभाववदवृत्तित्वादिपञ्चपूर्वपक्षलक्षणानां केवलान्वयिस्थलेषु अव्याप्तिं दर्शयित्वा व्याप्तेः सिंहव्याघ्रलक्षणमपि त्यक्त्वा व्यधिकरणधर्मावच्छिन्नाभावोपजीवितव्याप्तेः चतुर्दशलक्षणानि परित्यज्य सर्वदोषविनिर्मुक्तं सिद्धान्तलक्षणं निर्मितवान् ।

## दीधितिकारः

तत्त्वचिन्तामण्युपरि नैकाः टीकाः लिखिताः विद्यन्ते । तेषु टीकासु सर्वश्रेष्ठा तात्पर्यपूर्णा टीका भवति दीधितिटीका । अस्याः प्रसिद्धटीकायाः रचयिता भवति नवद्वीपचन्द्रः श्रीरघुनाथशिरोमणिभट्टाचार्यः । अस्य गुरुः सार्वभौमनिरुक्तिकर्ता सुप्रसिद्धनैयायिकः नवद्वीपनव्यन्यायपरम्परायाः प्रतिष्ठापकः वासुदेवसार्वभौमः । यद्यपीयं दीधितिटीका तत्त्वचिन्तामणिग्रन्थस्य टीकात्वेन व्यपदिष्टा विद्यते तथापि अनेके स्वतन्त्राः उत्कृष्टा च विषयाः अस्मिन् विचारिताः दृश्यन्ते ।

## द्रव्यलक्षणम्

वैशेषिकदर्शनप्रवक्ता महर्षिकणादः "क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणमि[३]"ति सूत्रेण द्रव्यं लक्षितवान् । कर्मणः सर्वेषु द्रव्येषु अवर्त्तमानतया न हि कर्मवत्त्वं द्रव्यसामान्यलक्षणं भवितुमर्हतीत्यतः गुणवत्त्वं द्रव्यलक्षणमिति स्थलान्तरानुधावनं सूत्रकारेण कृतम् । तत्रापि उत्पत्तिकालावच्छेदेन द्रव्ये गुणाभावात् तत्रापि द्रव्यलक्षणस्यातिव्याप्तिप्रसङ्गात् समवायिकारणत्वं द्रव्यत्वमिति लक्षणम् । यद्यपि क्रियासमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं, गुणसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमिति लक्षणं कृत्वा कदाचित् दोषाणां परिहारः कर्तुं शक्यते तथापि गौरवात् समवायिकारणं द्रव्यमिति द्रव्यस्य लक्षणं सूत्रकृता विहितम् । अस्यार्थस्तु समवायिकारणतावच्छेदकधर्मवत्वं द्रव्यत्वमिति द्रव्यसामान्यलक्षणम् । यदुक्तं भाषापरिच्छेदे "समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्[४]" तादृशसमवायिकारणताच्छेदकं भवति द्रव्यत्वं तद्वत्त्वं भवति द्रव्यसामान्यलक्षणम् । "समवायप्रागभावान्यतरसम्बन्धेन गुणाश्रयत्वं द्रव्यलक्षणमि"ति पदार्थकौमुद्यां काशीनाथतर्कपञ्चाननः । जलीयपरमाणौ प्रागभावसम्बन्धेन गुणाः न तिष्ठन्ति तद्गतरूपादिगुणानां नित्यत्वात् तत्राव्याप्तिवारणाय समवायसम्बन्धस्य कथनम् । तथा च उत्पत्तिकालीने द्रव्ये समवायेन गुणाभावात् तत्राव्याप्तिवारणार्थं प्रागभावसम्बन्धानुधावनम् ।

---

[१]सांख्यकारिका(का.४)
[२]न्यायसूत्रभाष्यम्(पृ.१)
[३]वैशेषिकसूत्रम्(१.१.१५)
[४]भाषापरिच्छेदः(का.२३)

## संयोगगुणः

"अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः"[१] इतिकारिकातः ज्ञायते यत् अप्राप्तयोः परस्परपृथक्सिद्धयोः पदार्थयोः या प्राप्तिः सैव संयोगपदवाच्या । संयोगस्य लक्षणं तावत् "संयुक्तव्यवहारासाधारणकारणत्वं संयोगस्य लक्षणम्" अर्थात् इमौ संयुक्तौ इति यो व्यवहारः तस्य असाधारणहेतुः भवति संयोगः । लक्षणस्य दण्डादावतिव्याप्तिवारणाय संयुक्तव्यवहारेति पदोपन्यासः । स संयोगः त्रिविधः अन्यतरकर्मजः, उभयकर्मजः, संयोगजसंयोगः इति । तेषु अन्यतरकर्मजः संयोगः भवति श्येनशैलादिसंयोगः । उभयकर्मजश्च संयोगः भवति मेषयोः युद्ध्यमानयोः संयोगः । तथा हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः भवति संयोगजसंयोगः ।

## सामान्याभावः

सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावत्वं सामान्याभावत्वमिति । यथा रूपं नास्ति, घटः नास्तीति । सामान्याभावः विशेषाभावादतिरिक्तः । केषाञ्चन मते तु विशेषाभावकूटः एव सामान्याभावः । इति मतं न समीचीनम् । यदुक्तं तत्त्वचिन्तामणेः सामान्याभावमाथुर्यां मथुरानाथः "सामान्यावच्छिन्नप्रतियोगिताकः वह्नित्वावच्छिन्नप्रतियोगिताकः, पृथगेव तत्तद्वह्नित्वावच्छिन्नप्रतियोगि-ताकादतिरिक्त एव"[२] । अन्यथा वायौ सकलप्रसिद्धरूपाभावे अवगतेऽपि "वायौ रूपमस्ति न वा" अथवा वायुः रूपवान्नवेति संशयः न स्यात् । यतोहि तत्र वायौ सकलविशेषाभावकूटनिश्चयस्य विद्यमानत्वात् । यदुक्तं तत्त्वचिन्तामणौ "अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चावगते वायौ रूपं न वा, वायुः रूपवान्नवेति संशयो न स्यात् विशेषाभावकूटस्य निश्चितत्वात्"[३] । दीधितिकृन्मतानुसारं तु अत्यन्ताभावः(घटो नास्ति) अन्योन्याभावश्च(घटो न) सामान्याभावः भवति । किन्तु ध्वंसप्रागभावयोः सामान्याभावत्वं नास्ति । यतोहि ध्वंसप्रागभावौ नहि सामान्यधर्मावच्छिन्नप्रतियोगिताकौ भवतः । घटस्य प्रागभावः ध्वंसश्च तत्तद्घटत्वावच्छिन्नप्रतियोगिताकः भवति । पक्षधरमिश्रस्य मतानुसारं घटस्य प्रागभावः उत्तरकालीनतद्घटत्वा-वच्छिन्नप्रतियोगिताकः ध्वंसश्च उत्तरकालीनतद्घटत्वावच्छिन्नप्रतियोगिताकः इत्यतः तयोः नहि सामान्याभावत्वम् ।

## द्रव्ये संयोगसामान्याभावसिद्धिः

गङ्गेशोपाध्यायः सिद्धान्तलक्षणग्रन्थे व्याप्तेः "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरि"[४]ति लक्षणं निगदितवान् । अत्र लक्षणघटकं यत् अत्यन्ताभावपदं तत्र विशेषणं भवति प्रतियोग्यसामानाधिकरण्यं तथा यत्सामानाधिकरण्यम् अर्थात् हेतुसामानाधिकरण्यम् । तादृशात्यन्तभावीयप्रतियोगितावच्छेदकावच्छिन्न-भिन्नं यत् साध्यं तेन साध्येन समं हेतोः सामानाधिकरण्यं व्याप्तिरिति लक्षणस्य सामान्यार्थः । अभावस्य विशेषणीभूतस्य प्रतियोग्यसामानाधिकरणस्य दलस्य निवेशसार्थक्यं सम्पादयितुं दीधितिकारः ग्रथयति यत् "अयं कपिसंयोगी एतद्वृक्षत्वादित्यादिसङ्ग्रहाय असमानाधिकरणान्तम्"[५]इति । अर्थात् कपिसंयोगी एतद्वृक्षत्वात् इत्यादि अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिवारणाय "प्रतियोग्यसमानाधिकरणः" इति दलं अभावविशेषणत्वेन प्रयुक्तम् । अत्रानुमानस्थले साध्यं भवति क-

[१]भाषापरिच्छेदः(का.११५)
[२]तत्त्वचिन्तामणिः,सामान्याभावप्रकरणम्, माथुरी (पृ.१२६)
[३]तत्त्वचिन्तामणिः, सामान्याभावप्रकरणम् (पृ. १२३)
[४]सिद्धान्तलक्षणम(पृ.१)
[५]सिद्धान्तलक्षणदीधितिः(पृ.८२)


ISSN : 2249-538X

पिसंयोगः । स च अव्याप्यवृत्तिः । इत्युक्ते स्वात्यन्ताभावसमानाधिकरण्यम् । अयं कपिसंयोगः स्वात्यन्ताभावः अर्थात् कपिसंयोगाभावसमानाधिकरणः एव भवतीत्यतः भवति अस्य अव्याप्यवृत्तित्वम् । तस्मात् प्रतियोग्य-सामानाधिकरण्यस्यानिवेशे तु एतद्वृक्षत्वाधिकरणे एतद्वृक्षे कपिसंयोगाभावोऽपि लक्षणघटकतया भवति इत्यतः अव्याप्तिः । किन्तु यदि निरुक्तदलस्य निवेशः क्रियते चेत् कपिसंयोगाभावः भवति प्रतियोगिसमानाधिकरणः त-स्मात् लक्षणघटकाभावपदेन तु कपिसंयोगाभावं धर्त्तुं नैव शक्यते तस्मात् घटपटाद्यभावमादाय लक्षणसमन्वयात् नाव्याप्तिसम्भावना ।

क्रमेऽस्मिन् दीधितिकारः यत्तुवादिनां नैयायिकानां मतमुत्थापयति यत् " इदं संयोगि द्रव्यत्वात् इत्यत्र अव्याप्तिवारणाय तत्"[१] । द्रव्ये तु संयोगविशेषाभावं सर्वे स्वीकुर्वन्ति किन्तु संयोगसामान्याभावविषये विप्रतिपत्तिः विद्यते तस्मात् तं विप्रतिपत्तिमुत्थाप्य विचारयितुं दीधितिकृतः इयं प्रवृत्तिः । तेषामयमाशयः यत् गङ्गेशकृतलक्षणघटकप्रतियोग्यसमानाधिकरणपदं तु "संयोगि द्रव्यत्वात्" इत्यत्राव्याप्तिवारणाय प्रयुक्तम् । द्रव्यत्वाधिकरणे द्रव्ये संयोगः तिष्ठति तथा तदभावश्च तिष्ठति । अतः यदि अभावे निरुक्तं विशेषणं न दीयते चेत् संयोगाभावोऽपि लक्षणघटकः स्यात् । एवं द्रव्ये संयोगसामान्याभावं प्रतिपादयितुं तेषां युक्तिः भवति यत् यद्यपि वृक्षस्य शाखाप्रशाखादिषु सर्वदा संयोगस्यैव प्रत्यक्षं भवति अर्थात् शाखाद्यवच्छेदेन यद्यपि संयोगः तिष्ठति वृक्षत्वावच्छेदे संयोगसामान्याभावः एव तिष्ठति । अत्र आशङ्का जायते यत् प्रतियोगिप्रत्यक्षम् अभावप्रत्यक्षं प्रति कारणं भवति । यथा घटाभावप्रत्यक्षं प्रति भवति घटप्रत्यक्षं कारणम् । यथा अभावलक्षणप्रसङ्गे उक्तं विद्यते "प्रतियोगिज्ञानाधीनज्ञान-विषयत्वमभावस्य लक्षणम्" । तस्मात् संयोगाभावस्थलेऽपि तथा स्यात् । किन्तु वृक्षस्य शाखाप्रशाखादिषु संयोगस्य प्रत्यक्षं यद्यपि भवति तथापि तदभावस्य प्रत्यक्षं न भवति तस्मात् संयोगाभावः द्रव्ये कथं सिद्ध्यतीति आशङ्कायां यत्तुवादिनः उत्तरयन्ति "तत्र च अतीन्द्रियस्य संयोगस्य सत्त्वात्"[२] । इत्युक्ते द्रव्ये यथा साधारणसंयोगाः तिष्ठन्ति तथैव केचन अतीन्द्रियसंयोगाः अपि भवन्ति । किन्तु तेषामतीन्द्रियत्वात् संयोगसामान्यस्यापि प्रत्यक्षं न भवति । तथा संयोगसामान्यस्याप्रत्यक्षेण तदभावस्यापि अप्रत्यक्षत्वम् । एवञ्च वृक्षादिद्रव्यं परितः सर्वदा संयोगस्य प्रत्यक्षं भवति तस्मादपि तदभावस्याप्रत्यक्षविरहः यतोहि प्रतियोगिज्ञानं सर्वदा अभावबुद्धौ प्रतिबन्धकं भवति । तमेवाशयं यत्तुवादिनः प्रकटयन्ति यत् "परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षे न संयोग इत्यादि नाध्यक्षम्"[३] । दीधितिकारः तन्नेति ग्रन्थेन यत्तुवादिनां मतं खण्डयति । तत्रायमाशयः यत् द्रव्ये कदापि संयोगसामान्याभावः स्थातुं नैव शक्नोति । चतुर्विधप्रमाणेषु केनापि प्रमाणेन द्रव्ये संयोगसामान्याभावस्यास्तित्वं साधयितुं नैव शक्यते । तस्मात् द्रव्ये संयोगसामान्याभावः न तिष्ठति ।

अस्यां स्थितौ यदि यत्तुवादिनः अनुमानप्रमाणमाश्रित्य स्वमतं प्रतिष्ठापयन्ति यत् "यो यदीय यावद्विशेषाभा-ववान् स तत्सामान्याभाववान्" इति व्याप्तिबलेन द्रव्ये विशेषाभावकूटवत्त्वहेतुना तदीयसामान्याभावः साध्यते । अर्थात् अत्र तु पक्षः भवति द्रव्यं, हेतुः भवति यत्सम्बन्धीययावद्विशेषाभावः तथा साध्यं भवति तत्सम्बन्धीय-सामान्याभावः । अर्थात् यत्पदेन किञ्चिदधिकरणं गृहीत्वा तदधिकरणे यस्य यावद्विशेषाभावः विद्यते तदधिकरणे तदीयसामान्याभावोऽपि विद्यते इति वक्तुं शक्यते । यथा यत्पदेन भूतलं गृहीत्वा तत्र यत्सम्बन्धीयः अर्थात् घटस-म्बन्धीयः यावद्विशेषाभावः यदि तिष्ठति अर्थात् नीलघटो नास्ति, पीतघटो नास्तीतिप्रकारेण यावद्विशेषाभावः तत्र

[१] सिद्धान्तलक्षणदीधितिः(पृ.८६)
[२] सिद्धान्तलक्षणदीधितिः(पृ.८६)
[३] सिद्धान्तलक्षणदीधितिः(पृ.८६)

भूतले यदि विद्यते तर्हि तत्र भूतले घटसामान्यस्यापि अभावो विद्यते । इत्थमनुमानप्रमाणेन तु द्रव्ये संयोगासामान्याभावः अनुमितो भविष्यति । इदं मतं खण्डयितुं दीधितिकारः कथयति यत् "यत्तदर्थयोः अननुगमात्"[१] । अर्थात् निरुक्तानुमानेन द्रव्ये संयोगसामान्याभावस्य सिद्धिः नैव सम्भवति यतोहि यत्तदादिपदेन सामान्यमुखी व्याप्तिः नैव सम्भवति । यतोहि तेषामनुगमः न भवति । "अनुगतप्रवृत्तिनिमित्तं भवति अनुगमः"[२] । यथा सर्वेषां घटानामनुगमो घटत्वम् । किन्तु यत्तदादिपदं विशेषस्य वाचकं भवति न तु सामान्यस्य वाचकम् । अर्थात् यत्पदेन यदा घटस्य ग्रहणं तदा तेन पदेन घटस्यैव ग्रहणं भविष्यति न तु पटादीनाम् । तस्मात् अननुगमात् अनेन यत्तदादिपदेन सामान्यव्याप्तेः प्रतिष्ठा नैव भवितुमर्हति । किन्तु प्राचीनैः यत्तदादिपदानां अनुगमः स्वीकृतः तस्मात् यत्तदादिपदघटितव्याप्त्या तु द्रव्ये कदाचित् संयोगसामान्याभावस्य सिद्धिः सम्भवतीति विचिन्त्य दीधितिकारः प्रकारान्तरेण खण्डयति यत् "एकावच्छेदेन यावद्विशेषाभाववत्त्वस्य उपाधित्वाच्च"[३] । अर्थात् यदि यत्तदादिपदानां अनुगमः कदाचित् स्वीक्रियते तदापि वृक्षे संयोगसामान्याभावस्य सिद्धिः नैव सम्भवति । यतोहि अस्मिन् अनुमाने "एकावच्छेदेन संयोगयावद्विशेषाभाव"रूपः उपाधिरस्ति । अतः उपाधेः सत्त्वात् अनुमानस्थलीयहेतुः साध्यव्यभिचारी भवतीत्यतः अनेनानुमानेन द्रव्ये संयोगसामान्यभावस्यानुमितिः नैव सम्भवति । तथा पुनः यो यदीयवादिनः कथयन्ति यत् "अयं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वात्"इति विशेषानुमानेन द्रव्ये संयोगसामान्याभावसिद्धौ न किञ्चिद्बाधकमिति । तदाशङ्क्य दीधितिकारः अस्मिन् अनुमाने दोषानुद्भावयति यत् "एतेन अयं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वात् इति निरस्तं व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेः उपाधित्वाच्च" । निरुक्तानुमानस्थले तु हेतुघटकयावद्विशेषदलयोः उपादानं व्यर्थम् । यतोहि संयोगसामान्याभावः गुणादिषु प्रसिद्धः एव । तथा यत्तुवादिनां मते तु द्रव्येऽपि संयोगसामान्याभावः विद्यते । तस्मात् केवलान्वयिसाध्यकस्थलमिदम् । अतः अभावत्वमात्रकथनेनैव व्यवहारः सम्भवति । यतोहि केवलान्वयिसाध्यकस्थले सर्वेऽपि हेतवः सदेव भवन्ति । अत्र यदि यत्तुवादिनः कथयन्ति यत् अभावत्त्वमेव हेतुरस्तु तेन द्रव्ये संयोगसामान्याभावस्य सिद्धिर्भवतु । तदा यद्यत्र अप्रयोजकशङ्का क्रियते यत् "द्रव्ये हेतुरस्तु साध्यं मास्तु" इति चेत् तदा तद्विघटकः कश्चिदनुकूलतर्कः नास्ति । तथापि यद्युच्यते यत् निरुपाधिकत्वमेवास्माकमनुकूलस्तर्कः अर्थात् "अभावत्वहेतुः नहि साध्यव्यभिचारी निरुपाधिकत्वात्"इत्यपि न वाच्यं यतोहि निरुक्तस्थले तु निर्गुणत्वादेः उपाधित्वं विद्यत एव ।

इत्येवं दीधितिकारः द्रव्ये संयोगसामान्याभावसिद्धौ पूर्वपक्षरूपेण बहुधा विचारयित्वा "नवीनास्तु" इत्यादिग्रन्थेन सिद्धान्तयति यत् द्रव्ये तु संयोगसामान्याभावः विद्यत एव। नवीनानां मते तु उत्पत्तिकाले घटपटादिषु द्रव्येषु गुणाः न तिष्ठन्ति। तस्मात् उत्पत्तिकालावच्छेदेन द्रव्ये गुणसामान्याभावः तिष्ठति तथा संयोगस्य गुणत्वात् तस्यापि सामान्याभावः उत्पत्तिकालावच्छिन्ने द्रव्ये तिष्ठत्येव ।

## उपसंहारः

प्रस्तुतशोधप्रबन्धे नव्यन्यायसम्मतं द्रव्ये संयोगसामान्याभावसिद्धिरिति विषयं सूक्ष्मतात्त्विकदृष्ट्या विचारितं वर्त्तते । मोक्षसाधनत्वेन तत्त्वज्ञानस्य अपरिहार्यतां प्रतिपाद्य प्रबन्धेऽस्मिन् द्रव्यसंयोगयोः अन्तर्निहिता जटिलता उद्घाटिता विद्यते । विशेषेण संयोगसामान्याभावः द्रव्ये प्रतिष्ठितो न वेति आशङ्कामाश्रित्य यत्तुवादिभ्यः तथा सिद्धान्तवादिभ्यः प्रवर्त्तिताः विचाराः अत्र सम्बद्धाः दृश्यन्ते। तत्र यत्तुवादिना उपस्थापितेषु विचारेषु तथा

---

[१] सिद्धान्तलक्षणदीधितिः(पृ.९५)
[२] न्यायकोशः(पृ.२२)
[३] सिद्धान्तलक्षणदीधितिः(पृ.९५)

 ISSN : 2249-538X

अनुमानस्थलेषु अननुगमादिदोषमुद्भाव्य सिद्धान्तवादी द्रव्ये संयोगसामान्याभावं निराकरोति। तथा चान्ते दीधितिकारः सिद्धान्तवादिनः मतं निरस्य नव्यमतमाश्रित्य द्रव्ये संयोगसामान्याभावं साधयति। अनेन प्रबन्धमाध्यमेन दार्शनिकानुसन्धानस्य गभीरता तथा प्रसङ्गिकता सुप्रतिष्ठिता भवतीति भावः ।

## परामृष्टाः ग्रन्थाः


१. बालव्युत्पत्तिः, डॉ. विश्वनाथधीतालः, संस्कृतिप्रकाशनम्, वाराणसी, २०१२ ।

२. तर्कसंग्रहः, श्रीमदन्नम्भट्टः, प.श्री.कृष्णवल्लभाचार्य्यः, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, २०१९ ।

३. न्यायदर्शनम्, महर्षिगौतमः, फणिभूषणतर्कवागीशः, व्यानार्जी पावलिशार्स, कोलकाता, १९६१ ।

४. भाषापरिच्छेदः, विश्वनाथन्यायपञ्चाननः, श्रीगोपालचन्द्रमुखोपाध्यायः, वर्धमान विश्वविद्यालयः, १९६३ ।

५. वैशेषिकसूत्रोपस्कारः, श्रीशङ्करमिश्रः, आ.ढुण्ढिराजशास्त्री, चौखम्बा संस्कृत संस्थानम्, वाराणसी, वि.सं.२०२६ ।

६. सिद्धान्तलक्षणम्, दीधितिजागदीशीसमेतम्, श्रीशैलजापति मुखोपाध्यायः, पश्चिम्बङ्गराज्यपुस्तकपर्षद्, १९९१ ।

७. तत्त्वचिन्तामणिः(अनुमानखण्डः), गङ्गेशोपाध्यायः, श्रीकामाख्यानाथतर्कवागीशः, व्याप्तिस्तमिशनप्रेस्, १८८८.

८. न्यायकोशः, महामहोपाध्याय-भीमाचार्य्यः, निर्णयसागरमुद्रणालयः, मुम्बई, १९२८ ।

# न्यायनये सृष्टिप्रक्रियाविमर्शः

श्री बिप्लबसरकारः*
शोधच्छात्रः, न्यायविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली

***लेखसारः*** *– प्रसङ्गवशात् न्यायदर्शनमनुसृत्य सृष्टिः निरूप्यते। न्यायदर्शने चतुर्थे अध्याये* ***"अभावाद्भावोत्पत्तिः नानुपमृद्य प्रादुर्भावात्"*** *इत्यादिसूत्रैः शून्यमेव जगदुत्पादनं इति मतमनूद्य दूषयित्वा –*

**"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्", "न पुरुषकर्माभावे फलनिष्पत्तेः", "न तत्कारित्वादहेतुः"**

*इति त्रिभिः सूत्रैः ईश्वरस्य जगत्कारणत्वं स्थापितम्। तथा हि पुरुषोऽयं समीहमानः न अवश्यं समीहाफलमाप्नोति, तेन अनुमीयते पराधीना कर्मफलप्राप्तिरिति। यदि परापेक्षां विना पुरुषः कर्मफलभोगे समर्थः स्यात्, न कदाचित् अफला क्रिया भवेत्। तस्मात् यदधीना पुरुषस्य कर्मफलप्राप्तिः, सः ईश्वरः कारणमिति प्रथमसूत्रार्थः। ईश्वराधीना चेत् फलनिष्पत्तिः स्यात्। तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येत, ततश्च कर्मलोपः स्यात् इति आक्षेपपरं द्वितीयसूत्रम्। न ब्रूमः पुरुषकर्मानपेक्षः ईश्वरः कारणमिति, अपि तु पुरुषकर्म ईश्वरः अनुगृह्णाति। फलस्य यतमानस्य पुरुषस्य ईश्वरः फलं सम्पादयति। तस्मात् ईश्वरकारितत्वात् पुरुषकर्माभावे फलानिष्पत्तेः इति अहेतुः इति तृतीयसूत्रार्थः।*

***कूटशब्दाः*** *– ईश्वरः, क्षुब्धाः, प्राकृतसृष्टिः, वैकृतसृष्टिः, सिद्धेः।*

## न्यायनये सृष्टिप्रक्रियाविमर्शः

इह खलु जगति कारणात्कार्यस्योत्पत्तिरिति समेषां दार्शनिकानां मतिः। कारणमन्तरा न कार्यस्योत्पत्तिः कार्यकारणयोः अविनाभावदर्शनात्। तत्रापि कस्मिंश्चिन्मतेऽदृष्टस्य जगत्कारणत्वं कस्मिंश्चिन्नये च ब्रह्मणः जगत्कारणत्वम्, ईश्वरस्य परमाणोः वा जगत्कारणत्वमिति भारतीयदार्शनिकानां वैमत्यं प्रतीयते। तत्र अदृष्टस्य परमाणोः ईश्वरस्य वा जगत्कारणत्वमिति नैयायिकानां सिद्धान्तः।

**"यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथा सतः पुरुषात्केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्॥"**[1]

इत्युपनिषत्प्रमाणेन ब्रह्मणः जगन्निमित्तोपादानत्वं साधयन्ति वेदान्तिनः।

**"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥"**[2]

इत्यनुसारेण प्रकृतिपुरुषयोः संयोगात् सृष्टिरिति सांख्याः वदन्ति। पुराणे तावत् सृष्टिविषयकं चिन्तनं बहुविधं विद्यते। **"सर्गश्च प्रतिसर्गश्च..."** इत्यादि पुराणलक्षणे प्रयुक्तं सर्गपदं जगतः तत्सजातीयपदार्थानां सृष्टिपरकमेव। उक्तं च—

**"अव्याकृतगुणक्षोभात् महतस्त्रिवृतोऽहमः। भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते॥"**[3]

अभिप्रायस्तु यदा मूलप्रकृतौ लीनभूताः गुणाः क्षुब्धाः भवन्ति तदा महत्तत्त्वस्योत्पत्तिः। महत्तत्त्वतः

---

***सम्पर्कसूत्रम्** - 8777077874 , Email- biplabs293@gmail.com
[1]मुण्ड. 1/1/7
[2]सां. का. 21
[3]भाग. का. 21

सात्त्विकादित्रिविधाहंकारस्योत्पत्तिः। त्रिप्रकारकाहंकारात् पंचतन्मात्रस्य, इन्द्रियाणां भूतानां च उत्पत्तिः।

अयमुत्पत्तिक्रमः सर्ग एव। पुराणसृष्टिप्रक्रिया प्रायशः सांख्याश्रिता भवति। पुराणेषु सांख्यशास्त्रस्य प्रभावसत्त्वेऽपि किञ्चित् स्वकीयं चिन्तनवैशिष्ट्यं विद्यते। यतः प्रकृतिपुरुषयोः द्वैतप्रतिपादकं शास्त्रं सांख्याशास्त्रम्, अद्वैतप्रतिपादकं शास्त्रं च वेदान्तशास्त्रम्, अनयोः चिन्तनयोः सम्मेलनात्मकं चिन्तनं यत्र तदेव पुराणम् इति। पुराणे तावद् विष्णोः प्रकृतिपुरुषभेदात् रूपद्वयं विद्यते। विष्णोः अपरं च रूपं भवति कालात्मकम्। त्रयाणां तत्त्वानां संयोगात् संसारस्य सृष्टिः। संयोगनाशात् प्रलयः। तथाहि विष्णुपुराणे—

**"विष्णोः स्वरूपात् परतो हि ते द्वे रूपं प्रधानं पुरुषस्य विप्र।**
**तस्यैव तेऽन्येन धृते वियुक्ते रूपान्तरं यद् द्विज कालसंज्ञम्॥"**[१]

विषयाणां रूपान्तरमेव कालस्य आकारः। कालस्य अनादित्वाद् अनन्तत्वात् निर्विशेषत्वाच्च तं कालं निमित्तीकृत्य भगवान् विष्णुः सृष्टिं करोति। महाप्रलयाभावादनादिकालतः अयं सृष्टिक्रमः प्रचलति।

सृष्टेः प्राक् समग्रविश्वं भगवतः मायायां लीनं भूत्वा ब्रह्मस्वरूपम् आसीत्। कालवशाद् भगवान् स्वकीयया लीलया पृथक् पृथक् सृजति। विश्वस्य अनादित्वे प्रमाणं यथा—

**"यथेदानीं तथाग्रे च पश्यदप्येतदीदृशम्।"**[२]

यदि विश्वं तथा भवेत् तर्हि तस्य प्रलयोऽपि नास्ति। तस्य प्रवाहस्य नित्यत्वादिति। पुराणनये प्राकृतसर्ग—वैकृतसर्ग—प्राकृतवैकृतसर्गभेदात् प्रधानतः सर्गः त्रिविधः। अबुद्धिपूर्वीका या सृष्टिः सा प्राकृतसृष्टिः। बुद्धिपूर्वीका सृष्टिः वैकृतसृष्टिः। उक्तं च—

**"प्राकृताश्च त्रयः पूर्वे सर्गास्तेऽबुद्धिपूर्वकाः। बुद्धिपूर्वं प्रवर्तन्ते मुख्याद्याः पंचवैकृताः॥"**[३]

यद्वा भवतु सर्गस्य मूलकारणं विष्णुरेव भवति। एतेन सिद्धं भवति यद् दार्शनिकाः पौराणिकाश्च सृष्टेः मूलकारणं किमपि तत्त्वमस्तीति आमनन्ति। कारणात् कार्यस्योत्पत्तिरिति नाभ्युपेयते चेत्तर्हि नियामकस्य विरहात् सर्वदा समेषां कार्याणामुपलब्धिरनुपलब्धिर्वा आपद्येत। तस्मात् किञ्चित्कालासम्बन्धित्वे सति किञ्चित्कालसम्बन्धित्वरूपकादाचित्कत्वं कार्यमात्रेषु प्रेक्ष्य कार्यं सापेक्षं कारणजन्यं कादाचित्कत्वात् यन्नैवं यथा नभ इति रूपेण सापेक्षत्वं तत्रानुमाय यदपेक्ष्यते तत्र कारणत्वं निश्चीयते।

संक्षेपतः सिद्धेः कार्यकारणभावे इह संसारे सुखिनं दुःखिनं च जनमवलोक्य प्रतीयते यदत्रापि केनापि कारणेनावश्यं भाव्यम्। तयोश्च सुखदुःखयोः दृष्टं कमपि हेतुं नैवावलोकमानाः सुखदुःखकार्यकारणत्वेन जीवात्मनिष्ठं धर्माधर्मात्मकमदृष्टं परिकल्पयन्ति नैयायिकाः। यस्मिन्नात्मनि समवायेन धर्मः सन्तिष्ठते तस्मिन् समवायेन सुखमुत्पद्यते। यत्र च समवायेनाधर्मस्तिष्ठति तत्र दुःखमुत्पद्यते। नहि केवलेन दृष्टेन हेतुना दुःखसुखादिवैचित्र्योत्पत्तिः। एकस्मिन्नेव परिवारे दृष्टहेतूनां समेषां समानत्वेऽपि पूर्वजन्मकृतकर्मजन्यादृष्टवशात् तत्परिवारस्य जनेषु कश्चित् पुनर्दुःखी लोचनगोचरो भवति।

तत्र सुखदुःखादिभोगवैचित्र्यं नैवादृष्टेन विना केनाप्युपायेन साधयितुं बृहस्पतिरपि क्षमः। अदृष्टस्य परलोकसाधनं नास्तीति इयं चार्वाकस्य विप्रतिपत्तिः एतत्फलमलौकिके वा वस्तुनि परलोकसाधनता अस्ति न वा? अतीन्द्रियस्तु परलोकसाधनं न वेत्यादि संशयः, एतादृशसंशयनिरासार्थमतीन्द्रियवस्तुनः साधकयुक्तेः प्रयोगः

[१] विष्णु. 1/2/24
[२] भाग. 3/10/13
[३] शिव. 1/12/18

आवश्यकः। ये खलु अलौकिकं कारणमदृष्टादिकं न स्वीकुर्वन्ति तेभ्यः अलौकिककारणसाधनमावश्यकं भवति। तत्सिद्धावेव प्रतिवादिनोऽपि एतादृशकारणप्रेरकत्वेन तदधिष्ठातृत्वरूपेण ईश्वरं स्वीकुर्वन्ति। अचेतनवस्तुमात्रं चेतनाधिष्ठितं सत् कार्यस्य कारणं भवति, चेतनप्रेरणां विना न कार्यकारणं भवति, अदृष्टस्य कारणत्वसाधनावसरे आचार्योदयनः प्रवदति—

**"सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः। प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिकः॥"**[१]

सापेक्षत्वादनादित्वादित्यादयस्तु भोगं प्रति कारणत्वाद् अदृष्टात्मकालौकिकस्य कारणत्वं विद्यत एव। प्रशस्तपादाचार्येण काणादीयं सूक्ष्ममनोभावं केषाञ्चित् सूत्राणां माध्यमेन अनुनिशम्य पृथिव्यप्तेजोवायुपदार्थनिरूपणानन्तरमेतेषामेव हि परमाणूनां संघातेन सृष्टिः विघातेन च प्रलय इति। तमेवग्रन्थमनुसरद्भिः व्याख्याकारैः श्रीधराचार्यादिभिः स्वटीकायां उच्यते यत्— पञ्चदशनिमेषाः काष्ठाः त्रयोविंशतिः काष्ठाः कला, पञ्चदशकलाः नाडिका, त्रिंशत्कलामुहूर्तः, त्रिंशत्मुहूर्त्तमहोरात्रः पञ्चदशाहोरात्रः पक्षः।

द्वौ पक्षौ मासः, द्वौ मासर्तुः षट् ऋतवो द्वादशमासाः, ऋतुत्रयेणोत्तरायणम्, ऋतुत्रयेण दक्षिणायनम्, उत्तरायणं च देवानां दिनम्, दक्षिणायनं रात्रिः, तथाभूताहोरात्रशतरात्रेण षष्ठ्यधिकेन वर्षं द्वादशसहस्रैश्च वर्षैश्चतुर्युगम्, चतुर्युगसहस्रपरिमितं ब्रह्मणो दिनम्। उक्तञ्च

**"मानुषेनैकवर्षेण देवानां दिनमुच्यते। तेषां शतत्रयं षष्टियुक्तं वर्षस्तु दैवतः॥**
**देववर्षसहस्राणि द्वादशाहश्चतुर्युगम्। चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते॥"**

इत्यादिस्मृतिवचनानि ब्रह्मणो दिनपरिमाणे मानम्। सर्वज्ञविशिष्टस्य महेश्वरस्य आत्मनां सुखदुःखानुभवोत्पत्तये सिसृक्षा जायते। तदनन्तरं स्वात्मसु विद्यमानानि अदृष्टानि वृत्तिं लभन्ते। यद्यपि ईश्वरस्य अनन्तकार्योत्पत्तौ व्याक्रियमाणा नित्यत्वाद् एकैव इच्छा क्रियाशक्तिस्वरूपा, सैवेच्छा संहारकारणेषु चोपलब्धेषु संजीहिर्षारूपा भवति। सृष्टिकारणेषु चोपलभ्यमानेषु सिसृक्षारूपा जायते। एतादृशसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यः आत्मपरमाणुसंयोगेभ्यः पवनपरमाणुषु कर्माण्युत्पद्यन्ते। पवनपरमाणवस्तत्र समवायिकारणम्। लब्धवृत्त्यदृष्टवदात्मपरमाणुसंयोगोऽसमवायिकारणम्। अदृष्टं च निमित्तकारणं भवति। एवञ्च कर्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगेभ्यः द्व्यणुकानि जायन्ते। तदन्तरं त्रसरेणुः इत्यादिक्रमेण महान् वायुः समुत्पद्यमानः आकाशे दोधूयमानस्तिष्ठति। ततश्च तस्मिन्नेव दोधूयमाने वायौ जलीयेभ्यो परमाणुभ्यो परस्परं संयोगात् द्व्यणुकादिक्रमेण जलनिधिस्तिष्ठति।

तदनन्तरं तस्मिन्नेव जलनिधौ पार्थिवपरमाणुसंयोगेभ्यः द्व्यणुकादिक्रमेण समुत्पन्ना महापृथिवी सन्तिष्ठति। तदनन्तरं च तस्मिन्नेव जलनिधौ तैजसेभ्य अणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नः महांस्तेजोराशिः देदीप्यमानस्तिष्ठति। अनया रीत्या समुत्पन्नेषु महाभूतेषु महेश्वरसंकल्पात् पार्थिवपरमाणुसाहाय्येन तैजसपरमाणुभ्यः महदण्डमुत्पद्यते। तस्मिन्नेवाण्डे चतुर्वदनकमलं ब्रह्माणं संस्थाप्य तं प्रजाः सर्वे विनियुक्ते स च ब्रह्मा मनुदेवर्षिपितृगणान् समुत्पाद्य एव स्वस्वकर्मानुसारं धर्मज्ञानवैराग्यैः सर्वान् संयुनक्ति। अनया रीत्या सर्गक्रमः वैशेषिकदर्शने प्रदर्शितः विद्यते।

परमाणुभ्यः जगतः सृष्टिः इति वैशेषिकैः यदुपपादितं तन्नाङ्गीकुर्वन्ति वेदान्तिनः। तेषां मते तमोगुणस्य प्राधान्यात् यत्किञ्चिद्रजस्सत्त्वसम्पन्नाद् विक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः, आकाशाद् वायुः, वायोरग्निः, अग्नेर्जलम्, जलात्पृथिवी चोत्पद्यते। तथा च श्रुतिः 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। एतेन दैवात्मश-

[१]न्या. कु. 1/4


ISSN : 2249-538X

किं स्वगुणैर्निगूढाम्' इति श्रुत्या ज्ञानस्य गुणत्रययुक्तत्वेऽपि तमोगुणप्राधान्यादेव कथमाकाशाद्युत्पत्तिरिति शङ्का अपास्ता । एवं च परमाणुः सृष्टेः कारणं इति वादिनां मतं न युक्तं तथा च वेदान्तसूत्रम्— **"महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्, उभयथाऽपि न कर्मातस्तदभावः, समवायाभ्युपगमाच्च साम्यादनवस्थितेः नित्यमेव च भावात्, रूपादिमत्त्वाच्च विपर्ययो दर्शनात्, उभयथा च दोषात्? अपरिग्रहाच्चात्यन्तमनपेक्षा ।"**[१]

उक्तवेदान्तसूत्राणि प्रदर्श्य वैशेषिकमतं यदपाकृतं वेदान्तविद्भिः तन्न युक्तमिति प्रदर्शयन्ति प्रशस्तपादाचार्याः । परमेश्वरेच्छावशात् प्रलयकालेऽदृष्टं प्रतिबद्धशक्तिकम्, सृष्टिकाले लब्धवृत्तिकं भवतीति स्वीकारान्न सर्वदा प्रवृत्तेर्न वा सर्वदा निवृत्तेः प्रसङ्गः इति । उत वा ब्रह्मकारणवादेऽप्येवं विकल्पे ब्रह्म स्वेच्छया कालविशेषे प्रवर्तते । तथा च परमाणुवादे तुल्यमुत्तरमिति ।

**"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्, न पुरुषकर्माभावे फलनिष्पत्तेः, न तत्कारित्वादहेतुः"**[२] इति त्रिभि सूत्रैः ईश्वरस्य जगत्कारणत्वं साधितं नैयायिकैः । पुरुषोऽयं समीहमानः नावश्यं समीहाफलमवाप्नोति । तेनानुमीयते पराधीना पुरुषस्य कर्मफलावाप्तिः इति । यदि परापेक्षां विना पुरुषः कर्मफलभोगे समर्थः स्यात् न कदाचित् निष्फला क्रिया भवेत् । तस्माद् यदधीना पुरुषस्य निमित्तं तदितरयोः समवायिकारणासमवायिकारणयोरनुग्राहकं यथा तुरीवेमादि तन्तूनां तत्संयोगानां च । ईश्वराज्जगतो निमित्तं जगतः साक्षादुपादानकारणं किमिति चेत् परमसूक्ष्मं परमाणुसंज्ञितं पृथिव्यादिद्रव्यम् । परमाणुकर्माणि प्राक्प्रवृत्तेः बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वात् वास्यादिवदिति यथा वास्यादि अचेतनं बुद्धिमता तक्ष्ण अधिष्ठितं प्रवर्तते तथा अचेतनानि परमाणुकर्माणि जगत्सृष्टौ प्रवर्तमानानि बुद्धिमत्कारणाधिष्ठितान्येव प्रवर्तन्ते इति उद्योतकराणामाशयः ।

सृष्ट्युत्पत्तिविषये हिरण्यगर्भसूक्तस्यापि अतीवमहत्त्वं विद्यते । तत्र वैज्ञानिकतत्त्वमप्युपलभ्यते । अस्मिन् सूक्ते जगदुत्पत्तेः पूर्वं वर्तमानो लोकत्रयस्य धारकश्चालकः स्वामी जीवात्मनां ज्ञानदाता अमृतरूपं च तच्छरणं कामानां पूरयिता परमाणून् प्रेरयिता इत्यादि सर्वमुपदिष्टं वर्तते ।

**"हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम"**[३]

हिरण्मयशब्दः हिरण्यपर्यायः **"हिरण्यो हिरण्मयः"**[४] इति निघण्टुवाक्याद् ज्ञायते । **'मयट् प्रत्ययस्य लोपश्छान्दसः'** हिरण्याः प्रकाशमयाः—सूर्यादयो गर्भे—गर्भसदृशे मध्येऽस्य स हिरण्यगर्भः— **'हिरण्यानि सूर्यादितेजांसि गर्भे यस्य स परमात्मा ।'**[५] स परमात्मा उत्पन्नस्य जगतः प्रसिद्ध एक एव स्वामी पालकोऽस्ति । स जगतः पूर्वमेव सम्यक् वर्तते वर्तमानो भवति हि स खलु अन्तरिक्षम् **'पृथिवी—अन्तरिक्ष—नाम्न'**[६] इति । द्युलोकमपि चेमां पृथिवीं धारयति सुखस्वरूपाय प्रजापतये परमात्मने **'प्रजापतिर्वै कः,'**[७] **'सुखं वै कः'**[८] उपहाररूपेण स्वात्मानं समर्पयेम ।

सृष्टेरादौ महान्तः खल्वाप्ताः परमाणवः **'आपो ह वा इदमग्रे यत्तत्सलिलमासीत्'** **'तम आसीत् तमसा गूलः... सलिले सर्वमा इदम्'** अग्निमाग्नेयपदार्थमुत्पादनहेतोः गर्भं धारयन्तः विश्वं प्रति प्रकटीभवति । पुनः

[१]ब्र.सू. 2/2/12
[२]न्या. सू. 4/1/19
[३]ऋ. 10/121/1
[४]निघ. 10/23
[५]यजु. 25/10
[६]निघ. 1/3
[७]ऐ.ब्रा. 2/36
[८]गो.ब्रा. 6/3

समस्तदेवानां विश्वं तदादेशं पालयति। सर्वे देवाः तस्यांशभूताः यस्याश्रयः अमरत्वप्रदायकः मृत्युरपि यस्य अधीनं भवति। समस्तमपि द्विपादवर्गं चतुष्पादवर्गं च शास्ति। एवं भूतः परमात्मा— 'यस्मात् परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिद्। वृक्ष इव स्तब्धस्तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्। स एव त्रैलोक्यस्य सम्पूर्णस्य जगतः पदार्थानां वा रचयिता पालयिता धर्ता संहर्ता वा वर्तते। अस्मात् सूक्ताद् परमेश्वरस्य निमित्तकारणत्वं स्पष्टं द्योत्यते।

यथा परमेश्वरस्य जगन्निमित्तिकारणत्वं सिद्ध्यति तथैव परमाणोरपि जगत्कारणत्वमस्तीति वेदः प्रतिपादयति —

**"विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्। संबाहुभ्यां नमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः॥"**[१]

इत्यस्य मन्त्रस्य तृतीयपादे 'पतत्र' शब्दस्य यो हि प्रयोगः तस्यार्थः परमाणुः। परमाणूनां गतिशीलत्वात् गत्यर्थकपत्-धातुना निष्पन्नोऽयं पतत्रशब्दः परमाणुवाचकः इति वैदिकमन्त्रेण विज्ञायते। यतः मन्त्रस्य परार्द्धवाक्ये 'पतत्रैः परामाणुभिः संजनयन् समुत्पादयन् संधमति संयोजयति' इत्याकारिकायाः व्याख्यायाः दर्शनात् परमाणुबोधकं श्रुतिप्रमाणमस्ति इति निश्चप्रचं वक्तुं शक्यते। अस्य मन्त्रस्य व्याख्यानावसरे उदयनः प्रवदति— 'षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वं ते हि गतिशीलत्वात् पतत्रव्यपदेशाः पतन्तीति। संधमति-संजनयति इति च व्यवहितोपसर्गसम्बन्धः। तेन संयोजयति समुत्पादयन्नित्यर्थः। एवं च परमाणूनां जन्यत्वे श्रुत्यभावात् नित्यत्वे च विरुद्धश्रुतेः अभावाद् अनुमानेन तस्य नित्यत्वं जगत्कारणत्वं च साधयितुं शक्यते। स परमाणुः एव। परमाणुस्तावत् द्यणुकं प्रति समवायिकारणं, परमाणुद्वयसंयोगस्तु असमवायिकारणम्, ईश्वरेच्छादिबलात् परमाणुषु क्रिया भवति क्रियातः संयोगश्च भवति इत्यतः ईश्वरस्य निमित्तकारणत्वं सिद्ध्यतीति न्यायवैशेषिकाणां सिद्धान्तः।

**संकेताक्षराणुक्रमणिका**

- न्या. सू. - न्यायसूत्रम्
- न्या. भा. - न्यायभाष्यम्
- न्या. द. - न्यायदर्शनम्
- न्या. कु. - न्यायकुसुमाञ्जलिः
- सा. सू. - साङ्ख्यसूत्रम्
- विष्णु. - श्रीविष्णुपुराणम्
- शिव. - श्रीशिवपुराणम्
- सा. का. - साङ्ख्यकारिका
- मु. उ. - मुण्डक्योपनिषद्
- ऐ. ब्रा. - ऐतरेयब्रह्मणम्
- ब्र.सू. - ब्रह्मसूत्रशाङ्करभाष्यम्

**परामृष्टाः ग्रन्थाः**

- वात्स्यायन, आचार्यः। **न्यायभाष्यम्**।
- गौतमः, महर्षि। **न्यायसुत्रम्**।
- श्रीईश्वरकृष्णेन। **साङ्ख्यकारिका** (श्रीगौडपादस्वामिकृतभाष्यसहिता)।
- श्रीजगद्गुरूश्रीमदाद्यशङ्कराचार्यप्रणीतं। **ब्रह्मसूत्रशाङ्करभाष्यम्।**
- **माण्डूक्योपनिषद्** (शाङ्करभाष्यसहिता)।
- श्रीमदुदयनाचार्यप्रणीतं। **न्यायकुसुमाञ्जलिः**।
- **ऐतरेयब्रह्मणम्।**
- **श्रीविष्णुपुराण**।
- **श्रीशिवपुराण**।
- **श्रीमद्भागवद्गीता**।
- **ऋग्वेद**।

[१] मु.उ. 3.3/3


ISSN : 2249-538X

# न्यायदर्शनानुसारेण अवयवविचारः

श्री चण्डीप्रसादः*
सहायकाचार्यः(अ.), न्यायविभागः,
के० सं० वि० वि० श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः

*लेखसारः* – *न्यायदर्शनीयषोडशपदार्थेषु अन्यतमपदार्थोऽवयवपदार्थः स चावयवः न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्त्वम्, न्यायत्वञ्चानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वं यथा - पर्वतो वह्निमानित्याकारकानुमितिचरमकारणलिङ्गपरामर्शः वह्निव्याप्यधूमवानयं पर्वत इत्याकारकः तत्प्रयोजकं शाब्दज्ञानं पञ्चावयवसमुदायविषयकं समूहालम्बनं ज्ञानं, यतो हि प्रतिज्ञादिप्रत्येकवाक्येन मध्यस्थाय तत्तद्विषयकानां पञ्चानां वाक्यार्थबोधे सति पञ्चभिः वाक्यैः मिलित्वा प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया समूहालम्बनात्मक एको महावाक्यार्थविषयकबोधो जायते । ततः विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते । स एव परामर्शः । परामर्शं प्रति यादृशमहावाक्यार्थबोधस्य प्रयोजकत्वं तादृशमहावाक्यार्थविषयकबोधजनकवाक्यपञ्चकावयवसमुदायवाक्यं तन्न्यायः । तादृशन्यायान्तर्गतत्वे सति प्रतिज्ञादि-अन्यतमत्त्वं प्रतिज्ञाहेतूदाहरणोपनयनिगमनेषु प्रत्येकेषु सत्त्वात् प्रतिज्ञादयः पञ्चावयवाः कथ्यन्ते । एते चावयवा ऐतिहासिकदृष्ट्या विचार्यमाणे परार्थानुमाने एव प्रयोजकाः । अत एव न्यायप्रयोज्यानुमानं परार्थानुमानमिति वदन्त्याचार्याः । स्वार्थानुमाने तु पञ्चावयवाः नापेक्षिताः एते च पञ्चावयवाः सर्वप्रथमं न्यायसूत्रकृतैवोपदिष्टाः । महर्षिगौतमः तान् पञ्चावयवान् सूत्ररूपेण दर्शितवान् तथा च सूत्रम् – "**प्रतिज्ञाहेतूदारहरणोपनयनिगमनान्यवयवाः**"[१] इति । न्यायसिद्धान्ते चैतादृशा एव पञ्चावयवाः स्वीक्रियन्ते, ते न विपरीतक्रमयुक्ताः, न वा न्यूनाधिकाः । अत एव भाष्यकारो वात्स्यायनः स्वकीयभाष्ये परार्थनुमाने आवश्यकरूपेण पञ्चावयवप्रयोगं विशेषतः स्वीकृत्यावयवानां विपरीतक्रमप्रयोगं न्यूनाधिकभावरूपेण च प्रयोगं नाङ्गीकृतवान् । तत्र केचन दार्शनिकाः **जिज्ञासा, संशयः, शक्यप्राप्तिः प्रयोजनम्, संशयव्युदासश्चेत्यधिकातिरिक्तावयवान्** स्वीकुर्वन्ति । तत्र ते पञ्चात्र न्यायसिद्धान्ते किमर्थं नोपदिष्टा इति जिज्ञासायां भाष्यकारः प्रत्येकं स्वरूपं प्रतिपाद्य तेषामवयवेष्वनन्तर्भावकारणं स्पष्टयति । तद्यथा "**तत्र जिज्ञासा अप्रतीयमानेऽर्थे प्रत्ययार्थस्य प्रवर्तिका जिज्ञासेति**"[२] अर्थाद् अज्ञातार्थे तद्विषयज्ञानार्थं तत्प्रवर्तिका जिज्ञासा जायते यतो हि अप्रतीयमानमर्थं तत्त्वतो ज्ञात्वा तं हास्यामि वोपादस्यामि, उपेक्षिष्यामीति हानोपादानोपेक्षाबुद्धयो भवन्ति । तत्त्वज्ञानार्थं जिज्ञासा अपेक्षिता भवति, परन्तु इयं न कस्याप्यर्थस्य साधिका, अतो न पञ्चावयवेषु गणना तस्याः । अत एवाह वार्तिककारः '**कथं पुनर्जिज्ञासादयोऽवयवाः न भवन्ति ? परप्रतिपादकत्वात्**' , **परप्रतिपादका ये वाक्याङ्गभूता इतरेतराप्रत्यायितेनार्थेनार्थवन्तो वाक्याङ्गमुपयान्ति तेऽवयवाः**[३] । वाक्याङ्गत्वमवयवार्थः । वाक्यश्चात्र प्रतिज्ञादीनां समूहः यैः जिज्ञासानिवर्तनोपयोगी वाक्यार्थः उपस्थितोभवति । ते च प्रतिज्ञादयः, न पुनर्जिज्ञासादयः तादृशाः अतो न तेऽवयवाः । एवमेव जिज्ञासाधिष्ठानं संशयो विरुद्धधर्मोपसंघाताद् भवति । स च तत्त्वज्ञानायापेक्षितो भवति । विरुद्धयोरन्यतरस्य भावः संभवीति बुध्यते । परन्तु कस्याप्यर्थस्य साधकाभावान्नावयवेषु गणना । प्रमातुः प्रमाणं प्रमेयाधिगमार्थम् इयमेव शक्यप्राप्तिः । सा च न साधकवाक्यस्य भागेन युज्यतेऽतः सा नावयवकोटिप्रविष्टा । तत्त्वावधारणं प्रयोजनम्, इदञ्च तत्त्वसाधक-*

---

***सम्पर्कसूत्रम्** - 8310764304, Email- bhattcp86@gmail.com
[१]न्या०सू० 1/1/32.
[२]वात्स्यायनभाष्यम् सप्रसन्नपदम्, पृ०सं० 53.
[३]न्याय वार्तिकम् न्यायचतुर्ग्रन्थिका, पृ० 510.

*वाक्यस्य फलं नावयवः । संशयव्युदासश्च प्रतिपक्षोपवर्णनं तत्त्वज्ञानायापेक्षते, परन्तु नार्थसाधकवाक्यैकदेश इति नावयवः । अतो नाधिकाः न न्यूनाः वावयवाः किन्तु पञ्चैव । अत एव न्यायभाष्यकारवात्स्यायनः प्रथमपञ्चावयवातिरिक्तम् उत्तरपञ्चावयवाः परार्थानुमानप्रयोगे नाङ्गभूताः भवन्तीति सम्यगुद्घोषितवान् । तार्किकदृष्ट्या एतेषां उत्तरपञ्चावयवानां नास्ति किमपि मूल्यं सर्वे निरसनीयाश्च सन्ति । यद्यपि अन्य-दर्शनेष्वपि अवयवविषयकचिन्तनं प्राप्यते, तथापि न्यायदर्शने तस्य व्यवस्थितं विशदञ्च निरूपणं दृश्यते । अत एव अस्मिन् शोधपत्रे मुख्यतया न्यायदर्शनानुसारेण अवयवानां स्वरूपम्, प्रयोजनम्, परस्परसंबन्धश्च सम्यगनुशीलितं वर्त्तते, अन्यदर्शनोक्तानां मतानाञ्च आवश्यकस्थले तुलनात्मकतया निर्देशः कृतः । एवञ्च अयमध्ययनप्रयासः न्यायतर्कपरम्परायाः गाम्भीर्यं प्रकाशयन् भारतीयदार्शनिकपरम्परायाम् अवयवविचारस्य विशिष्टस्थानं प्रतिपादयितुं प्रयतते ।*

***कूटशब्दाः*** *– न्यायदर्शनम्, प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम्, तर्कशास्त्रम्, अनुमानप्रक्रिया, प्रमाणमीमांसा, भारतीयदर्शनम् ।*

## उद्देश्यम् – (Objective)

१. न्यायदर्शने प्रतिपादितानां पञ्चावयवानां स्वरूपम्, कार्यं तथा तात्त्विकमहत्त्वञ्च सम्यक्तया विवेचयितुम् ।
२. अवयवविचारस्य अनुमानप्रक्रियायां तर्कशास्त्रे च स्थितम्, योगदानञ्च स्पष्टतया प्रतिपादयितुम् ।
३. अन्यदर्शनेषु उपलब्धानामवयवसम्बद्धमतानां न्यायदर्शनेन सह तुलनात्मकमध्ययनं कर्तुम् ।
४. भारतीयतर्कपरम्परायां न्यायदर्शनस्य वैज्ञानिकतां तथा आधुनिकबौद्धिकचिन्तने तस्य प्रासङ्गिकतां प्रकाशयितुम् ।

## शोधपत्रम् – (Research Paper)

एते च पञ्चावयवाः न केवलं न्यायशास्त्रे प्रसिद्धा अपितु अन्य दर्शनेष्वपि न्यूनाधिकतया प्रतिपादिताः । तत्रापि वैशेषिकदर्शने तु पञ्चवावयवाः स्वीकृताः । यद्यपि वैशेषिकसूत्रेषु अवयवानामुल्लेखो न स्पष्टीकृतो वर्त्तते, तथापि भाष्यकारश्रीप्रशस्तपादेन पञ्चावयवानां प्रयोगः सोदाहरणानि च लक्षणानि सुस्पष्टीकृतानि दृश्यन्ते । तदनुसारमेव तत्र पञ्चावयवानां प्रयोगः स्वीकृतो वर्त्तते इति वक्तुं शक्यते, परन्तु तेषामवयवानां नामानि पृथगेव सन्ति इत्यस्ति एतावान् विशेषः । यथा - प्रतिज्ञा, अपदेशः, निदर्शनम्, अनुसन्धानम्, प्रत्ययाम्नायश्चेति । एतेषु वैशेषिकाभिमतेषु पञ्चावयवेषु प्रथमोऽवयवः न्यायसूत्रानुसारी, द्वितीयोऽप्यवयवो वैशेषिकसूत्रेषु अस्मिन्नेव स्वरूपबाहुल्येनोपलभ्यते । परन्त्वन्तिमानां त्रयाणामवयवानां नामधेयस्य निर्वचनं स्वयं प्रशस्तपादेनैव कृतमिति प्रतीयते । अत्रेदमेव कारणं भवितुमर्हति यत् न्यायसूत्रकारीयावयवेभ्यः स्वावयवानां किमपि वैलक्षण्यं प्रदर्शयितुमेव एवं विधनामकरणं कृतम् । उपस्कारकारेण तु न्यायोक्ता एव पञ्चावयवा उल्लिखिताः, यथा **“तानि च वाक्यानि प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि”**[१] इति । न केवलं वैशेषिकदर्शने एवापितु साङ्ख्यदर्शनेऽपि न्यायोक्तानामवयवानां प्रयोगो मान्यो वर्त्तते । विज्ञानभिक्षुणा गौतमानुसारं पञ्चावयवानां प्रयोगः कृतोऽस्ति[२] । माठरमहोदयोऽपि प्रतिज्ञाहेतूदाहरणानि त्र्यवयवान् निर्दिष्टवान्[३] । एवमेवान्यैरपि दार्शनिकैः स्वाभिमतपरार्थानुमानार्थमवयवाः स्वीकृताः । परन्तु अवयवानां सङ्ख्याविषये नास्ति मतैक्यम् । तत्र केचन् दार्शनिकाः दशावयवान् अपरे चतुरोऽवयवान्, केचन त्र्यवयवान्, अन्ये द्वावेवावयवौ, कश्चनावयवमेकमेव स्वीकरोति । यद्यपि समुपलब्धेषु सर्वेष्वपि

[१]हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् वै०सू० 9/2/4.
[२]त्र्यवयवमनुमानम् एवं पक्षहेतुदृष्टान्ताः त्र्यवयवम् माठरवृत्ति, पृ० सं. 35.
[३]तत्रैव.


ISSN : 2249-538X

दार्शनिकग्रन्थेषु एवंविधा न कापि परम्परा श्रूयते दृश्यते वा यस्यामवयवचतुष्टयस्य व्यवस्था समुपलभ्येत परन्तु अनन्तवीर्यहेमचन्द्रादिजैनाचार्यैः केवलमवयवचतुष्टयात्मिकायाः परम्परायाः मीमांसकपरम्परानाम्ना उल्लेखनं कृतमिति श्रूयते, परन्तु प्रस्थानत्रयेऽपि मीमांसकप्रस्थाने त्रयाणामेवावयवानामङ्गीकारः श्रूयते। अतोऽनन्तवीर्यहेमचन्द्रजैनाचार्याणां पुरस्तात् काचित् एवंविधा अघटितघटनात्मिका व्यवस्था परम्परा वा समुपस्थिता यथा बाध्यमानैस्तैरवयचतुष्टस्यस्य व्यवस्था परम्परा वोल्लेखितेति। अवयवत्रयस्वीकारपक्षे प्रधानतया साङ्ख्यमीमांसकाद्वैतवेदान्तिनामेव परिगणना भवितुमर्हति। साङ्ख्यग्रन्थेषु अवयवचर्चा माठरवृत्त्यादावुपलभ्यते, माठरमहोदयेन त्रय एवावयवा अभिप्रेता भवेयुरिति यदभिप्रायेणैव लक्षणसहितानां प्रतिज्ञाहेतूदारहणभूतानामवयवत्रयाणां निर्वचनं कृतम्[१]। एतेषां नये पक्ष एव प्रतिज्ञापदप्रतिपाद्यः[२]। मीमांसादर्शने यद्यपि जैमिनिसूत्रेषु तथा शाबरभाष्ये चावयवचर्चायाः सर्वथा अत्यन्ताभाव एव वर्त्तते। तथापि कुमारिलभट्टपार्थसारथिमिश्रमानमेयोदयकारश्रीनारायणभट्टप्रभाकरशालिकनाथप्रभृतिभिर्मीमांसकैस्त्रय एवावयवाः अङ्गीकृता इति सुनिश्चितमेत्। ते चावयवाः प्रतिज्ञाहेतूदाहरणानि। अथवा उदाहरणोपनयनिगमनानि[३]। इमे आद्यस्त्रयोऽन्त्यस्त्रयो वावयवाः।

वेदान्तदर्शनेऽपि धर्मराजाध्वरीन्द्रादयो मीमांसकमतानुसारमेव त्र्यवयवं स्वीकुर्वन्ति[४]। धर्मकीर्तेः पूर्ववर्तिनो बौद्धाचार्याः अपि पूर्वोक्तांस्त्रीनेवावयवान् स्वीकृतवन्तः। आचार्यमैत्रेयेनापि प्रतिज्ञाहेतूदाहरणस्वरूपास्त्रय एवावयवाः स्वीकृताः दिङ्नागेनापि त्रय एवावयवाः स्वीकृताः। पक्षहेतुदृष्टान्तभूता एव। आचार्यधर्मकीर्तिः जैनतार्किकाश्च द्वावेवावयवौ स्वीकृतवन्तौ। तयोरेतावानेव भेदः यत्प्रथमः (धर्मकीर्तिः) उदाहरणोपनयौ स्वीकरोति। अपरे च जैनतार्किकाः प्रतिज्ञाहेतू इति [५]।

दार्शनिकजगति अवयवप्रयोगकाले केवलमेकमेवावयवः सर्वप्राथम्येन स्वीकृतो धर्मकीर्तिना। एतस्यैकावयवप्रयोगस्य व्यवस्था धर्मकीर्तिना विशिष्टाधिकारिणां विदुषां कृते एव, न त्वल्पज्ञानां कृते इति व्यवस्थापितम्।

## प्रतिज्ञा -

**'साध्यनिर्देशः प्रतिज्ञा'**[६] इति प्रतिज्ञालक्षणप्रतिपादकं सूत्रम्। सूत्रेऽस्मिन् साध्यनिर्देशपदस्य साध्यप्रतिपादकत्वार्थकरणे साध्यम् इति वाक्येऽतिव्याप्तिः, अस्यापि साध्यप्रतिपादकत्वात् अतः सूत्रोक्तं साध्यपदं नानुमितिविधेयपरं येन साध्यपदेऽतिव्याप्तिः स्यात् किं तु साध्यविशिष्टार्थकं साध्यपदम्, साध्यतेऽस्मिन्निति साध्यमिति व्युत्पत्त्या, निर्देशपदं बोधजनकन्यायघटकावयवपरं तेन अवयवबहिर्भूतप्रतिज्ञासमानाकारकवाक्ये नातिव्याप्तिः। साध्यपदस्य प्रकृतसाध्यविशिष्टार्थकरणेन साध्यत्वस्य केवलान्वयितया अवयवान्तरेऽपि साध्यत्वस्य सत्त्वेऽपि न क्षतिः। तथा च भाष्यकारः **'प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञेति'**[७]। धर्मिमात्रस्यापि प्रतिज्ञात्वं वार्तिककारो निषेधति, **'न ब्रूमो धर्मिमात्रं साध्यं (साध्यविशिष्टम्) अपि तु प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यम्'**[८]। एवञ्च साध्यनिर्देशः प्रतिज्ञेति। तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशि-

---

[१] पक्षहेतुदृष्टान्ताः त्र्यवयवम् माठरवृत्तिः चौ०सं० पृ० 35.

[२] पक्षः प्रतिज्ञापदम् माठरवृत्ति, पृ० 35.

[३] तस्मात् त्र्यवयवं ब्रूमः पौनरुक्त्या सह वयम्।उदाहरणपर्यन्तं यद्वोदाहरणादिकम्॥ मानमेयोदय-अनुमानप्रमाणम्, का0 54.

[४] अवयवाश्च त्रय एव प्रसिद्धाः प्रतिज्ञाहेतूदाहरणरूपाः, उदाहरणोपनयनिगमनरूपाः वा। वेदान्तपरिभाषा गजाननः, पृ० 166.

[५] पक्षहेतुवचनलक्षणमेवयवद्वयमेव परप्रतिपत्तरङ्गम्, न दृष्टान्तदिवचनम् प्रमाणनयतत्त्वालोकः 3/28.

[६] न्या०सू० 1/1/33.

[७] वात्स्यायनभाष्यम् सप्रसन्नपदम्, पृ० 55.

[८] न्यायवार्तिकम् न्यायचतुर्ग्रन्थिका, पृ० 514.

ष्यावगाहिज्ञानजनको न्यायावयवः प्रतिज्ञेति । यथा पर्वतो वह्निमानिति अतो न कोऽपि दोषः ।

मणिकारस्तु साध्यपदस्य शक्यार्थपरत्वं मन्वानः साध्यम् इति पदेऽतिव्याप्त्या लक्षणमिदं न युक्तमिति स्वीकुर्वन्नाह **'तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तिरिति उद्देश्यानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यत्वम्'**[१] इति प्रतिज्ञालक्षणञ्चकारः । लक्षणेऽस्मिन् सत्यन्तस्य न्यायावयवत्वमिति पर्यवसितोऽर्थः । प्रतिज्ञासमानाकारके न्यायबहिर्भूते वाक्येऽतिव्याप्तिवारणाय तत् । हेत्वादावतिव्याप्तिवारणाय विशेष्यदलम्, धूमादालोकवान् पर्वतो वह्निमान् धूमाद् इत्यादिन्यायान्तर्गतहेतुवाक्येऽतिव्याप्तिवारणाय विशेष्यदलेऽन्यूनपदम्, निगमनेऽतिव्याप्तिवारणायानतिरिक्तपदम् ।

दीधितिकारस्तु सूत्रोक्तलक्षणं समर्थयांचक्रिरे । अतो मणिकारोक्तप्रतिज्ञायाः यथाश्रुतलक्षणे बहून् दोषान् प्रदर्श्य यादृशपक्षसाध्यिकाः पक्षे यादृशविशिष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्त्यत्वस्य संशयस्यानिवर्तको यः तावद्बोधानामन्यतमो बोधः तज्जनकत्वं प्रतिज्ञायाः लक्षणमिति निष्कर्षं प्रदर्शितवान्[२] । एवमेव हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वम्, लिङ्गाविषयकज्ञानजनकन्यायावयववाक्यत्वम्'[३] इति लक्षणान्तरेऽपि मणौ प्रदर्शिते स्तः । धूमादित्यादिहेतुवाक्याभिधानप्रयोजिका या जिज्ञासा कुतः ? इत्याकारिका तज्जनकत्वं प्रतिज्ञायामस्ति इति प्रथमलक्षणसमन्वयः ।

द्वितीयलक्षणे लिङ्गमस्यास्ति इति व्युत्पत्त्या लिङ्गिपदं साध्यपरम्, लिङ्गिविषयकमित्यस्य साध्यवद्विशेष्यकमित्यर्थः । तथा च लिङ्गाविषयकं साध्यवद्विशेष्यकञ्च यद् ज्ञानं तज्जनकत्वं प्रतिज्ञायामिति लक्षणसमन्वयः ।

## हेतुः -

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायामुदाहरणस्य सादृश्यात् पक्षे यत् साध्यस्य साधनं भवति, तादृशसाध्यसाधकं पञ्चम्यन्तं तृतीयान्तं वा वाक्यं हेतुः । यथा पर्वतो वह्निमानिति । साध्यनिर्देशात्मिकायाः प्रतिज्ञायाः प्रयोगानन्तरं मध्यस्थस्य कुत इत्याकारजिज्ञासायाः निवृत्तये वक्ता महानसादेः उदाहरणस्य साधर्म्यादर्थाद् यथा महानसे वह्निधूमयोः साहित्यमस्ति तथैव पर्वतेऽपि धूमस्य वर्तमानत्वेन वह्निमत्त्वमपि भवितव्यमिति उदाहरणसाधर्म्यात् साध्यस्य यत् साधनं कारयति तादृशसाध्यसाधकधूमादिति वाक्यं हेतुवाक्यम् । अत आह सूत्रकारः **"उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः**[४]**"** यथा शब्दोऽनित्य उत्पत्तिधर्मकत्वादित्यत्र यदुत्पत्तिधर्मकं तज्जन्यं यथा घटादिकमिति घटादेः समानधर्मकत्वेन शब्देऽपि उत्पत्तिधर्मकत्वहेतुना अनित्यत्वं साध्यते, तत्र अनित्यत्वसाधकमुत्पत्तिधर्मकत्वादिति वाक्यं हेतुवाक्यम् । यथा अन्वय्युदाहरणसाधकत्वं भवति तथैव व्यतिरेक्युदाहरणवैधर्म्यादपि हेतोः साध्यसाधकत्वं भवति । अत आह सूत्रकारः **तथा वैधर्म्यात्**[५] इति । विपक्षोदाहरणवैधर्म्यादपि साध्यसाधकत्वं हेतौ । यथा यो न वह्निमान् स न धूमवान् यथा जलह्रद इति व्यतिरेकव्याप्त्या जलह्रदवैधर्म्यादपि धूमः पर्वते वह्निसाधको भवति । जलह्रदवैधर्म्यञ्च धूमव्यतिरेकित्वम् । अतः हेतुवाक्यस्य लक्षणमित्थं कर्तव्यम् यद् हेतुत्वप्रतिपादकविभक्तिमन्यायावयववाक्यत्वं हेतुवाक्यस्य लक्षणम् । हेतुत्वप्रतिपादकविभक्तिश्च पञ्चमी विभक्तिः । तादृशविभक्तिमत्त्वे सति न्यायावयवत्वं हेतुवाक्यत्वं धूमादिति वाक्येऽस्ति इति लक्षणसमन्वयः । एवमपि निगमनेऽतिव्याप्तिः स्यादतः विभक्त्यर्थहेतुत्वमुख्यविशेष्यकान्वयबोधजनकन्यायावयवत्वमिति हेतुवाक्यस्य लक्षणं कार्यम् । धूमादिति वा-

---

[१]अवयवचिन्तामणिः पृ०सं० 91.
[२]अवयवदीधितिः पृ० 131.
[३]अवयवचिन्तामणिः पृ० 187.
[४]न्या०सू० 1/1/34.
[५]न्या०सू० 1/1/34.


ISSN : 2249-538X

क्ये घटकीभूतविभक्तेः ज्ञाप्यत्वरूपहेतुत्वे लक्षणा, धूमज्ञाने च धूमपदस्य लक्षणा तथा च धूमज्ञानज्ञाप्य इति बोधो भवति ।

तादृशबोधजनकन्यायावयववाक्यत्वं धूमादिति वाक्येऽस्तीति लक्षणसमन्वयः । न कोऽपि दोषः । चिन्तामणिकारस्तु- **अनुमितिकारणीभूतलिङ्ग परामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वं हेतुत्वमिति**[१] हेतुवाक्यस्य लक्षणं कृतवान् । चरमजनकान्तं न्यायावयवार्थकं न्यायबहिर्भूतहेतुसदृशवाक्यातिव्याप्तिवारकम् । प्रतिज्ञादावतिव्याप्तिवारणाय तत्रैव साध्याविषयकत्वनिवेशः । इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वाद् इत्यत्र 'यद् दण्डाज्जातं तद् दण्डसंयोगाजन्यद्रव्यत्वाभाववद्' इति व्यतिरेक्युदाहरणे दण्डाज्जातत्वाभावरूपसाध्याविषयकज्ञानजनके वाक्येऽतिव्याप्तिवारणाय हेतुविभक्तिमत्त्वनिवेशः तदर्थश्च प्रकृतसाध्यान्वित स्वार्थबोधनक्षमार्थोपस्थितिजनकविभक्तिमत्त्वम् । उक्तव्यतिरेक्युदाहरणान्तर्गतदण्डपदोत्तरपञ्चम्याः जातशब्दार्थान्वितार्थोपस्थितिजनकत्वेऽपि दण्डाज्जातत्वाभावरूपप्रकृतसाध्यान्वितार्थोपस्थितिजनकत्वाभावान्नातिव्याप्तिः ।

एवमेव मणौ अन्यान्यपि हेतुवाक्यस्य बहूनि लक्षणानि प्रदर्शितानि वर्तन्ते । यथा **उदाहरणप्रयोजकाकांक्षाजनकशाब्दज्ञानजनकन्यायावयवत्वम्**[२] । उदाहरणप्रयोगहेतुभूता या आकांक्षा कथमस्य गमकत्वम् इत्याकारिका तज्जनको यः शाब्दबोधः तज्जनकन्यायावयववाक्यत्वं धूमादिति वाक्येऽस्तीति लक्षणसमन्वयः । हेतुवाक्यजन्यशाब्दबोधानन्तरं कथमस्य गमकत्वमित्याकाङ्क्षया उदाहरणप्रयोगात् । एवमेव **साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं हेतुवाक्यत्त्वम्**[३] । यथा धूमादिति वाक्ये साध्याविषयकज्ञानजनकत्वस्य हेतुपञ्चम्यन्तानुमितिपरशब्दत्वस्य च सत्त्वाल्लक्षणसमन्वयः । अनुमितिपरवाक्यत्वमित्यस्य न्यायावयव इति पर्यवसितोऽर्थः । तथा च हेतुबोधकपञ्चम्यन्तन्यायावयववाक्यत्वम् इति विशेष्यार्थः । अयं न दण्डाज्जातम् इति ।

**निगमनम् -**

हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम् । तथा च सूत्रम् '**हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्**'[४] । उपनयकृतहेतुनिर्देशमाश्रित्य प्रतिज्ञायाः यत्पुनर्वचनं तन्निगमनम् । यथा 'वह्निव्याप्यधूमवत्वात् पर्वतो वह्निमान्' इति वाक्यं निगमनम् । तथा च पर्वतो वह्निमान् धूमाद्, यो यो धूमवान् स वह्निमान् यथा महानसं तथा चायम्, तस्मात्तथेत्यत्र तस्मात्तथेति यत् प्रतिज्ञायाः पुनर्वचनं तदेव निगमनम् । उपनयेन हेतूपसंहारः कृतः, तदनन्तरं साध्योपसंहारोऽप्यावश्यक एवेति स एव निगमनेन क्रियते । साध्योपसंहारश्च प्रतिज्ञायाः पुनर्वचनम् । तथा च प्रकृतसाध्यव्याप्यधूमज्ञानज्ञाप्याबाधितासत्प्रतिपक्षितपर्वतो वह्निमानिति प्रतिज्ञायाः पुनर्वचनं निगमनम् । यद्यपि व्याप्तिपक्षधर्मतयोश्चतुर्भिरवयवैरेव लाभात् निगमनं किमर्थमिति शङ्का जायते, तथापि अबाधितत्वासत्प्रतिपक्षितत्वयोरवयवान्तरैरलाभात् तद्बोधकतया निगमनस्य सार्थक्यम् इति विवेकः ।

न्यायावयवप्रकृतसाध्यीयप्रकृतव्याप्तिविशिष्टप्रकृत पक्षधर्मताविशिष्टप्रकृतहेतुज्ञानज्ञाप्यत्वविशिष्टप्रकृतहेतुज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यावगाहि अबाधितासत्प्रतिपक्षितार्थबोधजनकवाक्यत्वं निगमनस्य लक्षणमिति ।

**निष्कर्षः** (Conclusion)

अस्मिन् शोधपत्रे न्यायदर्शनानुसारेण अवयवविचारस्य विस्तरेण अनुशीलनं कृतम् । न्यायशास्त्रे प्रतिपादिताः पञ्चावयवाः - प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम् अनुमानप्रक्रियायाः प्रमुखाधारत्वेन

[१] अवयवचिन्तामणि हेतुप्रकरणम्, पृ० 201.
[२] अवयवचिन्तामणिः-हेतुप्रकरणम्, पृ० 300.
[३] तत्रैव, पृ० 302.
[४] न्या० सू० 1/1/39.

प्रतिष्ठिताः सन्ति। एतेषामवयवानां समुचितप्रयोगेण तर्कस्य स्पष्टता, युक्तिसङ्गतता तथा ज्ञानस्य प्रमाणिकता च सुलभतया सिद्ध्यति। न्यायाचार्यैः अवयवव्यवस्था केवलं वादविवादस्य साधनरूपेण न निरूपिता, अपितु सत्यनिर्णयस्य वैज्ञानिकपद्धतिरूपेणापि प्रतिष्ठापिता। विशेषतः हेतोः साध्यसाधनभावः उदाहरणस्य च दृष्टान्तरूपेण प्रमाणत्वं न्यायतर्कपद्धतेः गाम्भीर्यं प्रकाशयति। अन्येषु भारतीयदर्शनेष्वपि अवयवसम्बद्धविचाराः दृश्यन्ते, तथापि न्यायदर्शने तेषां व्यवस्थितं सूक्ष्मञ्च निरूपणं विशेषतया प्राप्यते। वैशेषिक-साङ्ख्य-बौद्ध-जैनादिदर्शनेषु संक्षिप्तरूपेण प्रतिपादितस्य तर्कविचारस्य अपेक्षया न्यायस्य पञ्चावयवप्रणाली अधिकं संगठितं तार्किकञ्च दृश्यते। अवयवविचारस्य माध्यमेन न्यायशास्त्रस्य प्रमाणमीमांसात्मकं स्वरूपं स्पष्टतया अवगम्यते। एषा पद्धतिः भारतीयतर्कपरम्परायाः सूक्ष्मां वैज्ञानिकदृष्टिं च प्रतिपादयति। अधुनापि शास्त्रीयचर्चासु, अनुसन्धानक्षेत्रेषु तथा तार्किकविश्लेषणेषु च न्यायस्य महत्त्वं नितरां वर्त्तते। अवयवानां सम्यगध्ययनं बुद्धेः विश्लेषणात्मकक्षमतां वर्धयति तथा युक्तियुक्तचिन्तनस्य विकासाय सहायकरूपेण भवति।

अतः न्यायदर्शने प्रतिपादितः अवयवविचारः केवलं प्राचीनभारतीयतर्कशास्त्रस्य धरोहररूपेण न, अपितु आधुनिकबौद्धिकपरम्परायामप्यत्यन्तोपयोगी इति निष्पन्नम्। एवञ्च शोधपत्रमिदमवश्यमेव न्यायपरम्परायाः गाम्भीर्यं प्रकाशयन् भारतीयदार्शनिकचिन्तनस्य वैशिष्ट्यं समुज्ज्वलयति। इति शम्।

**परामृष्टाः ग्रन्थाः**


१. न्यायदर्शनम्-महर्षिः गौतमः, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली २००९
२. वैशेषिकदर्शनम्-महर्षिः कणादः, विजयकुमारगोविन्दरामहासानन्दः, २०१०
३. तर्कभाषा -केशवमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, २००३
४. तर्कचन्द्रिका – श्रीहरिरायः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २००१
५. न्यायसारः-श्रीभासर्वज्ञः, संजयप्रकाशनम्, देहली-२००५
६. न्यायकुसुमाञ्जलिः-उदयनाचार्यः, चौखम्बासुरभारतीप्रकाशनम्, १९९७
७. तत्त्वचिन्तामणिः माथुरी-श्रीमथुरानाथतर्कवागीशः, चौखम्बासुरभारतीप्रकाशनम्, २०१०
८. न्यायसिद्धान्तमुक्तावली (किरणावली टीका)-प० श्रीकृष्णवल्लभाचार्यः, चौखम्बा-संस्कृतसंस्थानम्, २०११
९. तर्कसङ्ग्रहः विद्याधरी टीका-देवदत्तशर्मा, समर्थ मिडिया सेंटर, २०१४
१०. न्यायवार्तिकम्-श्रीमद्भारद्वाज उद्योतकरः, चौखम्बासंस्कृतभवनम्, वाराणसी, वि.सं. १९१६
११. न्यायकोशः- महामहोपाध्यायः भीमाचार्यः, चौखम्बासुरभारतीप्रकाशनम्, २०११
१२. तर्कसङ्ग्रहः दीपिका-अन्नंभट्टः, भारतीयविद्यासंस्थानम्, २००२
१३. प्रशस्तपादभाष्यम् (पदार्थधर्मसंग्रहाख्यम्)-प्रशस्तपादाचार्यः
१४. ईश्वरकृष्णः-साङ्ख्यकारिका माठरवृत्तिसहितम्
१५. सदानन्दयोगीन्द्रसरस्वती-वेदान्तसारः, सुबोधिनी हिन्दीव्याख्यासहितः
१६. नारायणभट्टः-मानमेयोदयः
१७. धर्मराजाध्वरिन्द्रः-वेदान्तपरिभाषा



ISSN : 2249-538X

# भारतीयवादपद्धतौ निग्रहस्थानानामुपयोग आधुनिकवादे च तेषामुपयोगः

श्री सोमनाथमाइतिः*
शोधच्छात्रः,
पटना-विश्वविद्यालयः

***लेखसारः*** *– शोधप्रबन्धेऽस्मिन् मया वादविषये यथामति विचारितम् । वयं जानीमः यत् न्यायादर्शनाभिमतपदार्थेषु अन्यतमो भवति वादः । वादस्य प्रयोजनं तु तत्त्वबोध एव । भारतीयवादपद्धतिः किदृशी आसीत् । तत्र वादी प्रतिवादी मध्यस्थः एते च भवन्ति स्म । वादस्य लक्षणं तावत् प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः (1/2/1) । वादात्मके विचारे प्रमाणैः स्वपक्षस्थापनं परपक्षनिराकरणं च क्रियते, सः सिद्धान्ताविरुद्धः सन् प्रतिज्ञादिपञ्चावयवोपपन्नो भवति । तस्मिन् पक्षप्रतिपक्षयोः परिग्रहो भवति । तत्र वादस्य कथान्तर्गतत्वात् कथा नाम का इति आलोच्य तिस्रः कथाः वादो जल्पो वितण्डा चेति विचारिताः । जल्पवितण्डयोः प्रयोजनं तु तत्त्वबोधो नास्ति तर्हि तेषां वर्णनं किमर्थं क्रियते । वितण्डायाः प्रयोजनं किं वैतण्डिकस्य स्वपक्षो भवति न वा । तदनन्तरं वादस्य प्रतिज्ञादिपञ्चावयवोपपन्नत्वात् प्रतिज्ञादिपञ्चावयवाः अत्र प्रतिपादिताः । अवयवानां पौर्वापर्यविचारः, प्रत्येकम् अवयवस्य प्रयोजनं किमिति आलोचितम् । एवञ्च तत्र प्रतिज्ञा नाम शब्दप्रमाणम्, हेतुश्चानुमानम्, उदाहरणं तु प्रत्यक्षमेव, उपनयस्तु उपमानम्, निगमनं तु अबाधितमेव । प्रत्यक्षादिप्रमाणमूलकैः पञ्चावयवैः अर्थपरीक्षणं न्यायः । तथा हि उक्तं भाष्यकारेण "प्रमाणैर्थपरीक्षणं न्यायः" इति । स च परार्थानुमानमेव । तदनन्तरमेव निग्रहस्थानानां वादे कथमुपयोगः । तत्र प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्यासो हेत्वन्तरमर्थान्तरं निर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च द्वाविंशतिधा विभक्तानि निग्रहस्थानानि शोधप्रबन्धेऽस्मिन् आलोचितानि सन्ति । तदनन्तरं निग्रहस्थानानाम् आधुनिकवादे च कथमुपयोगः इति आलोचितः ।*

***कूटशब्दाः*** *– कथा, वादः, जल्पः, वितण्डा, छलम्, निग्रहस्थानम्, प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्यासो हेत्वन्तरमर्थान्तरं निर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाः ।*

**भूमिका** - वादे वादे जायते तत्त्वबोधः अर्थात् परस्परं शास्त्रार्थेन चर्चामाध्यमेन वा वास्तविकतत्त्वस्य ज्ञानं भवति । तत्त्वज्ञानाय वादः क्रियते स्म न तु विजिगीषार्थम् । महर्षिणा गौतमेन स्वकीयन्यायसूत्रग्रन्थे स्वीकृतेषु षोडशसु पदार्थेषु अन्यतमपदार्थो वादः । वादस्य कथान्तर्गतत्वाद् आदौ केयं कथा इति जिज्ञासा उदेति तत्रोच्यते वाचस्पतिमिश्रेण **"नानाप्रवक्तृका विचारविषया वाक्यसंदब्धिः कथेति सामान्यलक्षणम्"** । यथा वा उक्तं वरदराजेन तार्किकरक्षायां **"विचारविषयो नानावक्तृको वाक्यविस्तरः"** अर्थात् नानावक्तृकः पूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः कथा । विचार्यविषये अनेके वक्तारो यथानियमं कथितानां वाक्यानां समूह एव कथा । कथायां प्रायः वादी प्रतिवादी मध्यस्थः/सभासदः वा वक्तारो भवन्ति । तत्र एकस्यैव वक्तुः ग्रन्थकारस्य वा पूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः कथा नास्तीति प्रतिपादनाय नानावक्तृक इति । कथा इति शब्दोऽत्र पारिभाषिकः । तत्र वाल्मीकिरामायणेऽपि पारिभाषिककथाशब्दस्य प्रयोगः दृश्यते । तथा ह्युक्तम् अयोध्याकाण्डे [१]""**न विगृह्य कथारुचिः"**, तथा हि उक्तं

***सम्पर्कसूत्रम्** - 7384793638, Email- somnathmaitybelur@gmail.com
[१]रामायणे अयोध्याकाण्डे – 2/42

वात्स्यायनेन – [१]" **तिस्रः कथा भवन्ति वादो जल्पो वितण्डा चेति**" ।

**वादः** – तत्त्वबुभुत्सोः कथा वादः अर्थात् तत्त्वबुभुत्सया क्रियमाणा कथा एव वाद इत्युच्यते। अर्थात् प्रत्यक्षादिप्रमाणेन तदनुग्राहकतर्केण च तत्त्वनिर्णयफलकः कथाविशेषः वादः। तथाहि सूत्रितं गौतममहर्षिणा – [२]"**प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः**"। अर्थात् वादात्मकविचारे प्रमाणैः तर्केण च स्वपक्षस्थापनं परपक्षनिषेधश्च क्रियते, सः सिद्धान्ताविरुद्धः सन् (अपसिद्धान्तः न भवेत्) प्रतिज्ञादिपञ्चावयवोपपन्नो भवति। तस्मिन् च वादात्मकविचारे पक्षप्रतिपक्षयोः परिग्रहो भवति।

**जल्पः** – परपक्षनिराकरणस्वपक्षसाधनवती विजिगीषुकथा जल्पः। छलजातिनिग्रहस्थानप्रयोगबहुलो विजयफलकः कथाविशेषः जल्पः। मयैव जेतव्यमिति जल्पे भवति। तत्त्वं किमिति चिन्ता मास्तु, विजिगीषया परपक्षनिराकरणपुरःसरं स्वपक्षस्थापनमत्र भवति। तथा हि सूत्रितं महर्षिणा गौतमेन – [३]"**यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः**" इति। अर्थात् वादलक्षणे उक्तविशेषणविशिष्टः सन् छलजातिनिग्रहस्थानैः स्वपक्षस्थापनं परपक्षप्रतिषेधश्च यत्र भवति स जल्पः। यथोक्तोपपन्नः इति शब्दस्य व्याख्यानकाले भाष्यकारवार्तिककारयोर्मध्ये मतपार्थक्यं दृश्यते। तत्र भाष्यकारमते वादे उक्ताः सर्वे विशेषणांशाः जल्पेऽपि अनुवर्तन्ते। तन्मते छलजातिनिग्रहस्थानैरपि स्वपक्षस्थापनं परपक्षनिराकरणं भवति इति विशेषः। अर्थात् छलजातिनिग्रहस्थानानां प्रमाणतर्कयोः सहकारित्वेन स्वपक्षसाधकत्वमस्ति न तु स्वतन्त्रतया परन्तु परपक्षनिराकरणे छलजातिनिग्रहस्थानानां स्वातन्त्र्यमस्ति। तत्र वार्तिककारमते तु छलजातिनिग्रहस्थानैः स्वपक्षस्थापनं परपक्षनिराकरणं भवितुं नार्हति। यतो हि छलं जातिः इति पदार्थद्वयमपि असदुत्तरविशेषः। यद् उत्तरमेव नास्ति, तेन कस्यापि मण्डनं खण्डनं वा न भवति। न हि सहस्रेणाप्यन्धैः पाटच्चरेभ्यो गृहं रक्ष्यते इत्यर्थः। तत्र वार्तिककाराणां मतमेव अधिकतया आद्रियते।

**वितण्डा** – विदण्ड्यते व्याहन्यते परपक्षोऽनया इति वितण्डा। स्वपक्षस्थापनाहीना परपक्षनिराकरणमात्रा-वसाना विजिगीषुकथा वितण्डा। तथा हि न्यायसूत्रम् – [४]**स "प्रतिपक्षस्थापनाहीनः वितण्डा"** इति। स जल्पः प्रतिपक्षस्य वादिप्रतिकूलस्य स्वपक्षस्य स्थापनाहीनश्चेत् वितण्डा भवति। तत्र वितण्डायाः प्रयोजनमस्ति न वा। अत्र केचन वर्णयन्ति निष्प्रयोजना वितण्डा दूषणमात्रत्वात्। किन्तु वैतण्डिकप्रतिवादिनोऽपि स्वपक्षोऽस्ति परन्तु स तस्य स्थापनं न करोति। सर्वत्र स्वपक्षः सिद्धो भवतु वा न वा, परपक्षखण्डने एव तस्य तात्पर्यम्। परपक्षखण्ड-नेनैव तस्य स्थापना भवेत् अतः प्रमाणैः तस्य संस्थापनं न क्रियते। तदुक्तं वार्तिककारेण – "**न दूषणमात्रं वितण्डा किन्तु अभ्युपेत्य पक्षं यो न स्थापयति स वैतण्डिक उच्यते**"।

अत्र प्रश्नो भवति अध्यात्मविद्यारूपन्यायशास्त्रे जल्पवितण्डयोरुल्लेखः किमर्थम्, मुमुक्षुणा किमर्थं वा जेत-व्यम्। तत्र उच्यते तत्त्वनिश्चयरक्षार्थमिति। तस्मादेव उक्तम् – तदेतद्विद्यापरिपालनार्थं न तु लाभपूजाख्यात्यर्थम्। तथा हि सूत्रम् – [५]"**तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्**"। अर्थात् जनिताङ्कुरयुक्तक्षेत्रस्य संरक्षणार्थं कण्टकशाखावरणमिव तत्त्वज्ञानार्थं यतमानानां कृते तत्त्वज्ञानस्य संरक्षणार्थं ज-ल्पवितण्डयोः उपयोगः अस्ति। अथवा कश्चन अश्रद्धावान् नास्तिकः तत्त्वम् अन्यथाकर्तुं प्रयतते तद्दशायां तत्त्व-

[१]न्यायसूत्रभाष्ये द्वितीयाह्निके द्विचत्वारिंशत्तमसूत्रभाष्ये।
[२]न्यायसूत्रम् – 1/2/1
[३]न्यायसूत्रम् – 1/2/2
[४]न्यायसूत्रम् – 1/2/3
[५]न्यायसूत्रम् – 4/2/50


ISSN : 2249-538X

संरक्षणार्थं तयोः प्रयोगः कर्तव्यः । यथा वा सूत्रं [१]**"ताभ्यां विगृह्य कथनम्"** इति अर्थात् विजिगीषार्थं विवादमुत्पाद्य जल्पवितण्डाभ्यां तत्त्वस्य कथनं करणीयम् ।

वादलक्षणस्य पञ्चावयवोपपन्नत्वात् संक्षेपेण पञ्चावयवाः निरूप्यन्ते । तथा हि न्यायसूत्रं [२]**"प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः"** इति । स्वेनानुमितिं सम्पादिता, परः अनुमितिं न सम्पादितवान् तद्दशायायां तस्य कृते सर्वमिदं बोधनीयम्, सोऽपि अनुमितिं प्राप्नुयात् तदर्थमेव इमे अवयवाः । अवयवाः परार्थानुमानैकदेशाः । प्रतिज्ञादिपञ्चावयववाक्यं न्यायः । तथा हि भाष्यकारेणोक्तम् – [३]**"प्रमाणैर्थपरीक्षणं न्यायः"** । परार्थम् यदनुमानं तत् न्यायसाध्यम् अर्थात् परस्य प्रतिवादिनः अर्थः निवृत्तिः पराजयो वा यस्मात् भवति तत् परार्थम् अनुमानम् । तथा च परम्परया वादिप्रयुक्तन्यायजन्यया अनुमित्या प्रतिवादिनः स्वपक्षनिरासेन पराजयो भवति । न्यायस्य प्रयोजनं तावत् मध्यस्थस्य साध्यनिश्चयः संशयनिवृत्तिः, प्रतिवादिनः पराजयश्च ।

**प्रतिज्ञा** – साध्यनिर्देशः प्रतिज्ञा इति न्यायसूत्रम्। वस्तुतस्तु साध्यवत्पक्षनिर्देशः प्रतिज्ञा। यत् साधयितुमिष्यते तत्साध्यम् । यत्र सन्देहो वर्तते साध्यस्य सः पक्षः । पक्षज्ञानमेव प्रतिज्ञायाः प्रयोजनम् । यथा पर्वतो वह्निमानिति प्रतिज्ञा ।

**हेतुः** – पक्षे साध्यस्य निर्देशानन्तरं कुतः इति जिज्ञासा समुदेति तदा हेतोः प्रयोगः कर्तव्यः । अत्र हेतुशब्देन कारणमिति न चिन्तनीयं यतो हि धूमेन हेतुना वह्निः न जायते यथा तन्तुना पटः । तस्मात् अत्र हेतुशब्देन ज्ञापकः इत्यर्थो बोद्धव्यः । वह्निसत्त्वे धूमः ज्ञापकः, वह्निश्च ज्ञाप्यः । अत एव लिङ्गमित्युच्यते लीनमर्थं गमयतीति लिङ्गम् । तथा हि न्यायसूत्रम् – [४]**"उदाहरणसामर्थ्यात् साध्यसाधनं हेतुः"**। अर्थात् पक्षस्य उदाहरणेन दृष्टान्तेन सह समानधर्मतायाः कारणात् यः साध्यं साधयितुं योग्यः सः हेतुः । यथा शब्दोऽनित्यः कृतकत्वात् इति प्रयुक्ते सति घटादिदृष्टान्तेऽपि अनित्यत्वेन सह कृतकत्वं पश्यति । तदा तस्य हेतुत्वं निश्चीयते । यथा धूमः ।

**उदाहरणम्** – हेतौ उक्ते कथमस्य साध्यगमकत्वमित्याकांक्षायाम् उदाहरणप्रयोगः कर्तव्यः । तदानीं वक्ता हेतुसाध्ययोः साहचर्यं प्रदर्शयति । उदाहरणप्रयोगेण श्रोता च व्याप्तिं गृह्णाति । तदेव प्रयोजनम् उदाहरणस्य । तथा हि सूत्रम् – [५]**"साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्"** इति । दृष्टान्तः साध्यसदृशधर्मवान् भवति । यथा यत्र यत्र धूमः तत्र वह्निः यथा महानसम् ।

**उपनयः** – उदाहरणानन्तरं भवतु हेतौ साध्यव्याप्तिः, तथापि व्याप्तं लिङ्गं किं पक्षे वर्तते न वा इति जिज्ञासायां व्याप्तस्य पक्षवृत्तित्वप्रदर्शनाय उपनयवाक्यं प्रयुज्यते। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनम् उपनयः । अर्थात् वह्निव्याप्यो यो धूमः उदाहरणेन गृहीतः तादृशः धूमोऽत्रापि अस्ति । तथा चायमपि अर्थात् वह्निव्याप्यधूमवानयमपि । तथा हि न्यायसूत्रम् – [६]**"उदाहरणापेक्षः तथा इति उपसंहारो न तथा इति वा साध्यस्य उपनयः"** । उदाहरणानुसारं तथा व्याप्तिविशिष्टहेतुमान् पक्ष इति य उपसंहारस्य उपन्यासः स एव उपनयः ।

**निगमनम्** – हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम् । हेतोः साध्यवत्तया इति विग्रहः । तस्मात्तथेति निगमनम्। अर्थात् वह्निव्याप्यधूमवत्त्वात् पर्वतो वह्निमान्। अबाधितत्वं निगमनस्य प्रयोजनम्। तथा हि

[१]न्यायसूत्रम् – 4/2/51
[२]न्यायसूत्रम् – 1/1/39
[३]न्यायसूत्रभाष्यम् - प्रथमसूत्रम्
[४]न्यायसूत्रम् – 1/1/34
[५]न्यायसूत्रम् – 1/1/36
[६]न्या.सू. – 1/1/37

न्यायसूत्रम् – [१]"**हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्**"। अर्थात् हेतोः व्याप्तिविशिष्टस्य पक्षधर्मस्य अपदेशात् कथनात् प्रतिज्ञायाः प्रतिज्ञातार्थस्य पुनः कथनम् इत्यर्थः।

तत्र पक्षज्ञानं प्रतिज्ञायाः प्रयोजनम्। लिङ्गज्ञानं हेतोः प्रयोजनम्। व्याप्तिज्ञानं च उदाहरणस्य प्रयोजनम्। पक्षधर्मताज्ञानम् उपनयस्य प्रयोजनम्। पक्षे साध्यम् अबाधितमिति ज्ञानं निगमनस्य प्रयोजनम्। तत्र प्रतिज्ञा इति शब्दप्रमाणान्तर्गता, हेतुः अनुमानान्तर्गतः, उदाहरणं तु प्रत्यक्षान्तर्गतम्, उपनयः उपमानान्तर्गतः, निगमनं तु अबाधितमेव। अत एव भाष्यकारेण उक्तं प्रमाणैर्थपरीक्षणं न्यायः। प्रत्यक्षादिमूलकैः प्रतिज्ञादिपञ्चावयवैः अर्थपरीक्षणमेव न्यायः। परार्थानुमानमेव न्यायः।

**निग्रहस्थानम्** – वादिनः अपजयहेतुः निग्रहस्थानम्। प्रतिवादिना यदि वादिप्रयुक्ते विषये निग्रहस्थानं प्रदर्श्यते तदा वादी निगृहीतो भवति अर्थात् वादिनः पराजयो भवति। अत एव भाष्ये उक्तम् – [२]"**निग्रहस्थानं खलु पराजयप्राप्तिः**" अतः उभयोः वादिप्रतिवादिनोः निग्रहस्थानज्ञानं सुतरामपेक्षते। वादिप्रयुक्ते विषये यदि निग्रहस्थानमस्ति किन्तु प्रतिवादिना तन्न ज्ञातं चेत् तत्र प्रतिवादिनः एव पराजयो भवति। अतः उभयोः तद्विषये ज्ञानमावश्यकम्। एवञ्च तत्र यः मध्यस्थो भवति अथवा सभासदो यो भवति तस्यापि निग्रहस्थानविषये ज्ञानमावश्यकम्। अन्यथा वादे किं प्रचलति तत्तेन बोद्धुं न शक्यते। वादः यथानियमं सुष्ठुतया भवति चेदेव तत्त्वज्ञानं भवति। अन्यथा एकस्यैव जयः भवेत्। तथा हि न्यायसूत्रम् – [३]"**विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्**"। विपरीता प्रतिपत्तिः विप्रतिपत्तिः। विपरीतज्ञानमित्यर्थः। अप्रतिपत्तिः अज्ञानं पराजयहेतुः निग्रहस्थानम्। विपरीतज्ञानस्य कारणतः अज्ञानस्य कारणतः च पराजेते। निग्रहस्थानं प्रदर्शितं चेत् कथा एव समाप्ता भवेत्। तथा हि जयन्तभट्टः विशदेन उक्तवान् – "निग्रहः पराजयस्तस्य स्थानमाश्रयः कारणमित्यर्थः। किञ्च पराजयनिमित्तम्? विप्रतिपत्तिरप्रतिपत्तिश्च। विपरीता कुत्सिता विगर्हणीया प्रतिपत्तिर्विप्रतिपत्तिः, साधनाभासे साधनबुद्धिर्दूषणाभासे दूषणबुद्धिः। अप्रतिपत्तिस्त्वारम्भविषयेऽनारम्भः। आरम्भस्य विषयः, साधने दूषणं दूषणे चोद्धारः, तयोरकरणमप्रतिपत्तिः। द्विधा हि वादी पराजीयते यथा कर्तव्यमनारभमानो विपरीतं वा प्रतिपाद्यमानः" इति। तानि च निग्रहस्थानानि द्वाविंशतिधा विभज्यते तथा हि सूत्रम् – "[४]**प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्यासो हेत्वन्तरमर्थान्तरं निर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि**"।

**आधुनिकवादे (Debate) च तेषामुपयोगः** – आधुनिककाले संवादस्य, वादविवादस्य च स्वरूपं व्यापकं जातमस्ति। अद्यतनकाले वादविवादाः केवलं राजसभासु गुरुकुलेषु वा न भवन्ति, अपितु ते समाजमाध्यमेषु (Social Media), दूरदर्शनेषु (TV Debates), न्यायलयेषु (Courts), अन्ताराष्ट्रिय-कूटनीति-मञ्चेषु (Global Diplomacy), अन्तर्जालपुटे (Google Meet) च जायन्ते। एतादृशे **आधुनिकवादे** महर्षिणा गौतमेन न्यायसूत्रे प्रतिपादितानां **निग्रहस्थानानां** महानुपयोगो दृश्यते।

(1) इदानीन्तनकाले प्रवर्तमाने वादेऽपि द्वे दले भवतः। प्रत्येकस्मिन् दले द्वौ त्रयो वा वक्तारो भवन्ति। एवञ्च तत्र मध्यस्थः निर्णायकः श्रोतारश्च भवन्ति। यथा प्राचीनकाले वादी प्रतिवादी मध्यस्थः एते भवन्ति तथा अस्मिन् काले अपि भवन्ति।

---

[१]न्या.सू. – 1/1/39
[२]न्या.सू.भा. – 1/2/19
[३]न्या.सू. – 1/2/19
[४]न्या.सू. – 5/2/1

 ISSN : 2249-538X

(2) तत्र एकं दलं सकारात्मकपक्षं स्थापयति। अपरं दलं च तद्विरुद्धात्मकं पक्षं स्थापयति। यथा प्राचीनकालेऽपि पक्षः प्रतिपक्षः द्वौ भवतः तद्वत्।

(3) आधुनिकवादे निग्रहस्थानानि " Logical fallacies " इति रूपेण ज्ञायन्ते। यदा कश्चित् वक्ता तर्कहीनं प्रमाणहीनं वा तथ्यं प्रस्तौति तदा निग्रहस्थानेन अपरपक्षो निगृहीतो भवति। यथा अपार्थकम् असम्बद्धप्रलापः ( Irrelevant Arguments ), अर्थान्तरं प्रकृतविषयात् विच्युतिः ( Red Herring ) ।

(4) **न्यायालयेऽप्येतेषामुपयोगः वर्तते** – न्यायालये सत्यासत्ययोः निर्णयार्थं निग्रहस्थानानां सूक्ष्मेक्षिका अतीव उपयुक्ता अस्ति। तत्र अधिवक्तॄणां तर्केषु यदि विरोधाभासो भवेत् तर्हि **प्रतिज्ञाहानिः** अथवा **अपसिद्धान्तः** इति निग्रहस्थानैः तस्य पक्षस्य निर्बलता प्रदर्शिता भवति। यदि कश्चित् अधिवक्ता तादृशीं जटिलां भाषां प्रयुङ्क्ते यां न्यायाधीशः प्रतिपक्षी वा त्रिः श्रुत्वापि नावगच्छति, तर्हि सः तर्कः **अविज्ञातार्थमिति** निग्रहस्थानं प्राप्नोति। यथा वा यदा कश्चित् अपरोक्षसाध्यं विना केवलम् अनुमानेन कस्यचिद् अपराधस्य वर्णनं करोति अथवा स जनोऽपराधीति केवलमनुमानेनैव प्रमाणीकरोति तद्यथा एषः कृष्णवर्णं वस्त्रं धारयति स्म, अतः एष एव चोरः इति तदा **हेत्वाभासः** भवति। न्यायाधीशः एतान् दोषान् ज्ञात्वा एव न्यायसङ्गतं निर्णयं कुर्यात्। यदि न्यायाधीशो निग्रहस्थानानां ज्ञाने निपुणः स्यात् तर्हि सः प्रतिपक्षस्य कुतर्कान् ज्ञात्वा निष्पक्षं सत्यं च निर्णयं दातुं शक्नुयात्।

(5) **राजनैतिकभाषणे वादविवादे च निग्रहस्थानानामुपयोगः** – राजनैतिकभाषणेषु मतदातॄणां भ्रमाय जनमतम् आकर्षयितुं प्रायः निग्रहस्थानानां ( कुतर्काणाम् ) प्रयोगः क्रियते। तत्र निग्रहस्थानानां प्रयोगेण सत्यं प्रकटयितुं शक्यते। यदा कश्चिन्नेता देशस्य अर्थव्यवस्थायाः कर्मसंस्थानव्यवस्थायाः विषये पृष्टः सन् तस्य उत्तरम् अदत्त्वा राष्ट्रवादः अथवा प्राचीनगौरवमिति विषये वक्तुम् आरभते, तदा **अर्थान्तरं** ( Diverting the Topic ) नामकं निग्रहस्थानं भवति। आधुनिकवादे एषो दोषः रेड् हेरिंग ( Red Herring ) इति नाम्ना प्रसिद्धः। निग्रहस्थानानां ज्ञानेन वयं झटिति ज्ञातुं शक्नुमो यत् प्रवक्ता प्रकृतविषयाद् अपसरति। एवञ्च केचन नेतारः स्वपक्षे दोषखण्डनम् अकृत्वा परपक्षे दोषोद्भावनं कुर्तुमुद्यताः भवन्ति। तत्र **मतानुज्ञा** इति निग्रहस्थानं भवति। यथा वा वादविवादे यदा कश्चिन्नेता प्रतिपक्षस्य सुदृढतर्कस्य उत्तरं दातुं न शक्नोति तदा सः मौनं भजते अथवा केवलं कोपं करोति। एषा **अप्रतिभा** ( Inability to Reply ) इत्युच्यते। एतज्ज्ञात्वा प्रबुद्धाः नागरिकाः नेतुः वास्तविकतां ज्ञातुं प्रभवन्ति। एवञ्चैतेषां दोषाणां ज्ञानेन सामान्यनागरिकाः नेतॄणां वाक्चातुर्यं छलं च ज्ञात्वा उचितं निर्णयं स्वीकर्तुं समर्थाः भवन्ति।

(6) **दूरदर्शनविवादेषु निग्रहस्थानानामुपयोगः ( TV Debates )** - इदानीन्तनकाले दूरदर्शनस्य प्राइम-टाइम (Prime Time) इति विवादाः तर्करहिताः, कोलाहलमयाः च भवन्ति। तत्र न्यायशास्त्रस्य नियमाः व्यवस्थापकाः भवितुं शक्नुवन्ति। यदा दूरदर्शन-विवादे कश्चित् वक्ता प्रबलेन प्रमाणेन सह प्रतिरुध्यते, तदा स उत्तरं दातुम् असमर्थः सन् ( अत्र **अप्रतिभा** इति निग्रहस्थानम् ), "अहं श्वः एतस्य उत्तरं दास्यामि" इति वदति अथवा दूरध्वनि-सम्पर्कं छिनत्ति। अत्र विक्षेपनामकनिग्रहस्थानेन स पराजितो भवति। **कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः** इति तल्लक्षणात्। केचन विचारकाः स्वकीयपक्षं प्रबलयितुं केषाञ्चिद् दुर्बोधानां प्रलोभकशब्दानां च प्रयोगं कुर्वन्ति येषां प्रकृतवादे किमपि सामञ्जस्यं नास्ति। एतादृशं शब्दजालं **निरर्थकनिग्रहस्थानेन** निरसितुं शक्यते।

(7) **आधुनिकवाणिज्यक्षेत्रे विज्ञापनेष्वपि** ( Advertisements & Marketing ) निग्रहस्थानानामुप-

योगः दरीदृश्यते । वाणिज्यक्षेत्रे विज्ञापकाः स्वकीयोत्पादानां विक्रयणाय उपभोक्तृणां तर्कबुद्धिं मोहयन्ति । विज्ञापनेषु लिख्यते एतस्य घृतस्य सेवनेन शतप्रतिशतं स्वास्थ्यलाभः, नियम-शर्ताः ( Terms and Conditions Apply ) अत्र प्रयुज्यन्ते । अत्र नियम-शर्ताः इति सूक्ष्मशब्देन मूलप्रतिज्ञायाः छलं क्रियते । न्यायशास्त्रे एतादृशः **शब्दच्छलदोषः** निग्रहस्थानरूपेण परिगण्यते । केचन विज्ञापकाः स्वोत्पादस्य श्रेष्ठतां दर्शयितुं कतिपयान् जटिलान् वैज्ञानिकशब्दान् यथा क्वान्टम् टेक्नोलॉंजी युक्तं तैलं वदन्ति, येषां तत्र कोऽपि वास्तविकः सम्बन्धो न भवति । एतत् निरर्थकनिग्रहस्थानस्याधुनिकम् उदाहरणम् ।

( 8 ) **समाजमाध्यमवादविवादे निग्रहस्थानानामुपयोगः** – वर्तमानकाले समाजमाध्यम-वादविवादाः वैयक्तिक-आक्षेपैः परिपूर्णाः सन्ति । तत्र निग्रहस्थानानामुपयोगो विवेकजागरणे साहाय्यं करोति । यदा कश्चित् वदति यत् भवतः सर्वकारस्य नीतौ दोषः अस्ति, तदा प्रतिपक्षी तस्य दोषम् अनिवार्य वदति यत् "भवतः पूर्वजः अपि चोरः आसीत् ।" अर्थात् स्वस्य दोषं अङ्गीकृत्य अन्यस्य दोषं दर्शयति । एषः आधुनिकवादे 'Ad Hominem' इति दोषः । न्यायशास्त्रे एतत् **मतानुज्ञानामकं** निग्रहस्थानम् । एतस्य ज्ञानेन सामाजिकमाध्यमेषु निरर्थकवादाद् आत्मानं रक्षितुं शक्यते ।

( 9 ) शोधकार्येऽपि निग्रहस्थानानामुपयोगो महान् वर्तते । यदा कश्चित् शोधकर्ता स्वसिद्धान्तं साधयितुं न शक्नोति तदा सः मध्ये एव स्वकीयां मूलप्रतिज्ञारूपां पूर्वसम्भावनां ( Hypothesis ) परिवर्तयति । न्यायमते एषा **प्रतिज्ञाहानिः** । शोधस्य निष्पक्षतायै एतादृशदोषक्षालनं निवार्यम् । अतः शोधकर्ता एतादृशनिग्रहस्थानानां विषये सावधानो भवेत् । एवञ्च शोधपत्रेषु एकस्यैव विचारस्य शब्दभेदैः पुनः पुनः कथनं **पुनरुक्तदोषः** कथ्यते । आधुनिककाले उत्तमलेखनाय एषो दोषो वर्जनीयः ।

( 10 ) एवञ्च आधुनिकशिक्षायां निग्रहस्थानानाम् अध्ययनेन छात्राणां बुद्धिः तीक्ष्णा भवति । छात्रेषु विश्लेषणात्मकचिन्तनस्य विकासाय एतेषाम् अध्ययनम् आवश्यकम् । संक्षेपेण, महर्षिणा गौतमेन प्रतिपादितं निग्रहस्थान-विवेचनं केवलं बौद्धिक-व्यायामो नास्ति, अपितु तत् **बौद्धिक-आत्मरक्षायाः (Intellectual Self-Defense)** एकं सुदृढं साधनम् अस्ति । आधुनिके सूचना-विस्फोट-युगे (Information Age) यत्र प्रलोभनानि, कुतर्काः, भ्रामकप्रचाराः च सर्वत्र सन्ति, तत्र निग्रहस्थानानां प्रासङ्गिकता पूर्वस्माद् अपि अधिका वर्तते । एतेषां निग्रहस्थानानां सम्यग् ज्ञानेन मनुष्यः आधुनिकवादे कस्यापि प्रलोभने, कुतर्के च न पतति, आत्मनः बौद्धिकरक्षां च कर्तुं समर्थः भवति ।

( 11 ) निग्रहस्थानानि केवलं पराजयस्य हेतुरेव नास्ति अपि तु तानि सत्यस्य अन्वेषणाय मार्गं दर्शयन्ति । आधुनिकवादे कुतर्केभ्यः रक्षणायापि एतेषां महानुपयोगो वर्तते । अतः वक्तुं शक्यते यत् निग्रहस्थानानि केवलं प्राचीनशास्त्रार्थानां विषया एव न सन्ति अपि तु आधुनिकयुगे **'तार्किक-दोष-निवारक' (Logical Fallacy Detectors)** रूपेण कार्यं कुर्वन्ति । एतेषां ज्ञानेन समाजे मानसिकजागरूकता, बौद्धिकशुद्धता च आगच्छति ।

**परामृष्टाः ग्रन्थाः**

१. न्यायदर्शन – फणिभूषण तर्कवागीश ।
२. तर्कसंग्रहः – श्रीनारायणचन्द्रगोस्वामी ।
३. न्यायदर्शनम् – अनन्तलालठक्कुरः ।
४. न्यायसूत्रवृत्तिः – विश्वनाथपञ्चाननः ।
५. न्यायमञ्जरी – जयन्तभट्टः ।
६. व्योमसंस्कृतपाठशाला – निग्रहस्थानविषयसम्बद्धाः चलचित्राणि (Videos) ।
७. तर्कभाषा – व्याख्याकार-गजाननशास्त्री ।
८. न्यायसूत्रम् – महर्षिगौतम ।
९. न्यायभाष्यम् आचार्यवात्स्यायनः ।
१०. न्यायसूत्रवृत्तिः – विश्वनाथपञ्चानन ।


ISSN : 2249-538X

# प्रमाविषये जैनतर्कभाषया सह तर्कभाषायाः मतवैषम्यम्

डा. देवार्पिताव्यानार्जी*
सहायकाध्यापिका(सं),
विद्यासागरविश्वविद्यालयः, वङ्गदेशः

***लेखसारः*** *– परिदृश्यमानजगति अणुतमादारभ्य महत्तमं पर्यन्तं सर्वं वस्तु खलु प्रमेयम् । प्रमेयज्ञानं किमपि साधनं विना स्वतरुत्पादितं न भवति । अतः येन साधनेन प्रमेयज्ञानं जायते तत्खलु प्रमाणम् । अर्थात्प्रमीयते यथार्थज्ञान-विषयीक्रियते वस्तुजातं येन तत्प्रमाणम् । इह लोके जन इन्द्रियादिना प्रमाणेन किमपि वस्तु ग्रहीतुं हातुञ्च समर्थो भवति । इत्थं प्रमाणप्रयोजनं शास्त्रे समुपवर्णितम् । भारतीयदर्शनेषु न्यायेतरदर्शनपेक्षया न्यायशास्त्रे प्रमाणस्य समधिकं महत्वमुद्घोषितम् । अतो न्यायशास्त्रस्य नामान्तरं प्रमाणशास्त्रमिति । प्रमाणस्वरूपविभागफलनिरूपणे यद्यपि जैनानां मतं नैयायिकेन न ग्राह्यमपि तु नग्नक्षपणकाणां मतरूपेणोपहसितम् ।उपाध्यायेन यशोविजयग-णिना वैदिकानां बौद्धानां नैयायिकानां समन्वयेन च जैनतर्कभाषाइति ग्रन्थः रच्यते । केशवमिश्रेण तर्कभाषाप्र-णीता । न्यायनये यत् षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसाधिगमविषये उच्यते तत्रापि प्रथमोल्लिखितः पदार्थः प्रमाणम् । अस्य जगतः सर्वे पदार्थाः यावन्तः अवस्थीयन्ते तावतामेव तेषां स्वरूपं संशयमुक्ततया यथार्थरूपेण ज्ञानं हि जैनमते सम्यग्ज्ञानम् । जैनदर्शनेसम्यग्ज्ञानं प्रमा भवति । अपि च या प्रमा सैव प्रमाणं भवति । आदौ उल्लेखनीयं यज्जैनेतरे न्यायदर्शने यथा प्रमाप्रमाणयोर्मध्ये सम्बन्धो वर्तते जैनदर्शने तादृशः सम्बन्धो न वर्तते । न्यायदर्शने प्रमाप्रमाणयोर्मध्ये कार्यकारणभावसम्बन्धः स्वीक्रियते । परन्तु जैनदर्शने प्रमाप्रमाणयोर्मध्ये एतादृशः कार्यकारणसम्बन्धरूपभेदो न दृश्यते । यतो जैनदर्शने प्रमाप्रमाणयोर्मध्ये अभेदसम्बन्धः स्वीक्रियते । जैनदर्शने प्रमाप्रमाणयोर्मध्ये प्रकाश्यप्रकाशकसम्वन्धः वर्तते ।*

***कूटशब्दाः*** *– प्रमा, प्रमाणम्,सम्यग्ज्ञानम्, यथार्थानुभवः ।*

## प्रस्तावना

दर्शनसाहित्ये अस्माभिः तर्कभाषा नाम्नी ग्रन्थत्रयस्य उल्लेखः प्राप्यते। तत्र प्रथमा खलु बौद्धदार्शनिकस्य मोक्षकरगुप्तस्य बौद्धतर्कभाषेति। यस्याः रचनाकालः खलु एकादशशतकम्। ग्रन्थेऽस्मिन् बौद्धदार्शनिकानां सिद्धान्तसमूहः सुन्दरतया प्रतिपादितो वर्तते। द्वितीया तर्कभाषा केशवमिश्रस्य तर्कभाषा इति ग्रन्थः। यस्याः कालः त्रयोदशशतकम्। ग्रन्थेऽस्मिन् नैयायिकवैशेषिकसिद्धान्तानां सुनिपुणतया वर्णनं परिलक्ष्यते। अपि च तत्र तृतीया तर्कभाषा भवति जैनदार्शनिकाचार्यस्य श्रीयशोविजयगणिमहाभागस्य जैनतर्कभाषा। यस्याः कालः सप्तदशशतकम्। यत्र जैनदार्शनिकानां सिद्धान्तसमूहः सुन्दरतया प्रतिपादितो वर्तते। कालानुसारेण बौद्धतर्कभाषायाः पञ्चसप्तत्यधिकशतवतसरेभ्यः परं तर्कभाषायाः अपि च चतुर्शताधिकशतवत्सरेभ्यः परं तत्र जैनतर्कभाषायाः आविर्भावो दृश्यते।केशवमिश्रस्य तर्कभाषेति ग्रन्थः भारतीयदर्शनस्य प्रवेशद्वारस्वरूपा।

## विषयः

वात्स्यायनभाष्ये तत्त्वं खलु वस्तुनः यत्स्वरूपं तदेव तस्य सम्यग्ज्ञानम्। तत्त्वमिति पदेन सत्त्वरूपे भावपदार्थः असत्त्वरूपे अभावपदार्थश्च बोधव्यः। अर्थात् पदार्थस्य अपविपरीज्ञानम्। ज्ञानं सविषयकं भवति न तु निर्विषयकम् एतस्मात् प्रश्न उदेति ज्ञानस्य कोऽपि विषयोऽस्ति न वा? तत्र उच्यते विषय-विषयीभावात्मकसम्बन्धे तत्त्वज्ञानं

***सम्पर्कसूत्रम्** - 9735512604, Email- debarpitabanerjee109@gmail.com

तु विषयी। विषयत्वरूपेण न्यायशास्त्रे षोडशपदार्थः स्वीकृतः। उमास्वातिसूरिणा तत्त्वार्थसूत्रमिति ग्रन्थे उक्तं सम्यग्ज्ञानदर्शनचारित्राणि मोक्षमार्गः। अर्थात् सम्यग्ज्ञानेन सम्यग्दर्शनेन सम्यक्चारित्रेण च मोक्षमार्गः स्पष्टीभवति। यद्यपि तत्त्वज्ञानं मोक्षसाधनं तथापि प्रमाणमन्तरेण तेषां प्रमेयानां प्रतीतिः न भवति। प्रमेयसिद्धिः प्रमाणाद्धि इति नियमेन जगतः सर्वेषां पदार्थानां ज्ञानं तु प्रमाणसापेक्षम्। एतस्मात् सूत्रकारेण षोडशपदार्थानां प्रमाणोद्देश आदौ एव क्रियते।

## प्रमा

प्रमायाः करणं प्रमाणमिति प्रमाणलक्षणम्। अतः प्रमाणलक्षणघटीभूतं प्रमास्वरूपज्ञानं विना प्रमाणस्वरूपनिर्धारणं न भवितुमर्हति। सम्यग्ज्ञानं यथार्थज्ञानं वा खलु प्रमापदेनाभिधीयते। प्रमारूपकार्यस्य करणं तथा प्रमाणस्य फलं तु प्रमा। अत्र का संज्ञा प्रमायाः इति ज्ञातव्या। उच्यते यथार्थानुभवः हि प्रमा। अर्थात् प्रमायाः लक्षणं तु यथार्थानुभवत्वम्। तत्र वस्तुनः यावदवस्था तावदेव ज्ञानं यथार्थानुभवः इति। अत्र यथार्थज्ञानमिति न उक्त्वा यथार्थानुभवः इति कथने अभिप्रायः खलु स्मृतिरपि एकप्रकारकं ज्ञानम्, सापि यथार्था भवितुमर्हति। परन्तु स्मृतिः कदापि न तु प्रमा। तर्कभाषाकारकेशवमिश्रस्य मते यथार्थानुभवः प्रमेति। अनुभवपदेन स्मृतिरूपात्मकं ज्ञानं निषिध्यते। अपि च अनुभवांशे यथार्थविशेषणेन संशयविपर्ययतर्कादीनाम् अयथार्थानुभवानां प्रमात्वे नातिव्यप्तिः। तत्र यदि केवल अनुभवः एव प्रमेति उच्यते तर्हि अयथार्थानुभवे प्रमात्वापत्तिः भवेत्। परन्तु यथार्थपदेन हि अयथार्थानुभवानां प्रमात्वेऽपि न प्रमात्वापत्तिः पुनश्च स्मृतिः अनुभवति न सति यथार्थत्वेऽपि न प्रमेति। यथार्थशब्देन यथा अयथार्थज्ञानस्य निराकरणं तथैव अनुभवशब्देन स्मृतेः निराकरणं भवति। स्मृतिः खलु पूर्वज्ञातविषयस्य ज्ञानम्। भावनानामकेन संस्कारमात्रेण यज्ज्ञानम् उत्पद्यते तत्तु स्मृतिरिति। अनुभूति-स्मृतिभेदेन ज्ञानस्य द्विविधत्वे सति तत्र स्मृतिभिन्नज्ञानमेव अनुभवः। जैनदार्शनिकैः मोक्षलाभार्थं दण्डचक्रन्यायेन मिलितभावेन रत्नत्रयमुपदिष्टम्। रत्नत्रयेषु सम्यग्ज्ञानमन्यतमं साधनं भवति। किं तावत्सम्यग्ज्ञानस्वरूपमित्याकाङ्क्षायामुच्यते यदस्मिन् जगति यद्वस्तु यादृशप्रकारकं भवति तद्वस्तुनः तादृशप्रकारकं मिथ्यासंशयरहितञ्च ज्ञानमेव सम्यग्ज्ञानम्। माधवाचार्येण सर्वदर्शनसंग्रहे आर्हतदर्शने उच्यते

**'यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा। योऽवबोधस्तत्राहुः सम्यग्ज्ञानं मनीषिणः॥**

जैनमते ज्ञानमिदमादौ द्विविधं भवति परोक्षज्ञानम्, प्रत्यक्षज्ञानञ्चेति। प्रत्यक्षज्ञानन्तु त्रिविधम् अवधिज्ञानम्, मनःपर्यायज्ञानम्, केवलज्ञानञ्चेति। परोक्षज्ञानं खलु द्विविधं मतिज्ञानम्, श्रुतज्ञानञ्चेति। इत्थं सम्यग्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्यायकेवलभेदेन। जैनमते केवलं मनःपर्यायज्ञानं केवलज्ञानञ्च सम्यग्ज्ञानं भवति। परन्तु अनयोः ज्ञानयोः मध्ये केवलज्ञानं हि मोक्षस्य कारणं भवति। ज्ञानमिदं खलु प्रमापदेनाभिहितम्। मिथ्याज्ञानन्त्वप्रमापदेनाभिहितम्। जैनमते सम्यग्ज्ञानमेव प्रमा प्रमाणञ्च भवति। तदुच्यते तत्त्वार्थसूत्रकारेण "तत्प्रमाणे।" "यत्तदोः नित्यसम्बन्धः" इति न्यायेन तच्छब्दः यच्छब्दसापेक्षत्वं भवति। यदित्यनेन "मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्" इति पूर्वस्मात् सूत्रात् ज्ञानमिति पदस्याध्याहारेण "सर्वनाम्नां प्रधानपरामर्शित्वमि'ति न्यायेन यन्मतिश्रुतावधिमनःपर्ययकेवलरूपं ज्ञानं तदेव प्रमाणमित्यर्थः प्राप्यते। जैनमते पदार्थस्य धारणा एव ज्ञानम्। ज्ञानं चैतन्यस्य स्वाभाविकधर्मः। प्रतिबन्धकाभावे चैतन्यो यथा स्वयं तथा अन्यान् प्रकाशयति। जैनदर्शने सम्यग्ज्ञानं यथा प्रमा तथा प्रमाणमपि भवति।प्रश्न उदेति सम्यग्ज्ञानं कथं प्रमा, कथं प्रमाणं वा भवति? जैनदार्शनिकैः दीपकदृष्टान्तेन विषयोऽयं व्याख्यायते। दीपको यथा स्वस्य प्रकाशको भवति तथा अन्येषां वस्तूनामपि प्रकाशहेतुर्भवति। इत्थं दीपके प्रकाश्यप्रकाशकभावरूपसम्बन्धो वर्तते। ज्ञानमपि स्वस्य


ISSN : 2249-538X

प्रकाशकं भवति तथा अन्येषां वस्तूनामपि प्रकाशकारणं भवति । ज्ञानं स्वप्रकाशात्प्रमाणमर्थात्तस्य प्रकाशेऽन्यस्य कस्यापि साधनस्य प्रयोजनं नास्ति ।

न्यायदर्शने यथा प्रमाप्रमाणयोर्मध्ये सम्बन्धो वर्तते जैनदर्शने तादृशः सम्बन्धो न वर्तते। न्यायदर्शने प्रमाप्रमाणयोर्मध्ये कार्यकारणभावसम्बन्धः स्वीक्रियते । अर्थान्न्यायमते प्रमायाः करणं प्रमाणमिति नियमानुसारं प्रमा खलु कार्यम्, तस्याः करणं खलु प्रमाणं भवति। इत्थंप्रमाप्रमाणयोर्मध्ये कार्यकारणसम्बन्धरूपभेदः परिलक्ष्यते। परन्तु जैनदर्शने प्रमाप्रमाणयोर्मध्ये एतादृशः कार्यकारणसम्बन्धरूपभेदो न दृश्यते। यतो जैनदर्शने प्रमाप्रमाणयोर्मध्ये अभेदसम्बन्धः स्वीक्रियते। अर्थाज्जैनमते या प्रमा सैव प्रमाणं भवति। ज्ञानस्य प्रापकव्यापारो ज्ञानादतिरिक्तो न भवति। प्रापकज्ञानं प्रापकव्यापारस्य प्रवृत्तिविषयस्य प्रदर्शनमेव भवति। अतो ज्ञानमिदं अर्थसत्ताज्ञापकदृष्ट्या प्रमाणं तथा निश्चयात्मकज्ञानतया प्रमा भवति।जैनानां मते प्रमाणप्रमाणफलयोर्मध्येऽभेदसम्बन्धो वर्तते इति मतं नैयायिकेन खण्डितम्। यतो हि कारणस्य कार्यनियतपूर्वभावित्वम्, कार्यस्य कारणपश्चाद्भावित्वं व्यवस्थितम् । अतः द्वयोर्मध्ये कार्यकारणरूपभेदे सति एकत्वं न द्योतितम् । इत्थं प्रमाप्रमाणयोरभेदसम्बन्धाभावे जैनमतं निरस्यते ।विषयस्य विषयितासम्बन्धेन प्रकाशकरूपेण ज्ञानं खलु प्रमा। इत्थं ज्ञाने प्रमाप्रमाणयोर्मध्ये प्रकाश्यप्रकाशकरूपसम्बन्धो निरूप्यते। एवं न्यायजैनयोः प्रमाप्रमाणयोर्मध्ये वैषम्यं परिलक्ष्यते । जैनदर्शने प्रमाप्रमाणयोर्मध्ये अभेदसम्बन्धः स्वीक्रियते । अर्थाज्जैनमते या प्रमा सैव प्रमाणं भवति। ज्ञानस्य प्रापकव्यापारो ज्ञानादतिरिक्तो न भवति। प्रापकज्ञानं प्रापकव्यापारस्य प्रवृत्तिविषयस्य प्रदर्शनमेव भवति । अतो ज्ञानमिदमर्थसत्ताज्ञापकदृष्ट्या प्रमाणं तथा निश्चयात्मकज्ञानतया प्रमा भवति । यथा एकस्मिन् काले एकस्मिन् पाचके बहुविधरूपाणि परिलक्ष्यते तथा एकस्मिन् ज्ञाने कारणांशः प्रमेयांशश्च वर्तते । जैनमते सम्यग्ज्ञानं यथा प्रमा तथा प्रमाणमपि भवति ।

जैनदर्शने सम्यग्ज्ञानं यथा प्रमा तथा प्रमाणमपि भवति । भारतीयदर्शने सर्वैः दार्शनिकैः प्रमाणं खलु प्रमायाः करणरूपेण स्वीकृतम्। परन्तु तस्याः करणविषये दार्शनिकेषु वैमत्यं दृश्यते । यथा न्यायदर्शने प्रमायाः करणं प्रमाणमिति नियमादिन्द्रियम्, इन्द्रियार्थसन्निकर्षः, ज्ञानञ्च प्रमाणानि भवन्ति । परन्तु जैनदर्शने प्रमायाः करणं प्रमाणमिति प्रमाणलक्षणं यद्यपि स्वीकृतम्, तथापि तस्य करणविषये वैमत्यं दृश्यते । जैनमते प्रमाणं तद्भवति यत् स्वयं प्रकाशकमन्येषामपि प्रकाशकारणम् । यद्यपि जैनदार्शनिकैः प्रमाणमिति शब्दस्य व्युत्पत्तिः कर्तृकरणभाववाच्यैः व्याख्याता तथापि तासु प्रमाणस्य करणवाच्ये स्पष्टमेव तेषामभिप्रेतम् । जैनदार्शनिकैः अर्थाधिगतेः अर्थाद्विषयस्य ज्ञाने सम्यग्ज्ञानं साधकतममर्थात्प्रमितेः करणत्वेन प्रमाणमाख्यातम् । इममभिप्रेत्य जैनेन न्यायसम्मतं प्रमाणं खण्डितम् । जैनमते वस्तूनां ज्ञाने नैयायिकस्वीकृतानामिन्द्रियादीनामज्ञानात्मकत्वादचेतनत्वाच्च तानि इन्द्रियादीनि प्रमाणानि भवितुं नार्हन्ति । एतदर्थं वस्तुज्ञाने इन्द्रियसन्निकर्षादीनां साधकतमत्वाभावान्न प्रमाणत्वंसिद्ध्यति । जैनमते वस्तुना सहेन्द्रियस्य सन्निकर्षादनन्तरमपि ज्ञानं नोत्पद्यते । यथा घटेन सह यदा चक्षुः संयुज्यते तदा आकाशादिभिरपि संयुज्यते, परन्तु तत्र घटज्ञानं जायते न त्वाकाशज्ञानम् । यथा दीपकः गृहाभ्यन्तरे सर्वेषां पदार्थानां प्रकाशकत्वेन साधकतमो भवति तथैव व्यवधानरहितत्वेन सर्वेषां विषयाणां प्रकाशकत्वाज्ज्ञानमपिसाधकतमं भवति । अतो ज्ञानं प्रमाणं भवति न त्विन्द्रियादीनि । अपि चेन्द्रियार्थसन्निकर्षो यदि प्रमाणरूपेणस्वीक्रियते तर्हि प्रमातुः निकटस्थितेन वस्तुना सह तेन चक्षुरिन्द्रियसंयोगेन वस्तुज्ञानं जायते, परन्तु दूरस्थितेन वस्तुना सह संयोगाभावाज्ज्ञानं भवितुं नार्हति । परन्तु यः सर्वज्ञः सः त्रिकालज्ञः, तस्य सूक्ष्मान्तरितविप्रकृष्टरूपाणां सर्वेषां विषयाणां ज्ञानं भवति । जैनमते ज्ञानंयथा अतीन्द्रियं तथैव इन्द्रियग्राह्यमपिभवति । अतीन्द्रियज्ञानं सन्निकर्षाभावेनापि जायते । अतः सकलपदार्थज्ञानजनकाभावात्सन्निकर्षः प्रमाणं भवितुं नार्हति । जैनमते इन्द्रियमपि प्रमाणं

न भवितुमर्हति तस्याप्राप्यकारित्वत्वात्। न्यायमते इन्द्रियाणि स्वविषयेणसम्बद्धानिसन्तिविषयान्प्रापयन्ति, अर्थाद्विषयस्य प्रत्यक्षं जनयन्ति। अत इन्द्रियादीनि सम्बन्धानि सन्ति प्राप्यकारकाणिभवन्ति। परन्तु जैनमते चक्षुरिन्द्रियादिनि स्वविषयेण सह सम्बन्धं विना तद्विषयस्य प्रत्यक्षं जनयति। अत इन्द्रियादीन्यप्राप्यकारकाणि भवन्ति। एतदर्थमिन्द्रियाणामप्राप्यकारित्वात् सन्निकर्षाभावाच्च तेषां प्रमाणत्वं न सिद्ध्यति। अतो जैनदार्शनिकैः ज्ञानमेव प्रमाणं नत्विन्द्रियादिनि इति उद्घोषितम्। अपि च तेषां मते प्रमाणस्य फलं यद् हानोपादानोपेक्षादिकम्, तत्खलु केवलं ज्ञानेन जायते न त्विन्द्रियादिभिः। माणिक्यनन्दिना प्रमेयरत्नमाला इति ग्रन्थे उक्तं यज्ज्ञानं हितप्रापकम् अहितपरिहारकञ्च तदेव प्रमाणम्। तेन स्पष्टं कथितं यज्ज्ञानमेव हिताहितप्राप्तिपरिहारसामर्थ्यात्प्रमाणं भवति। अनेन एतदपि स्पष्टं यज्ज्ञानं न हिताहितप्राप्तिपरिहारसामर्थ्यंतन्न प्रमाणम्। यद्यत्करणं तत्तत्फलवदिति नियमाज्ज्ञानरूपप्रमाणस्य फलं खलु अज्ञाननिवृत्तिः। अर्थात् प्रमाणेन सम्यग्ज्ञानेन प्रमेयस्य यन्निश्चयज्ञानं जातम्, तेन प्रमेयविषयेऽज्ञानं दूरीभूतं भवति। इत्थं विषयस्याज्ञाननिवृत्तिः खलु प्रमितिः प्रमा वा भवति।

जैननये स्वपरप्रकाशकत्वं खलु ज्ञानस्य साधारणधर्मः। नैयायिकमते ज्ञानं बाह्यार्थं प्रकाशयति न तु स्वयं प्रकाशितं भवति। जैनमते ज्ञानं यदि स्वस्य प्रकाशकं न स्यात्तर्हि परस्य प्रकाशकमपि न भवितुमर्हति। अतो ज्ञानस्य स्वपरप्रकाशकधर्मः स्वीकर्तव्यः।जैनमते यद्व्यवसायात्मकं ज्ञानं स्वपरप्रकाशकं भवति तत्प्रमाणम्। व्यवसायात्मकज्ञानमित्यस्यार्थः निश्चयात्मकज्ञानम्। अत्रोल्लेखनीयं यत्प्रत्यक्षज्ञानं द्विविधं निर्विकल्पकसविकल्पकभेदेन।नैयायिकैः निर्विकल्पकज्ञानस्य प्रमाणत्वं स्वीकृतम्। जैनदार्शनिकैः व्यवसायात्मक इति पदेन सविकल्पकस्य प्रमाणत्वं स्वीकृतं तथा निर्विकल्पकस्य प्रमाणत्वं निराकृतमव्यवसायात्मकत्वादिति तात्पर्यम्। न्यायमते प्रमाणं खलु सफलप्रवृत्तेःजनकं भवति। परन्तु जैनानां वक्तव्यं यन्निर्विकल्पकस्य निश्चयात्मकत्वाभावाद्व्यवहारसाधकत्वाच्चाविसंवादकं न भवति। अतो निर्विकल्पकं ज्ञानं न प्रमाणम्। जैनदर्शने ज्ञानस्य पर्यायवाचकरूपेण दर्शनमिति पदमुल्लिखितम्। ज्ञानदर्शने आत्मनः गुणौ स्तः। तत्र दर्शनं निर्विकल्पकं निराकारञ्च, ज्ञानं सविकल्पकं साकारञ्च भवति। परन्तु तेन निर्विकल्पकं ज्ञानं प्रमाणत्वेन नाङ्गीकृतम्।

न्यायदर्शने चतुर्विधं प्रमाणं स्वीकृतं प्रत्यक्षमनुमानमुपमानं शब्दश्च। तर्कभाषाकारेण केशवमिश्रेण उच्यते अर्थापत्तिः तु केवलं केवलव्यतिरेकी-अनुमाने अन्तर्भवति इति। अपि च तर्कभाषाकारमते अभावः तथा अनुपलब्धिः न तु पृथक् प्रमाणमिति। जैनतर्कभाषा इति ग्रन्थे प्रमाणं प्रत्यक्षपरोक्षाभ्यां द्विविधं विभज्य पुनः प्रत्यक्षस्य सांव्यवहारिकं मुख्यञ्चेति विभागद्वयं स्वीकृतम्। सांव्यवहारिकप्रत्यक्षं द्विविधमिन्द्रियप्रत्यक्षमनिन्द्रियप्रत्यक्षञ्चेति। सांव्यवहारिके मतिज्ञानम्, मुख्येऽवधिमनःपर्यायकेवलज्ञानानि परिगणितानि। परन्तु परोक्षं स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदैः पञ्चविधं प्रोक्तम्।

## उपसंहारः

न्यायदर्शने यथार्थानुभवः खलु प्रमा, तस्याः करणं प्रमाणम्। यथार्थानुभवः खलु तद्वति तत्प्रकारकानुभवः। अयथार्थानुभवः खलु तदभाववति तत्प्रकारकानुभवः। अत्र यथार्थानुभवः खलु प्रमा उच्यते। जैनदर्शने सम्यग्ज्ञानमेव यथा प्रमा तथैव प्रमाणं भवति। जैनेतरदर्शने यथा प्रमाप्रमाणयोर्मध्ये सम्बन्धो वर्तते जैनदर्शने तादृशः सम्बन्धो न वर्तते। यथा न्यायदर्शने प्रमायाः करणं प्रमाणमिति नियमानुसारं प्रमा खलु कार्यम्, तस्याः करणं खलु प्रमाणं भवति। इत्थं प्रमाप्रमाणयोर्मध्ये कार्यकारणसम्बन्धरूपभेदः परिलक्ष्यते। परन्तु जैनदर्शने प्रमाप्रमाणयोर्मध्ये अभेदसम्बन्धः स्वीक्रियते। जैनदर्शने संशयविपर्ययादिरहितसम्यग्ज्ञानं यथा प्रमा तथा प्रमाणमपि भवति।


ISSN : 2249-538X

**परामृष्टाः ग्रन्थाः**

१. न्यायदर्शनम्, (न्यायभाष्यसहितमेवञ्च खद्योतभाष्यचन्द्रटीकाभ्यां सहितम्) सम्पा. महेश झा, वाराणसी, चौखाम्बासंस्कृतसीरीज आफिस, २०१३(प्रअथमसंस्करणम्)

२. मिश्र केशवः , तर्कभाषा,तत्वालोकासहिता ; सम्पा. रुद्रधर झा वाराणसी,चौखाम्बासंस्कृतसीरीज आफिस २०१४ ।

३. न्यायपरिचयः ; सम्पा. फ़णिभूषणतर्कवागीशः, कलकत्ता,पश्चिमवङ्गराज्यपुस्तकपरिषद्,२००६(तृतीयसंस्करणम्) ।

४. हेमचन्द्रः,प्रमाणमीमांसा,(स्वोपज्ञवृत्तिसहिता) ;सम्पा.सुखलालजी संघवी,कलकत्ता,सिंघीजैनग्रन्थमाला।

५. यशोविजयगणिः , जैनतर्कभाषा,(तात्पर्यसंग्रहाख्यवृत्तिसहिता) ; सम्पा.सुखलालजी संघवी, अहमदाबाद सरस्वतीपुस्तकभण्डारम्,१९९३(पुनर्मुद्रणम्)।

# क्रियाविशेषणानां कर्मत्वविचारः


दुर्गा श्रीवत्सा*
शोधच्छात्रा, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी



***लेखसारः –*** *स्तोकं पचति इत्यादिक्रियाविशेषणस्थले स्तोकस्य कर्मत्वं स्वीक्रियते । तत्र "क्रियाविशेषणानां कर्मत्वं क्लीबता च" इत्यनुशासनेन स्तोकादेः कर्मत्वमिति नैयायिकाः । "कर्तुरीप्सिततमं कर्म" इति सूत्रेणैव कर्मसंज्ञा न तु अनुशासनेन इति वैयाकरणाः । स्तोकः पाकः इत्यत्र सार्थकप्रत्ययान्तधातूपस्थाप्यक्रियायाः अभावात् न स्तोकपदोत्तरं द्वितीया भवति । स्तोकं स्थीयते इति भावाख्यातस्थले वर्तमानकालरूपार्थजननस्वरूपयोग्यत्वात् सार्थकत्वात् स्तोकपदोत्तरं द्वितीया भवति । स्तोकः पाकः इत्यत्र तत्प्रयोगोपपादनार्थं घञन्तसमुदायस्य पाके शक्तिः स्वीकर्तव्या इति केचित्तुकाराणां मतं, तत्र सिद्धान्ते समाधानम् इति एतेषां विचाराणां युक्त्या प्रतिपादनम् अस्मिन् लेखे उपलभ्यते ।*



***कूटशब्दाः –*** *अभेदः, संबन्धः, पदार्थः, भेदः, नीलः, घटः, धात्वर्थः, अन्वयः, बोधः, विशेषणं, क्रिया, पाकः, पचति, संसर्गः, स्तोकः, घञ्, विभक्तिः, विक्लित्तिः, फलं, व्यापारः ।*


द्वयोः पदार्थयोः संबन्धः आकाङ्क्षामर्यादया क्वचिद्भेदेन क्वचिदभेदेन च भासते । अभेदः विशेष्यविशेषणवाचकयोः समानविभक्तिमत्प्रातिपदिकार्थयोः, समासघटकीभूत-विशेष्यविशेषणवाचकप्रातिपदिकार्थयोः, धात्वर्थतद्विशेषणीभूतद्वितीयान्तपदोपस्थापितार्थयोः च संबन्धतया भासते । नीलो घटः इत्यत्र प्रथमाविभक्त्युपस्थापितयोः घट-नीलयोः संसर्गः अभेदेन भासते, अतः नीलाभिन्नः घटः इति बोधः जायते । नीलघटः इत्यत्र समासघटकीभूतघटपदार्थ-नीलपदार्थयोः संसर्गः अभेदेन भासते, अतः नीलाभिन्नः घटः इति बोधः भवति ।

क्रियाविशेषणस्थले स्तोकं पचति इत्यत्र विशेष्यभूत-पच्धात्वर्थपाकस्य यद्विशेषणं स्तोकः तस्य अभेदेन अन्वयः, अतः स्तोकाभिन्नः पाकः इति बोधः जायते । स्वसमानविभक्त्युपस्थापितस्य स्वाव्यवहितपूर्ववर्तिपदोपस्थापितस्यैव प्रातिपदिकार्थस्य अभेदेनान्वयबोधः भवतीति नीलो घटः, नीलं घटम् आनय, नीलघटमानय इत्यादिषु दृश्यते । तद्वत् प्रकृते क्रियाविशेषणस्थले स्तोकं पचतीत्यत्र विरुद्धविभक्त्युपस्थापितस्यापि स्तोकपदार्थस्य पच्धात्वर्थपाके अभेदान्वयबोधः इष्यते । नीलो घटः इत्यादिषु समानविभक्तिसमभिव्याहारः यथा आकाङ्क्षा भवति तद्वत् प्रकृते द्वितीयान्तधातुपदसमभिव्याहारः आकाङ्क्षा, तेन अभेदान्वयबोधः जायते ।

"क्रियाविशेषणानां कर्मत्वं क्लीबता च" इति अनुशासनानुसारं क्रियाविशेषणस्थले, प्रकृते "स्तोकं पचति" इत्यत्र पच्धात्वर्थविशेषणीभूतस्य स्तोकस्य नपुंसकत्वं भवति कर्मत्वञ्च अतिदिश्यते । "ग्रामं गच्छति चैत्रः" इत्यत्र कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादित्यर्थकेन 'कर्तुरीप्सिततमं कर्म'[1] इति सूत्रेण ग्रामस्य कर्मसंज्ञा । तत्र कर्तुः चैत्रस्य उत्तरदेशसंयोगानुकूलव्यापाररूपक्रियया आप्तुं संबन्धुम् इष्टः उद्दिष्टः ग्रामः । अतः तस्य कर्मसंज्ञा भवति । परन्तु तद्वत् "स्तोकं पचति चैत्रः" इत्यत्र स्तोकपदार्थस्य कर्मसंज्ञा न भवति । अत्र कर्तुः चैत्रस्य या क्रिया विक्लित्त्यनुकूलव्यापाररूपक्रिया, तया आप्तुं संबन्धुं न इष्टः स्तोकपदार्थः । अतः 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण स्तोकपदार्थस्य कर्मसंज्ञा न भवति । तस्मात् "क्रियाविशेषणानां कर्मत्वं क्लीबता च" इत्यनुशासनानुसारं स्तोकपदार्थस्य कर्मत्वमतिदिश्यते । तेन 'स्तोकम्' इति द्वितीयान्ततया प्रयोगः भवति ।

---


***सम्पर्कसूत्रम्*** - 7892669825, Email- mrudulavalli97@gmail.com


[1]अष्टाध्यायी सूत्रसङ्ख्या १.४.४९

"स्तोकं पचति" इत्यत्र 'कर्तुरीप्सिततमं कर्म' इति सूत्रेणैव स्तोकपदार्थस्य कर्मसंज्ञा इति नव्यवैयाकरणाः। व्यापारजन्यफलाश्रयः कर्म। पचतीत्यत्र व्यापारः - विक्लित्त्यनुकूलः व्यापारः – तण्डुलाधिश्रयणं, फूत्कारः, दर्व्यालोडनम्, अधःश्रयणम् इत्यादि, तज्जन्यं फलं – विक्लित्तिः, तदाश्रयः – व्यपदेशिवद्भावेन विक्लित्तिरेव विक्लित्त्याश्रयः, तस्याः विक्लित्तेः - फलस्य विशेषणत्वेन स्तोकस्य कर्मसंज्ञा। तदा चैत्रः स्वनिष्ठव्यापारेण 'स्तोकं - लघुभूताम्- अनायाससाध्यां विक्लित्तिं' जनयति इत्यर्थः प्रत्येतव्यः।

यदि धात्वर्थव्यापारविशेषणत्वं स्तोकस्य विवक्षितं तदा 'अनायासेन लघुभूतेन व्यापारेण' विक्लित्तिं जनयति चैत्रः इत्यर्थः अधिगन्तव्यः। तदा अत्र प्रश्नः भवति – मुख्यकर्मणः तण्डुलस्य सत्त्वात् कुतः अत्र व्यपदेशिवद्भावेन फलस्य विक्लित्तेः विक्लित्त्याश्रयत्वम् इति। तत्रोच्यते – येन संबन्धेन यस्मिन् विक्लित्त्याश्रयत्वमुच्यते तेन संबन्धेन तत्सजातीयद्वितीयरहितत्वे व्यपदेशिवद्भावः उच्यते इति। यथा तण्डुलस्य मुख्यकर्मत्वं तथा विक्लित्तेः मुख्यकर्मत्वं न भवति। तण्डुलस्य व्यापारजन्यफलाश्रयत्वरूपं मुख्यं कर्मत्वमस्ति। अतः तत्र पुनः व्यपदेशिवद्भावेन कर्मत्वकथनस्य अपेक्षा न भवति। प्रकृते तादात्म्यसंबन्धेन विक्लित्तौ विक्लित्त्याश्रयत्वमुच्यते, तेनैव संबन्धेन - तादात्म्येन तत्सजातीयद्वितीयं नास्ति, अतः अस्य व्यपदेशिवद्भावेन फलाश्रयत्वमुच्यते। तद्विशेषणत्वात् स्तोकस्य कर्मसंज्ञा। अतः स्तोकपदोत्तरं द्वितीया भवति।

तत्र नैयायिकाः – धात्वर्थात् भेदेन स्थितस्यैव धात्वर्थफलाश्रयस्य 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मसंज्ञा उक्ता सर्वत्र। यथा "ग्रामं गच्छति" इत्यत्र व्यापारजन्य-उत्तरदेशसंयोगस्य आश्रयत्वात् ग्रामस्य कर्मसंज्ञा उक्ता। स च ग्रामः संयोगापेक्षया भिन्नः। प्रकृते "स्तोकं पचति" इत्यत्र तावत् धात्वर्थात् विक्लित्तेः भेदेन न स्थितः स्तोकपदार्थः। तस्मात् 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मसंज्ञा न प्राप्नोति। अतः "क्रियाविशेषणानां कर्मत्वम्" इत्यनुशासनेनैव अत्र स्तोकपदार्थस्य कर्मत्वम् इति।

"स्तोकं पचति" इत्यत्र "क्रियाविशेषणानां कर्मत्वं क्लीबता च" इत्यनुशासनेन कर्मत्वस्वीकारे, "स्तोकः पाकः" इत्यत्रापि स्तोकपदोत्तरं द्वितीया स्यादित्यापत्तिः, अत्रापि स्तोकस्य पाकक्रियायां विशेषणत्वात्। "स्तोकः पाकः" इति प्रयोगे पाकः इत्यत्र घञन्तसमुदायेन पाकक्रिया बोध्यते, न तु केवलं पच्धातुना इति यद्युच्यते तर्हि, भावकृतां प्रयोगसाधुत्वमात्रनियमेन अस्मिन् प्रयोगे भावघञा क्रियायाः अबोध्यमानत्वात्, पच्धातुना एव पाकक्रियायाः उपस्थाप्यमानत्वात् आपत्तिः तथैव अनुवर्तते। अतः 'क्रियाविशेषणानां कर्मत्वं क्लीबता च' इत्यनुशासने 'क्रिया' इत्यस्य 'सार्थकप्रत्ययान्तधातूपस्थाप्यक्रिया' इत्यर्थः परिष्क्रियते। तदा "सार्थकप्रत्ययान्तधातूपस्थाप्यक्रियाविशेषणानां कर्मत्वं क्लीबता च" इत्यनुशासनं फलति। स्तोकः पाकः इत्यत्र यद्यपि पाकक्रिया अस्ति परन्तु सा सार्थकप्रत्ययान्तधातुना न उपस्थाप्यते। पाकः इत्यत्र पच्धातूत्तरघञः भावे विहितत्वात्, तस्य च निरर्थकत्वात् अस्मिन् प्रयोगे सार्थकप्रत्ययान्तधातूपस्थाप्या पाकक्रिया न इत्यतः, न तद्विशेषणात् स्तोकपदार्थात् द्वितीया।

"स्तोकं स्थीयते" इति भावाख्यातस्थले भावाख्यातस्यापि निरर्थकत्वात् सार्थकप्रत्ययान्तधातूपस्थाप्यक्रियायाः अभावात् विशेषणीभूतस्तोकवाचकात् द्वितीया न स्यात्। तत्रोच्यते – भावकृतः निरर्थकत्वेऽपि भावतिङः सार्थकत्वमस्ति। भावाख्यातस्य वर्तमानार्थकत्वात् सार्थकप्रत्ययान्तधातूपस्थाप्यस्थितिक्रिया अत्र अस्तीत्यतः द्वितीया सिद्ध्यति इति। यदि तत्र भावाख्यातस्य वर्तमानत्वादिकालविवक्षा नास्ति तदा तस्य आख्यातप्रत्ययस्य निरर्थकत्वात् द्वितीयानुपपत्तिः इति चेत् तत्रोच्यते – सार्थकत्वं नाम अर्थबोधजननस्वरूपयोग्यत्वम्। प्रकृते वर्तमानकालाविवक्षा अस्ति चेदपि वर्तमानकालरूपार्थजननस्वरूपयोग्यत्वं भावाख्यातस्य अस्तीत्यतः "स्तोकं स्थीयते" इति प्रयोगे सार्थकप्रत्ययान्तधातूपस्थाप्यस्थितिक्रिया अत्र अस्तीत्यतः तादृशक्रियाविशेषणत्वात् स्तोकपदार्थस्य

कर्मसंज्ञा भवति । कर्मत्वात् द्वितीया उपपद्यते ।

केचित्तुकाराणां मते उच्यते- घञन्तसमुदायस्य पाके शक्तिः इति । पाकः इत्यत्र पच्धातुः घञ्प्रत्ययः वर्तते । पच्धातु-घञ्प्रत्ययसमुदायस्य पाके शक्तिः स्वीकर्तव्या इति । तत्स्वीकारे युक्तिरप्युच्यते – 'चैत्रः पाकं करोति' इति वाक्ये "पाकम्" इत्यत्र पाक इति घञन्तसमुदायः तदुत्तरम् अम्प्रत्ययश्च वर्तते । तत्र अम्प्रत्ययेन कर्मत्वम् एकत्वञ्च उपस्थाप्यते । पाकस्य अम्विभक्त्यर्थे अन्वयः वक्तव्यः, तेन "एकत्ववत्पाकनिष्ठकर्मत्वनिरूपककृत्याश्रयः चैत्रः" इति बोधः वक्तव्यः । परन्तु सिद्धान्ते तन्न सम्भवति । यतः "प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति नियमः वर्तते । तन्नियमविरोधः स्यात् । स्वम् – अम्प्रत्ययः, तदर्थस्य कर्मत्वस्य स्वप्रकृत्यर्थान्वितत्वं वक्तव्यम् । परन्तु अम्प्रत्ययस्य या प्रकृतिः – पाक इति घञन्तसमुदायः, तदर्थः अप्रसिद्धः सिद्धान्ते, घञः निरर्थकत्वात् । अतः स्वप्रकृत्यर्थस्य अप्रसिद्धत्वात् तदन्वितत्वम् अम्प्रत्ययार्थ-कर्मत्वस्य न भवति । तथैव एकत्वम् अन्वेति पच्-धातूपस्थापितेऽर्थे पाके । स च पाकः घञन्तसमुदायेन नोपस्थापितः, केवलं धातुना उपस्थापितः । अतः पाकः न प्रकृत्यर्थः परन्तु प्रकृत्येकदेशार्थः । नियमः अस्ति प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति, न तु स्वप्रकृत्येकदेशार्थान्वितस्वार्थबोधकत्वम् इति । तस्मात् उक्तनियमविरोधात् पाकस्य न कर्मत्वेन एकत्वेन च अन्वयः स्यात् । अतः घञन्तसमुदायस्य पाके शक्तिः स्वीकर्तव्या इति केचित्तुकाराः । तत्र सिद्धान्ते समाधानमुच्यते – नियमे स्वप्रकृत्यर्थः इत्यनेन स्वप्रकृत्येकदेशार्थोऽपि स्वीकर्तुं शक्यते । "चैत्रः पाकं करोति" इत्यत्र अम्प्रत्ययप्रकृतिः इत्यनेन घञन्तसमुदाय-एकदेशः पच्-धातुः गृह्यते, तदर्थः पाकः तदन्वितस्वार्थबोधकत्वं सम्भवति कर्मत्वस्य एकत्वस्य च । अतः नियमस्य समन्वयात् घञन्तसमुदाये शक्तिः नापेक्षिता इति ।

अत्र उच्यते – यदि एकदेशान्वयोऽपि स्वीक्रियते तर्हि यत्र स्थले चैत्रः पाकं पश्यति, न तु पाचकं, तदा "चैत्रः पाकं पश्यति" इति प्रयोगः इष्टः । परन्तु एकदेशान्वयस्वीकारे "चैत्रः पचन्तं पश्यति" "पचमानं पश्यति" इति प्रयोगापत्तिः । पचन्तम् इत्यत्र पच्-धातुः शतृप्रत्ययः तदुत्तरम् अम्-प्रत्ययः वर्तते । पच्धातुशतृप्रत्ययसमुदायैकदेशार्थः भवति पच्धात्वर्थपाकः, तस्य आधेयतासंबन्धेन कर्मत्वे (विषयतारूपे) अन्वयः, तेन पाकनिष्ठं कर्मत्वमिति बोधः भवति, स च अबाधितः एव । तथैव पचमानम् इत्यत्रापि पच्धातुशानच्प्रत्ययसमुदायैकदेशः पच्धातुः, तदर्थः पाकः अम्प्रत्ययार्थकर्मत्वे अन्वेति, तेन पाकनिष्ठं कर्मत्वमिति अबाधितः बोधः जायते इत्यतिप्रसङ्गः । तत्रोच्यते – "एकत्र विशेषणतया उपस्थितस्य अन्यत्र विशेषणतया नान्वयः" इति नियमेन उक्तातिप्रसङ्गः वार्यते । पचन्तम् इत्यत्र पच्धात्वर्थपाकः एकत्र शतृप्रत्ययार्थकर्तृत्वे विशेषणतया उपस्थितः, सः पुनः अन्यत्र अम्-प्रत्ययार्थकर्मत्वे विशेषणतया न अन्वेति । अनेनैव अतिप्रसक्तिः वार्यते इति ।

तदा पुनः आक्षेपः – यत्र एकः पाचकः पाकद्वयं करोति, तत् पश्यति चैत्रः, तदा "चैत्रः पाकौ पश्यति" इति अथवा "चैत्रः पचन्तं पश्यति" इति प्रयोगः इष्टः । परन्तु "चैत्रः पचन्तौ पश्यति", "चैत्रः पचमानौ पश्यति" इति प्रयोगस्य प्रामाण्यप्रसङ्गः । पचन्तम् इत्यत्र पच्धातु-शतृप्रत्यय-औप्रत्ययाः सन्ति । पच्धातुना पाकः उपस्थाप्यते, शतृप्रत्ययेन कर्ता, औप्रत्ययेन कर्मत्वं द्वित्वञ्च उपस्थाप्यते । अत्र औप्रत्ययार्थद्वित्वस्य पच्धात्वर्थपाके अन्वयः, पाकस्य शतृप्रत्ययार्थकर्तरि, तस्य अम्प्रत्ययार्थकर्मत्वे (विषयतारूपे), तस्य दृश्-धात्वर्थदर्शने, तस्य आश्रयतया चैत्रे च अन्वयः । तथा च "द्वित्ववत्पाककर्तृनिष्ठविषयतानिरूपकदर्शनाश्रयः चैत्रः" इति बोधः "चैत्रः पचन्तौ पश्यति" इति वाक्यात् भवति । स च अबाधितः एव । अतः "चैत्रः पचन्तौ पश्यति" इति प्रयोगस्य प्रामाण्यप्रसङ्गः । अत्र पूर्वोक्तनियमभङ्गोऽपि न भवति । यतः धात्वर्थपाकः शतृप्रत्ययार्थकर्तरि एव विशेषणतया उपस्थितः । तस्मात् प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमे प्रकृत्यर्थः इत्यस्य प्रकृत्येकदेशार्थः


ISSN : 2249-538X

इत्यपि अर्थस्वीकारे "पाकौ पश्यति" इत्यर्थे "चैत्रः पचन्तौ पश्यति" इति प्रयोगस्य प्रामाण्यप्रसङ्गः दुर्वार एव इति ।

तत्र समाधानमुच्यते – उक्तातिप्रसङ्गस्य वारणार्थं कश्चन प्रतिबध्यप्रतिबन्धकभावः कल्प्यते । "धातूपस्थाप्यार्थे सुबर्थान्वयबोधं प्रति तत्तद्धातूत्तरप्रत्ययधर्मिककिञ्चिदर्थपरत्वज्ञानं प्रतिबन्धकम्" इति । प्रकृतस्थले धातूपस्थाप्यार्थे - पच्धातूपस्थाप्यार्थे पाके सुबर्थस्य – द्वित्वस्य अन्वये जननीये पच्धातूत्तरप्रत्ययः शतृप्रत्ययः, तद्धर्मिककिञ्चिदर्थपरत्वज्ञानं – शतृप्रत्ययः कर्त्रर्थकः इति ज्ञानं प्रतिबन्धकं भवति । प्रतिबन्धकसत्त्वात् उक्तार्थे "चैत्रः पचन्तौ पश्यति" इति प्रयोगस्य न प्रामाण्यप्रसङ्गः । तथैव "चैत्रः पाकं करोति" इत्यत्र धात्वर्थपाकस्य कर्मत्वे अन्वयार्थं घञन्तसमुदायस्य पाके शक्तिः स्वीकृता । परन्तु उक्तप्रतिबध्यप्रतिबन्धकभावेनैव सः प्रयोगः उपपादयितुं शक्यते । "चैत्रः पाकं करोति" इत्यत्र धातूपस्थाप्यार्थे - पच्धातूपस्थाप्यार्थे पाके सुबर्थस्य – कर्मत्वस्य एकत्वस्य च अन्वये जननीये पच्धातूत्तरप्रत्ययः घञ्प्रत्ययः, तद्धर्मिककिञ्चिदर्थपरत्वज्ञानं – घञ्प्रत्ययः किञ्चिदर्थकः इति ज्ञानं न भवति, घञः निरर्थकत्वात् । तस्मात् प्रतिबन्धकज्ञानस्य अभावात् धात्वर्थपाकस्य कर्मत्वे एकत्वे च अन्वयः उपपद्यते । अतः केवलधातोः यथा पाके शक्तिः तथा घञन्तसमुदायस्य पाके शक्तिः इति नापेक्षिता इति सिद्धान्तः ।

## परामृष्टाः ग्रन्थाः


१. व्युत्पत्तिवादः – गदाधरभट्टाचार्यः ।

२. व्युत्पत्तिवादः विद्वन्मनोरमाव्याख्यासहिता – एन्. एस्. रामानुजताताचार्याः ।

३. लघुशब्देन्दुशेखरे कारकप्रकरणम् – नागेशभट्टः ।

४. सुबर्थवादमञ्जूषा – नागेशभट्टः ।

# जिज्ञासाधिकरणविचारः ।

आचार्यः सुब्राय वि भट्टः*
निदेशकः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– "धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्"[१] धर्मेण लभते सर्वं धर्मसारमिदं जगत्[२] । इत्यादिभिः श्रुतिस्मृत्यादिवचनैः धर्मस्य पापनाशकत्वं सर्वविधसुखसाधनत्वं च प्रतिपादितम् । स च धर्मः कः इति धर्माधर्मविवेचनार्थं प्रवृत्तं मीमांसाशास्त्रम् । यद्यपि धर्मविचारः प्रधानोद्देश्यः तथापि अयमधर्मः इति ज्ञाते सत्येव परित्यक्तुं शक्यते इति धर्मस्य परिग्रहार्थम् अधर्मस्य परित्यागार्थं च धर्माधर्मयोः विचारः कृतः । अधर्मविचारः प्रासङ्गिकोऽपि वा भवेत् ।*

***कूटशब्दाः*** *– धर्मः,स्वाध्यायः,अध्ययनविधिः,त्वाप्रत्ययः,शाब्दी भावना ।*

धर्मविवेचनार्थं प्रवृत्तः सन् सूत्रकारः भगवान् जैमिनिः पूर्वमीमांसाशास्त्रारम्भे "अथातो धर्मजिज्ञासा"[३] इत्यनेन सूत्रेण धर्मजिज्ञासां प्रतिज्ञाय द्वादशसु अध्यायेषु धर्मं विचारयामास । अत एव अस्य "प्रतिज्ञासूत्रम्" जिज्ञासासूत्रमिति च व्यवहारः प्रवर्तते । तद्घटितस्य अधिकरणस्यापि जिज्ञासाधिकरणमिति शास्त्रप्रसिद्धिः । इदं च सिद्धान्तबोधकं सूत्रम् ।

अथ - वेदाध्ययनानन्तरं, अतः - वेदाध्ययनस्य अर्थज्ञानरूपदृष्टप्रयोजनवत्त्वात्, धर्मस्य - वेदार्थस्य जिज्ञासा - विचारः कर्तव्यः इति सामान्यतः यथाश्रुतसूत्रार्थः ।

अधिकरणं च विषयः,संशयः,सङ्गतिः,पूर्वपक्षः,सिद्धान्तश्चेति पञ्चावयवयुक्तं भवति । अधिकरणेऽस्मिन् "स्वाध्यायोऽध्येतव्यः"[४] इत्यध्ययनविधिवाक्यं विषयः । स्वस्य अध्यायः - स्वाध्यायः - स्वकुलपरम्पराप्राप्तवेदशाखा इत्यर्थः । अधीयते (गुरुमुखात्) इत्यध्यायः । स च वेद एव भवेत् । अध्येतव्यः इति अध्युपसर्गपूर्वक इङ् अध्ययने इति धातोः तव्यप्रत्यये सति निष्पन्नः । अत्र तव्यप्रत्ययेन भावना बोध्यते ।

"प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इति सूत्रानुसारेण कृत्यप्रत्ययः प्रैषाद्यर्थेषु पठितः । तव्यप्रत्ययः कृत्यप्रत्ययगणे अन्तर्गतः । अप्राप्ते अर्थे परप्रेरणं प्रैषः इति वैयाकरणाः । अतः प्रेरणार्थकः तव्यप्रत्ययः इति सिद्ध्यति । प्रेरणा, शाब्दी भावनेति पर्यायौ । शब्दभावनया आक्षिप्तायाम् अर्थभावनायां धात्वर्थस्य करणत्वेन अन्वयः । स्वाध्यायस्य कर्मत्वेनान्वयः । अत्र संस्कार्यत्वरूपं कर्मत्वं विवक्षितम् । तथा च अध्ययनेन स्वाध्यायं संस्कुर्यात् इति बोधः जायते ।

वेदाध्ययनानन्तरं वेदार्थविचारः कर्तव्यो न वा इति संशयः । कुतः संशयः - यदि वेदाध्ययनस्य अर्थज्ञानमेव दृष्टं प्रयोजनं तर्हि गुरुकुले एव स्थित्वा विचारशास्त्राध्ययनं कर्तव्यम् । तदा "अधीत्य स्नायात्" इति स्मृतिविरोधः । यदि स्मृत्यनुसारेण वेदाध्ययनानन्तरं समावर्तनं क्रियते तदा वेदस्य अर्थज्ञानरूपदृष्टप्रयोजनस्य बाधप्रसङ्गः । अतः संशयः ।

अत्रायं पूर्वपक्षः - वेदाध्ययनानन्तरं वेदार्थविचारः कर्तव्यः चेत् स्मृतिविरोधः । "अधीत्य स्नायात्" इति

---

***सम्पर्कसूत्रम्*** - 9449160458, Email- subrayavbhat@sanskrit.ac.in

[१]महानारायणोपनिषत् ।

[२]वाल्मीकिरामायणम् ।

[३]जै.सू.१-१-१

[४]तै.आ.२-१५

स्मृत्या अध्ययनानन्तरं समावर्तनं विधीयते। अत्र क्त्वाप्रत्ययेन "समानकर्तृकयोः पूर्वकाले" इति स्मृत्या एककर्तृकत्वं पूर्वकालत्वं च विधीयते इति अध्ययनानन्तरं विचारशास्त्राध्ययने सति अध्ययनानन्तरं प्राप्तस्य समावर्तनस्य विरोधापत्तिः ।

ननु अध्ययनविधिरेव अर्थज्ञानरूपदृष्टप्रयोजनसिद्ध्यर्थं अध्ययनानन्तरं विचारशास्त्राध्ययनमाक्षिपति इति चेत् अध्ययनस्य अर्थज्ञानजनकत्वं लोकत एव सिद्धमिति अर्थज्ञानार्थमध्ययनमिति न सम्भवति। अतः तन्नियमोऽपि न सम्भवति। अध्ययनमर्थज्ञानार्थम् अर्थज्ञानञ्च कर्मानुष्ठानार्थमिति वक्तव्यम्। किन्तु सर्वेषां मन्त्राणाम् अव्यभिचरितक्रतुसम्बन्धाभावेन न विधेयत्वं सम्भवति। अतः स्वर्गार्थमध्ययनं विधीयते। अथवा वेदाध्ययनं कर्तव्यमिति पित्रादिभिः हितकाङ्क्षिभिः वा उक्तमिति अध्ययनार्थमध्ययनम्। फलस्य भावनायां साध्यत्वेनान्वयः । फलाभावात् अध्ययने प्रवृत्तिरेव न स्यात् इति चेत् - "अनधीयाना व्रात्या भवन्ति" - इति वचनेन अकरणे प्रत्यवायः बोधितः । अतः प्रत्यवायभयात्प्रवृत्तिः सिद्ध्यति । कृतस्य अध्ययनस्य अदृष्टमेव प्रयोजनम् । अतः अर्थविचारार्थं गुरुकुले अवस्थानं नापेक्षितमिति अधीत्य स्नायादिति स्मृतिबलात् अध्ययनानन्तरं गुरुकुलात् समावर्तनं कर्तव्यमिति पूर्वपक्षसंक्षेपः ।

सिद्धान्तस्तु - "स्वाध्यायोऽध्येतव्यः" इति स्वाध्यायविधिः न स्वर्गाद्यदृष्टफलार्थमध्ययनं विधत्ते। दृष्टे सम्भवति अदृष्टस्य अन्याय्यत्वात् । अर्थज्ञानरूपदृष्टफले सम्भवति सति अदृष्टफलकल्पनायाः अन्याय्यत्वात् ।

यथाश्रुतार्थज्ञानार्थमध्ययनं विधीयते इत्यपि न सम्भवति । तथा हि - "अनधीयाना व्रात्या भवन्ति" इति वाक्येन अध्ययनाभावे व्रात्यतादोषः बोधितः । व्रात्यतादोषपरिहारार्थम् अध्ययने प्रवृत्तिः जायते । यदा अध्ययनं समाप्यते तदा अर्थज्ञानस्य अनिवार्यता यास्काचार्येण निरुक्तग्रन्थे अभिहिता ।

**"अधीत्य वेदं न विजानाति योऽर्थम् स्थाणुरयं भारहारः किलाभूत् ।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा ॥"[1] इति ।**

अतः केवलस्य वेदाध्ययनस्य वैयर्थ्यपरिहारार्थम् अर्थज्ञानं सम्पादनीयम् । यथाश्रुतार्थज्ञानं तु आनुषङ्गिकतयापि सिद्ध्यति इति तदर्थम् अध्ययनविधाने स्वाध्यायविधिः व्यर्थः स्यात्। अतश्च अक्षरग्रहणरूपस्य अध्ययनस्य वैयर्थ्यपरिहारार्थं प्रयोजनविशिष्टार्थज्ञानोद्देशेन स्वाध्यायाध्ययनम् अध्ययनविधिना विधीयते । अथवा तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वाभिधानात् - प्रयोजनविशिष्टार्थज्ञानसाधनीभूतस्वाध्यायोद्देशेन अध्ययनम् अनेन विधीयते । अतः वेदार्थविचारः नित्यः । "अधीत्य स्नायात्" इत्यत्र क्त्वाप्रत्ययः उत्तरकालमात्रं बोधयति । वेदाध्ययनानन्तरं समावर्तनं कर्तव्यमिति स्मृत्यर्थः । अव्यवहितोत्तरमिति नार्थः । तथा च वेदाध्ययनानन्तरं गुरुकुले एव स्थित्वा विचारशास्त्राध्ययनं कृत्वा समावर्तनं क्रियते चेदपि वेदाध्ययनानन्तर्यं समावर्तनस्य न बाध्यते । वेदस्य दृष्टार्थत्वमपि संरक्षितं भवति। अयमर्थः भाष्यकारैः स्पष्टं सूचितः। "एवं हि समामनन्ति वेदमधीत्य स्नायात् इति। इह च वेदमधीत्य स्नास्यन् धर्मं जिज्ञासमानः इममाम्नायमतिक्रामेत्। न च आम्नायो नाम अतिक्रमितव्यः। तदुच्यते - अतिक्रमिष्यामः इममाम्नायम्, अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम । दृष्टो हि तस्यार्थः कर्मावबोधनं नाम । न च तस्य अध्ययनमात्रात् तत्र भवन्तो याज्ञिकाः फलं समामनन्ति । यदपि च समामनन्तीव, तत्रापि "द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिः अर्थवादः स्यात् ।"[2] इत्यर्थवादतां वक्ष्यति । इति भाष्यम् ।

तथा च सूत्रार्थः - "अथातो धर्मजिज्ञासा" अथ- वेदाध्ययनानन्तरं, अतः - वेदाध्ययनस्य अर्थज्ञानरूपदृ-

---

[1]या-निरुक्तम्
[2]जै.सू.४-३-१

ष्टप्रयोजनवत्त्वात् वेदाध्ययनानन्तरं, धर्मस्य - वेदार्थस्य जिज्ञासा- विचारः कर्तव्यः इति ।एवं च अध्ययनं नाम गुरूच्चारणानूच्चारणरूपमक्षरग्रहणम् अर्थज्ञानपर्यन्तम् इति सिध्यति । अर्थज्ञानौपयिकतया अध्ययनविधिरेव विचारमाक्षिपतीति अस्य मीमांसाशास्त्रस्य वैधत्वमपि सिध्यति ।

धर्मजिज्ञासायाः उद्देश्यं किमिति भाष्यकारैः सरलया शैल्या उल्लिखितम् - "धर्मः प्रसिद्धो वा स्यात् अप्रसिद्धो वा ? स चेत् प्रसिद्धः न जिज्ञासितव्यः । अथाप्रसिद्धो नतराम् । तदेतदनर्थकं धर्मजिज्ञासाप्रकरणम् । अथवाऽर्थवत् । धर्मं प्रति हि विप्रतिपन्नाः बहुविदः केचिदन्यं धर्ममाहुः केचिदन्यम् । सोऽयमविचार्य प्रवर्तमानः कश्चिदेवोपाददानो विहन्येत , अनर्थं च ऋच्छेत् । तस्मात् धर्मो जिज्ञासितव्यः इति" । ततः जिज्ञास्यमानः धर्मः किं फलक इत्यपि अभिहितम् - "स हि निःश्रेयसेन पुरुषं संयुनक्तीति प्रतिजानीमहे" इति । धर्मः ऐहिकस्वर्गपशुपुत्रादिफलकः एवं नित्यकर्मादिरूपः धर्मः तत्त्वज्ञानप्राप्त्यौपयिकचित्तशुद्धिद्वारा निःश्रेयसफलकः इति ॥

॥इति शम् ॥

**परामृष्टाः ग्रन्थाः**


१. भाट्टदीपिका ।

२. शाबरभाष्यम् ।

३. प्रभावली ।

४. निरुक्तम् ।




ISSN : 2249-538X

# मीमांसाशास्त्रीयं सर्गप्रलयविज्ञानम्

आचार्यः सूर्यनारायणभट्टः*
मीमांसाविद्याशाखा, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– अनुष्ठानोपयोगितया धर्माधर्मविवेचनार्थं प्रवृत्तं महर्षिजैमिनिप्रणीतं द्वादशाध्यायात्मकं मीमांसादर्शनम् । अत्र द्वादशसु अध्यायेषु प्रमाणादिप्रसङ्गान्ता नैके विषया धर्मानुष्ठानोपयोगितयैव विमृष्टाः । वस्तुत: परिशील्यमाने इह दर्शने कुत्रापि सृष्टिप्रलयविज्ञानस्य साक्षात् संबन्धो नैव दृश्यते । यदा जीव: - जगत् – ईश्वर: इति साक्षात् विचारः क्रियते तदा कः ईश्वरः, कः जीवः, केन इदं जगत् सृष्टम्, कदा सृष्टमिति विचाराः सहसा बुद्धिमधिरोहन्ति । परं धर्मानुष्ठाने सृष्टिप्रलययोः अनङ्गीकारेऽपि न कापि क्षतिरिति विशिष्य सृष्टिप्रलयचिन्तनं न कृतम् । तथापि शब्दार्थसंबन्धयोः नित्यत्वस्थापनार्थं विषयोऽयं निरूपणीय इति शब्दार्थसंबन्धाक्षेपपरिहारनिरूपणावसरे श्लोकवार्तिके भट्टपादैः प्रसङ्गात् सृष्टिप्रलयवादः अनूद्य प्रत्याख्यातः ।*

***कूटशब्दाः*** *– सर्ग:, प्रलय:, औत्पत्तिक:,उपदेश:, समय:, सङ्केत:, प्रतिपत्ति:, कल्प:, भूतानि, तैजसं शरीरम्, प्रायदुःखा, गुणवाद:, ऊर्णनाभि:, लाला,वपा, तूपर:।*

**उपक्रम:** – द्वादशलक्षण्यां प्रथमाध्यायस्य प्रथमपादे **औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः तस्य ज्ञानमुपदेशः**[१] इत्यादिना शब्दार्थयोः संबन्धः औत्पत्तिकः, स्वाभाविकः, नित्य इति साधितम् । शब्दार्थयोः संबन्धः तदा नित्यः भवितुमर्हति यदा शब्दार्थावुभावपि नित्यौ स्याताम् । यदि शब्दः अनित्यः तदापि संबन्धः अनित्यः । यदि अर्थः अनित्यः तदापि संबन्धः अनित्य एव । एवम् उभयोर्नित्यत्वे संबन्धस्यापि नित्यत्वं शक्यम् । धर्मे वेदस्य प्रामाण्यनिरूपणार्थं प्रवृत्तो महर्षिः शब्दार्थयोः संबन्धस्य कृतकत्वं निराकरोति । यदि शब्दार्थयोः सम्बन्धस्य कृतकत्वं स्यात् तदा यथा लोके शब्दार्थसंबन्धः नैकविधः तथैव वेदेऽपि शाब्दबोधः एकविधः न स्यादिति वैदिककर्मानुष्ठानस्य वैगुण्यं वैरूप्यं परिहर्तुं शब्दार्थसम्बन्धः वैदिकः एकविधः भवेत् इति नित्यत्वं साधितम् ।

अस्मिन् सन्दर्भे भाष्यकाराः **अथ गौरित्यत्र कः शब्दः ? गौरित्यत्र कोऽर्थः ? अथ कः संबन्धः?**[२] इति प्रश्नानुद्भाव्य प्रथमप्रश्नस्य समाधानं स्फोटवादेन द्वितीयम् आकृतिवाद-अपोहवाद-वनवादैः समाधाय अथ कः संबन्ध इत्यस्य समाधानं तु संज्ञासंज्ञिलक्षण इत्याहुः । येन संबन्धेन शब्दे ज्ञाते अर्थो विज्ञायते स: शब्दार्थयोः सम्बन्ध इति । तावता शब्दार्थयोः संबन्धः संज्ञासंज्ञिलक्षण इति कथनेन सः संबन्धः किंरूपः इति स्पष्टं स्वरूपं नावगम्यते । अथ क: संबन्धः इत्यस्य नेदं समाधानम् - येन संबन्धेन शब्दे ज्ञाते अर्थो विज्ञायते स एव तस्य प्रकृतः शब्दार्थयोः संबन्धः इति तथा कथनं तु- **किमौषधं ज्वरस्येति पृष्टो यदि वदेदिदम् ।**

**येनासौ नश्यतीत्येवं किं तेन कथितं भवेदि**[३]तिवत्स्यादिति भाष्यकारलक्षणेन अपरितुष्टाः केचन सन्ति तान् समाधातुं अतः सम्बन्धाक्षेपपरिहारार्थं सः सम्बन्धः औत्पत्तिकः स्वाभाविकः नित्यः इति वार्त्तिककारैःउपक्रान्तम् ।शब्दार्थयोः संबन्धः स्वाभाविकः, नित्यः इति यदा कथ्यते तदा त्रयः पूर्वपक्षाः वार्तिककारैः प्रदर्शिताः यथा –

**समयः प्रतिमर्त्यं वा प्रत्युच्चारणमेव वा ।**

---

***सम्पर्कसूत्रम्** - 9449541822 , Email- snbhat@sanskrit.ac.in

[१] जैमिनिसूत्रम् -१-१-५

[२] मीमांसाभाष्यम् – १-१-५

[३] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार: -३

**क्रियते जगदादौ वा सकृदेकेन केनचिदि**[१]ति ॥

समयः - सङ्केतः - प्रत्येकं पुरुषं प्रति पृथक् पृथगेव सङ्केतः, उत प्रतिपुरुषं प्रत्युच्चारणं पृथक् पृथक् सङ्केतः । अथवा सृष्ट्यादौ परमेश्वरः सकृदेव शब्दान् अर्थान् च सृष्ट्वा सङ्केतं कृतवान् ततः प्रवृत्तः सम्प्रदाय : आप्रलयं प्रवर्तते इति ।

**तेषु आदिमः पक्षः**- प्रतिपुरुषं पृथक् पृथक् सङ्केत :। तत्रापि पक्षे पुनः विकल्पद्वयम् - किं सर्वैरपि पुरुषैः अस्य शब्दस्य अयमर्थः अस्य शब्दस्य अयमर्थ इति एक एव सङ्केतः क्रियते अथवा प्रतिपुरुषं सङ्केतः भिन्नः भिन्नः इति । तत्र बहुभिः सङ्केतः क्रियते इति स्वीकारे कृतकत्वभङ्गः । बहुभिः कस्यचिदेकस्य सङ्केतकरणस्य असम्भवात् । तर्हि प्रतिपुरुषं सङ्केतः भिन्नः इति पक्षे तु येन सङ्केतः कृतः तं विना अन्यस्य बोध एव न स्यादिति अयमपि पक्ष अनुभवविरुद्ध इति त्याज्यः इति एतौ उभावपि पक्षौ अतिमन्दाविति न बहु व्याख्यातम् । तृतीयः यः पक्षः, स एव प्रधानपूर्वपक्षः इति प्रधानमल्लनिबर्हणन्यायेन अनूद्य प्रत्याख्यातः । स च पक्षस्तु इत्थम् – **सर्गादिकाले प्रजापतिः इदं जगत् सृष्ट्वा धर्माधर्मौ च व्यवस्थाप्य संव्यवहारार्थं च शब्दान् अर्थान् च सृष्ट्वा शब्दानामर्थैः सह संबन्धं च कृत्वा धर्माधर्मप्रतिपादनाय कृतसंबधैः वेदान् कृत्वा आत्मजेभ्यः मरीच्यादिभ्यः शब्दार्थसंबन्धं वेदान् च उपदिदेश ।तेऽपि अन्येभ्यः तेऽपि अन्येभ्यः इति पूर्वपूर्वेभ्यः प्रतिपद्य उत्तरोत्तरेभ्यः प्रादु**[२]रिति । तथैव अद्यापि सम्प्रदायः प्रवर्तते इति । अत एव शब्दार्थसंबन्धः कृतक इति । सृष्ट्यादौ च प्रजापतिः एवं शब्दार्थौ (नाम रूपम्) सृष्ट्वा सङ्केतं करोति इति यः पक्षः सः मीमांसकानां न सम्मतः । तथा स्वीकारे धर्मे वेदस्य प्रामाण्यं न सम्भवति । चोदनायाः धर्मे प्रामाण्यसंरक्षणार्थं कृतकत्वं निराकृतम् । भगवता प्रजापतिना संबन्धः कृतः इति स्वीक्रियते चेदपि वेदप्रामाण्यं न सिद्ध्यति । यतो हि अस्मिन् सर्गे व्रीहिशब्दस्य अयमर्थः इति यः सम्बन्धः कृतः स्यात्, पूर्वस्मिन् कल्पे अथवा अग्रिमसर्गे, पुनः सर्गावसरे वा अस्य शब्दस्य अयमेवार्थः इत्यत्र विनिगमकं नास्ति । अन्यथापि संबन्धः भवितुमर्हति । तदा एकरूपता न स्यात् । सर्वेषु कल्पेषु एक एव वेदः । अन्यथा धर्माधर्मयोः वैपरीत्यं स्यात् अनिष्टानि च आपद्येरन् । अतः एतन्निवारणार्थं मीमांसकाः सर्गप्रलयौ निराकुर्वन्ति । अतः वादोऽयं समारब्धः । अत्र भट्टपादा वदन्ति – **सर्गादौ च क्रिया नास्ति तादृक्कालो हि नेष्यते** [३]। इति ।

सृष्ट्यादौ शब्दान् सृजति, अर्थान् सृजति तयोः संबन्धं करोतीति वक्तुमेव न शक्यते । यतो हि तादृशः काल एव अस्माभिः नेष्यते, नाङ्गीक्रियत इति ।तादृशः काल एव नास्तीत्यतः सर्वज्ञः जगत्कर्ता प्रजापतिः इदं सर्वं करोतीति पक्ष एव नैवानुमतः ।

अथवा **प्रजापति र्वा इदमेक एव अग्र आसीत् प्रजापतिर्वेदानसृजत** इत्याद्यर्थवादेषु पुराणेषु केषुचित् उपवर्णितम् सृष्टिप्रकारमाश्रित्य यदि शङ्का स्यात्- **यदि त्वादौ जगत्सृष्ट्वा धर्माधर्मौ ससाधनौ ।**

**यथा शब्दार्थसम्बन्धान् वेदान् कश्चित्प्रवर्तयेत् ॥**

**जगद्धिताय वेदस्य तथा किञ्चिन्न दुष्यति** [४]**। इति ॥**

इति चेत्- नायं पक्षः आश्रयितुं शक्यः । तेषां वाक्यानां यथाश्रुतार्थे तात्पर्यम् उपपादयितुं न शक्यते, यतो हि **यदा सर्वमिदं नासीत् क्वावस्था तत्र गम्यताम् ।**

[१]श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - १३

[२]शास्त्रदीपिका १-१-५

[३]श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ४२

[४]श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ४३-४४


ISSN : 2249-538X

**प्रजापतेः क्व वा स्थानं किं रूपं च प्रतीयताम्** [१] ॥

यदा सर्वमिदं नासीदित्युच्यते तदा जगदवस्था तु बुद्धौ आरोपयितुमेव न शक्यते । तदा समस्तस्य प्रपञ्चस्य कर्ता प्रजापतिः पृथिव्यादीनामभावात् कुत्र अवतिष्ठते । न पृथिव्यादिषु तस्य अवस्थानम् । किञ्च किमाकृतिश्च असौ ? न तावदशरीर :, तथा सति सिसृक्षायाः यत्नादेः असम्भवः । नापि शरीरी, तस्य भौतिकत्वात् । भूतादीनां तदा अभावात् प्रजापतेः क्व वा स्थानं स्यात् ?

सर्गादौ सर्वस्यापि अवस्थानाभावात् न कोऽपि ज्ञाता, न किञ्चित् ज्ञेयम् । तयोरभावात् शब्दार्थसम्बन्धः कथं अध्यवसेयः स्यात् ।किञ्च सर्वाभावे स्रष्टुः सर्गस्य ज्ञाता न कोऽपि, यः अन्येभ्यः कथयेत् । सर्वाभावे च निःसाधनस्य तस्य आद्या प्रवृत्तिः कथं स्यात् । **प्रवृत्तिः कथमाद्या च जगतः सम्प्रतीयते** [२]। अथवा इच्छा मात्रेण भवगतः जगन्निष्पत्तिः सम्भाव्यते - न प्रवृत्या इति चेत् - न अशरीरस्य इच्छापि सम्भवति ।

**शरीरादेः विना चास्य कथमिच्छापि सर्जने** [३]। अथवा तस्य प्रजापतेरपि शरीरादिकं स्वीक्रियेत - तदा तत् शरीरादिकं तत्कृतं न स्यात् अन्यकृतं स्यात् तर्हि तत् अन्यशरीरमपि अन्यकृतं स्यादिति अनवस्था । अस्तु **'तदिष्यते यदि नित्यम्'** इति चेत् तर्हि **पृथिव्यादावनुत्पन्ने किमयं तत्पुनर्भवेत्** [४]? पार्थिवं तैजसं वा स्यात् ? तेषामेव अभावात् नैव प्रमाणमुपलभ्यते। **किंच प्रणिनां प्रायदुःखा च सिसृक्षास्य न युज्यते ।**

**साधनं चास्य धर्मादि तदा किञ्चिन्न विद्यते ।**
**न च निःसाधनः कर्ता कश्चित् सृजति किञ्चन** [५] ॥

ननु - ऊर्णनाभि : साधनं विना कोशं सृजतीति चेत् न, सोऽपि विनाधारं न सृजति ।

**नाधारेण विना सृष्टिःऊर्णनाभेरपीष्यते ।**
**प्राणिनां भक्षणाच्चापि तस्य लाला प्रवर्तते** [६] ।

सः लालारस एव कोशरूपेण निस्सरति । न च अनुकम्पया सृजति

**अभावाच्चानुकम्प्यानां नानुकम्पास्य जायते ।**
**सृजेच्च शुभमेवैकं अनुकम्पाप्रयोजितः ॥**
**अथाशुभात् विना सृष्टिः स्थितिर्वा नौपपद्यते ।**
**आत्माधीनाभ्युपाये हि भवेत् किं नाम दुष्करम् ।**
**तथा चापेक्षमाणस्य स्वातन्त्र्यं प्रतिहन्यते ।**
**जगच्चासृजतस्तस्य किं नामेष्टं न सिध्यति ।**
**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ॥**
**एवमेव प्रवृत्तिश्चेत चैतन्येनास्य किं भवेत्** [७] ॥

अथवा क्रीडार्था इयं सृष्टिरिति चेत्-

**क्रीडार्थायां प्रवृत्तौ च विहन्येत कृतार्थता ।**

---

[१] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ४५
[२] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ४६
[३] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ४७
[४] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ४९
[५] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ५०
[६] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ५१
[७] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहार : - ५५

**बहुव्यापारतायां च क्लेशो बहुतरो भवेत्** [१] ॥

क्रीडा च अल्पीयसो रमयति, समस्तभूधरादिविषयस्तु महाव्यापारः अतिक्लेशरूपः क्रीडार्थमिति न चित्तमनुरञ्जयति ।

**संहारेच्छापि चैतस्य भवेदप्रत्ययात् पुनः ।**

**प्रलयेषु स्थितिश्चास्य साशङ्का स्यात् प्रजापतौ** [२] ।

किञ्च इदं सर्वं वेदादवगम्यते यथा **प्रजापतिर्वा इदमेक एवासीत् सोऽकामयत प्रजाः पशून् सृजेयेत्युपक्रम्य ततो वै सः प्रजाः पशून् असृजत इति** । तदपि न सम्भवति यदि वेदः तत्कृतश्चेत् पूर्ववदेव अनाश्वासः

**एवं वेदोऽपि तत्पूर्वः सद्भावदिबोधने ।**

**साशङ्को न प्रमाणं स्यात् नित्यस्य व्यापृतिः कुतः** [३] ॥

नित्यस्य भूतप्राजासर्गव्यापारः न सम्भवति ।ननु बहूनि स्तुतिपराणि वेदवाक्यानि, पुराणादीनि च प्रजापतिना सर्वमिदं जगत्सृष्टम् । शब्दार्थसम्बन्धः कृतक इति उपवर्णयन्ति तत्र तेषां तात्पर्यार्थं सम्यक् अवगम्य वाक्यार्थो योजनीयः । नो चेत् **पौर्वापर्यापरामृष्टः शब्दः अन्यथा कुरुते मतिम्** इति न्यायेन तेषां वाक्यानां तु प्रकरणवशात् तात्पर्यार्थः अनुसन्धेयः । पुराणादयोऽपि वैदिकैरेव प्रणीताः । अतः पुराणादीनां रचयितारः अत्यन्तं वैदिकाः । वेदाभ्यासवशादेव अर्थं ज्ञात्वा पुराणादीनि रचयन्ति । अतः तेषां मुखात् निर्गतानि वाक्यानि वेदवदेव निर्गच्छन्ति । अतः वेदे विधिः अर्थवादः इत्यादिव्यवस्था यथा तथैव पुराणादिष्वपि । अत एव पुराणादिषु आर्षत्वादिति वैदिकाः शब्दा उपलभ्यन्ते । अतः पुराणादिषु यानि उपाख्यानानि लभ्यन्ते तत्र यथाश्रुतार्थे तात्पर्यं नास्ति, किन्तु स्तुतावेव । स्तुतेश्चाश्रयभूतः धर्मप्रतिपादकः कश्चित् विधिर्लभ्यते इति वेदवदेव तेषामपि व्यवस्थापनं मीमांसकानां मते । अतः वेदस्य आदिप्रवृत्तिः स्वीक्रियते तदा अपौरुषेयत्वं बाध्येत । अतः प्रपञ्चस्य सृष्टिः इति पक्षः नाभ्युपगम्यते । किञ्च सृष्ट्या किं प्रयोजनं सम्भावयितुं शक्यते ? किं वा प्रयोजनं प्रलयेन ? अथवा कर्मफलानि नष्टानि अतः प्रलयं करोतीति वक्तव्यम् । तदा अशेषकर्मनाशे पुनः सृष्टिरपि कथं भवेत् ? सा न युज्यते ।अतः वेदस्य प्रामाण्यसम्पादनार्थं धर्माधर्मव्यवस्थापनार्थं सृष्टिप्रलयौ नाङ्गीक्रियेते ।अत उक्तम् – **सर्गप्रलयविज्ञानं समस्तजगदाश्रयम् ।**

**स्वशरीरविदां पुंसां नाधिक्येनोपयुज्यते ॥**

**तस्मादद्यवदेवात्र सर्गप्रलयकल्पना ।**

**समस्तक्षयजन्मभ्यां न सिध्यत्यप्रमाणिका** [४] ॥

अत्र कर्मणि सर्गप्रलयविज्ञानस्य तथा उपयोगो न वर्तते । अतः सर्गप्रलयविज्ञानम्म् अद्यवदेव प्रवर्तते । अद्यापि पदार्था उत्पद्यन्ते नश्यन्ति इति दृश्यते । उत्पन्नाः कञ्चन कालं स्थित्वा नश्यन्ति । इयमेव सृष्टिः अयमेव प्रलयः । एतदपेक्षया समस्तस्य जगतः सर्गः प्रलयः इति न किंचित् । **स्वशरीरानित्यताज्ञानमात्रेण स्वर्गमोक्षार्थप्रवृत्तिसिद्धेः व्यर्थं समस्तजगदाश्रयं सर्गप्रलयविज्ञानमिति** [५] पार्थसारथिमिश्राः ।

इति वेदप्रामाण्यव्यवस्थापनार्थं सर्गप्रलयविज्ञानं निराकृतम् । अयं प्रधानपक्षः तैरेव भट्टपादैः अमुख्यपक्षोऽपि

---

[१] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहारः - ५६

[२] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहारः - ६६

[३] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहारः - ७५

[४] श्लोकवार्त्तिकम्- सम्बन्धाक्षेपपरिहारः - ११३

[५] न्यायरत्नाकरः -सम्बन्धाक्षेपपरिहारः - ११२


ISSN : 2249-538X

प्रदर्शितः। **अथवा मन्त्रार्थवाद-इतिहासप्रामाण्यात् सर्गप्रलयौ इष्येते** इति अर्थवादप्रामाण्याधिकरणे **गुणवादस्तु** इति सूत्रार्थप्रसङ्गे किञ्चित् अर्थवादवाक्यमादाय विचारप्रसङ्गे अयं विचारः प्रस्तुतः। **सः प्रजापतिः आत्मनो वपामुदःखिदत्। तामग्नौ प्रागृह्णात्। ततोऽजस्तूपरः उदतिष्ठत्** इति। **यः प्रजाकामः पशुकामो वा स्यात् स एतं प्राजापत्यं तूपरमालभेत इति विधिसन्निधौ श्रुतः अयमर्थवादः**[1] । अस्य अर्थवादस्य असम्भावितः यथाश्रुतार्थः वर्णितः। प्रजापतिः यागमनुष्ठितवान् वपया यागोऽनुष्ठेयः। पशुरेव न सृष्टः कुतः वपा? तदा स्वकीयामेव वपाम् उद्धृत्य होमम् अनुष्ठितवान्। तेन अजः तूपरः इति झटिति उत्पन्नः इति अयं यागः प्रशस्तःइति तात्पर्यार्थः। भाष्यकारा अपि एतादृशवाक्यानां यथाश्रुतार्थः वर्णनीयः तात्पर्यं स्तुतौ भवतु इति कथयन्ति। **ते वदन्ति – कथं पुनरिदं निरालम्बनम् अन्वाख्यायते**। कोऽपि स्वयमेव स्वकीयां वपाम् उद्धृत्य होमं कर्तुं शक्नुयाद्वा? वपामुद्धरति चेत् स्वयमेव मृतो भविष्यति। **निरालम्बनमिदम् कथं स्यात्। नित्यः कश्चन अर्थः वर्ण्यते। अत्र प्रजापतिः वायुः, वायोः भूतानां सर्वेषामपि प्रजापालनकर्तृत्वं सम्भवतीति प्रजापतिः। प्रजापतिः वायुः, आकाशः, आदित्यो वा। वपा अत्र खाआ? सारः। वृष्टिः, वायुः रश्मिर्वा। वायुः वृष्टिमुत्पादयति। प्रजापतिः वायुः स्वसारं वृष्टिं पृथक् कृतवान् दत्तवानिति। वायोः सकाशात् वृष्टिः जायते इत्यंशः ज्ञातव्यः। प्रजापतिराकाशश्चेत् तत्र वायुः चलति इत्यंशः निर्दिश्यते। अथवा आदित्यः प्रजापतिः तदा रश्मिम् उत्पादयती**[2]ति योजना कृता।

अत्र भट्टपादानाम् आशयस्तु एवं सृष्टिप्रलयौ अङ्गीकृत्य एतादृशार्थनिरूपणेन प्रकृते कः सम्बन्धः। अतः स्तुतावेव तात्पर्यम् इति। अतः अङ्गीकृत्य इति कथनात् अनङ्गीकारपक्ष एव मुख्यः वेदप्रामाण्यनिरूपणार्थम्। सर्गप्रलयस्वीकारे वेदाध्ययनाध्यापनपरम्पराविच्छेदः भवति - अतः सर्गप्रलयौ नेष्येते इति मीमांसकानां प्रधानः सिद्धान्तः।

[1]मीमांसाशबरभाष्यम्- (जैमिनिसूत्रम् १-२-१०)
[2]मीमांसाशबरभाष्यम्- (जैमिनिसूत्रम् १-२-१०)

# उद्देश्यगतगुणानामविवक्षा

डा. श्रीरामः ए एस्*
सहायकाचार्यः, धर्मशास्त्र-मीमांसा-विभागः,
संस्कृतविद्याधर्मविज्ञानसङ्कायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

***लेखसारः*** *– द्वादशलक्षण्यामधिकरणरूपेण बहवो न्याया व्युत्पाद्यन्ते । तेष्वुद्देश्यगतगुणानामविवक्षेति न्यायस्सुप्रसिद्धः । ग्रहाद्युद्देश्यनिष्ठसंख्यादिगुणानामविविक्षेत्यनेन न्यायेन व्युत्पाद्यते । ग्रहं संमार्ष्टीत्यत्र ग्रहोद्देशेन यथा सम्मार्जनविधानम्, तथैव एकत्वोद्देशेनापि सम्मार्जनविधानं भवति न वेति संशय्य, एकत्वस्यापि विवक्षायां भावनाया एककर्मकत्वनियमाद्वाक्यभेदापत्त्यैकत्वमविवक्षितमिति सिद्धान्त्यते । अविवक्षितमित्यस्योद्देश्यत्वेनापि विधेयत्वेनाप्यन्वयो न सम्भवतीत्यर्थः ।*

*द्वादशलक्षण्यां तृतीयाध्याये प्रथमे पादे सप्तममधिकरणं भवति ग्रहैकत्वाधिकरणम् । अस्मिन्नधिकरणे उद्देश्यगतगुणा अविविक्ष्यन्त इति न्यायो व्युत्पाद्यते ।*

*अधिकरणेऽस्मिन् ''एकत्वयुक्तमेकस्य श्रुतिसंयोगात्''*[१] *इत्यादीनि सूत्राणि ।*

*एकत्वयुक्तम् - एकत्वविशिष्टं ग्रहद्रव्यं सम्मार्गविध्युद्देश्यं स्यात् । एकस्य - एकत्वसंख्यायुक्तस्य, श्रुतिसंयोगात् - ग्रहमित्येकवचनश्रुत्या प्रतिपादनादित्यर्थः ।*

*ज्योतिष्टोमादिप्रकरणस्थानि वाक्यानि विषयः । तत्र उदाहरणं तु ''दशापवित्रेण ग्रहं संमार्ष्टि''*[२] *इति । दशापवित्रपदस्य वासःखण्डः कम्बलो वार्थः । ग्रहपदस्य ग्रह्यतेऽस्मिन्निति व्युत्पत्त्या सोमरसधारणपात्रमर्थः । सम्मार्जनं प्रोञ्छनम्, शुद्धीकरणम् । ग्रहमुद्दिश्य सम्मार्जनरूपस्संस्कारो विधीयते ।*

*एवमग्निहोत्रप्रकरणगतम् ''अग्नये तृणान्यपचिनोति''*[३] *इति बहुवचनान्तपदघटितं वाक्यम्, दर्शपूर्णमासप्रकरणगतं ''पुरोडाशं पर्यग्निकरोति''*[४] *इत्येकवचनान्तपदघटितवाक्यम्, ''यस्य पुरोडाशौ क्षायतः''*[५] *इति द्विवचनान्तपदघटितं वाक्यम्, एवं ''यस्य सर्वाणि हवींषि नश्येयुर्वापहरेयुर्वाज्येन ता देवताःपरिसंख्याय यजेत''*[६] *इति बहुवचनान्तपदघटितवाक्यं चोदाहरणम् ।*

*क्रियाद्रव्यगुणानां श्रुत्या विनियोगस्तृतीयप्रथमे निरूपितः । तृतीयाध्यायास्य प्रथमे पादे चतुर्थाधिकरणं तेषामर्थाधिकरणम् । तस्मिन् ''व्रीहीन् प्रोक्षति''*[७]*, ''आज्यम् उत्पुनाति''*[८] *इत्यादौ उत्पवनादिसंस्काराणामाज्यादिद्रव्यं प्रत्यङ्गत्वं प्रतिपादितम् । पञ्चमे ''स्फ्येनोद्धन्ति''*[९]*, ''कपालेषु श्रपयति''*[१०] *इत्यादौ स्फ्यकपालादिद्रव्याणामङ्गत्वं प्र-*

---

***सम्पर्कसूत्रम्** - 9032291671, Email- asshriram@gmail.com

[१]जैमिनिसूत्रम् - 3.1.7
[२]आपस्तम्बश्रौतसूत्रम् - 12.4.8
[३]श्रौतम्
[४]तैत्तिरीयब्राह्मणम् - 3.2.8.5
[५]मैत्रायणीयसंहिता - 1.4.33
[६]आपस्तम्बश्रौतसूत्रम् - 9.4.43
[७]शतपथब्राह्मणम् - 1.3.110
[८]श्रौतम्
[९]तैत्तिरीयसंहिता - 6.4
[१०]तैत्तिरीयब्राह्मणम् - 3.2.8.6

*तिपादितम् । षष्ठे "अरुणया पिङ्गाक्ष्या"[१] इत्यत्रारुण्यगुणस्यापि सोमक्रयाङ्गत्वं निरूपितम् । सम्प्रति सप्तमे 'ग्रहं सम्मार्ष्टि' इत्यत्र ग्रहं प्रति सम्मार्जनं प्रत्युद्देश्यं ग्रहमात्रं वा उतैकत्वमपीति विचारादवसरसङ्गतिः ।*

***कूटशब्दाः** – उद्देश्यम्, गुणः, अविविक्षा, कर्मत्वम्, ग्रहः, सम्मार्जनम् इत्यादि ।*

## संशयः

ग्रहं सम्मार्ष्टीत्यत्र ग्रहमुद्दिश्य सम्मार्जनं विधीयते । ग्रहत्वमुद्देश्यतावच्छेदकम् । इदं चोभयवादिसिद्धम् । ग्रहमित्यत्रैकवचनोपात्तमेकत्वमपि ग्रहे ग्रहत्ववदुद्देश्यतावच्छेदकं भवति न वेति संशयः । अर्थात् प्रातिपदिकं यथोद्देश्यं समर्पयति तथा प्रत्ययोऽप्युद्देश्यं समर्पयति न वेति संशयः । ग्रहमुद्देश्यम् । तत्तु विवक्ष्यत एव । परं ग्रहगतमेकत्वस्यापि विवक्षास्ति न वेति फलति ।

## पूर्वपक्षः

पश्वेकत्वाधिकरणे विधेयगतगुणानां विविक्षेति सिद्धान्तःकृतः । "पशुना यजेत"[२] इत्यत्र पशुर्विधेयः, पशुगतं प्रत्ययोपात्तमेकत्वं विवक्ष्यत इत्युक्तम् । तद्वदेव श्रुतस्य ग्रहगतस्यैकत्वस्याविवक्षाकारणाभावादेकत्वस्याप्युद्देश्यतावच्छेदकता सम्भवति । ग्रहगतस्यैकत्वस्य विवक्षितत्वादेवैकस्यैव ग्रहस्य सम्मार्जनं कार्यमिति ।

## सिद्धान्तः

एकत्वविशिष्टग्रहस्योद्देश्यत्वे वाक्यभेदाद्ग्रहगतमेकत्वमविवक्षितमिति । तर्हि विशिष्टोद्देश्ये सर्वत्र वाक्यभेदो भवति वेति प्रश्ने क्वचिद्वाक्यभेदो भवति, क्वचिन्न भवतीति समाधानम् ।

"इमामगृभ्णन् रशनाम् ऋतस्येत्यश्वाभिधानीमादत्ते"[३] इत्यत्राश्वाभिधानीमुद्दिश्य मन्त्रविशिष्टादानं विधीयते । अश्वाभिधानीमिति समस्तं पदमश्वसम्बन्ध्यभिधानीत्यर्थबोधकम् । पदमिदं विशिष्टमुद्देश्यं समर्पयति । तथाप्यत्र वाक्यभेदो न भवति । यतो भावनान्वयात्पूर्वमेवाश्वपदार्थाभिधानीपदार्थयोः परस्परान्वयो जातः । अतोऽत्र वाक्यभेदो न भवति ।

एवमेव "यत्किञ्चित्सोमलिप्तं तेनावभृतं यन्ति" इत्यत्रापि सोमलिप्तमित्युद्देश्यसमर्पकं पदम् । इदं सोमसम्बन्धिपात्रं बोधयति । इदञ्च विशिष्टोद्देश्यं समर्पयति । इदं समस्तं पदम् । अत्रापि भावनान्वयात्पूर्वमेव समासघटकयोःपरस्परान्वयो जातः ।

समासादौ भावनान्वयात्पूर्वमेव परस्परान्वयो व्युत्पन्न इति कृत्वा विशिष्टोद्देशेपि न वाक्यभेदः । यत्रासमस्तपदस्थले परस्परान्वयो न व्युत्पन्नस्तत्र विशिष्टोद्देशोऽव्युत्पन्नान्वयनिबन्धनवाक्यभेदः । यथा - दर्शे "यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्"[४] इत्यादौ हविरार्तिमात्रमुद्देश्यम् । हविरार्तिर्नाम हविषो नाशः । उभयत्वविशिष्टवहिरार्तिर्नोद्देश्यम् । उभयपदार्थस्य हविरार्तिपदार्थस्य च परस्परान्वयो न भवति । अतोऽत्र न विशिष्टोद्देशः । तेनैकस्यापि हविषो नाशे प्रायश्चित्तमनुष्ठेयम् । इत्थं द्वयोस्सुबर्थयोः परस्परान्वयस्तु न व्युत्पन्नः । अपि तु भावनान्वय एव व्युत्पन्नः ।

[१]तैत्तिरीयसंहिता - 6.1.6
[२]काठकसंहिता - 8.1
[३]तैत्तिरीयसंहिता - 5.1.2
[४]तैत्तिरीयब्राह्मणम्. - 3.7.1.7

ISSN : 2249-538X

एवं ग्रहमित्यत्रापि विशिष्टोद्देशे वाक्यभेदः। ''पञ्चदशान्याज्यानि''[१] इत्यत्राज्यस्य विधाने वाक्यभेदापत्तेराज्यमिति पदं स्तोत्रनामधेयमिति सिद्धान्तितम्। यदि भावनायमन्वयात्पूर्वं परस्परान्वयो व्युत्पन्नस्तर्हि पञ्चदशत्वविशिष्टाज्यस्यापि भावनान्वयसम्भवाद्वाक्यभेदो न स्यात्। तेन चित्राधिकरणोक्तसिद्धान्तभङ्गस्स्यात्। अतस्सुबर्थयोःपरस्परान्वयो न भवति।

ग्रहमित्यत्रैकवचनोक्तैकत्वसंख्यायास्तु समानाभिधानश्रुत्या प्रत्ययार्थे कर्मत्वे अन्वयः। न तु समानपदश्रुत्या प्रातिपदिकार्थे।

'सर्वेभ्यो दर्शपूर्णमासौ'[२] इत्यत्र सर्वान्फलानुद्दिश्य दर्शपूर्णमासौ विधीयेते। 'सर्वेभ्य' इत्येकेन पदेनोपादानात्सर्वेषां फलानां साहित्यं प्रतीयते। तस्य साहित्यस्य प्रत्ययार्थे एवान्वयः। ग्रहगतैकत्ववत्साहित्यस्याप्यविवक्षा।

## प्रकारान्तरेण पूर्वपक्षः

यथा ग्रहपदं ग्रहत्वावच्छिन्नमुद्देश्यं समर्पयति तथा प्रत्ययोपि स्वातन्त्र्येणैकत्वावच्छिन्नोद्देश्यं समर्पयति न वेति द्वितीयो विचारः।

प्रत्ययार्थस्यैकत्वस्य प्रातिपदिकार्थे ग्रहे विशेषणत्वेनान्वयाभावादेकत्वविशिष्टग्रहस्य उद्देश्यत्वाभावादुद्देश्यतावच्छेदकतयैकत्वस्य विवक्षा न सम्भवति चेदपि प्रातिपदिकवत्प्रत्ययस्यापि स्वातन्त्र्येणोद्देश्यसमर्पकत्वं भवत्विति।

पूर्वोक्तवदेकत्वविशिष्टग्रहस्योद्देश्यत्वं न सम्भवति चेदपि प्रकृत्यर्थप्रत्ययार्थैकत्वयोःप्रत्ययार्थे कर्मत्वे एवान्वयात्, विशेषणद्वयविशिष्टकर्मत्वस्य सम्मार्जनभावनायामन्वयात्, यदा सम्मार्जनेन सह पार्ष्ठिकस्साध्यसाधनभावसम्बन्धःकल्प्यते, तदा प्रातिपदिकार्थग्रहेण सह एवं प्रत्ययार्थैकत्वेन सह स्वातन्त्र्येण सम्बन्धो भवेत्।

उद्देश्यानेकत्वे न वाक्यभेदः। भावनायामनेककरणादिकारकसम्बन्धेपि यथा न वाक्यभेदः, तथानेकोद्देश्येन सम्बन्धेऽपि न वाक्यभेदः। न च तस्यामर्थभावनायामेकोद्देश्यतावच्छेदककत्वनियमः। 'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ सर्वेभ्य इति सर्वनामपदं पुत्रत्वेन पशुत्वेन विशेषरूपेण फलमुपस्थापयति। पुत्रपश्वादिफले अनुगतः उद्देश्यतावच्छेदकधर्मो न भवति। पुत्रत्वपशुत्वादिकमेवोद्देश्यतावच्छेदकम्। एवमनेकोद्देश्यतावच्छेदककत्वेपि न वाक्यभेदः। शब्दभावनायास्त्वनेकोद्देश्यकत्वे न वाक्यभेदः।

तदुपरि प्रश्नः, 'ग्रहैर्जुहोति' त्यत्र ग्रहत्वावच्छिन्नस्य ग्रहस्य विनियोगो भवतीति हेतोर्ग्रहत्वावच्छिन्नस्य संस्कार्यता सम्भवति। परमेकत्वावच्छिन्नस्यैकस्य विनियोगाभावात्संस्कार्यता न स्यादिति। येन रूपेण विनियोगस्तेनैव रूपेण संस्कार्यतेति न कश्चिन्नियमः। यथा - पशौ 'लोहितं निरस्यति', 'शकृत्सम्प्रविध्यति' इत्येवं यागेऽविनियुक्तस्यापि लोहितस्य निरसनादिसंस्कारा विहिताः। निरसनादिसंस्कारेण संस्कृतस्याग्रिमकर्मणि विनियोगाभावेपि लोहितादि प्रति निरसनादिसंस्कारःकृतः। इत्थं लोहितत्वेन रूपेण विनियोज्यत्वाभावेपि पशुप्रकृतिकत्वेन रूपेण विनियुक्तस्य लोहितादेस्संस्कार्यत्वं यथा, तथैकत्वेन रूपेण ग्रहाणां विनियोज्यत्वाभावेपि ग्रहत्वेन रूपेण विनियोज्यत्वात्संस्कार्यत्वं स्यात्। तेन बहुत्वविशिष्टतया विनियुक्तस्यापि ग्रहस्यैकत्वावच्छिन्नोद्देशेनापि सम्मार्जनविधानम्।

तदुपरि प्रश्नः - ग्रहैकत्वयोर्द्वयोरुद्देश्ययोःकर्मत्वकारकेऽन्वयात्सम्मार्जनभावनारूपैकप्रधानक्रियायां वशीकाराभावात्कथं भावनान्वयोत्तरं परस्परान्वय इति। विकृतिभावनायाःकथम्भावाकांक्षायां क्लृप्तोपकारकत्वात्प्राकृताङ्गानामेव ग्रहणं भवति। प्राकृताङ्गानामन्वयमात्रेणाकांक्षायाश्शमनेपि वैकृताङ्गानामुपहोमादीनामन्वयार्थं यथा प्र-

---

[१] ताण्ड्यब्राह्मणम् - 20.1.1

[२] वाराहश्रौतसूत्रम् - 1.1.1.1


ISSN : 2249-538X

धानस्याकांक्षा उत्थाप्यते तथा सम्मार्जनस्यैकस्मिन्विशेषणे अन्वयोत्तरं सम्मार्जनक्रियां प्रति प्रधानभूतस्यापि विशेषणान्तरस्याकांक्षानुरोधेन सम्मार्जनस्याकांक्षामुत्थाप्यापरविशेषणेन साकमन्वयोपपद्यते। इष्यते च यत्र 'आग्नेयं चतुर्धा करोति', 'पुरोडाशं चतुर्धा करोति'[१] इत्यादौ भिन्नवाक्यस्थलेपि यथा चतुर्धाकरणरूपगुणकर्मानुरोधेन प्रधानयोराग्नेयपुरोडाशयोरभेदेनान्वयःकृतस्तथैकवाक्यस्थले सुतरां शाब्दबोधे मुख्यविशेष्यभूतया क्रियया वशीकारः।

श्रुतस्यैकत्वस्याविवक्षापेक्षया सम्मार्जनक्रियायाःप्राधान्यं प्रकल्प्यापि द्वयोर्ग्रहैकत्वयोर्विशेषणयोर्वशीकारकल्पनायां न कोपि दोषः। अत एकत्वादेरपि स्वातन्त्र्येणोद्देश्यतावच्छेदकत्वमिति चेत् -

करोतिपर्यायत्वं भावनायाः। करोतेरेककर्मकत्वनियमात्, भावनाया अप्येककर्मकत्वं पर्यवस्यति। उद्देश्यानेकत्वे तु भावनाया एककर्मकत्वनियमभङ्गनिबन्धनवाक्यभेदस्स्यात्। एककर्मकत्वं च एकबोधविषय-कर्मत्वपर्याप्त्यधिकरणतावच्छेदकधर्मवत्त्वम्। एकबोधविषय इत्युक्ते एकपदजन्योपस्थितिविषय इति। 'घटं करोति' इत्यादौ करोतेरर्थःकृतिः। उद्देश्यं घटः। उद्देश्यता घटनिष्ठा। उद्देश्यतावच्छेदकं घटत्वम्। घटपदजन्योपस्थितिर्बोधः। घट(एक)पदजन्योपस्थितिविषयो घटत्वरूपो धर्म एकबोधविषयः। स एव कर्मत्वपर्याप्त्यधिकरणतावच्छेदकधर्मः। घटेषु प्रतीयमानकर्मत्वपर्याप्त्यधिकरणतावच्छेदकधर्मो घटत्वम्। एवमेव यजेत स्वर्गकाम इत्यादौ स्वर्गत्वमुद्देश्यतावच्छेदकम्। तच्च स्वर्गपदजन्योपस्थितिविषयः। एकबोधविषयस्वर्गत्वरूपकर्मत्वपर्याप्त्यधिकरणतावच्छेदकधर्मवत्त्वं भावनायामिति भावनाया एककर्मकत्वम्।

'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ पुत्रत्वपशुत्वादीन्यनेकान्युद्देश्यतावच्छेदकधर्माणि भवन्ति। कर्मत्वपर्याप्त्यधिकरणतावच्छेदकधर्माणामनेकत्वेपि सर्वेषामपि धर्माणामेकपदजन्योपस्थिति-विषयत्वान्नैककर्मत्वबाध इत्येकत्वस्य बोधे निवेशं कृत्वाद्यमेकपदजन्योपस्थितिविषयेति दलम्। एकबोधविषयकर्मत्वावच्छेदकधर्मवत्त्वमित्येतावन्मात्रोक्तावध्वर्युयजमानौ वाचं यच्छत इत्यादावध्वर्युत्व-यजमानत्वयोरेकपदजन्योपस्थितिविषयत्वाभावाद् एककर्मकत्वाभावात्वाक्यभेदस्स्यात्। अध्वर्युत्वं त्वध्वर्युपद-जन्योपस्थितिविषयः। यजमानत्वं तु यजमानपदजन्योपस्थितिविषय इत्येकपदजन्योपस्थितिविषयो न भवति। अतो लक्षणे पर्याप्त्यधिकरणतावच्छेदकधर्मवत्वस्य निवेशः। तेनाध्वर्युयजमानाविति द्वन्द्वोपात्तस्य साहित्यविशिष्टस्य कर्मत्वे अन्वयः। अध्यर्युयजमानौ वाग्यमं कुरुत इति तदर्थः। अयं वाग्यमः(मौनम्) अध्वर्युयजमानयोस्संस्कारः। अध्वर्युयजमानयोस्संस्कार्यत्वेन प्राधान्यम्। कर्मत्वं तु उभयत्र पर्याप्तम्। कर्मत्वपर्याप्त्यधिकरणतावच्छेदकधर्मः उभयत्वमिति स्वीकार्यम्। तच्च प्रत्येकपदजन्यपस्थितिविषयो न। अपि तु एकसमस्तपदजन्योपस्थितिविषयो भवति।

अतश्च यत्र विधौ पदद्वयेनोपात्तं फलद्वयम्, यत्र पदद्वयेनोपात्तं संस्कार्यद्वयम्, यत्र फलं संस्कार्यं चोभयमुपात्तं तत्र वाक्यभेदस्स्यात्। यत्र निमित्तद्वयं पठितं तत्रापि यावज्जीवाधिकरणन्यायेन निमित्तद्वयस्य फलद्वयाक्षेपकत्वाद्वाक्यभेदः। निमित्तस्य मुख्यकर्मत्वाभावाद्यत्रैकेन वाक्येनैकं निमित्तमेकं फलञ्चोपात्तम्, अथवा एकं निमित्तं संस्कार्यं च बोधितम्, तत्रैककर्मकत्वभङ्गाभावान्न वाक्यभेदः। यथा 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते ... यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इत्यत्र पुत्रजननरूपनिमित्तस्य पूतादिफलस्य च बोधनेपि न वाक्यभेदः। कालदेशादीनामुद्देश्यत्वेपि न वाक्यभेदः। एवं ग्रहैकत्वयोर्विवक्षायां वाक्यभेदः॥

[१] तैत्तिरीयब्राह्मणम् - 3.3.8

**तदुपरि आक्षेपः**

ननूद्देश्यतावच्छेदकत्वयोरन्वयासम्भवेऽपि केवलं ग्रहत्वस्योद्देश्यतावच्छेदकत्वं भवेत्। एकत्वस्य त्वेकत्वेन सम्मार्गं भावयेदिति विधेयत्वेन सम्मार्गभावनायामन्वयसम्भवादेकत्वस्य विवक्षा स्यादिति। ग्रहमित्यत्र द्वितीया ग्रहांशे कर्मत्वं समर्पयति एकत्वांशे तु करणत्वं समर्पयतीत्युच्यमाने वैरूप्यं स्यात्। एक एव प्रत्ययो युगपत् शक्त्या कर्मत्वस्य, लक्षणया करणत्वस्य समर्प्यमाणे वृत्तिद्वयविरोधस्स्यादिति न चिन्त्यम्। द्वितीयायाश्शक्त्या साध्यत्वमात्रमर्थः। ईप्सितानीप्सितादिकं प्रमाणान्तरगम्यम्। ईप्सितानीप्सित-साधारणकर्मत्वस्य द्वितीयावगतस्य प्रमाणान्तरेण विशेषाकारेणावगम्य यथोचितमन्वयः। ईप्सितकर्मत्वस्य ग्रहस्य साध्यत्वेन, अनीप्सितकर्मत्वस्यैकत्वस्य साधनत्वेनान्वय इत्युभयोःकर्मत्वेनान्वयान्न वैरूप्यम्। तदुपरि प्रश्नः, एकत्वस्य सम्मार्गं प्रत्यङ्गत्वं सम्मार्जनीयद्रव्यद्वारा भवितुमर्हति। परं तच्च द्रव्यं न ग्रहो भवेत्। यतस्सम्मार्जनं प्रति ग्रहस्याङ्गत्वाभावात्। तदनङ्गभूतग्रहद्वारकत्वासम्भवः। 'अगन्म'[1] इति मन्त्रस्य दर्शपूर्णमासप्रकरणे पाठाद्दर्शपूर्णमासाङ्गत्वं दर्शपूर्णमासापूर्वसम्बन्धिस्वर्गरूपफलप्रकाशनद्वारा वाच्यम्। मन्त्रस्याङ्गत्वं सम्भवति चेदपि द्वारभूतफलस्य न अङ्गत्वम्। तद्वदेव सम्मार्गं प्रति प्रधानभूतग्रहद्वारैकत्वस्य सम्मार्गं प्रत्यङ्गत्वं सम्बन्धित्वमात्रेण भवेत्। अतश्च विधेयत्वेनैकत्वस्य विवक्षेति चेत् -

सम्मार्गं प्रत्येकत्वस्याङ्गत्वं करणत्वलक्षणां विना न सम्भवतीति करणत्वलक्षणायां युगपद्वृत्तिद्वयविरोधस्स्यात्। श्रुतया द्वितीयया ग्रहांशे उद्देश्यत्वम्, एकत्वांशे विधेयत्वं बोधनीयमिति वैरूप्यं स्यात्। शाखाभेदेनाम्नातयोर्मन्त्रयोः 'अदितिःपाशं प्रमुमोक्त्वेतम्', 'अदितिःपाशान्प्रमुमोक्त्वेतान्' इत्यन-योरेकपशुकप्रयोगे बहुवचनान्तपदघटितमन्त्रस्यानन्वयादन्वयसम्पादनाथ बहुवचनस्यैकत्वे लक्षणेति पाशाधिकरणोक्तरीत्या ग्रहमित्युद्देश्यसमर्पके पदे बहुत्वे लक्षणा। द्वितीयया ईप्सितानीप्सितसाधारण्येन कर्मत्वमात्राभिधानात्प्रत्ययार्थस्य करणत्वेनाप्यन्वयसम्भव इति यदुक्तम्, तन्न, ग्रहस्यैकत्वस्य च ईप्सिता-नीप्सितसाधारण्येन वा कर्मत्वाभिधाने एककर्मकत्वभङ्गेन वाक्यभेदस्स्यात्। अतश्चैकत्वस्य सम्मार्गं प्रति गुणत्वाभावादेकवचनं बहुत्वं लक्षयति। एवं चैकत्वस्योद्देश्यत्वेन विधेयत्वेन वान्वयासम्भवात्पदसाधुत्वार्थम-नुवादादविवक्षा।

यथा चैवं सति 'अष्टवर्षं ब्राह्मणमुपनयीत'[2] इत्यादौ ब्राह्मणस्योद्देश्यत्वात्, अष्टवर्षत्वस्य पदान्तरेण समर्पणादविवक्षा स्यादिति, तन्न, तमध्यापयीतेति वाक्यान्तरे तेनाध्ययनं भावयेदिति बोधं स्वीकृत्य तेनेति पदेनाष्टवर्षत्वविशिष्टब्राह्मणस्य परामर्शाद्विधेयत्वेनाष्टत्वस्यापि विवक्षोपपत्तिः ॥

**सन्दर्भः**

भाट्टदीपिका - खण्डदेवः, प्रभावली - शम्भुभट्टः, निर्णयसागरः, 1922

[1]तैत्तिरीयसंहिता - 1.6.6
[2]याज्ञवल्क्यस्मृतिः - 1.14


ISSN : 2249-538X

# प्रवर्ग्याधिकरणम् ।

डा. गोविन्दगोपालकृष्णहेगडे*
सहायकाचार्यः (सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– - द्वादशाध्यायात्मकपूर्वमीमांसायां अनुष्ठानोपयोगितया धर्मः विचारितः । तत्र च प्रथमाध्याये धर्मप्रमाणानि, द्वितीये कर्मभेदः, तृतीये अङ्गाङ्गीभावः,चतुर्थे प्रयोज्यप्रयोजकभावः,पञ्चमे क्रमः, षष्ठे अधिकारः, सप्तमे अतिदेशः, अष्टमे विशेषातिदेशः, नवमे ऊहः, दशमे बाधः,एकादशे तन्त्रम् , द्वादशे प्रसङ्गः इत्येवं प्रत्येकस्मिन्नध्याये विभिन्नाः विषयाः विमृष्टाः । तत्र तृतीयाध्याये उत्सर्गापवादाभ्यां अङ्गाङ्गीभावः निरूपितः । अङ्गत्वं नाम परोद्देशप्रवृत्तकृतिकारकत्वेनविहितं यत् तत्वमिति । तृतीयाध्यायस्य तृतीयपादस्य द्वादशाधिकरणं प्रवर्ग्याधिकरणम् । तत्र च प्रवर्ग्यस्य वाक्यात् उपसदङ्गत्वम् उत प्रकरणात् ज्योतिष्टोमाङ्गत्वविचारः प्रस्तुतः ।*

***कूटशब्दाः*** *– - प्रवर्ग्यः,उपसत् , पर्युदासः,प्रथमयज्ञः ।*

प्रधानलेखः - पूर्वमीमांसायां तृतीयाध्यायस्य तृतीयपादस्य द्वादशाधिकरणं प्रवर्ग्याधिकरणम् । अधिकरणेऽस्मिन् "संख्यायुक्तं क्रतोः प्रकरणात् स्यात्"[१] इत्यादि सूत्रानुसारेण प्रवर्ग्यविषयकविचारः निरूपितः । अनारभ्याधीतः प्रवर्ग्यः । "यत्प्रवर्ग्यं प्रवृणक्ति"[२] इतीदं प्रवर्ग्यस्य उत्पत्तिवाक्यम् । तप्ते घृते पयः प्रक्षेपः प्रवृञ्जनम् । तद्यस्मिन् कर्मविशेषे बिद्यते सोऽयं प्रवर्ग्यः । अनारभ्याधीतस्य प्रवर्ग्यस्य "पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति"[३] इत्यनेन ज्योतिष्टोमाङ्गत्वेन विनियोगः क्रियते । प्रवर्ग्येण ज्योतिष्टोमोपकारं भावयेदिति । ननु प्रवर्ग्यस्य उपसदुपकारकत्वमेव वाक्येन अवगतं न तु ज्योतिष्टोमोपकारकत्वम् । वाक्येन तावत् उपसदामेव उपस्थितिः न तु ज्योतिष्टोमस्य उपस्थितिः इत्यतः पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति इत्यनेन प्रवर्ग्यस्य उपसदुपकारकत्वमेव न तु ज्योतिष्टोमोपकारकत्वं बोध्यते इति चेत् - न । अव्यभिचरितक्रतुसम्बन्धसहकृतद्विरुक्तत्वन्यायेन ज्योतिष्टोमस्य उपस्थितत्वात् ज्योतिष्टोमाङ्गत्वेनैव प्रवर्ग्यस्य विनियोगः क्रियते । उपसदां तावत् अव्यभिचरितक्रतुसम्बन्धात् यद्यपि प्रकृतिविकृतिसाधारणसोमयागस्य उपस्थितावपि विकृतौ च प्रकृतितः एव अतिदेशेन उपसदां सम्भवत्प्राप्तिकत्वात् उपदेशेनापि प्राप्तौ द्विरुक्तत्वापत्तिः । अतः प्रकृतिज्योतिष्टोमाङ्गत्वेनैव प्रवर्ग्यस्य विनियोगः क्रियते । न च प्रवर्ग्यस्य उपसदङ्गत्वमेव किं न स्यादिति वाच्यम् । अव्यभिचरितक्रतुसम्बन्धसहकृतद्विरुक्तत्वन्यायेन ज्योतिष्टोमस्य उपस्थतिकथनापेक्षया लाघवात् वाक्येन उपस्थितानां उपसदामेव उद्देश्यत्वात् तदङ्गत्वेन प्रवर्ग्यस्य विनियोगः युक्तः इति । उपसदाम् उद्देश्यत्वसमर्पकं तावत् उपसदामिति पदम् । तच्च पुरस्तादित्यनेन अन्वितम् । अतः उपसत्पदस्य पुरस्तात्कालप्रतियोगित्वेन स्वार्थोपस्थापकस्य उद्देश्यसमर्पकत्वं न भवति । तथा च प्रवर्ग्यस्य उपसदङ्गत्वेन विनियोगः कर्तुं न शक्यते । अतः अव्यभिचरितक्रतुसम्बन्धसहकृतद्विरुक्तत्वन्यायेन ज्योतिष्टोमस्य उपस्थितत्वात् ज्योतिष्टोमाङ्गत्वेनैव प्रवर्ग्यस्य विनियोगः कर्तव्यः इति । नन्वेवमपि "संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति" इत्यत्र वाक्येन वैमृधस्य पौर्णमास्यङ्गत्वम् इष्टम् । तत्र च यद्यपि पौर्णमासीति पदं संस्थाप्य इत्यनेन अन्वितं सत् उद्देश्यसमर्पकं न भवति, तथापि पौर्णमास्याः संस्थाप्रतियोगित्वेन उपस्थितायाः उपस्थितत्वात् वैमृधोद्देश्यत्वं वैमृधेन पौर्णमासीं भावयेदिति कल्प्यते । तथैव प्रकृते पुरस्तात् प्रवर्ग्यं प्रवृणक्ति इत्यत्र पुरस्तात्कालप्रतियोगित्वेन उपस्थितस्य उपसदः

---

***सम्पर्कसूत्रम्** - 8277226830, Email- govindahegde@sanskrit.ac.in

[१]जैमिनिसूत्रम् - ३-३-३२

[२]तै.आ.८-२

[३]तै.आ.८-६

एव प्रवर्ग्योद्देश्यत्वं प्रवर्ग्येण उपसदुपकारं भावयेदिति कल्प्यते इति । तथा च प्रवर्ग्यस्य उपसदङ्गत्वेनैव विनियोगः न तु ज्योतिष्टोमाङ्गत्वेन इति चेत् । उच्यते - उपस्थिततत्वात् उद्देश्यवाचकपदान्तरकल्पनया उपसदाम् उद्देश्यत्वाङ्गीकारे प्रवर्ग्यस्य उपसदां स्वरूपे प्रयोजनाभावात् ज्योतिष्टोमापूर्वसाधनीभूतोपसदुद्देशेनैव विनियोगः कर्तव्यः । अतः उपसदां फलवत्वज्ञानार्थं ज्योतिष्टोमोपस्थितेः आवश्यकत्वात् लाघवात् प्रवर्ग्यस्य ज्योतिष्टोमार्थत्वमेव इति । कौषीतकीब्राह्मणे ज्योतिष्टोमप्रकरणे एव प्रवर्ग्याम्नानाच्च प्रवर्ग्यस्य ज्योतिष्टोमार्थत्वं सिद्धं भवति ।

कौषीतकीब्राह्मणस्थज्योतिष्टोमप्राकरणिकप्रवर्ग्यविध्यनन्तरं "न प्रथमयज्ञे प्रवृञ्ज्यात्" इति श्रुतम् । अत्र च प्रथमयज्ञपदेन अग्निष्टोमादिसर्वसंस्थः सर्वावस्थश्च (द्वितीयादिप्रयोगः) अभिधीयते उत ज्योतिष्टोमीयप्रथमप्रयोगमात्रम् इति चिन्तायाम् - प्रथमयज्ञशब्दः ज्योतिष्टोमनामैव । "एष वाव प्रथमयज्ञो यज्ञानां यज्ज्योतिष्टोमः" इत्यत्र प्रथमयज्ञज्योतिष्टोमयोः सामानाधिकरण्यात् । ज्योतिष्टोमे प्रथमं प्रयुज्यमानत्वेन प्रथमयज्ञप्रयोगप्रवृत्तिनिमित्तत्वमपि वर्तते । यद्यपि अग्निष्टोमसंस्थाकज्योतिष्टोमस्यैव प्रथमं प्रयुज्यमानत्वं न तु उक्थ्यादिसंस्थाकज्योतिष्टोमस्य तथापि ज्योतिष्टोमत्वसामानाधिकरण्येन सर्वसंस्थाकस्य प्रथमं प्रयुज्यमानत्वमस्तीत्यतः न प्रथमयज्ञपदप्रयोगप्रवृत्तिनित्तत्वाविघातः । तथा च न प्रथमयज्ञे प्रवृञ्ज्यात् इत्यनेन ज्योतिष्टोमत्वच्छेदेनैव प्रवर्ग्यस्य प्रतिषेधः क्रियते । यदि शास्त्रप्राप्तस्य शास्त्रान्तरेण प्रतिषेधे विकल्पः विकल्पे च अष्टौ दोषाः तर्हि ज्योतिष्टोमभिन्ने प्रवृञ्ज्यादिति पर्युदासः । यत्तु "अग्निष्टोमे प्रवृणक्ति" इति वचनं तत् पर्युदासप्रसवार्थम् । तदपि "कामं तु योऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यात्" इत्यनेन उपसंह्रियते । सामान्यतः प्राप्तस्य विशेषे सङ्कोचः उपसंहारः । अग्निष्टोमे प्रवृणक्ति इत्यनेन सर्वकर्तृकाग्निष्टोमे प्राप्तस्य प्रवर्ग्यस्य कामं तु योऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यात् इत्यनेन अनूचानः श्रोत्रियश्च यः तत्कर्तृकाग्निष्टोमप्रयोगे एव प्रवृञ्जनम् इत्युपसंहारः । तथा च अनूचानस्य श्रोत्रियस्याग्निष्टोमसंस्थाकज्योतिष्टोमे नित्यं करणम्,अन्यज्योतिष्टोमे नित्यमकरणम् , विकृतिषु नित्यं करणमिति पूर्वपक्षसंक्षेपः ।

सिद्धान्तस्तु - प्रथमयज्ञशब्दस्य प्रथमो यज्ञः इति अवयवयोगेनैव अर्थबोधोपपत्तौ अतिरिक्तशक्तिकल्पनायां प्रमाणं नास्ति । प्रथमशब्दः अप्रवृत्तप्रवर्तनाविषयवाची । अतः प्रथमशब्दस्य आद्यप्रयोगपरत्वमवगम्यते । यज्ञशब्दस्य लक्षणया प्रयोगपरत्वम् । तथा च प्रथमयज्ञपदेन प्रथमप्रयोगः उच्यते । अथवा प्रकरणात् ज्योतिष्टोमप्रथमप्रयोगः अभिधीयते । ज्योतिष्टोमाद्यप्रयोगः अग्निष्टोमसंस्थकज्योतिष्टोमः अथवा "प्रथमं यजमानोऽतिरात्रेण यजेत" इति वचनेन अतिरात्रसंस्थाकज्योतिष्टोमः वा भवति । अतः उभयस्मिन प्रयोगे एव "न प्रथमयज्ञे प्रवृञ्ज्यात्" इत्यनेन पर्युदासः न तु विकृत्यन्तरे । ज्योतिष्टोमभिन्ने विकृतौ उपदेशेन अतिदेशेन वा प्राप्तिः नास्तीत्यतः पर्युदासः न भवति । ननु प्रथमतया यदा ज्योतिष्टोमः अनुष्ठीयते तदैव ज्योतिष्टोमप्रयोगे द्वितीयादिप्रयोगापेक्षया प्राथम्यस्य विवक्षिततत्वात् सः प्रथमयज्ञशब्दवाच्यः,तथैव विकृतिसोमयागः यदा प्रथमतया अनुष्ठीयते तदा सोऽपि प्रथमयज्ञशब्दवाच्यो भवत्येव । तथा च "न प्रथमयज्ञे प्रवृञ्ज्यात्" इत्यनेन विकृतौ प्रथमप्रयोगे प्रवर्ग्यपर्युदासः कुतो न भवतीति चेत् - न । प्राथम्यस्य निरूपकापेक्षायां द्वितीयादिप्रयोगस्य निरूपकत्वं न कल्प्यते अपि तु "एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः" इति वचनेन ज्योतिष्टोमभिन्नविकृतिमात्रस्यैव निरूपकत्वम् । तथा च प्रथमयज्ञशब्दः वाक्यशेषात् वैदिकप्रयोगाच्च निरूढलक्षणया सोमान्तरनिरूपितप्राथम्यवत्प्रयोगविषयज्योतिष्टोममेवाभिधत्ते । अन्यथा स्वस्वद्वितीयादिप्रयोगनिरूपितप्राथम्यवत्प्रयोगविषययज्ञमात्राभिधाने "आहिताग्नयः इष्टप्रथमयज्ञाः गृहपतिसप्तदशाः सत्रमासीरन्" इत्यादौ सत्रे यज्ञमात्रोत्तरकालतापत्तिः स्यात् न तु अभीष्टज्योतिष्टोमोत्तरत्वम् । अतः अग्निष्टोमसंस्थाकज्योतिष्टोमप्रयोगे अतिरात्रसंस्थाकज्योतिष्टोमप्रयोगे वा प्रवर्ग्यप्रतिषेधः इति ।

वस्तुतस्तु "न प्रथमयज्ञे प्रवृञ्ज्यात्" इत्ययं न प्रतिषेधः । तथा सति "न तौ पशौ करोति" इतिवत् अतिरात्रप्रथमाहारेऽपि विकल्पः स्यात् । अत्र च केचन विकल्पम् एवं परिहरन्ति । क्रियायाः स्वरूपेण


ISSN : 2249-538X

उद्देश्यसम्बन्धित्वेन वा निषेधे एव विकल्पः। यत्र कारकनिषेधः तत्र निषेधस्य कारकमात्रविषयत्वेन क्रियाविषयत्वाभावात् क्रियाविषयविधिविकल्पापादकत्वानुपपत्तिः इति। यथा "रात्रौ श्राद्धं न कुर्वीत" इत्यनेन रात्रिरूपाधिकरणस्यैव निषेधः न तु श्राद्धरूपक्रियायाः। अतः प्रमाणान्तरेणप्राप्तश्राद्धक्रियायाः निषेधाभावात् न विकल्पः। प्रकृतेऽपि "न प्रथमयज्ञे प्रवृञ्ज्यात्" इत्यत्र प्रथमयज्ञशब्दस्य नोद्देश्यपरत्वम् अपि तु अधिकरणरूपकारकपरत्वम्। तथा च प्रवृञ्जनरूपक्रियायाः निषेधाभावात् न विकल्पापत्तिः इति - तन्न। अधिकरणरूपकारकस्यापि प्रयोगविधितः प्राप्तौ न्यायतौल्येन प्रथमप्रयोगाधिकरणत्वस्य विकल्पः स्यादेव। अतः "नानूयाजेषु" इतिवत् अनारभ्यवाक्यशेषः प्रथमप्रयोगभिन्ने प्रवृञ्ज्यादिति। अतः अग्निष्टोमसंस्थकप्रथमप्रयोगे अकरणप्रसक्तौ "अग्निष्टोमे प्रवृणक्ति" इति वचनम् अत्यन्ताप्राप्तफलकमपि प्रतिप्रसवफलकं सत् अग्निष्टोमसंस्थाकत्वे निमित्ते प्रथमप्रयोगेऽपि नित्यं प्रयोगविधानार्थम्। "कामं तु योऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यात्" इत्यनेन उपसंहारः क्रियते। श्रोत्रियः यः अनूचानः(वेदाध्यापकः)तत्कर्तृकप्रयोगे नित्यं करणम्। अन्यकर्तृकप्रयोगे नित्यमकरणम्। विकृतौ तु प्रथमप्रयोगेऽपि नित्यं प्रवर्ग्यकरणमिति।

॥इति शम्॥

**परामृष्टाः ग्रन्थाः**


१. भाट्टदीपिका।

२. जैमिनीयन्यायमालाविस्तरः।

३. श्लोकवार्तिकम्।

# आधानविमर्शः

श्री आदर्श विनायक भट्टः*
सहायकाचार्यः (सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– समग्रस्यापि श्रौतकर्मणः अनुष्ठानं शिष्टत्रैवर्णिकानां नियतम् । तत्रापि अधिकारः विशेषरूपेण तत्र तत्र श्रुत्या एव प्रतिपाद्यते । यथा राजसूयादौ राज्ञः सतः एव क्षत्रियस्याधिकारः, अश्वमेधादौ चक्रवर्तिनः एव इति । परन्तु अग्निहोत्रादिनित्यकर्मणः, वायव्येष्ट्यादिकाम्यकर्मणां, वैश्वानरेष्ट्यादिनैमित्तिककर्मणां च अधिकारिनिश्चयः मीमांसादिशास्त्रगम्यः । अत एव अर्थी समर्थो विद्वान् यजेत इति श्रौतकर्मणि सामान्यतः अधिकारी उच्यते । यथा अध्ययनविधिसिद्धा विद्या अधिकारिविशेषणं तथैव अग्नावेव समस्तकर्मणः अनुष्ठानात् अग्निमत्ता अपि मुख्या एव भवति । अतः त्रेताग्निसाधकम् आधानमपि आदौ विचारणीयम् । तस्मादेव अत्र आधानविधानम्, आधानकालः, आधानप्रभेदाः, अधिकारी, तत्प्रयोजनं चेति बहवः विचाराः सङ्क्षेपेण एकत्रैव सङ्गृह्य विविच्यन्ते । तेन सुलभेनैव शास्त्रादौ विहितः निर्णयः, विचारितविषयाणां स्पष्टता च सम्भवति । अतः तैत्तिरीयशाखोक्तदिशा श्रीसायणभाष्यानुरोधेन मीमांसाग्रन्थावलोकनेन च इदं लेखनं चिकीर्ष्यते ।*

***कूटशब्दाः*** *– इष्टिपूर्वाधानम्, सोमपूर्वाधानम्, आर्तिजाधानम्, रथकाराधनम् ।*

**वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।**
**यन्नत्वा कृतकृत्यास्स्युः तन्नमामि गजाननम् ॥**

प्रपञ्चेऽस्मिन् धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु पुरुषाणां प्रवृत्तिसम्पादनेन सन्मार्गप्रवर्तिका सर्वशास्त्राणां परमप्रमाणभूता च श्रुतिरेव इति विदितमेवैतत् । सा च अपौरुषेयीति प्रामाण्यमप्यव्याहतम् । तत्र हि धर्मप्रतिपादकत्वेनैव सर्वेषां वेदवाक्यानाम् अर्थवत्त्वं वेदभाष्यकारादिभिः श्रीसायणाद्याचार्यैः, मीमांसाशास्त्रकृज्जैमिनिमहर्षिभिश्च विशदरूपेण प्रतिपादितमेव । धर्मपदवाच्यः कः ? स च किंलक्षणकः ? किंप्रमाणकः ? इत्यादीनां सन्देहानां समाधानमपि तत्र तत्र उक्तमेव । धर्मस्य अलौकिकत्वात् प्रत्यक्षादिलौकिकप्रमाणप्रतिपाद्यत्वं निरस्य चोदनैकगम्यत्वात् यागादिरूपस्य धर्मस्य वेदमूलकत्वादेव प्रामाण्यं तत्र तत्र मीमांसादिग्रन्थेषु प्रतिपाद्यते । यागादिरेव धर्मः इति क्रियारूपत्वावगतेः तेषामनुष्ठानेनैव पुरुषाः इह अमुत्र च लोके सुखमनुभवन्तीति निश्चयेन तत्र प्रवृत्तिः अवलोक्यते । अतः ज्योतिष्टोमादियागानुष्ठानार्थम् अधिकारिविशेषणम् उक्तम् - अध्ययनविधिसिद्धा विद्या, आधानसिद्धाग्निमत्ता, सामर्थ्यं चेति । अतः तत्रान्यतमम् अग्निमत्त्वस्य हेतुभूतम् आधानविषयं यजुर्वेदोक्तक्रमेण मीमांसाशास्त्रप्रतिपादितक्रमेण च उपपादयितुमीहे ।

इदं च आधानम् तैत्तिरीयब्राह्मणे प्रथमाष्टके प्रथमप्रश्नस्य द्वितीयानुवाकादारभ्य द्वितीयप्रश्नस्य प्रथमानुवाकान्तं यावद्विहितम् । तत्र क्रमेण काल-अधिकारी-अङ्गादिविषये च विधानं दृश्यते । कालविषये वाक्यानि एवं श्रूयन्ते **"कृत्तिकास्वग्निमादधीत । यो रोहिण्यामग्निमाधत्ते । ते पुनर्वस्वोरादधत । स पूर्वयोः फल्गुन्योरग्निमादधीत । स उत्तरयोः फल्गुन्योरग्निमादधीत । स चित्रायामग्निमादधीत"** ।[1] इत्यादिभिः आधानकालो विहितः । तत्तद्वाक्येन कृत्तिका, रोहिणी, पुनर्वसू, पूर्वाफल्गुनी, उत्तराफल्गुनी चेति नक्षत्राणि विहितानीत्यतः तत्तन्नक्षत्रयुक्तं दिनम् आधानस्य प्रशस्तमित्यर्थः । तत्रापि यदि विशेषरूपेण जिज्ञासा क्रियते तर्हि तस्मिन्नेवानुवाके **"अथो खलु । अग्निनक्ष-**

---

***सम्पर्कसूत्रम्*** - 9740815338, Email- bhatadarsh355@gmail.com

[1] कृष्णयजुर्वेदे तैत्तिरीयब्राह्मणे प्रथमाष्टके १ प्रपाठके २ अनुवाकः ।

**त्रमित्यपचायन्ति । गृहान् ह दाहुको भवति"** ।[1] इति वाक्यैः पूर्वोक्तस्यैव कृत्तिकानक्षत्रस्य निन्दा च प्रतिपादिता । अथो इत्यनेन गुणप्रतिपादनं यत्कृतं पूर्वैः वाक्यैः तद्वैपरीत्यम् अस्मिन्वाक्ये प्रतिपाद्यते इति भेदद्योतकम् । तेन च कृत्तिकानक्षत्रे अग्न्याधाने क्रियमाणे गृहस्यैव दाहो भविष्यतीत्यनेन कृत्तिकानक्षत्रस्य अप्राशस्त्यमुक्तं भवति । परन्तु निषेधवाक्यस्य अश्रवणात् निन्दायाः अनपेक्षणाच्च विध्येकवाक्यत्वमेव अङ्गीकृत्य लक्षणादिना वा वाक्यार्थः उन्नेयः । एवमेव पुनर्वसूनक्षत्रस्यापि **"एतद्वै पुनराधेयस्य नक्षत्रम्"** इति वाक्येन पुनराधानार्थमिदं नक्षत्रमिति विधानात् व्यवस्थितं भवति । एवञ्च अवशिष्टेषु रोहिणी, पूर्वाफल्गुनी, उत्तराफल्गुनीनक्षत्रयुक्तदिनेषु आधानं कर्तव्यमिति सिद्धं भवति । एवमेव ऋतुरपि अधिकारिभेदेन विहितो वर्तते । तथा हि - **"वसन्ते ब्राह्मणोऽग्निमादधीत । ग्रीष्मे राजन्य आदधीत । शरदि वैश्य आदधीत"**[2] । उपनयनादिसंस्कारैः संस्कृतानां, गुरुकुले गृहीतविद्यानां, शिष्टत्रैवर्णिकानां विवाहात्परम् अग्निसिद्ध्यर्थम् क्रमेण वसन्त-ग्रीष्म-शरदृतवः विधीयन्त इति आधानविषये काल-अधिकारिनिर्णयः । फलविशेषस्य श्रवणेऽपि प्रधानं फलम् अग्निसिद्धिरेव । ब्रह्मवर्चसादिकं तु आनुषङ्गिकमिति सिद्ध्यति । पुनश्च आधाने त्रैविध्यमपि उक्तं वेदेन सोमपूर्वाधानम्, इष्टिपूर्वाधानम्, आर्तिजाधानमिति । सोमयागं चिकीर्षोः अग्न्यभावे कर्तुमशक्यत्वात् तदानीम् अग्न्यर्थं क्रियमाणमाधनं सोमपूर्वाधानमिति व्यवहारः । दर्शपूर्णमासात्पूर्वं क्रियमाणमाधानम् इष्टिपूर्वाधानम् । **"यदैवैनं यज्ञ उपनमेत् । अथादधीत । सैवास्यर्द्धिः"**[3] । इत्यादिवाक्येन श्रद्धा यदा भवति तदा आधानं यत्क्रियते तदाधानम् अथवा यः मरणावस्थायां भवति सोऽपि यदि आधानं कर्तुमिच्छति तदा क्रियमाणमाधानमपि आर्तिजाधानमित्युच्यते । सोमपूर्वाधानविषये पूर्वमीमांसायामपि विचारो दृश्यते ।

भगवता महर्षिणा जैमिनिना प्रणीतायां द्वादशलक्षण्यां पञ्चमाध्यायस्य चतुर्थपादस्य तृतीयाधिकरणे आधानस्य सोमपूर्वत्वविचारो विमृष्टः । आधानस्य सोमपूर्वत्वम् इष्टिपूर्वत्वं नाम किमिति सन्देहः आधानविषयकप्रस्तावनया सञ्जिहीर्ष्यते । विवाहसंस्कारसंस्कृतस्य च त्रैवर्णिकस्य नित्य-नैमित्तिक-काम्येति श्रौतकर्मणामनुष्ठानार्थम् त्रेताग्निरपेक्ष्यते । तत्सिद्ध्यर्थं च श्रुत्या त्रैवर्णिकोद्देशेन वसन्तादिवाक्येन आधानं विधाय **"यस्सोमेन यक्ष्यमाणः अग्निमादधीत नर्तुं सूर्क्षेन्न नक्षत्रम्"**[4] इति श्रुतम् । तत्र किं विधीयते इति विचारे क्रियमाणे न तावत्सोमस्याधानानन्तर्यं विधीयते तद्बोधकपदाद्यभावात् । कल्प्यमाने तु गौरवापत्तिः । अतः केवलम् आधानमात्रस्य विहितकालानादरः एव विधीयते, यस्सोमेन यक्ष्यमाणः इति तु अनुवादः इति पूर्वपक्षः अधिकरणे उत्थापितः । अनेन सोमयागः आधानात्परं साक्षात् कर्तुमेव न शक्यते इत्युक्तं भवति । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत इति वाक्येन दर्शपूर्णमासानन्तरमेव सोमयागः कर्तव्यः इति इष्टिपूर्वाधानमेव पर्यवसितं भवति ।

तत्सिद्धान्तः- विशेषणं चेद्व्यावर्तकं स्यादिति कश्चन सामान्यः नियमः । अत्र यस्सोमेन यक्ष्यमाणः इत्यस्य केवलानुवादकत्वे आधानकर्तृविशेषणत्वं नैव युज्यते । यतो हि यः आधानं करोति सः अवश्यं कालान्तरे सोमेन यक्ष्यमाणः एव भवतीत्यतः केवला-नुवादकत्वस्वीकारे प्रयोजनाभावात् कालान्तरे सोमयागं करिष्यमाणः आधानं यदा कदापि कुर्यादिति सामान्यतः वाक्यार्थो भविष्यति । इदं च लोकतः एव सिद्धं भवतीति न किञ्चिद्वैशिष्ट्यं प्रामाण्यं वा वेदवाक्यस्य वक्तुं शक्यम् ।अतः यस्सोमेन यक्ष्यमाणः इत्यस्यापि कर्तृविशेषणत्वेन अन्वयेसोमयागं कर्तुमुद्युक्तस्य आधानकालानादरः विधीयते ।तथा हि सोमाव्यवहितपूर्वकालीनम् आधानमुद्दिश्य

[1]कृष्णयजुर्वेदे तैत्तिरीयब्राह्मणे प्रथमाष्टके १ प्रपाठके २ अनुवाकः ।
[2]कृष्णयजुर्वेदे तैत्तिरीयब्राह्मणे प्रथमाष्टके १ प्रपाठके २ अनुवाकः १० हनः ।
[3]कृष्णयजुर्वेदे तैत्तिरीयब्राह्मणे प्रथमाष्टके १ प्रपाठके २ अनुवाकः१३ हनः ।
[4]बोधायनश्रौतसूत्रम् २४.१२.१.२

विहितकालानादरो विधीयत इति वाक्यस्यापि वैय्यर्थ्यपरिहारः भविष्यति ।

वैय्यर्थ्यपरिहारः प्रकारान्तरेणापि कर्तुं शक्यत इति आशङ्क्य परिह्रियते यथा - **वर्षासु रथकारः आदधीत** इति वाक्येन विहितम् आधानम् न अग्निसिद्ध्यर्थम् । यतः तस्य अध्ययनाद्यभावात्, उत्तरक्रतुषु अधिकारस्यैव अभावात् । अतः स्वर्गार्थम् उत अदृष्टार्थमिति वक्तव्यम् । तादृशाधानस्य व्यावृत्तिः **यस्सोमेन यक्ष्यमाणः** इत्यनेन क्रियते इति अनुवादस्य सार्थक्यं सम्पादयितुं शक्यम् इति सन्देहस्य समाधानम् एवमुच्यते, रथकाराधानस्य अदृष्टार्थत्वादेव अग्निमिति द्वितीयाद्यभावात् प्रसक्तिरेव न भवतीति तस्य व्यावृत्तिः अनेन वाक्येन नैव उच्यते । अतः अनेन वाक्येन आधानसमनन्तरं यः सोमयागं चिकीर्षति तेन कालानादरः कर्तव्यः इति सोमपूर्वाधानमेव अनेन वाक्येन विधीयते इत्येव सिद्धं भवति । तेन च इष्टिपूर्वाधानं विकल्प्यते । तत्रापि पञ्चदिनादि कालस्य नैव बाधः अपि तु विहितनक्षत्रादिकालस्यैव इत्यपि सिद्ध्यति । तथा च आधाने त्रैविध्यं सिद्ध्यति । एतस्य च आधानस्य फलविशेषजिज्ञासायां दृष्टे सम्भवत्यदृष्टकल्पनायाः अन्याय्यत्वमिति न्यायेन दृष्टरूपा अग्निसिद्धिरेव फलमिति आमनन्ति मीमांसकाः । एवमेव रथकाराधानस्यापि विषये मतभेदः मीमांसकेषु दृश्यते । यथा - स्वर्गार्थमेव रथकाराधानमिति केचन मन्यन्ते प्राचीनाः । खण्डदेवाचार्यादयः अर्वाचीनाः मीमांसकास्तु नैव अदृष्टार्थत्वमाधानस्य अपि तु अन्त्येष्ट्यादौ तस्य आधानसिद्धस्य अग्नेः उपयोगदर्शनात् तदर्थत्वमेवेति आमनन्ति इति शम् ।

**परामृष्टाः ग्रन्थाः**


१. अध्वरमीमांसाकुतूहलवृत्तिः ।

२. भाट्टदीपिका ।

३. मनुस्मृतिः ।

४. कृष्णयजुर्वेद-तैत्तिरीयब्राह्मणभाष्यम् ।

५. आपस्तम्बश्रौतसूत्रम् ।

६. बोधायनश्रौतसूत्रम् ।



ISSN : 2249-538X

# दृष्टिद्रष्ट्रोः असम्बन्धः

आचार्यः गणेश ईश्वर भट्टः*
वेदान्तविद्याशाखा, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– अद्वितीयचिन्मात्रस्वरूपस्य आत्मतत्त्वस्य निर्दिधारयिषया वेदान्ता आरब्धा इति विदन्त्येव विपश्चिदः । स च आत्मा लोके ज्ञानाश्रयतया प्रसिद्धः, अहं जानामि इत्याद्यनुभवात् । किन्तु तस्य निर्विकारचैतन्यरूपेणैव वेदान्तेषु प्रतिपादनात्, तस्य च स्वरूपस्य लोके तार्किकसमये कर्माकाण्डे वा अप्रसिद्धत्वात् आत्मस्वरूपं वेदान्तैकवेद्यम् । यदवोचन् भाष्यकाराः –* ***"न ह्यहम्प्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा"***[१] *इति । आत्मा अनाद्यनन्तचिन्मात्रस्वरूपः स्वप्रकाशत्वात् स्वयं भासमानः स्वस्मिन् अध्यस्तं समस्तप्रपञ्चमपि अवभासयति । स एव ज्ञानस्वरूप आत्मा घटादिज्ञानरूपेणापि प्रथत इति ज्ञानात्मनोः भेदाभावात् तद्व्यापाकस्य तयोः सम्बन्धोऽपि असिद्धः ।*

***कूटशब्दाः*** *– प्रमुखाः शब्दाः – दृष्टिः, द्रष्टा, आत्मा, ज्ञानम्, अन्तःकरणम्, वृत्तिः, वार्त्तिकम्, भाष्यकाराः, वृत्तिकाराः, कर्तृत्वम्, साक्षी चित्सुखी, मानमनोहरकारः, सम्बन्धः, नित्यः भेदः*

बृहदारण्यके श्रूयते – उषस्तेन चाक्रायणेन आत्मतत्त्वम् अधिकृत्य प्रश्ने कृते सति, याज्ञवल्क्यः तमात्मानम् उपदिशन्, घटाद्यनात्मपदार्थवत् आत्मा निरूपयितुम् अशक्य इति तं प्रतिबोधयन्नाह **"न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयाः ... एष त आत्मा सर्वान्तरः.."** [२] इति । अत्र दृष्ट्यादिशब्दस्य अन्तःकरणवृत्तिरूपं ज्ञानमर्थः । यथोक्तं वार्त्तिककारैः –

**"अन्तःकरणवृत्तिर्या चक्षुरादिसमाश्रया ।**
**रूपादिविषयाभासा लौकिकी दृष्टिरुच्यते"**[३] **॥ इति ।**

तथा हि अनाद्यन्तम् आत्मस्वरूपभूतं केवलचैतन्यं स्वप्रकाशमपि स्वयमेव सर्वदा सर्वान् विषयान् न प्रकाशयति । अन्तःकरणवृत्त्युपारूढं हि तत् यस्य पुरुषस्य यदाकारा अन्तःकरणवृत्तिः जाता, तमेव पुरुषं प्रति तमेव विषयं प्रकाशयति । इदं विषयाकारवृत्त्यवच्छिन्नं चैतन्यं ज्ञानम् इत्युच्यते । अस्य च ज्ञानस्य उत्पत्तिमत्त्वात्, वृत्त्यभिव्यक्तचैतन्यापेक्षया अन्यत् नित्यचैतन्यम् अजानानाः नैयायिकादयः ज्ञानम् अनित्यमिति मन्यन्ते । कादाचित्कमिदं ज्ञानम् आत्मनि उत्पद्यमानम् आत्मनि समवायसम्बन्धेन तिष्ठति, अतः ज्ञानाधिकरणमात्मेति तेषां मतम् । किन्तु अस्य लौकिकज्ञानापेक्षया आत्मस्वरूपभूतं ज्ञानम् अन्यदेव । तस्यैव रूपभेदः इदं घटादिज्ञानम् । यस्मात् अन्तःकरणद्वारा आत्मैव सर्वं विजानाति, तस्मात् तमात्मानं ज्ञातृस्थाने स्थितम् अन्यः कोऽपि न जानाति, आत्मभिन्नस्य सर्वस्यापि अचेतनत्वेन प्रमातृत्वायोगात् । प्रमाता तु प्रमातृत्वादेव घटादिप्रमेयवत् स्वस्वरूपभूतम् आत्मानं विषयीकर्तुं न शक्नोति । अत एव अन्तःकरणवृत्त्युत्पत्तौ कारणीभूतानि चक्षुरादीनि करणान्यपि आत्मानं न विषयीकुर्वन्ति । तेषामपि स्वरूपमयमात्मैव । स्वात्मनि च क्रिया न सम्भवति । इममर्थमाह श्रुतिः " **न दृष्टेर्द्रष्टारं**

---

***सम्पर्कसूत्रम्** - 9448906454/7019454925, Email- gibhat@sanskrit.ac.in

[१] ब्रह्मसूत्रम् १-१-४

[२] बृहदारण्यकोपनिषत् ३-४-२

[३] बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ३-४-२

**पश्येः"** इति । **"यच्चक्षुषा न पश्यति येन चक्षूंषी पश्यति" "यच्छ्रोत्रेण न श्रृणोति येन श्रोत्रमिदं श्रुतम्"**[१] इत्यादयः श्रुतयः अस्मिन्नर्थे उदाहार्याः ।

द्रष्टृशब्दितः य आत्मा निर्विकारः चिदेकस्वभावः सर्वाः दृष्टिशब्दोक्त-अन्तःकरणवृत्तीः, वृत्तिमदन्तःकरणम्, वृत्तीनाम् अन्तरम्, वृत्त्यभावं च पश्यति । सः वेदान्तेषु कूटस्थ इति साक्षीति च निर्दिश्यते । वस्तुतः तस्य दृक्स्वरूपतया दृष्टिकर्तृत्वं न सम्भवति । तथापि वृत्त्याश्रयतया विषयप्रकाशके प्रमातरि द्रष्टृत्वव्यपदेशात् अत्रापि विषयप्रकाशके चैतन्ये द्रष्टृशब्दः उपचर्यते । उक्तं च विद्यारण्यमुनिभिः –

**"चिदाभासविशिष्टानां तथाऽनेकधियामसौ ।**
**सन्धिं धियामभावं च भासयन्प्रविविच्यताम् ॥**
**क्रमाद्विच्छिद्य विच्छिद्य जायन्ते वृत्तयोऽखिलाः ।**
**सर्वा अपि विलीयन्ते सुप्तिमूर्च्छासमाधिषु ॥**
**सन्धयोऽखिलवृत्तीनामभावाश्चावभासिताः ।**
**निर्विकारेण येनासौ कूटस्थ इति गीयते" ॥**[२] इति ।

अन्यत्रापि भाष्यकारैरुक्तम् – **"यो दृष्टेर्द्रष्टा सः दृष्टिश्चेद्भवति नित्यमेव पश्यति दृष्टिम् , न कदाचिदपि दृष्टिर्न दृश्यते द्रष्ट्रा ; तत्र द्रष्टुर्दृष्ट्या नित्यया भवितव्यम् ; अनित्या चेद्द्रष्टुर्दृष्टिः, तत्र दृश्या या दृष्टिः सा कदाचिन्न दृश्येतापि — यथा अनित्यया दृष्ट्या घटादि वस्तु ; न च तद्वत् दृष्टेर्द्रष्टा कदाचिदपि न पश्यति दृष्टिम्"**[३] इति ।

एवम् अन्तःकरणतद्धर्मान् साक्षादीक्षमाण आत्मा दृष्टेः द्रष्टा इति कथ्यत इति श्रुत्यर्थः भाष्यकारैः दर्शितः । अत्र भर्तृप्रपञ्चाख्याः वृत्तिकाराः प्रागुक्तरीत्या दृष्टिद्वैविध्यम् अकृत्वा, श्रुतिमिमाम् अन्यथा व्याख्यान्ति । तन्मतं भाष्यकारैः अनूद्य निराकृतम् । एवं हि वृत्तिकाराः मन्यन्ते– द्रष्टा इति तृजन्तेन पदेन आत्मनः दर्शनक्रियाकर्तृत्वमुच्यते । कर्तरि हि तृच्प्रत्ययः विहितः । आत्मकर्तृकायां क्रियायां दर्शनं कर्म । सकर्मिकायां क्रियायां कर्मणः अन्तरङ्गत्वात् दृष्टेः इति कर्मणि षष्ठी । शेषषष्ठ्यङ्गीकारे तु शेषरूपः अर्थः बहिरङ्गं स्यात् । यथा चैत्रः ग्रामं गच्छति इत्यत्र, चैत्रस्य गमनक्रियायाः कर्तृत्वात्, गमनक्रिया चैत्रं न विषयीकरोति, एवमेव, आत्मनः दर्शनक्रियाकर्तृत्वात् सा दर्शनक्रिया रूपादिविषयं विषयीकुर्वती न दर्शनकर्तारम् आत्मानं विषयीकरोति इति । वृत्तिकारमतमिदम् अनूदितं वार्त्तिककारैः-

**"दृष्टेः कर्तारमात्मानं न पश्येः क्रियमाणया ।**
**दृष्ट्या रूपानुपातिन्या न क्रिया कर्तृकर्मिका" ॥**[४] इति ।

तदिदं मतं भाष्यकारा दूषयामासुः । तद्यथा – दृष्टेः द्रष्टा इति हि श्रुतिः, न तु दृष्टेः कर्ता इति । अयं च पाठः काण्वमाध्यन्दिनयोः उभयोः समानः । एवं सति द्रष्टृपदेनैव आत्मनः दृष्टिकर्तृत्वसिद्धौ पुनः दृष्टेः इति पदमिह व्यर्थं स्यात् । यथा लोके चैत्रः गन्ता इत्युच्यते, न तु चैत्रः गतेः गन्ता इति । अतः व्याख्यानमिदम् अयुक्तम् । तथा च आत्मनः ज्ञानकर्तृत्वाभावात् ज्ञानस्वरूप एवात्मा ।

एवमपि, दृष्टिशब्दितं ज्ञानम् अन्यत्, द्रष्टा तदाश्रयः आत्मा अन्यः, तयोः सम्बन्धः **"न द्रष्टुर्दृष्टेः विपरिलोपो**

[१]केनोपनिषत् १-६
[२]पञ्चदशी ८-३
[३]बृहदारण्यकोपनिषद्भाष्यम् १-४-१०
[४]बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ३-४-२


ISSN : 2249-538X

**विद्यतेऽविनाशित्वात्**"[१] इति श्रुत्या अवगम्यत इति **वादिवागीश्वरकृते मानमनोहराख्ये** ग्रन्थे प्रतिपादितम्। तच्च चित्सुखाचार्यैः निरस्तम्। तथा हि, चिद्रूपत्वात् आत्मा स्वप्रकाशः। तच्च चिद्रूपत्वम् अनुमानेनापि साधयन्तः चित्सुखाचार्या एवं प्रयोगं दर्शयामासुः – घटतज्ज्ञानयोः सम्बन्धः आत्मनिष्ठः ज्ञाननिष्ठत्वात् इति। सिद्धान्ते ज्ञानज्ञेययोः सम्बन्धः आध्यासिकः। ज्ञाननिष्ठस्य सम्बन्धस्य आत्मनिष्ठत्वे, सम्बन्धस्य सम्बन्धिमात्रनिष्ठत्वात्, द्वयोः सम्बन्धिनोः घटज्ञानयोः मध्ये घटस्य आत्मत्वं तु कस्यापि नेष्टम्। पारिशेष्यात् ज्ञानस्यैव आत्मत्वं सिद्ध्यति इति अस्य अनुमानप्रयोगस्य आशयः।

अत्र नैयायिकः, ज्ञानस्य आत्मभिन्नत्वं सिषाधयिषुः, ज्ञानात्मनोः सम्बन्धः अनात्मवृत्तिः ज्ञानवृत्तित्वात् इत्यनुमानं ब्रूयात्। अत्र सम्बन्धस्य अनात्मवृत्तित्वम् आत्मज्ञानयोः मध्ये अन्यतरस्य अनात्मवृत्तित्वेनैव सिद्ध्यति, तत्र आत्मनः अनात्मत्वाभावात् ज्ञानस्य अनात्मत्वं सिद्ध्यतीति तदीय आशयः। किन्तु सिद्धान्ते अत्र आश्रयासिद्धिः दोषः, ज्ञानमेव आत्मा इत्यङ्गीकारेण तयोः सम्बन्धस्य असिद्धत्वात्। ततः तार्किकैः आक्षिप्तम्- "**न हि द्रष्टुर्दृष्टेः विपरिलोपो विद्यतेऽविनाशित्वात्**" इति श्रूयमाणत्वात् ज्ञानात्मनोः सम्बन्धे श्रुत्यैव अवगम्यमाने सति, कथम् आश्रयासिद्धिः इति। उच्यते- अप्राप्ते हि शास्त्रम् अर्थवत्। ज्ञानात्मनोः सम्बन्धः लोके ज्ञायत एव। एषा तु श्रुतिः ज्ञानस्य नित्यत्वं प्रतिपादयितुं प्रवृत्ता। तदर्थं लोकसिद्धः सम्बन्धः अनूद्यते। स च सम्बन्धः ज्ञानात्मनोः भेदाभावेऽपि राहोः शिर इत्यादाविव गौणः। सम्बन्धः, मुख्यार्थे गृह्यमाणे अद्वैतश्रुतिविरोधात्। सम्बन्धश्रुतेः अद्वैतश्रुतेः च इति द्वयोरपि श्रुतित्वे समाने अपि, यत्परः शब्दः स शब्दार्थः इति न्यायात् अद्वैतश्रुतेः उपक्रमादितात्पर्यलिङ्गोपेततया बलवत्त्वम्।

अत्र द्रष्टुः दृष्टेः इति षष्ठीद्वयं द्वेधा व्याख्यातुं शक्यम्। अनयोः सामानाकधिरण्ये, द्रष्टृरूपा या दृष्टिः तस्याः विनाशो न विद्यत इति वा, दृष्टिलक्षणः यः द्रष्टा तस्य विनाशो न विद्यत इति वा वाक्यार्थः वर्णनीयः। वैयधिकरण्ये तु, प्रागुक्तरीत्या अन्तःकरणवृत्तिरूपायाः दृष्टेः यः साक्षिलक्षणः द्रष्टा इत्यर्थः। उभयमपि व्याख्यानं तात्पर्यवतीम् अद्वैतश्रुतिम् अनुसरति इति न किञ्चिदनुपपन्नम्।

ये दृष्टिद्रष्ट्रोः मुख्यमेव सम्बन्धम् इच्छन्ति , जीवपरमात्मनोः भेदं च तात्त्विकम् अङ्गीकुर्वन्ति, तैः वक्तव्यं नित्यदृष्टिसम्बन्धः जीवपरयोः मध्ये कस्य प्रतिपाद्यत इति। तत्र जीवस्य तावत् नित्यदृष्टिसम्बन्धः भवितुं नार्हति, तन्मते जीवस्य अनित्यज्ञानाश्रयतया प्रतिपादनात्। द्रष्टुः इति पदेन ईश्वरः अभिधीयत इत्येतदपि न सम्भवति। तथा हि " **न हि द्रष्टुर्दृष्टेः विपरिलोपो विद्यते**" इतीदं वाक्यं बृहदारण्यके मैत्रेयीब्राह्मणे ज्योतिर्ब्राह्मणे च श्रूयते। तत्र मैत्रेयीब्राह्मणे तावत् "**न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति..**"[२] इत्यादिना पतिजायादिसंसूचितः जीव एव उपक्रान्तः। तस्य जीवस्य विनाशाशङ्कां निराकर्तुम् श्रुतिरियं प्रवृत्ता- "**अविनाशि वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवति यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्**" इति। अतः तत्र प्रकृत आत्मा परामत्मा भवितुं नार्हति। एवमेव ज्योतिर्ब्राह्मणेऽपि। तत्र जाग्रदाद्यवस्थानां प्रतिपादनावसरे सुषुप्तिम् उपक्रम्य इयं श्रुतिः श्रुता- "**यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्**" इति। अत्र विशेषविज्ञानाभावेऽपि सुषुप्तौ स्वरूपविज्ञानस्य सद्भाव उक्तः। अतः परमात्मा द्रष्टृपदस्य अर्थ इति वक्तुं न शक्यते, तस्य विशेषविज्ञानाभावात्। तस्य सुषुप्तेरप्यभावात् अस्यां श्रुतौ स्परमात्मा नभिधीयते। तस्मात् उभयथाऽपि नित्यदृष्टेः उपपादनासम्भवात् द्रष्टृदृष्ट्योः सम्बन्धः असिद्धः।

[१]बृहदारण्यकोपनिषत् ४-३-२३
[२]तैत्तिरीयोपनिषत् २-१

पुनः नैयायिकः ज्ञानस्य गुणत्वसाधनाय एवम् अनुमानमाह- घटतज्ज्ञानयोः सम्बन्धः गुणनिष्ठः, ज्ञाननिष्ठत्वात् सत्तवत् इति। अत्रापि, सम्बन्धस्य सम्बन्धिमात्राश्रितत्वात् सम्बन्धिनोः घटज्ञानयोः कस्यचित् गुणत्वम् अवश्यं वक्तव्यम्। तत्र घटस्य गुणत्वं तु उभयोरप्यसम्मतमेव। तदा ज्ञानस्य गुणत्वं वक्तव्यम्। ज्ञानस्य गुणत्वानङ्गीकारे तु अहं जानामि इत्यनुभव उपापदयितुम् अशक्यः। आत्मनः ज्ञानरूपगुनवत्त्वादेव अयम् अनुभवः जायते। यदि ज्ञानमेव आत्मनः स्वरूपं स्यात् तरि अनुभवः ज्ञानाश्रयत्वं न विषयीकुर्यात् इति। अत्र सिद्धान्तिना एवं प्रतिप्रयोगः कृतः- रूपतज्ज्ञानयोः सम्बन्धः द्रव्यनिष्ठः ज्ञाननिष्ठत्वात् सत्तावत् इति। रूपतज्ज्ञानयोः सम्बन्धः तदैव द्रव्यनिष्ठो भवति यदि अनयोः मध्ये अन्यतरस्य द्रव्यत्वं स्यात्। तत्र रूपस्य द्रव्यत्वं तु उभयवाद्यसम्मतम्। अतः ज्ञानस्यैव द्रव्यत्वं पर्यवस्यतीति तस्य गुणत्वम् असिद्धम्।जानामि इत्यनुभवस्तु आत्मनः अन्तःकरणवृत्तिरूपज्ञानाश्रयत्वात् सूपपादः। " **सत्यं ज्ञानमनन्तं ब्रह्म**"[1] "**विज्ञानमानन्दं ब्रह्म**" इत्याद्याः श्रुतयश्च आत्मनः ज्ञानरूपत्वम् अवगमयन्ति। न च श्रुतौ ज्ञानशब्दः ज्ञायते अस्मिन् इति व्युत्पत्त्या ज्ञानाधिकरणत्वं वदतीति वाच्यम्। ज्ञानस्य अद्वैतत्वानन्तत्वोक्त्या तस्य आत्मभेदासम्भवात्। तदेवं दृष्टिशब्दितस्य ज्ञानस्य द्रष्टुः आत्मनश्च भेदाभावेन सम्बन्धाभावात् दृष्टिस्वरूप एवात्मा, स एव वेदान्तप्रतिपाद्य इति शम्।

[1] बृहदारण्यकोपनिषत् ३-९-२७

# अद्वैतसिद्धौ मिथ्यात्वस्य मिथ्यात्वविचारः

डा. श्रीकरः जि. एन्.*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– ब्रह्मैव पारमार्थिकं सत् प्रपञ्चस्तु व्यावहारिकः वेदान्तवाक्यजन्यब्रह्मज्ञानबाध्यत्वात् शुक्तिज्ञानबाध्य-प्रातिभासिकरजतमिव मिथ्या इति मन्यन्ते अद्वैतवादिनः वेदान्तिनः । अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् मधुसूदनसरस्वत्याचार्यैः अद्वैतसिद्ध्याख्ये ग्रन्थे प्राचां प्रयोगानुसारेण विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वादिति हेतुत्रयेण प्रपञ्चस्य मिथ्यात्वं साध्यते । सिषाधयिषितं मिथ्यात्वं च पूर्वाचार्याणां मतान्यनुसृत्या पञ्चधा निरूपितम् – सदसत्त्वानधिकरणत्वम्, प्रतिपन्नोपधौ त्रैकालिकनिषेधप्रतियोगित्वम्, ज्ञाननिवर्त्यत्वम्, स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम्, सद्विविक्तत्वं चेति । अस्मिन् लेखे मिथ्यात्वसामान्योपपत्तिमाक्षिप्य सिद्धान्तः प्रपञ्चितः ।*

***कूटशब्दाः*** *– मिथ्यात्वम्, अद्वैतव्याघातः, व्यावहारिकत्वम्, पारमार्थिकत्वम्, प्रातिभासिकत्वम्, समसत्ताकत्वम्, विषमसत्ताकत्वम् ।*

अत्र मिथ्यात्वनिर्वचनम् असहमानः पूर्वपक्षी शङ्कते यथा – ननु उक्तमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वापातः । एकस्मिन् धर्मिणि प्रसक्तयोः विरुद्धधर्मयोः एकमिथ्यात्वे अपरसत्यत्वनियमात् । मिथ्यात्वसत्यत्वे च तद्वदेव प्रपञ्चसत्यत्वापत्तेः, उभयथापि अद्वैतव्याघात इति ।

अत्र निरुक्तं मिथ्यात्वं बाध्यमबाध्यं वा इति विकल्पद्वयम् । प्रथमविकल्पे - एकस्मिन् धर्मिणि आत्मनि प्रसक्तयोः परस्परविरुद्धयोः सत्यत्वमिथ्यात्वयोः मिथ्यात्वस्य मिथ्यात्वे अपरस्य सत्यत्वस्य सत्यत्वदर्शनात्, अत्र जगन्निष्ठमिथ्यात्वस्य बाध्यत्वे 'जगत् सत्यं मिथ्याभूतमिथ्यात्मकत्वात् आत्मवत्' इत्यनुमानेन जगत् सत्यं स्यात् ।

मिथ्यात्वम् अबाध्यमिति द्वितीयविकल्पस्वीकारेऽपि प्रपञ्चसत्यत्वापत्तिः । तद्यथा – पूर्वं दृश्यत्वादिहेतुना जगतः मिथ्यात्वमुक्तम् । किन्तु मिथ्यात्वस्य सत्यपि दृश्यत्वे सत्यत्वेन, दृश्यत्वहेतोः अत्र मिथ्यात्वव्यभिचारित्वात् दृश्यत्वादिहेतोः मिथ्यात्वासाधकत्वेन मिथ्यात्वस्य सत्यत्ववदेव जगतः अपि सत्यत्वं स्यात् ।

एवमेव अद्वैतव्याघात इति विकल्पद्वयसाधरणदोषः । प्रपञ्चमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वानुमानेन अद्वैतव्याघत एवं मिथ्यात्वस्य सत्यत्वे सदन्तरस्वीकारेणापि अद्वैतव्याकोप इत्यर्थः ।

एवञ्च –

**मिथ्यात्वं यदि बाध्यं स्यात् जगत्सत्यत्वमापतेत् ।**[१]
**मिथ्यात्वं यद्यबाध्यं स्यात् सदद्वैतमतक्षतिः ॥** इति पूर्वपक्षसंक्षेपः ।

मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वानुपपत्तेः इति सिद्धान्तः ग्रन्थकारैः प्रस्तुतः । मिथ्यात्वस्य अबाध्यत्वपक्षम् अनभ्युपगममात्रेणैव निरस्य बाध्यत्वपक्षे प्रदर्शितदोषाणां निराकरणं सिद्धान्तिना क्रियते ।

एकस्मिन् धर्मिणि प्रसक्तयोः विरुद्धधर्मयोः एकमिथ्यात्वे अपरसत्यत्वमिति पूर्वोक्तनियमः यत्र मिथ्यात्वावच्छेदकं दृश्यत्वादि उभयवृत्तिः न भवेत् तत्र सम्भवति । एकधर्मिप्रसक्तविरुद्धधर्मद्वयवृत्तिः न भवेदित्यर्थः । यथा

---

***सम्पर्कसूत्रम्** - 9481649088, Email- sribluesky24@gmail.com

[१] अद्वैतसिद्धेः बालबोधिनी-व्याख्या

शुक्तिरूपे धर्मिणि प्रसक्तयोः परस्परविरहरूपयोः रजतत्वरजतत्वात्यन्ताभावयोः धर्मयोः एकस्य धर्मस्य निषेधे अपरधर्मस्य सत्त्वं भवति । रजतत्वस्य निषेधे रजतत्वाभावस्य, रजतत्वाभावस्य निषेधे रजतत्वस्य च सत्त्वं स्यात् । अत्र रजतत्त्वस्य निषेधे निषेध्यतावच्छेदकधर्मः रजतत्वत्वम् । रजतत्वाभावस्य निषेधे निषेध्यतावच्छेदकधर्मः रजतत्त्वाभावत्वम् । तथा च रजतत्वत्वरजतत्वाभावयोः भेदात् निषेध्यतावच्छेदकधर्मभेदेन एकस्मिन् धर्मिणि प्रसक्तयोः परस्परविरहरूपयोः धर्मयोः एकनिषेधे अपरसत्त्वं भवति ।

प्रकृते सत्यत्वमिथ्यात्वयोः दृश्यत्वादिरूप-एकनिषेध्यतावच्छेदकावच्छिन्नत्वेन मिथ्यात्वमिथ्यात्वेऽपि न मिथ्यात्वसत्यत्वम् ।

तुच्छे शशविषाणादौ त्रिकालाबाध्यत्वरूपसत्यत्वस्य सदसदनधिकरणत्वरूपमिथ्यात्वस्य च अभावेन न सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वं न वा परस्परविरहव्यापकत्वम् । किन्तु सत्यत्वमिथ्यात्वयोः गोत्वाश्वत्वयोरिव विरुद्धत्वमात्रं बोध्यम् । तथा च सत्यत्वमिथ्यात्वयोः एकनिषेध्यतावच्छेदकावच्छिन्नत्वसम्भवात् मिथ्यात्वस्य मिथ्यात्वे न तस्य सत्यत्वम् ।

अत्र द्वयोः विरुद्धधर्मयोः परस्परविरहरूपत्वाभावे परस्परविरहव्यापकत्वाभावे च एकनिषेधे अपरस्य सत्त्वं नास्तीत्यत्र दृष्टान्तः यथा - गजादौ धर्मिणि गोत्वाश्वत्वयोः अभावात् न तयोः परस्परविरहरूपत्वं परस्परविरहव्यापकत्वं वा । अत एव गजादौ प्रसक्तयोः तयोः विरुद्धयोः निषेधे निषेध्यतावच्छेदकगजत्वात्यन्ताभावव्याप्यत्वरूपं गोत्वाश्वत्वयोः समानम् । तेन गजे गोत्वनिषेधे न अश्वत्वमायाति न वा अश्वत्वनिषेधे गोत्वम् । तद्वत् प्रकृतेऽपि सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वस्य परस्परविरहव्यापकत्वस्य च अभावात् न एकनिषेधे अपरसत्यत्वम् ।

अत्र यद्यपि सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वं नास्तीति पूर्वम् उपपादितम् । तथापि तुच्छानङ्गीकतृमते सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वमस्ति । अपि च सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वाभावे परस्परविरहव्यापकत्वाभावेऽपि च गोत्वाश्वत्ववत् विरुद्धयोः तयोः न सामानाधिकरण्यमिति कथं सत्यत्वेन प्रतीते प्रपञ्चे सिद्धान्तिभिः मिथ्यात्वम् अनुमेयमिति चेत् उच्यते – गोत्वाश्वत्ववत् सत्यत्वमिथ्यात्वयोः परस्परविरहव्याप्यत्वेऽपि विषमसत्ताकयोः तयोः एकस्मिन् धर्मिणि सत्त्वे विरोधो न भवति । तथा च प्रपञ्चमिथ्यात्वं प्रपञ्चसमसत्ताकत्वेन व्यावहारिकम् । व्यावहारिकमिथ्यात्ववति सत्यत्वं न व्यावहारिकं भवितुमर्हति, तुल्यसत्ताकत्वेन विरोधात् । अतः व्यावहारिकमिथ्यात्ववति प्रपञ्चे मिथ्यात्वविषमसत्तकमेव सत्यत्वमङ्गीकरणीयम् । तच्च पारमार्थिकं प्रातिभासिकं वा इति विकल्पे सति प्रातिभासिकं सत्यत्वं स्यात् । यतः अत्र व्यावहारिकं सत्यत्वं नाम व्यवहारकालाबाध्यत्वम् । एकस्मिन् धर्मिणि प्रसक्तयोः विरुद्धधर्मयोः एकस्य धर्मस्य यत्सत्ताकत्वम् अपरस्य धर्मस्य तद्भिन्नसत्ताकत्वमिति व्याप्तिबलेन प्रपञ्चस्य व्यावहारिकमिथ्यात्वे व्यवहारकालाबाध्यत्वरूपव्यावहारिकसत्यत्वस्य अपहारेण प्रपञ्चस्य व्यवहारकालबाध्यत्वमायातम् । प्रपञ्चे व्यवहारकालबाध्यत्वे स्वीकृते सर्वदा अबाध्यत्वरूपं पारमार्थिकसत्यत्वं न सम्भवति इत्यतः व्यावहारिकसत्यत्वापहारेण पारमार्थिकसत्यत्वस्यापि अपहारात् प्रातिभासिकसत्यत्वम् अवशिष्यते ।

तथा च व्यावहारिकमिथ्यात्ववति शुक्तिरूप्ये प्रातिभासिकसत्यत्ववत्, व्यावहारिकमिथ्यात्ववति प्रपञ्चे प्रातिभासिकसत्यत्वस्य अविरोधेन मिथ्याभूतस्यापि प्रपञ्चस्य प्रातिभासिकसत्यत्वेन प्रतीतिरुपपद्यते । शुक्तिरूप्यादौ व्यावहारिकमिथ्यात्वस्य प्रातिभासिकसत्यत्वस्य च दृष्टत्वात् प्रपञ्चेऽपि व्यावहारिकमिथ्यात्वं प्रातिभासिकं च सत्यत्वं कल्प्यते ।

शुक्तिरजते यथा मिथ्यात्वाज्ञानेन प्रातिभासिकसत्यत्वस्य उत्पत्तिः तथैव प्रपञ्चेऽपि मिथ्यात्वाज्ञानेन प्रातिभासिकसत्यत्वस्य उत्पत्तिः । तथा च मिथ्यात्वप्रमया मिथ्यात्वाज्ञानस्य मिथ्यात्वाज्ञानकार्यस्य च प्रतिभासिक-


ISSN : 2249-538X

सत्यत्वस्य उच्छेदः । प्रपञ्चगतसत्यत्वस्य मिथ्यात्वप्रमाबाध्यत्वेन ब्रह्मप्रमान्यप्रमाबाध्यत्वात् प्रपञ्चसत्यत्वं प्रातिभसिकमेव अङ्गीकरणीयम् । एवं च ब्रह्मप्रमातिरिक्तप्रमाबाध्यत्वेन प्रपञ्चगतसत्यत्वस्य प्रातिभासिकत्वमङ्गीकृत्य अद्वैतक्षतिः यथा न स्यात् तथोक्तम् ।

अत्र पुनः प्रपञ्चगतसत्यत्वस्य व्यावहारिकत्वमभ्युपगम्यापि व्यावहारिकयोः सत्यत्वमिथ्यात्वयोः अविरोधं दर्शयितुं ग्रन्थकारैः 'तार्किकमतसिद्धसंयोगतदभाववत् सत्यत्वमिथ्यात्वयोः समुच्चयाभ्युपगमाच्च ।'[1] इत्युक्तम् । यथा तार्किकाः एकस्मिन् वृक्षे समसत्ताकयोः संयोगतदत्यन्ताभावयोः समुच्चयं स्वीकुर्वन्ति तथा वयमपि समसत्ताकयोः सत्यत्वमिथ्यात्वयोः समुच्चयं स्वीकुर्मः । अत्र प्रपञ्चगतसत्यत्वमिथ्यात्वयोः एकबाधकज्ञानबाध्यत्वेन समसत्ताकत्वम् ।

एकस्य साधकेन अपरस्य बाध्यत्वं विषमसत्ताकत्वे प्रयोजकम् । यथा शुक्तिरूप्यतदभावयोः । यथा शुक्तौ विरुद्धयोः शुक्तिरूप्यतदभावयोर्मध्ये एकस्य शुक्तिरूप्याभावस्य साधकं नेदं रजतमिति ज्ञानम् अपरस्य शुक्तिरूप्यस्य बाधकं भवति । अतः तयोः विषमसत्ताकत्वमेव । शुक्तिरूप्यस्य प्रातिभासिकं सत्त्वं तदभावस्य च व्यावहारिकं सत्त्वमिति । एकस्य साधकेन ज्ञानेन अपरस्य बाध्यत्वे बाध्यतावच्छेदकधर्मस्य उभयवृत्तित्वं न सम्भवति । प्रकृते च प्रपञ्चगतसत्यत्वमिथ्यात्वयोः एकस्य साधकेन अपरस्य बाध्यत्वाभावेन न तयोः विषमसत्ताकत्वम् ।

प्रपञ्चे प्रसक्तयोः सत्यत्वमिथ्यात्वयोः उभयसाधरणदृश्यत्वेनैव निषिध्यमानत्वात् तयोः समसत्ताकत्वमेव । अपि च प्रपञ्चगतमिथ्यात्वबाधकेन ब्रह्मज्ञानेन प्रपञ्चगतसत्यत्वस्यापि बाधनात् तयोः एकबाधकबाध्यत्वम् । ययोः एकबाधकबाध्यत्वं तयोः समानसत्ताकत्वमिति व्याप्तिः । यथा शुक्तिरूप्यबाधकेन शुक्तिसाक्षात्कारेण शुक्तिभेदस्यापि बाध्यत्वात् शुक्तिरूप्यशुक्तिभेदयोः समानसत्ताकत्वमेव । अत्र द्वयोः प्रतिभासिकत्वेन समानसत्ताकत्वम् । इदमत्र अवधेयं यत् सत्यत्वमिथ्यात्वयोः परस्परविरहरूपत्वं नास्तीत्यभ्युपेत्य प्रपञ्चगतसत्यत्वमिथ्यात्वयोः एकबाधकबाध्यत्वमुक्तम् ।

एवं च प्रपञ्चतन्मिथ्यात्वयोः समानसत्ताकत्वात् प्रपञ्चगतमिथ्यात्वबाधकेन ब्रह्मज्ञानेन प्रपञ्चगतसत्यत्वमिथ्यात्वाभ्यां सह प्रपञ्चस्यापि बाधात् न अद्वैतहानिप्रसङ्गः । प्रपञ्चसमानसत्ताकस्य मिथ्यात्वस्य व्यावहारिकत्वेन प्रपञ्चस्यापि व्यावहारिकत्वात् प्रपञ्चसत्यत्वस्य पारमार्थिकत्वं न सम्भवतीति भावः ।

एतेन मिथ्यात्वं यदि बाध्यं स्यात् जगत्सत्यत्वमापतेत् । मिथ्यात्वं यद्यबाध्यं स्यात् सदद्वैतमतक्षतिः ॥ इति पूर्वपक्षिभिः यदुक्तं तदपि निरस्तम् । प्रपञ्चसमानसत्ताकमिथ्यात्वस्य प्रपञ्चस्य च एकब्रह्मज्ञानबाध्यत्वेन द्वयोः अपि मिथ्यात्वात् इति शम् ।

## परामृष्टाः ग्रन्थाः

१. अद्वैतसिद्धिः, बालबोधिन्याख्यया व्याख्ययोद्भासिता, तारा पब्लिकेशन्स्, वाराणसी

[1] अद्वैतसिद्धिः, प्रथमपरिच्छेदः, मिथ्यात्वसामान्योपपत्तिः

# श्रुतिघटकसप्तम्यर्थविचारपुरस्सरम् अनुकृत्यधिकरणनिरूपणम्

डा. विश्वनाथ हेगडे*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– अस्मिन् शोधलेखे श्रीमच्छारीरकमीमांसायाः प्रथमाध्यायस्य तृतीयपादस्थे अनुकृत्यधिकरणे[१] कठ-मुण्डक योः[२] पठ्यमानस्य[३] "न तत्र सूर्यो भाति न चन्द्रतारकम्..." इति मन्त्रस्य तात्पर्यनिर्णयः क्रियते। विशेषतः अस्य मन्त्रस्य प्रथमे पादे प्रयुक्तस्य **'तत्र'** इति त्रल्-प्रत्ययान्तसर्वनामपदस्य **'सतिसप्तमी'** आश्रयणीया उत **'विषयसप्तमी'** इति शाङ्करभाष्य-भामती[४]-रत्नप्रभा[५]-न्यायरक्षामण्यादिव्याख्यानानामालोके[६] पूर्वपक्षसिद्धान्तयोः परिशीलनं विधीयते। पूर्वपक्षी 'तत्र' इति पदे सतिसप्तमीमाश्रित्य ('तस्मिन् भासमाने सति सूर्यादयो न भान्ति'), णिजर्थाध्याहारदोषपरिहारेण, तेजोऽभिभावकत्वलिङ्गबलाच्च कञ्चन महत्तरं भौतिकं तेजोधातुमेव विषयवाक्यप्रतिपाद्यतया व्यवस्थापयति। सिद्धान्ते तु सतिसप्तमीस्वीकारे मानान्तरविरोधः, प्रकरणबाधः, सर्वशब्दसङ्कोचश्चेत्यादिदोषाः प्रदर्श्यन्ते। विषयसप्तम्याश्रयणे तु सामर्थ्यादेव प्रकाशनव्यापारनिषेधस्य सिद्धेः ब्रह्मणः अचाक्षुषत्वेऽपि न कोऽपि दोष इति समर्थ्यते।*

*अन्ते च, 'अनुभाति' इत्यस्य पश्चाद्भामित्वरूपं लौकिकानुकरणमपहाय 'तदायत्तसत्तास्फूर्तिकत्वरूपः' अर्थः, 'भासा' इत्यत्र तृतीयायाः करणत्वं निरस्य हेत्वर्थकत्वं च संस्थाप्यते। एवं 'तत्र' इति पदस्य सतिसप्तमी-विषयसप्तमीविचारमुखेन भौतिकतेजसो बाधं विधाय, सकलप्रपञ्चाधिष्ठानभूतस्य, निरतिशयचैतन्यरूपस्य, स्वप्रकाशस्य परब्रह्मण एव सर्वभासकत्वं मन्त्रस्य परमं तात्पर्यमिति अत्र निरूप्यते।*

***कूटशब्दाः*** *– 'तत्र'-पदम्, सतिसप्तमी, विषयसप्तमी, अनुकृत्यधिकरणम्, शाङ्करभाष्यम्, स्वप्रकाशं ब्रह्म, तेजोऽभिभावकत्वम्, अनुभाति।*

## शोधलेखः

श्रीमच्छारीरकमीमांसाशास्त्रस्य प्रथमाध्यायस्य तृतीयपादः ज्ञेयब्रह्मविषयकाणाम् अस्पष्टब्रह्मलिङ्गानां श्रुतिवाक्यानां ब्रह्मणि समन्वयाय प्रवृत्तः। अस्मिन् पादे **'अनुकृत्यधिकरणम्'** (१.३.२२–२३) षष्ठमधिकरणम्। अधिकरणेऽस्मिन् **अनुकृतेस्तस्य च** (1.3.22), **अपि च स्मर्यते** (1.3.23) इति सूत्रद्वयं वर्तते।

---

***सम्पर्कसूत्रम्** - 9481075146 , Email- vishwanathhegde@sanskrit.ac.in

[१]ब्रह्मसूत्रम् — बादरायणः, १.३.२२–२३ ; ब्रह्मसूत्रशाङ्करभाष्यम् — शङ्करभगवत्पादः, सम्पा. वासुदेव लक्ष्मण शास्त्री पणशीकर, निर्णयसागर प्रेस, मुम्बई, १९३४, पृ. २१२–२१६।

[२]मुण्डकोपनिषत् — शौनकादिपरम्परा, २.२.१० ; दशोपनिषदः शाङ्करभाष्योपेताः — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४, पृ. १५८।

[३]कठोपनिषत् — यम-नचिकेतस्संवादपरम्परा, ५.१५ ; दशोपनिषदः शाङ्करभाष्योपेताः — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४, पृ. ९६।

[४]भामती — वाचस्पतिमिश्रः, ब्रह्मसूत्रशाङ्करभाष्योपस्कृता, सम्पा. अनन्तकृष्ण शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८२, पृ. २८६–२९०।

[५]रत्नप्रभा — गोविन्दानन्दः, ब्रह्मसूत्रशाङ्करभाष्यव्याख्या, सम्पा. जियालाल काम्बोज, चौखम्बा विद्याभवन, वाराणसी, १९९८, पृ. २५२–२५६।

[६]न्यायरक्षामणिः — अप्पयदीक्षितः, सम्पा. सुब्रह्मण्य शास्त्री, श्रीमद्बालमुकुन्द मुद्रणालयः, श्रीरङ्गम्, १९०६, पृ. २३४–२३७।

**विषयवाक्यम् -**

अस्याधिकरणस्य विषयवाक्यं तावत् मुण्डकोपनिषदि (२.२.१०), कठोपनिषदि (५.१५) च श्रूयमाणं

**"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।**

**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥"** इति वाक्यम् ।

**संशयः**

*'न तत्र सूर्यो भाति'* इत्यत्र **'तत्र'** इति तच्छब्दप्रकृतिकः त्रल्प्रत्ययः सतिसप्तमी-विषयसप्तमीद्वयसाधारणः । तस्मात् *'यं भान्तं सर्वमनुभाति यस्य भासा सर्वमिदं विभाति'* तत् किं सूर्यादिसजातीयं भौतिकं तेजः, उत परमात्मा इति संशयः । अस्मिन्मन्त्रे प्रयुक्तस्य **"अनुभाति"** इति पदस्य, शतृप्रत्ययान्तस्य **"भान्तम्"** इति शब्दस्य च विषये पूर्वपक्षसिद्धान्तयोः विप्रतिपत्तिः प्रवर्तते । किमत्र **"तमेव भान्तमनुभाति सर्वम्"** इति वाक्येन कश्चित् उत्कृष्टः अचेतनः भौतिकः तेजोधातुः परिगृह्यते अथवा निरतिशयचैतन्यरूपं स्वप्रकाशं परं ब्रह्मेति संशये सति तन्निराकरणाय इदमधिकरणं प्रवर्तते ।

**पूर्वपक्षः**

तत्र भौतिकः तेजोधातुरिति पूर्वपक्षः । तेजोऽभिभावकत्वलिङ्गमाश्रित्य अयं पक्षः प्रवर्तते । लोके हि बलीयसा सौरेण तेजसा चन्द्रनक्षत्रप्रभृतीनि तेजांसि तिरस्क्रियमाणानि दृश्यन्ते । प्रकृष्टतेजसा मन्दप्रकाशाः अभिभूताः भवन्ति । तथा च यत्तेजसोऽभिभावकं तत्तेज इति व्याप्तिः । तद्वदेव सूर्यादीनामपि तदपेक्षया उत्कृष्टे तेजसि सति सूर्यादयोऽपि निष्प्रभा इव भान्तीति अनुमातुं शक्यते । तादृशं च तेजः अवश्यमेव सर्वातिशायि किञ्चित् महत्तरं भौतिकं तेज एव भवितुमर्हति । न तु नीरूपस्य तेजोभिन्नस्य ब्रह्मणः तादृशं तेजोऽभिभावकत्वं घटते ।

अपि च अस्मिन् मन्त्रे **"तत्र"** इति सर्वनामपदे अष्टाध्यायीसूत्रानुसारं[1] सतिसप्तमी एव अङ्गीकर्तुं युक्ता, न तु विषयसप्तमी । यदि हि ब्रह्मणि विषयसप्तमी आश्रीयते, तर्हि 'न तत्र सूर्यो भाति' इत्यत्र "सूर्यः ब्रह्म(विषये) न भासयति" इति अर्थवर्णनाय णिच्-प्रत्ययार्थस्य प्रकाशनव्यापारस्य अध्याहारः कर्तव्यः स्यात् । शास्त्रे च अप्रमाणिकः अध्याहारः दोषत्वेन परिगण्यते । अतः सतिसप्तमीमाश्रित्य "तस्मिन् महति तेजसि भासमाने सति सूर्यादयः न भान्ति" इत्येव युक्ततरं भवति ।

यदि कश्चिदाशङ्केत यत् कुड्यादिरपि अतेजोरूपः सन् तेजसः प्रकाशम् अभिभावयतीति, तन्न । यतो हि घनकुड्यादयः चक्षुषः विषयसन्निकर्षं निरुध्य आवरणं कुर्वन्ति, न तु तेजसः अभिभावकाः भवन्ति । अतः प्रकाशकस्य सतः तेजोभिभावकत्वं सम्भवति न तु अतेजोरूपस्य कस्यचन अन्यस्य । किञ्च श्रुतौ **"तमेव भान्तमनुभाति"** इति यत् अनुकरणमुच्यते, तत् समानजातीययोरेव वस्तुनोः लोके प्रसिद्धम्, यथा गच्छन्तम् अनुगच्छतीति । सूर्यादिषु श्रूयमाणम् अनुकरणं तेजोऽन्तरे स्वीकृते सत्येव सम्भवति न तु तेजोविहीने चेतने ब्रह्मणि स्वीकृते सति ।

ननु मानान्तरविरोधात् अभिभवलिङ्गमसिद्धम् । इदानीं भात्येव सूर्यादौ न भातीति निषेधः प्रत्यक्षविरुद्धः । सतिसप्तमीरक्षणाय भविष्यदर्थम् अध्याहृत्य तस्मिन् तेजसि सति कालान्तरे सूर्यः न भास्यतीति यदि व्याख्यायते

[1] अष्टाध्यायी — पाणिनिः, 'यस्य च भावेन भावलक्षणम्' (२.३.३७), सम्पा. श्रीशचन्द्र वसु, मोतीलाल बनारसीदास, दिल्ली, १९६२, पृ. २८४ ।

तर्हि विषयसप्तमीस्वीकारेऽपि न कोऽपि दोषः। सतिसप्तम्यां स्वीक्रियमाणायां भविष्यदर्थस्य, विषयसप्तम्यां तु णिजर्थस्य अध्याहार इति उभयोः पक्षयोः अध्याहारः अवर्जनीयः। यदि व्यत्ययानुशासनात् लटैव भविष्यदर्थलाभ इत्यतः अध्याहारः नापेक्ष्यते इत्युच्येत तर्हि विषयसप्तमीबलाद् विषयित्वेन न भातीति सामर्थ्येन णिजर्थो लभ्यते इत्यतः अस्मिन्पक्षेऽपि अध्याहारः नापेक्ष्यते। किञ्च यस्मिन्सति यन्न भाति तत्तदनुभातीति विरुद्धम्। अतः अनुकारलिङ्गमप्यसिद्धम् इति चेत् उच्यते— न भातीत्यस्य न सर्वात्मना भाननिषेधो विवक्षितः किन्तु तेजोऽन्तराभिभूतत्वमेव। अत एव अनुभातीत्यस्य मन्दभानत्वमिति पर्यवस्यति। इत्थं न पूर्वापरविरोधः न वा व्यत्ययानुशासननैर्भर्यम्।

ननु *'तस्य भासा सर्वमिदं विभाति'* इत्युक्तं सर्वप्रकाशकत्वं जडतेजसि न घटते, तेजसो रूपविशिष्टद्रव्यावभासकत्वनियमेन सर्वावभासकत्वायोगात्। किञ्च, सूर्यादीनां चक्षुर्व्यतिरिक्ततेजोऽन्तरानपेक्षणात् तेषां तेजोऽन्तरेण भास्यत्वमप्यसङ्गतम्। यदि च सूर्यादिप्रकाशकत्वस्य सिद्धये कल्पनागौरवमादृत्य अपूर्वं तेजस्तत्त्वं कल्प्येत, तर्हि ततोऽपि ब्रह्मण एव सर्वावभासकत्वं सूर्यादीनां तदनुकारकत्वं च स्वीक्रियताम् इति चेन्न। तेजसः तेजोऽन्तरप्रकाशकत्वे लोकानुभवस्यैव प्रमाणत्वात्। तथा हि— दीपप्रभासंयुक्ते आलोकमण्डले परस्पराविष्टानां तेजःकिरणानां सान्निध्येनैव प्रकाशातिशयोपलब्धेः, वातविक्षेपाभावे सत्यपि जालान्तरप्रविष्टतेजसा त्रसरेण्वादीनां प्रत्यक्षीकरणाच्च तेजसश्चाक्षुषविषयप्रकाशकत्वे बाधकाभावात्।

किञ्च, मन्त्रेऽस्मिन् 'अनुकार'लक्षणस्य लिङ्गस्य प्रबलत्वात्, तेजसः तेजोऽन्तरावभासकत्वोपपत्तेश्च तेजोविशेष एवात्र प्रतिपाद्यतया ग्राह्यः। अतो लिङ्गबलीयस्त्वात् प्रकरणान्तरविषयिणी ब्रह्मप्रतीतिर्बाध्यते। न च **'तस्य'** इति सर्वनाम ब्रह्मण एव परामर्शकमिति निर्बन्धः; *'तेन रक्तं रागात्'*[१] इत्यादिषु व्याकरणसूत्रेषु सर्वनाम्नामप्रकृतपरामर्शकत्वस्यापि दर्शनात्। किञ्च ब्रह्मपक्षे ब्रह्मणः अचाक्षुषत्वात् तस्मिन् सूर्यादिप्रकाश्यत्वनिषेधस्य अप्रसक्तनिषेधता, सिद्धान्ते भारूपत्वात् **'तस्य भासा'** इति षष्ठ्याः निर्विषयता, प्रपञ्चब्रह्मभानान्यभानाभावेन भेदप्रयुक्तस्य **'अनुभाति'** इत्यस्य निर्विषयत्वं च आपद्येत। तस्मात् तेज एव किञ्चिदुपासनीयं न तु ज्ञेयं ब्रह्मेति पूर्वपक्षः।

## सिद्धान्तः

अत्र **'तमेव भान्तमनुभाति सर्वम्'** इति मन्त्रप्रतिपाद्यं तत्त्वं[२] न भौतिकं किञ्चित् तेजो भवितुमर्हति, किन्तु ब्रह्मैवेति सिद्धान्तः। यदि हि सूर्याद्यभिभावकं सर्वव्यापि किञ्चित् तेजः मन्त्रप्रतिपाद्यतयाऽभ्युपगम्येत, तर्हि तदर्थम् अदृष्टोपासनाविधिकल्पना, तत्फलकल्पनं, प्रस्तुतस्य ब्रह्मप्रकरणस्य बाधश्चेति महद्गौरवं प्रसज्येत। किञ्च, **'तत्र'**, **'तस्य'**, **'तम्'** इत्यादयः सर्वनामशब्दाः पूर्वप्रकृतं, प्रकरिष्यमाणं, लोके प्रसिद्धमर्थमेव वा परामृशन्ति; प्रकृते च तादृशस्य भौतिकतेजसः प्रागुपन्यासाभावात्, लोके तादृशस्य चाप्रसिद्धत्वात्, सर्वनामश्रुतेर्बाधपरिहाराय प्रकृतब्रह्मपरत्वमेव स्वीकर्तुं न्याय्यम्। भौतिकतेजोऽङ्गीकारे मानान्तरविरोधोऽपि दुर्वारो भवति; यतो हि यदि सूर्यादधिकप्रकाशकं नित्यं सर्वव्यापि तेजः जगति स्यात्, तर्हि तस्य सर्वदा विद्यमानत्वात् सूर्यादीनामभावेऽपि घटादीनां स्वतः प्रकाशः स्यात्, रात्रावपि तमसोऽनुपपत्तिः प्रसज्येत।

---

[१]अष्टाध्यायी — पाणिनिः, 'तेन रक्तं रागात्' (४.२.१); काशिकावृत्तिः — वामन-जयादित्यौ, चौखम्बा संस्कृत सीरीज, वाराणसी, १९८३, पृ. ३०५।

[२]ब्रह्मसूत्रशाङ्करभाष्यम् — शङ्करभगवत्पादः, १.३.२२–२३, सम्पा. एस. सुब्रह्मण्य शास्त्री, कामकोटि कोषस्थानम्, मद्रास, १९५४, पृ. १८७–१९१।


ISSN : 2249-538X

न च मणिप्रभान्यायेन दीपादिसन्निधानेनैव तदभिव्यक्तिरिति वाच्यम्, तथा सति दीपनिर्वापणे तदुपाधिकतेजसोऽपि नाशप्रसङ्गात्, प्रतिदीपाद्युपाधिभेदेन तस्य नानात्वे मन्त्रगतानामेकवचननिर्देशानां च व्याकोपापत्तेः। अपि च **'अनुभाति'** इत्यनुकृतिरपि ब्रह्मैकनिष्ठतयैव सङ्गच्छते न तु तेजःपक्षे। समानजातीयानां तेजोधातूनां परस्परम् अनुभानानङ्गीकारात्, न हि प्रदीपः प्रदीपान्तरस्य भानेन भानवानुपलभ्यते। अपि तु यथा वह्निमनु दहन् अयःपिण्डो वह्नेरेव दाहकत्वमनुकरोति, तथैव सत्ता-स्फूर्ति-प्रियत्वरूपेण स्वाधिष्ठानब्रह्मस्वरूपमनुकुर्वतामेव सूर्यादीनां भानमुपपद्यते। *'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्'*[१]इत्युक्तदिशा ब्रह्मण एव सर्वत्रानुगमात्। भौतिकं तेजस्तु केवलं चक्षुर्ग्राह्यमेव रूपिद्रव्यं प्रकाशयितुं प्रभवति न तु सकलं प्रपञ्चम्; **'तस्य भासा सर्वमिदं विभाति'** इति तु सर्वशब्दः सङ्कोचकाभावात् सर्वप्रपञ्चपरः। तेजोद्रव्यपक्षे सर्वशब्दस्य सङ्कोचः करणीयः स्यात्। ब्रह्मैव तु स्वयम्प्रकाशचिद्रूपतया स्वसत्तास्फुरणाभ्यां सर्वाधिष्ठानभूतं सत् सर्वं प्रपञ्चं भासयितुं क्षमम्। तस्मात् *'न चक्षुषा पश्यति कश्चनैनम्'* इति चक्षुर्विषयत्वं प्रतिषिध्य, **'तमेव भान्तम्' 'तस्य भासा'** इत्यादिव्यपदेशैः स्वयम्प्रकाशरूपं ब्रह्मैव सर्वभासकत्वेन प्रतिपाद्यते।

अस्मिन् अधिकरणे (१.३.२२–२४) प्रथमसूत्रम् **'अनुभानात्'** इति विशेषवाचकपदं विहाय **'अनुकृतेस्तस्य च'** (१.३.२२) इति सामान्यशब्दघटिततया प्रणीतं वर्तते। अत्र **'अनुकृतेः'**[२] इति सामान्यनिर्देशस्य प्रयोजनमिदमेव यत् यथा शुक्तिकायामध्यस्तं रजतमध्यासाधिष्ठानभूतशुक्तिभास्वररूपेणैव भास्वरं सत् स्फुरति, तथा परब्रह्मणि अध्यस्तं सूर्यादिकं सर्वमपि तेजोमण्डलं स्वाधिष्ठानस्य ब्रह्मणः सत्तास्फुरणानुरोधेनैव स्फुरति, न तु स्वातन्त्र्येणेति प्रतिपादनम्। अपि च सूत्रे **'तस्य च'**[३] इति यश्चकारः प्रयुक्तः, सः मन्त्रस्य चतुर्थपादे पठितस्य *'तस्य भासा सर्वमिदं विभाति'* इति वाक्यस्य तदर्थभूतस्य सकलप्रपञ्चभासकत्वस्य च द्वितीयहेतुतया समुच्चयार्थं निवेशितः। विषयवाक्ये च प्राणाकाशादिशब्दवत् ब्रह्मणः साक्षाद्वाचकस्य पदस्याभावेऽपि *'अत एव प्राणः'* (१.१.२३) इत्यादिवत् हेतुसामर्थ्यादेव साध्यभूतं ब्रह्म उन्नेयमिति प्रथमसूत्रस्य अभिप्रायः।

एवं स्थिते पूर्ववादी पुनः प्रत्यवतिष्ठते यत् *'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः'* इति मन्त्रभागे सूर्यादीनां यदभिभवनमुच्यते, तत् कैमुतिकन्यायेनैव सङ्गतं भवति; यतो हि येन महता तेजसा साक्षात् सूर्योऽप्यभिभूयते, तेन लौकिकस्याग्नेरभिभवे किमु वक्तव्यमिति कैमुतिकन्यायोपपत्तिः तेजःपक्षे एव शोभते, न तु रूपरहिते ब्रह्मणि; न हि यत्र पटे जननीये मृत्पिण्डो न कारणं, तत्र मृत्कणो न कारणमिति कैमुतिकन्यायः प्रवर्त्यते। अपि च यथा ज्योतिषशास्त्रप्रसिद्ध्या चन्द्रमण्डलस्य तेजस्वित्वं सौरतेजोऽनुप्रवेशाधीनम्, तथैव सूर्यादीनामपि तेजस्वित्वं कस्यचिन्महतोऽलौकिकतेजसोऽनुप्रवेशाधीनमिति *'तमेव भान्तम्' 'तस्य भासा सर्वमिदं विभाति'* इत्येतत् सर्वमपि सूर्यादिप्रकाशकसर्वव्यापितैजसपरमेव युक्तमिति।

एतादृशाशङ्कानिवारणाय द्वितीयं सूत्रं प्रवृत्तम् **'अपि च स्मर्यते'** (१.३.२३) इति। अत्र भगवद्गीतास्मृतिः प्रमाणतयोपन्यस्ता[४]—

*'न तद्भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥'* इति।

---

[१]पञ्चदशी — विद्यारण्यमुनिः, 'चित्रदीपप्रकरणम्' (६.२२), सम्पा. कृष्णगोपाल भट, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००२, पृ. १६८।

[२]न्यायरक्षामणिः — अप्पयदीक्षितः, सम्पा. सुब्रह्मण्य शास्त्री, श्रीमद्वालमुकुन्द मुद्रणालयः, श्रीरङ्गम्, १९०६, पृ. २३५।

[३]न्यायरक्षामणिः — अप्पयदीक्षितः, सम्पा. सुब्रह्मण्य शास्त्री, श्रीमद्वालमुकुन्द मुद्रणालयः, श्रीरङ्गम्, १९०६, पृ. २३५।

[४]श्रीमद्भगवद्गीता — कृष्णद्वैपायनव्यासः, १५.६; श्रीमद्भगवद्गीता शाङ्करभाष्योपेता — शङ्करभगवत्पादः, सम्पा. वासुदेव लक्ष्मण शास्त्री पणशीकर, निर्णयसागर प्रेस, मुम्बई, १९३६, पृ. ३४२।

तथा *'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥'* इति च ।[१]

एताभ्यां स्मृतिभ्यां सूर्यादीनामभिभावकत्वं न कस्यचिद् भौतिकतेजसोऽधीनम्, अपि तु परमात्मस्वरूपस्यैवेति स्पष्टं भवति । सूर्यादिगतं च भासकत्वं भगवच्छक्तेरनुप्रवेशाधीनं तदधिष्ठानसत्तायत्तं चैवेति सिद्धम् । 'अपि'-शब्देन च कठवल्लीषु ब्रह्मप्रकरणे *'तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् । कथं नु तद्विजानीयां किमु भाति विभाति वा'* इति ब्रह्मणो दुर्दर्शत्वमुपक्रम्य *'न तत्र सूर्यो भाति'* इति मन्त्रस्य पाठात्, मुण्डकोपनिषदि च *'तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः'* इति परब्रह्मण एव ज्योतिषां ज्योतिष्ट्वेन प्रतिपादनात् प्रकृतमन्त्रस्य ब्रह्मपरत्वमेव निर्विवादम् । कस्यचिदप्रसिद्धस्य भौतिकतेजसस्तदुपासनादेश्चादृष्टकल्पना श्रुतिप्रकरणविरुद्धैव ।

## उपसंहारः

यदि च पूर्वपक्ष्यभिमतेन कस्यचित् तेजसोऽनुप्रवेशेन सूर्यादीनां तेजस्वित्वं व्याख्यायेत, तदापि 'यदादित्यगतं तेजो' इति स्मृत्यनुसारेण ब्रह्मण एव तादृशशक्तिमत्त्वं सिद्ध्यति न तु लौकिकतेजसः । किञ्च 'सर्वमिदं विभाति' इत्यत्र सर्वशब्दस्य सङ्कोचे प्रमाणाभावात् भौतिकं तेजस्तु केवलं चक्षुर्ग्राह्यमेव रूपिद्रव्यं भासयति, न तु सर्वं प्रपञ्चम् । परब्रह्मैव तु स्वयम्प्रकाशचिद्रूपतया स्वचैतन्यप्रभया समस्तस्याप्यविद्याप्रपञ्चस्य भासकमधिष्ठानं भवति । महाभारतवचनानुसारेणापि[२] -

*'तापनी पावनी चैव शोषणी च प्रकाशिनी ।*
*नैव राजन्रवेः शक्तिः शक्तिर्नारायणस्य सा'*

इति सूर्यादितेजःसु परमेश्वरशक्तेरेवानुप्रवेश उक्तः । तस्मात् *'परञ्ज्योतिरुपसम्पद्य'*[३] इत्यादिश्रुतिप्रसिद्धं स्वयम्प्रकाशं सर्वाधिष्ठानभूतं परब्रह्मैव अत्र मन्त्रे प्रतिपाद्यमिति सिद्धान्तः ।

**सङ्गतिः** - पूर्वस्मिन् अधिकरणे आकाशशब्दादीनां रूढिं परित्यज्य आत्मश्रुत्यादिबलेन ब्रह्मण्येव मुख्यत्वं यथा साधितम्, तथा प्रकृतेऽपि **'तत्र'** इति सतिसप्तम्या सूर्याद्यभिभावकतेजोविशेषस्य रूढ्या प्राप्तौ तद्बाधेन प्रत्युदाहरणसङ्गत्या (दृष्टान्तसङ्गत्या वा) विचारः प्रवृत्तः । यद्वा, पूर्वत्र *'परं ज्योतिरूपसम्पद्य'* इति ज्योतिःशब्देन ब्रह्मप्रतिपादनात् अत्रापि *'न तत्र सूर्यो भाति'* इति मन्त्रेण तदेव परञ्ज्योतिःस्वरूपं ब्रह्म समर्थ्यत इति प्रसङ्गसङ्गतिर्बोध्या[४] ।

## फलम्

पूर्वपक्षे सूर्याद्यभिभावकस्य उत्कृष्टस्य तेजोविशेषस्य उपासनम् । सिद्धान्ते सर्वप्रपञ्चाधिष्ठानभूतस्य स्वयम्प्रकाशस्य परब्रह्मणः साक्षात्कारः ।

[१]कठोपनिषत् — यम-नचिकेतस्संवादपरम्परा, ५.१४ ; दशोपनिषदः शाङ्करभाष्योपेताः — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४, पृ. ९५ ।

[२]महाभारतम् — कृष्णद्वैपायनव्यासः, शान्तिपर्व—मोक्षधर्मपर्व, ३४१.४१ ; सम्पा. वी. एस. सुखथङ्कर आदयः, भण्डारकर प्राच्यविद्या संशोधन मन्दिरम् (BORI), पुणे, १९६१, पृ. १८९० ।

[३]छान्दोग्योपनिषत् — शङ्करभगवत्पादः, ८.३.४; दशोपनिषदः शाङ्करभाष्योपेताः — सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४, पृ. ४२४ ।

[४]न्यायनिर्णयः — आनन्दगिरिः, ब्रह्मसूत्रशाङ्करभाष्यटीका, सम्पा. पट्टाभिराम शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८४, पृ. २२५–२२९ ।


ISSN : 2249-538X

**परामृष्टाः ग्रन्थाः**


१. छान्दोग्योपनिषत् (शाङ्करभाष्योपेता) — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४ ।

२. दशोपनिषदः (ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषद्भाष्यम्) — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४ ।

३. न्यायनिर्णयः (ब्रह्मसूत्रशाङ्करभाष्यटीका) — आनन्दगिरिः, सम्पा. पट्टाभिराम शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८४ ।

४. न्यायरक्षामणिः — अप्पयदीक्षितः, सम्पा. ए. सुब्रह्मण्य शास्त्री, श्रीमद्बालमुकुन्द मुद्रणालयः, श्रीरङ्गम्, १९०६ ।

५. पञ्चदशी (रामकृष्णाख्यव्याख्योपेता) — विद्यारण्यमुनिः, सम्पा. कृष्णगोपाल भट, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००२ ।

६. ब्रह्मसूत्राणि (श्रीमच्छङ्करभगवत्पादभाष्य-भामती-वेदान्तकल्पतरु-परिमलोपबृंहितानि) — बादरायणः, सम्पा. वासुदेव लक्ष्मण शास्त्री पणशीकर, निर्णयसागर प्रेस, मुम्बई, १९३४ ।

७. ब्रह्मसूत्रशाङ्करभाष्यम् — शङ्करभगवत्पादः, सम्पा. एस. सुब्रह्मण्य शास्त्री, कामकोटि कोषस्थानम्, मद्रास, १९५४ ।

८. भामती (ब्रह्मसूत्रशाङ्करभाष्योपस्कृता) — वाचस्पतिमिश्रः, सम्पा. अनन्तकृष्ण शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८२ ।

९. महाभारतम् (शान्तिपर्व—क्रिटिकल संस्करणम्) — कृष्णद्वैपायनव्यासः, सम्पा. विष्णु एस. सुखथङ्कर एवं एस. के. बेलवलकर, भण्डारकर प्राच्यविद्या संशोधन मन्दिरम्, पुणे, १९६१ ।

१०. मुण्डकोपनिषत् — शौनकादिपरम्परा; दशोपनिषदः शाङ्करभाष्योपेताः — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४ ।

११. रत्नप्रभा (ब्रह्मसूत्रशाङ्करभाष्यव्याख्या) — गोविन्दानन्दः, सम्पा. जियालाल काम्बोज, चौखम्बा विद्याभवन, वाराणसी, १९९८ ।

१२. श्रीमद्भगवद्गीता (शाङ्करभाष्य-आनन्दगिरिटीकायुता) — कृष्णद्वैपायनव्यासः, सम्पा. वासुदेव लक्ष्मण शास्त्री पणशीकर, निर्णयसागर प्रेस, मुम्बई, १९३६ ।

१३. कठोपनिषत् — यम-नचिकेतस्संवादपरम्परा; दशोपनिषदः शाङ्करभाष्योपेताः — शङ्करभगवत्पादः, सम्पा. सुब्रह्मण्य शास्त्री, मोतीलाल बनारसीदास, दिल्ली, १९६४ ।

१४. अष्टाध्यायी (काण्डत्रयोपेता) — पाणिनिः, सम्पा. एवं अनु. श्रीशचन्द्र वसु, मोतीलाल बनारसीदास, दिल्ली, १९६२ ।

१५. काशिकावृत्तिः — वामन-जयादित्यौ, चौखम्बा संस्कृत सीरीज, वाराणसी, १९८३ ।

# मिथ्यात्वे अर्थापत्तिप्रमाणोपन्यासः

श्री ब्रह्मभट्ट नचिकेता सञ्जयकुमार्*
सहायकप्राध्यापकः (अ), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– अद्वैतवेदान्तः नाम उपनिषदः एव , ताः च उपनिषदः तात्पर्येण आत्मप्रतिपादनं कुर्वन्ति। स च आत्मा "एकमेवाद्वितीयम्"[१] इत्यादिश्रुत्या उच्यमानः। तत्र च इयं शङ्का भवितुमर्हति यत् प्रपञ्चस्य द्वितीयस्य विद्यमानत्वात् कथम् आत्मनः एकत्वम् अद्वितीयत्वं वा श्रुत्या प्रतिपादयितुं शक्यते इति। यथा प्रत्यक्षप्रमाणबाधे सति प्रबलायाः अपि श्रुतेः अन्यथानयनं दृश्यते- "यजमानः प्रस्तरः"[२] इत्यादिषु तथा प्रकृते अपि अद्वितीयत्वप्रतिपादकश्रुत्याः अपि अन्यथानयनं स्यात्। तत्र इदं समाधानम् - यत्र श्रुतेः अनन्यशेषत्वं भवति तत्र श्रुतिः प्रबला तथा च एकमेवाद्वितीयमिति श्रुतेः यजमानः प्रस्तरः इतिवत् विधिशेषत्वं न बोधयति। एवं च अद्वैतानाम् अद्वितीयब्रह्मणि तात्पर्यम् अक्षतमेव। नन्वेवमपि प्रत्यक्षप्रमाणस्य निरवकाशत्वात् प्राबल्यमेव स्यात् इति चेत् अत्र उच्यते - प्रत्यक्षप्रमाणेन गृह्यमाणस्य प्रपञ्चस्य तात्त्विकत्वे एव प्रत्यक्षस्य सावकाशत्वम् इति न नियमः प्रपञ्चस्य मिथ्यात्वे अपि प्रत्यक्षप्रमाणस्य विषयलाभस्तु अस्त्येव इति भावः। न च प्रपञ्चस्य मिथ्यात्वे प्रमाणाभावः इति वाच्यम्। श्रुतेः एव तत्र प्रमाणत्वात्। तथा च नेह नानास्ति किञ्चन इत्यादिश्रुतिभिः प्रपञ्चमिथ्यात्वं बोध्यते। तथा विमतं मिथ्या दृश्यत्वात् इति अनुमानप्रयोगेण अपि प्रपञ्चमिथ्यात्वसिद्धिः इति। प्रपञ्चमिथ्यात्वे अर्थापत्तिः अपि प्रमाणं भवति इति अयं विचारः अस्मिन् शोधपत्रे विचार्यते।*

***कूटशब्दाः*** *– ब्रह्म , मिथ्यात्वम् , निवर्तकता , अर्थापत्तिः।*

**शोधपत्रम्**

अर्थापत्तिशब्दः व्युत्पत्तिवैचित्र्यात् प्रमाणप्रमोभयबोधकः। अर्थापत्तिप्रमाणं नाम उपपाद्यज्ञानं , येन विना यत् अनुपपन्नं तत् तत्रोपपाद्यम्[३]। उपपादकज्ञानं प्रमा , उपपादकं नाम यस्याभावे यस्यानुपपत्तिः तत्तत्रोपपादकम्[४] इति। एकं दृष्टान्तं स्वीकृत्य विचारयामः। यथा पीनः देवदत्तः दिवा न भुङ्क्ते इति। अर्थापत्तिप्रमाणस्य तत्रैव प्रवृत्तिः भवति यत्र प्रमाणयोः विरोधः भाति। अर्थापतिप्रमाणेन च सः विरोधः परिह्रियते इति। प्रकृते अपि एकं प्रमाणं देवदतस्य पीनत्वग्राहकम् अपरं प्रमाणं देवदतस्य दिवाकालीनभोजनाभावग्राहकम्। अत्र च पीनत्वं प्रति भोजनं प्रयोजकं भवति यदि देवदत्तस्य अभुञ्जानत्वं तर्हि पीनत्वं न उपपद्यते इति अयं विरोधः प्रमाणेन परिह्रियते इति।

तत्र पीनत्वज्ञानं करणं भवति तथा च येन विना भोजनेन विना दिवाऽभुञ्जानस्य देवदत्तस्य पीनत्वं न उपपद्यते इति पीनत्वं तत्र उपपाद्यं तज्ज्ञानं च करणम्। यस्याभावे यस्यानुपपत्तिः तत् तत्र उपपादकं यथा दिवाऽभुञ्जानस्य देवदतस्य रात्रिभोजनस्य अभावे पीनत्वस्य अनुपपत्तिः अतः रात्रिभोजनम् उपपादकं तज्ज्ञानं च फलम्। अत्र दिवाऽभुञ्जानस्य देवदत्तस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनं कल्प्यते इति। तथा अर्थापत्तिः अपि मिथ्यात्वे प्रमाणं भवति - तत्र च श्रुतार्थान्यथानुपपत्त्या मिथ्यात्वं कल्प्यते इति तत्र च श्रुतिः - "तरति शोकमात्मवित्"[५] ,

---

***सम्पर्कसूत्रम्** - 9427382683, Email- nachiketabrahmbhatt11@gmail.com

[१]छान्दोग्य उपनिषद् (6.2.1)
[२]तैत्तिरीयसंहिता ६.३.४
[३]वेदान्तपरिभाषा अर्थापत्तिपरिच्छेदः
[४]वेदान्तपरिभाषा अर्थापत्तिपरिच्छेदः
[५]छान्दोग्योपनिषद् ७.१.३

"विद्वान् नामरूपाद्विमुक्तः"[१] , "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[२] इति । एताभिः श्रुतिभिः उक्तः अर्थः प्रपञ्चस्य ज्ञाननिवर्त्यत्वम् , इदं च ज्ञाननिवर्त्यत्वं प्रपञ्चस्य मिथ्यात्वं विना अनुपपद्यमानं सत् प्रपञ्चस्य मिथ्यात्वं बोधयति इति ।

अयमेव विषयः- अद्वैतसिद्धिग्रन्थे प्रथमपरिच्छेदे अपि प्रतिपादितः अस्ति ।

तथाहि अद्वैतसिद्धौ आदौ मिथ्यात्वे अनुमानप्रमाणस्य उपन्यासः कृतः अस्ति । "विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वाच्च"[३] इति । तेषु च अनुमानेषु सोपाधिकादिहेत्वाभासानां निरूपणं कृत्वा तत्परिहारः कृतः । ततः परम् एकमेवाद्वितीयम्[४] इति श्रुतेः अर्थविचारः व्यधायि ग्रन्थकारैः । अधुना ज्ञाननिर्वत्यात्वन्थानुपपत्त्या मिथ्यात्वसाधनं क्रियते । तथा च "तरति शोकमात्मवित्"[५] , "विद्वान् नामरूपाद्विमुक्तः"[६] , "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[७] इति । एताभिः श्रुतिभिः तावत् तृतीयं मिथ्यात्वं सिद्ध्यति ।

१. सदसद्विलक्षणत्वम्
२. प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्
३. ज्ञाननिर्वत्यत्वम्
४. स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम्
५. सद्विविक्तत्वम्

इत्येवं पञ्चधा मिथ्यात्वनिर्वचनं प्रत्यपादि मधुसूदनश्रीचरणैः ।

ननु कथं वा उक्ताभिः श्रुतिभिः प्रपञ्चस्य मिथ्यात्वं सिद्ध्यति इति चेत् उच्यते । प्रपञ्चस्य ज्ञाननिर्वत्यत्वमिथ्यात्वं च इत्थम् एताभिः श्रुतिभिः लभ्यते । तथा च "तरति शोकमात्मवित्" इत्यस्यां श्रुतौ तरति इत्यस्य नाशयति इत्यर्थः , शोकशब्दस्य शोककारणं बन्धः प्रपञ्चः इति अर्थः , आत्मवित् नाम आत्मज्ञानवान् । तथा मिलित्वा वाक्यार्थः भवति - आत्मज्ञानवान् बन्धनिवृत्तिमान् इति । अत्र च प्रसिद्धः न्यायः – "उद्देश्यतावच्छेदकविधेययोः असति बाधके प्रयोज्यप्रयोजकभावः" उद्देश्यतावच्छेदकस्य विधेयप्रयोजकत्वम् इति सामान्यः अर्थः ।

प्रकृते च आत्मज्ञानवन्तम् उद्दिश्य शोकाभावः विधीयते इत्यतः आत्मज्ञानवान् उद्देश्यः , उद्देश्यतावच्छेदकम् आत्मज्ञानम् , विधेयं च शोकाभावः । एवं च आत्मज्ञानप्रयोज्यत्वं शोकनिवृत्तौ भासते । आत्मज्ञानं बन्धनिवृत्तिप्रयोजकं बन्धनिवर्तकमिति लभ्यते । तुल्यवित्तिवेद्यतया बन्धस्य आत्मज्ञाननिर्वत्यत्वं लभ्यते । तदित्थं श्रुत्या बोधितं बन्धस्य प्रपञ्चस्य ज्ञाननिर्वत्यत्वं प्राप्तम् । एवमेव "विद्वान् नामरूपाद्विमुक्तः" इति श्रुत्या अपि नामरूपात्मकस्य प्रपञ्चस्य निवृत्तिप्रयोजकम् आत्मज्ञानम् इति लभ्यते । तथा च "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति श्रुत्या अपि मिथ्यात्वमेव उच्यते । अयमाशयः - हृदयग्रन्थिः - अहङ्कारः भिद्यते - नश्यति । छिद्यन्ते सर्वसंशयाः - अन्तःकरणस्य कारणस्य नाशात् तत्परिणामानां संशयानां नाशः भवति इति । क्षीयन्ते चास्य कर्माणि - अस्य विदुषः कर्माणि प्रारब्धातिरिक्तसर्वाणि कर्माणि क्षीयन्ते प्रारब्धस्य तावात् उपभोगेनैव क्षयः इति नियमात् । कदा इति उच्यते - तस्मिन् दृष्टे परावरे इति । परः हिरण्यगर्भः - सः अवरः कनिष्ठः यस्मात् सः परावरः परमात्मा इति यावत् । तथा च परमात्मनि दृष्टे संसारस्य निवृत्तिः भवति इति । तथा च सिद्धं प्रपञ्चस्य ज्ञाननिर्वत्यत्वम् इति ।

[१] मुण्डकोपनिषद् ३.२.८
[२] मुण्डकोपनिषद् २.२.८
[३] अद्वैतसिद्धिः
[४] छान्दोग्य उपनिषद 6.2.1
[५] छान्दोग्योपनिषद् ७.१.३
[६] मुण्डकोपनिषद् ३.२.८
[७] मुण्डकोपनिषद् २.२.८

तच्च ज्ञाननिर्वर्त्यत्वं बन्धस्य सत्यत्वे अनुपपद्यमानं सत् बन्धस्य मिथ्यात्वं बोधयति। यदि बन्धः ब्रह्मवत् सत्यः स्यात् तर्हि ज्ञाननिर्वर्त्यः न स्यात्। यत् सत् तत् अनिर्वर्त्यम् इति व्याप्तिनियमात्। तथा च व्यापकाभावस्य अनिर्वर्त्यत्वाभावस्य प्रपञ्चे लब्धत्वात् व्याप्याभावः अपि लभ्यते। तस्मात् प्रपञ्चस्य मिथ्यात्वं सिद्धम्।

तथा च प्रपञ्चस्य निर्वर्त्यत्वं ज्ञानस्य निवर्तकत्वं च सिद्धम्। अधुना तदवच्छेदकं किम् इति विचार्यते। यथा शुक्तिज्ञानेन शुक्तिरूप्यं निवर्तते तत्र च शुक्तिरूप्यनिष्ठनिर्वर्त्यतावच्छेदकं न तदसाधारणधर्मः शुक्तित्वादि। तथा सति अननुगमप्रसङ्गः स्यात्। अतः अनुगतमेकं निवर्त्यतावच्छेदकं वक्तव्यम्। तच्च मिथ्यात्वमेव। तथा च शुक्तिरूप्यनिर्वर्त्यतावच्छेदकं भवति मिथ्यात्वम्। एवमेव शुक्तिज्ञाननिष्ठनिवर्तकतावच्छेदकं तत्तद्विषयकत्वं न अपितु अधिष्ठानप्रमात्वमेव तथा च अननुगमदोषः अपि नास्ति।

तथा च अयं नियमः लब्धः यत्र ज्ञानस्य अधिष्ठानप्रमात्वेन निवर्तकता तत्र मिथ्यात्वेनैव वस्तुनः निवर्त्यता इति। तथा हि "यन्निष्ठा यदाकारा प्रमारूपान्तःकरणवृत्तिः तन्निष्ठां तदाकारां च अविद्यां नाशयति " इति नियमः प्रसिद्धः। तथा च अन्यः अपि नियमः - "उपादाननिवृत्तौ तदुपादेयस्य निवृत्तिः" इति। एवं च कार्यकारणभावद्वययोजनेन शुक्तिरूप्यस्य यथा मिथ्यात्वं व्यवस्थाप्यते तथा प्रपञ्चस्यापि मिथ्यात्वं व्यवस्थापनीयम्। तदादौ शुक्तिरूप्यस्य मिथ्यात्वं कथम् इति पश्यामः। तत्र प्रथमकार्यकारणभावस्य समन्वयः प्रदर्श्यते। देवदत्तनिष्ठा घटाकारा या प्रमारूपान्तःकरणवृत्तिः सा देवदत्तनिष्ठं घटाकारम् अज्ञानं नाशयति इति द्वैताद्वैतवादिसम्मतम्। तथा च द्वितीयकार्यकारणभावस्य प्रसिद्धं स्थलं भवति - तन्तुनिवृत्तौ तदुपादेयस्य पटस्य अपि निवृत्तिः इति।

अधुना शुक्तिरूप्यस्थले नियमस्य समन्वयः प्रदर्श्यते। देवदत्तनिष्ठया शुक्त्याकारया प्रमारूपया अन्तःकरणवृत्त्या शुक्तिविषयकमज्ञानं निवर्तते , शुक्तिरूप्योपादानस्य च शुक्त्यज्ञानस्य निवृत्तौ तदुपादेयस्य शुक्तिरूप्यस्य अपि निवृत्तिः भवति। तथा च शुक्तिरूप्ये ज्ञाननिवर्त्यत्वं प्राप्तम्। समानः न्यायः प्रपञ्चस्थले अपि योजनीयः। पुरुषनिष्ठया प्रमारूपया अखण्डाकारया (ब्रह्मविषयया) अन्तःकरणवृत्त्या ब्रह्मविषयकम् अज्ञानं (माया) निवर्तते। मायायाश्च निवृत्तौ जातायां तदुपादेयस्य सकलप्रपञ्चस्य अपि निवृत्तिः भवति इति सकलप्रपञ्चस्य ज्ञाननिवर्त्यत्वं संभवति। तथा च यथा अधिष्ठानप्रमात्वेन शुक्तिज्ञानस्य शुक्तिरूप्यनिवर्तकता तत्र निवर्त्यस्य शुक्तिरूप्यस्य मिथ्यात्वं तथा अधिष्ठानप्रमात्वेन ब्रह्मज्ञानस्य प्रपञ्चनिवर्तकता दृष्टा, अतः निवर्त्यस्य प्रपञ्चस्य मिथ्यात्वम् इति द्रष्टव्यम्। तथा च क्लृप्तकार्यकारणभावद्वयमादाय यत्र ज्ञानस्य अधिष्ठानप्रमात्वेन निवर्तकता तत्र मिथ्यात्वेनैव वस्तुनः निवर्त्यता इति नियमः सिद्धः अतः लाघवानुगृहीतः तर्कः अद्वैतपक्षे अस्ति। तत्तद्व्यक्तित्वं निवर्त्यतावच्छेदकं चेत् अननुगमः गौरवं च इति विपक्षे बाधकस्तर्कः। सर्वानुगतं निवर्त्यतावच्छेदकं मिथ्यात्वं मास्तु सद्भिन्नत्वं ब्रह्मभिन्नत्वं वा भवतु इति न च वाच्यम्। तथा सति अस्य निवर्त्यताच्छेदकस्य तुच्छे अपि विद्यमानत्वात् अतिप्रसक्तिः स्यात्। तथा सति तुच्छस्य ज्ञाननिवर्त्यत्वं स्यात् इति। ननु तुच्छे अतिप्रसक्तिवारणाय निवर्त्यतावच्छेदके असद्भिन्नत्वम् इति दलं योजयामः तथा च तुच्छस्य उक्तनिवर्त्यतावच्छेदाक्रान्तत्वं नास्ति इति न कापि अनुपपत्तिः इति चेत् न , असद्भिन्नत्वविशेषणदानेन निवर्त्यतावच्छेदकं सद्भिन्नत्वे सति असद्भिन्नत्वम् इति जातम्। इदं च प्रथममिथ्यात्वे एव पर्यवसन्नम् इति निवर्त्यस्य मिथ्यात्वं सुलभमेव जातम्। एवं च ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या प्रपञ्चस्य सदसद्विलक्षणत्वरूपं मिथ्यात्वं सिद्ध्यति इति नः अद्वैतिनः इष्टापत्तिरेव।

एवं च श्रुतिबोधित-अधिष्ठानप्रमात्वावच्छिन्न-आत्मज्ञाननिष्ठनिवर्तकतानिरूपितनिवर्त्यता प्रपञ्चस्य सत्यत्वे अनुपपन्ना सती प्रपञ्चस्य मिथ्यात्वं कल्पयति इति सिद्धम्।

अधुना पूर्वपक्षस्य आक्षेपः निरूप्यते - अद्वैतिना उक्तं तदा युज्यते यदा प्रपञ्चनिवर्तकात्मज्ञाने

 ISSN : 2249-538X

शुक्तिज्ञानसाधारणम् अधिष्ठानप्रमात्वम् अवच्छेदकमित्यत्र किञ्चित् मानं स्यात् तदेव न संभवति इति। यदि आत्मज्ञानस्य भिन्नेनापि रूपेण निवर्तकता संभवति तदा निवर्त्यस्य मिथ्यात्वं न सिद्ध्यति तथा च प्रपञ्चः सत्यः इति द्वैतिनां विवक्षा अस्ति।

तथा च बहूनि उदाहरणानि सन्ति यत्र ज्ञानस्य भिन्नधर्मेण निवर्तकावच्छेदकता संभवति।

१. ज्ञानस्य स्वप्रागभावं प्रति प्रतियोगित्वेन निवर्तकता।
२. ज्ञानस्य पूर्वज्ञानं प्रति उदीच्यगुणत्वेन निवर्तकता।
३. स्मृतिरूपस्य ज्ञानस्य संस्कारं प्रति फलत्वेन निवर्तकता।
४. गरुडध्यानस्य विषं प्रति गरुडध्यानत्वेन निवर्तकता।
५. सेत्वादिदर्शनस्य पापं प्रति विहितक्रियात्वेन निवर्तकता।
६. ईश्वरज्ञानस्य घटं प्रति ईश्वरज्ञानत्वेन निवर्तकता।

तत्र क्रमेण उदाहरणानां सामान्यम् अर्थं पश्यामः -

१. प्रतियोगिनः उत्पत्तौ प्रागभावः नश्यति तथा च ज्ञानस्य उत्पतौ तत्प्रागभावः निवर्तते तत्र च निवर्तकतावच्छेदकं प्रतियोगित्वं न तु ज्ञानत्वम् अथवा अधिष्ठानप्रमात्वं वा।
२. योग्यविभुविशेषगुणानां स्वोत्तरगुणनाश्यत्वम् इति नियमानुरोधेन उत्तरज्ञानेन पूर्वज्ञानस्य निवृत्तिः भवति तत्र निवर्तकावच्छेदकम् उत्तरगुणत्वं न तु अधिष्ठानप्रमात्वम् इति।
३. स्मृतेः संस्कारनाशकत्वम् इति नियमानुरोधेन स्मृतिरूपज्ञानस्य संस्कारनिवर्तकता फलत्वेन रूपेण न तु अधिष्ठानप्रमात्वेन इति।
४. यदि सर्पविषबाधः भवति तदा गरुडध्यानं क्रियते तर्हि विषस्य निवृत्तिः भवति अत्र निवर्तकतावच्छेदकं गरुडध्यानत्वम्।
५. सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति[1] इति प्रसिद्धवचनात् सेतुदर्शनस्य पापनिवर्तकत्वम् अवगम्यते। तत्र निवर्तकतावच्छेदं विहितक्रियात्वम्।
६. ईश्वरः साधरणकारणम् इति कृत्वा घटनिवृत्तिं प्रति ईश्वरस्य कारणत्वम् अस्ति इति वक्तव्यम्। तत्र ईश्वरज्ञानत्वेन निवर्तकता न तु अन्येन केनचित् धर्मेण।

तथा च ज्ञानस्य भिन्नैः धर्मैः निवर्तकता दृष्टा अस्ति तथा च ब्रह्मज्ञानस्य अपि भिन्नेन रूपेण निवर्तकता निरूपयितुं शक्यते। तथा च यथा पापस्य मिथ्यात्वं विना एव सेतुदर्शननिवर्त्यत्वं वर्तते तथा प्रपञ्चस्य अपि मिथ्यात्वं विना एव ब्रह्मज्ञाननिवर्त्यत्वं संभवति। अतः मिथ्यात्वे अर्थापत्तिः न प्रमाणम्। तथा च अद्वैतिना अभिमतः नियमः यदा ज्ञाननिष्ठनिवर्तकतावच्छेदकम् अधिष्ठानप्रमात्वं तत्र ज्ञाननिवर्त्यस्य मिथ्यात्वम् इति। सोऽपि न संभवति। अयमाशयः -यथा सेतुदर्शनस्य विहितक्रियात्वेन निवर्तकता तथा आत्मज्ञानस्य विहितक्रियात्वेन एव निवर्तकता तथा च प्रपञ्चस्य न मिथ्यात्वम् इति चेत् अत्र उच्यते - आत्मज्ञानस्य प्रपञ्चनिवर्तकता अधिष्ठानप्रमात्वेन एव संभवति। प्रकारान्तरेण वक्तुमशक्यत्वात्। उक्तेषु कोपि प्रकारेषु कोपि प्रकारः न संभवति अतः पारिशेष्यात् अधिष्ठानप्रमात्वमेव निवर्तकतावच्छेदकं भवति।

[1] पराशरस्मृतिः

ISSN : 2249-538X

१. प्रथमोदाहरणं न संभवति कुतः इति चेत् - ज्ञानप्रागभावं प्रति ज्ञानस्य प्रतियोगित्वेन निवर्तकत्वमिव आत्मज्ञानस्य न संभवति । यदि आत्मज्ञानस्य प्रतियोगित्वेन निवर्तकता तदा निवर्त्यस्य बन्धस्य अभावरूपत्वं वक्तव्यं परन्तु प्रपञ्चस्य भावरूपत्वात् आत्मज्ञानस्य न प्रतियोगित्वेन निवर्तकता । किञ्च वस्तुतः ज्ञानप्रागभावं प्रति न ज्ञानं निवर्तकम् । निवर्त्यस्य अपेक्षया निवर्तकस्य प्राक्क्षणवृत्तित्वं वक्तव्यम् । तथा च ज्ञानप्रागभावस्य प्राक् प्रतियोगिनः ज्ञानस्य एव अभावात् न ज्ञानस्य तन्निवर्तकत्वं तर्हि कस्य निवर्तकत्वं चेत् ज्ञानजनकसामग्र्याः इति वदामः ।
२. नापि आत्मज्ञानस्य उत्तरगुणत्वेन निवर्तकत्वं संभवति । तथा सति निवर्त्यस्य अपि आत्मविशेषगुणत्वं वाच्यम् । प्रपञ्चान्तर्गतानाम् आकाशादीनां तु द्रव्यत्वात् आत्मविशेषगुणत्वं न वक्तुं शक्यते । किञ्च उत्तरगुणत्वेन आत्मज्ञानस्य निवर्तकता चेत् इच्छादेः अपि प्रपञ्चनिवर्तकत्वं स्यात् ।
३. नापि आत्मज्ञानस्य फलत्वेन प्रपञ्चनिवर्तकता । तथा सति यथा संस्कारस्य स्मृतिनिवर्त्यस्य कार्यं स्मृतिः इति वाच्यं तथा निवर्त्यस्य आकाशादेः आत्मज्ञानं कार्यम् इति वक्तव्यम् । परन्तु तथा तु नास्ति । किञ्च स्मरणस्य संस्कारनाशकत्वम् इति नियमः नास्ति । स्मृतौ हि जातायां संस्कारः दृढः भवति इति प्रसिद्धम् ।
४. ध्यानत्वेन आत्मज्ञानस्य निवर्तकत्वं न वक्तुं शक्यम् । ध्यानस्य ज्ञानतः भिन्नत्वात् । ध्यानं तु कर्तुमकर्तुमन्यथा कर्तुं शक्यते । ज्ञानं न तथा तस्मात् ततः वैलक्षण्यम् । तथा च आत्मज्ञानस्य ध्यानरूपत्वाभावात् न ध्यानत्वं तदवच्छेदकं भवति ।
५. नापि ईश्वरज्ञानत्वेन आत्मज्ञानस्य प्रपञ्चनिवर्तकत्वम् । यथा घटनाशं प्रति ईश्वरज्ञानस्य कारणत्वम् ईश्वरज्ञानत्वेन उक्तं तदत्र न संभवति । तत्र ईश्वरज्ञानत्वं नाम किम् इति वक्तव्यम् । ईश्वरज्ञानत्वं न तावत् जातिः एकव्यक्तिवृत्तित्वात् । उपादानगोचरापरोक्षज्ञानत्वेन निवर्तकता वक्तव्या । तत्र अभावस्य उपादानाभावात् न तद्गोचरज्ञानं न संभवति । तथा च इदं न प्रत्युदाहरणम् ।
६. नापि सेतुदर्शनादिवत् विहितक्रियात्वेन आत्मज्ञानस्य निवर्तकत्वं सम्भवति । ज्ञानस्य विधेयत्वाभावात् । ननु तथासति सेतुदर्शनस्य विहितक्रियात्वेन कथं निवर्तकता ? इति चेत् - विशिष्टाकारेण विधेयत्वं तस्य संभवति इति । तथा च सेतुदर्शनमात्रस्य न पापनाशकत्वं तथा सति म्लेच्छानामपि सेतुदर्शनादिना निवृत्तिः स्यात् । किन्तु परिषदुपस्थानादिपूर्वकव्रतकलापविशिष्टस्य सेतुदर्शनस्य पापनाशकत्वम् । यः ब्रह्महत्यायाः प्रायश्चित्तं चिकीर्षति सः परिषदि स्वदोषोद्घोषणं कुर्यात् "मया ब्रह्महत्या कृता" इति । ततः परं छत्रपादुकादिवर्जनं , दूरदेशगामित्वं , भिक्षान्नभक्षित्वम् इदं सर्वं सम्पाद्य सेतुदर्शनं कुर्यात् । आत्मज्ञानस्य तु नास्ति कृतिसाध्यं किञ्चित् साधनान्तरं येन तस्य विधेयत्वं स्यात् ।

तथा च पारिशेष्यात् आत्मज्ञानस्य अधिष्ठानत्वप्रमात्वेन एव निवर्तकता इति सिद्धम् । तथा च अज्ञाननिवृत्तौ अधिष्ठानप्रमा न किमपि सहकारि अपेक्षते ।

तथा च उक्तं वार्तिके - "प्रत्यग्याथात्म्यधीरेव प्रत्यगज्ञानहानिकृत् । सा चात्मोत्पत्तितो नान्यत् ध्वान्तध्वस्तौ अपेक्षते ॥"

तस्मात् अधिष्ठानप्रमात्वेन आत्मज्ञाननिवर्त्यत्वात् शुक्तिरूप्यादिवत् प्रपञ्चस्यापि मिथ्यात्वं सिद्ध्यति ।

## परामृष्टाः ग्रन्थाः

१. https://advaitasharada.sringeri.net/
२. न्यायामृत सम्पा. आनन्दशास्त्री वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस, 1996.
३. श्रीमद्धर्मराजाध्वरीन्द्रप्रणीता वेदान्तपरिभाषा श्रीदक्षिणामूर्तिमठ वाराणसी
४. उपनिषद्भाष्यम् खण्डः १ महेश-अनुसन्धान-संस्थानम्
५. सुरेश्वराचार्यप्रणीतं बृहदारण्यकभाष्यवार्तिकम् – आनन्दाश्रममुद्रालयः


ISSN : 2249-538X

# भामतीप्रस्थाने अविद्यास्वरूपस्य तात्त्विकविश्लेषणम्

श्री विकास गुरिकार्*
शोधच्छात्रः, वेदान्तविभागः,
श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः,
कालटी

***लेखसारः*** *– अद्वैतवेदान्तपरम्परायाम् "अविद्या" इति तत्त्वं सर्वाधिकगम्भीरविषयत्वेन परिगण्यते । ब्रह्मणः अद्वितीयत्वे सत्यपि जगतः अनुभवरूपेण प्रतीतिः कथं सम्भवति, जीवब्रह्मणोर्भेदबुद्धिः कथं जायते, मोक्षस्य च साधनं किं भवति इत्यादीनां प्रश्नानां समाधानम् अविद्यातत्त्वस्य विवेचनेनैव लभ्यते । वाचस्पतिमिश्रविरचितायां "भामती" इति प्रसिद्धायां ब्रह्मसूत्रशाङ्करभाष्यटीकायाम् अविद्यायाः स्वरूपं निरूपितम् अस्ति । प्रस्तुते शोधलेखे भामतीप्रस्थाने प्रतिपादितस्य अविद्यास्वरूपस्य तात्त्विकमूल्यांकनं क्रियते । अविद्याया आश्रयः, विषयः, स्वरूपम्, कार्यम्, निवृत्तिश्च इत्येतानां पक्षाणां शास्त्रीयरीत्या परीक्षणं कृतम् अस्ति । इदं लेखनं वेदान्तविद्यार्थिनां, संशोधकानां तथा भारतीयदर्शनानुरागिणां कृते उपयुक्तं भविष्यति ।*

***कूटशब्दाः*** *– अविद्या, भामती, वाचस्पतिमिश्रः, अद्वैतवेदान्तः, मायावादः, अध्यासः, ब्रह्मज्ञानम् ।*

## प्रस्तावना

भारतीयदर्शनपरम्परायाम् अद्वैतवेदान्तस्य विशिष्टं स्थानम् अस्ति । "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः"[१] इति सिद्धान्तः अद्वैतवेदान्तस्य मूलाधारः । अस्य सिद्धान्तस्य व्याख्याने "अविद्या" इति तत्त्वं केन्द्रीयभूमिकां निर्वहति । यदि ब्रह्मैव केवलं सत्यं चेत्, कथं नानात्वरूपस्य जगतः अनुभवः ? कथं जीवः स्वस्वरूपं विस्मृत्य संसारदुःखानि अनुभवति ? एतेषां प्रश्नानां समाधानार्थं शङ्करभगवत्पादैः अध्याससिद्धान्तः प्रतिपादितः । तस्य विस्तृतं विवेचनं परवर्तिभिः आचार्यैः कृतम् ।

तेषु वाचस्पतिमिश्रस्य **"भामती"** इति ग्रन्थः अद्वैतवेदान्ते अत्यन्तमहत्त्वपूर्णः । भामती तावत् अद्वैतपरम्परायां स्वतन्त्रविचारधारां निर्मितवती । विशेषतः अविद्याया आश्रयविषये, जीवब्रह्मसम्बन्धे, ज्ञानोत्पत्तौ च भामतीकारस्य दृष्टिः गम्भीरा दार्शनिकी च अस्ति ।

अविद्या न केवलं सामान्यज्ञानाभावः, अपि तु अनादिभावरूपा सत्ता, या ब्रह्मणि जगदाकारं कल्पयति । सा एव जीवस्य बन्धहेतुः । यावत् अविद्या न निवर्तते, तावत् संसारचक्रं न निवर्तते । अतः अविद्याविचारः मोक्षशास्त्रस्य प्राणभूतः विषयः इति वक्तुं शक्यते ।

भामतीकारः अविद्यां "भावरूपा" इति स्वीकरोति । केवलं ज्ञानाभावत्वेन तस्याः व्याख्या न पर्याप्ता इति तेन प्रतिपादितम् । यदि अविद्या अभावरूपा स्यात्, तर्हि दृश्यप्रपञ्चस्य अनुभवरूपसत्ता कथं सम्भवेत् ? अतः अविद्या अनिर्वचनीया, अनुभवरूपा, ज्ञाननिवर्त्या चेति भामतीकारस्य मतम् ।

शाङ्करभाष्ये अध्यासः **"स्मृतिरूपः परत्र पूर्वदृष्टावभासः"**[२] इति परिभाषितः । भामतीकारः तस्य विस्तीर्णं विश्लेषणं करोति । जीवः आत्मनि अनात्मधर्मानध्यस्यति । देहस्य जडत्वे सत्यपि "अहं कर्ता", "अहं भोक्ता"

---

***सम्पर्कसूत्रम्** - 6363205051, Email - vikasgurikar05@gmail.com

[१]ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति अद्वैतवेदान्तस्य प्रसिद्धः सिद्धान्तः शाङ्करवेदान्तपरम्परायां प्रतिपादितः । — सदानन्दयोगीन्द्रः, वेदान्तसारः, प्रारम्भभागः ।

[२]"स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इति अध्यासलक्षणं शङ्करभगवत्पादैः ब्रह्मसूत्रभाष्यस्य अध्यासभाष्ये निरूपितम् । शङ्करभगवत्पादः, ब्रह्मसूत्रभाष्यम्, अध्यासभाष्यम् ।

इत्याद्यभिमानः अविद्यया एव जायते। अयम् अध्यासः संसारस्य मूलकारणम्।

अविद्याया विषयः ब्रह्म एव। किन्तु तस्याः आश्रयः कः? इति प्रश्ने भामतीकारः जीवमेव अविद्याया आश्रयत्वेन स्वीकरोति। जीवस्य अनुभवः, बन्धः, मोक्षश्च प्रत्यक्षतया दृश्यन्ते। अतः अविद्याया व्यवहारिकाश्रयः जीव एव इति तेन सिद्धीकृतम्। एषः पक्षः विवरणप्रस्थानात् भिन्नः अस्ति।

भामतीप्रस्थाने अविद्याया विवेचनं केवलं तात्त्विकचर्चा न, अपि तु मोक्षमार्गस्य आधारभूतं चिन्तनम्। ज्ञानस्य उदयेन अविद्यानाशः भवति। यदा आत्मा स्वस्वरूपेण ज्ञायते, तदा संसारस्य मिथ्यात्वबुद्धिः जायते। एवं ब्रह्मज्ञानमेव अविद्यानिवृत्तेः एकमात्रसाधनम् इति अद्वैतसिद्धान्तः।

अतः प्रस्तुते शोधप्रबन्धे भामतीप्रस्थाने निरूपितस्य अविद्यास्वरूपस्य गम्भीरतया परीक्षणं क्रियते। तत्र शास्त्रीययुक्तीनां, भाष्यवचनानां, दार्शनिकदृष्टीनां च समुचितं चिन्तनं विधास्यते।

## अविद्यायाः स्वरूपम्

अद्वैतवेदान्ते “अविद्या” इति पदं केवलं सामान्य-अज्ञानपरं नास्ति, अपि तु समग्रसंसारव्यवहारस्य मूलकारणत्वेन स्वीकृतम्। भामतीप्रस्थाने वाचस्पतिमिश्रः अविद्यायाः स्वरूपं सूक्ष्मतया निरूपयति। तस्य मते अविद्या न केवलं ज्ञानाभावः, किन्तु भावरूपा, अनादिः, अनिर्वचनीया च सत्ता अस्ति। सा एव आत्मनि अनात्मधर्माध्यासस्य कारणम्।

शङ्कराचार्यैः अध्यासभाष्ये “स्मृतिरूपः परत्र पूर्वदृष्टावभासः”[१] इति अध्यासस्य परिभाषा प्रदत्ता। अस्य अध्यासस्य मूलम् अविद्या इति भामतीकारस्य स्पष्टोऽभिप्रायः। यदा जीवः देहमात्मत्वेन पश्यति, सुखदुःखादीन् आत्मधर्मत्वेन अनुभवति, तदा तस्य व्यवहारस्य मूलहेतुः अविद्यैव भवति।

भामतीकारस्य मते अविद्या “अनादिः”[२] अस्ति। तस्याः आरम्भकालः निर्देष्टुं न शक्यते। यदि तस्याः आरम्भः स्वीक्रियेत, तर्हि तस्य कारणं पुनरन्यदपेक्षितं स्यात्। एवम् अनवस्था प्रसज्येत। अतः अविद्या अनादिरूपेणैव स्वीकर्तव्या। किन्तु सा अनन्ता नास्ति, ज्ञानोत्पत्त्या तस्याः निवृत्तिः सम्भवति।

अविद्यायाः स्वरूपविषये भामतीप्रस्थानं विवरणप्रस्थानात् भिन्नमतं प्रतिपादयति। भामतीकारः जीवमेव अविद्याया आश्रयत्वेन स्वीकरोति। जीवः संसारदुःखानुभवकर्ता, बन्धमोक्षयोः भोक्ता च दृश्यते। अतः अविद्या जीवाश्रया इति तस्य सिद्धान्तः। ब्रह्म तु अविद्याया विषयः, न तु आश्रयः। एषः सिद्धान्तः भामतीप्रस्थानस्य प्रमुखविशेषः मन्यते।

भामतीकारः अविद्यां “भावरूपा” इति स्वीकरोति। यदि सा केवलमभावरूपा स्यात्, तर्हि दृश्यजगतः अनुभवरूपसत्ता नोपपद्येत। अभावस्य कार्योत्पादनासामर्थ्यात् जगत्कारणत्वं तस्य न सम्भवति। अतः जगदुपपत्तये किञ्चित् सकारात्मकं तत्त्वम् आवश्यकम्। तदेव अविद्या इति भामतीकारस्य मतम्।

अविद्या “अनिर्वचनीया” इति अद्वैतवेदान्तस्य प्रसिद्धः सिद्धान्तः। सा न पूर्णतया सती, न च पूर्णतया असती। यदि सती स्यात्, तर्हि ज्ञानेन न निवर्तेत। यदि असती स्यात्, तर्हि अनुभवो न स्यात्। अतः सदसद्विलक्षणत्वेन तस्या अनिर्वचनीयता प्रतिपाद्यते। यथा रज्जौ सर्पभ्रमः न पूर्णतया सत्यम्, न च पूर्णतया

[१] स्मृतिरूपः परत्र पूर्वदृष्टावभासः” इति अध्यासलक्षणं शङ्करभगवत्पादैः प्रतिपादितम्। अद्वैतवेदान्ते अध्यास एव अविद्याया मुख्यप्रकाशरूपं मन्यते।
शङ्करभगवत्पादः, ब्रह्मसूत्रभाष्यम्, अध्यासभाष्यम्।

[२] “अनादिभावरूपत्वे सत्यपि ज्ञाननिवर्त्या अविद्या” इति अद्वैतवेदान्तस्य मूलसिद्धान्तः परवर्तीभिराचार्यैरपि समर्थितः।
— मधुसूदनसरस्वती, अद्वैतसिद्धिः, अविद्याविचारप्रकरणम्।


ISSN : 2249-538X

मिथ्या, तथैव अविद्याजन्यः संसारव्यवहारः ।

"अविद्याया द्वे शक्ती स्वीक्रियेताम् — आवरणशक्तिः, विक्षेपशक्तिश्च । आवरणशक्त्या ब्रह्मस्वरूपस्य तिरोभावः भवति । विक्षेपशक्त्या जगदाकारप्रपञ्चः कल्प्यते । जीवः स्वात्मानं न जानाति, इदं जगत् सत्यं मन्यते, अयं सर्वः व्यवहारः अविद्यायाः विक्षेपशक्तेः परिणामः"[1] ।

भामतीकारः प्रतिपादयति यत् अविद्या अनुभवसिद्धा अस्ति । सर्वे जनाः "अहं न जानामि" इति अनुभवन्ति । अयम् अज्ञानानुभवः अविद्याया अस्तित्वं सूचयति । यदि अविद्या न स्यात्, तर्हि ज्ञानप्रयत्नस्यापि आवश्यकता न भवेत् । अतः अविद्या न केवलं काल्पनिकतत्त्वम्, किन्तु व्यवहारदृष्ट्या अनुभवरूपा सत्ता ।

अविद्याया निवर्तकं केवलं ब्रह्मज्ञानमेव । कर्मणा, उपासनेन, दानतपसादिभिः वा तस्याः पूर्णनाशः न सम्भवति । कर्म अनित्यफलप्रदं भवति, अविद्या तु ज्ञानविरोधिनी । अतः यथा दीपप्रकाशेन अन्धकारनिवृत्तिः भवति, तथैव आत्मज्ञानोत्पत्त्या अविद्यानाशः भवति । एषः अद्वैतवेदान्तस्य मूलसिद्धान्तः ।

भामतीप्रस्थाने अविद्याविचारः केवलं सैद्धान्तिकचर्चा नास्ति । मोक्षसाधनस्य आधाररूपेण तस्य प्रस्तुतीकरणं कृतम् । जीवः यदा "अहं ब्रह्मास्मि"[2] इति आत्मसाक्षात्कारं प्राप्नोति, तदा अविद्यायाः पूर्णनिवृत्तिः भवति । संसारस्य मिथ्यात्वबुद्धिः उदेति । स एव मोक्षः इति भामतीकारस्य अभिप्रायः ।

## अविद्याया आश्रयविषये भामतीकारस्य मतम्

अद्वैतवेदान्ते अविद्याविचारस्य अत्यन्तगम्भीरः पक्षः "अविद्यायाः आश्रयः कः?" इति प्रश्नः । अयं विषयः परवर्तिषु अद्वैतवेदान्तिषु बहुविचारितः । विशेषतः भामतीप्रस्थानस्य विवरणप्रस्थानस्य च मध्ये अस्मिन् विषये महत्त्वपूर्णो मतभेदः दृश्यते । भामतीकारः वाचस्पतिमिश्रः जीवमेव अविद्यायाः आश्रयत्वेन स्वीकरोति । एषः सिद्धान्तः तस्य दार्शनिकप्रज्ञां प्रकटयति । सामान्यतया आश्रयः नाम यत्र किञ्चिद्वर्तते सः । यदि अविद्या अस्ति, तर्हि सा कस्मिन्नाश्रिता इति विचारः अनिवार्यः । भामतीकारस्य मते संसारदुःखस्य अनुभवकर्ता जीवः एव । "अहं कर्ता"[3], "अहं भोक्ता", "अहं दुःखी" इत्याद्यभिमानः जीवस्य अनुभवसिद्धः । अतः यस्य बन्धः दृश्यते, तस्यैव अविद्या स्वीकर्तव्या इति तस्य तर्कः ।

यदि ब्रह्म अविद्याया आश्रयत्वेन स्वीकृतं स्यात्, तर्हि निरुपाधिकस्य, शुद्धस्य, नित्यज्ञानस्वरूपस्य ब्रह्मणः अविद्यासम्बन्धः कथं सम्भवेत्? ब्रह्म चेतनस्वरूपम्, सर्वप्रकाशकं, नित्यशुद्धं च । तत्र अज्ञानस्य आश्रयत्वकल्पना विरुद्धा स्यात् । अतः भामतीकारः ब्रह्मणि अविद्यायाः आश्रयत्वं नाङ्गीकरोति ।

जीवः तु अविद्योपहितचैतन्यरूपः । संसारव्यवहारः, कर्तृत्वम्, भोक्तृत्वम्, सुखदुःखानुभवः च जीवधर्मत्वेन दृश्यन्ते । अतः अविद्या जीवाश्रया इति युक्तिसङ्गतं भवति । भामतीकारः प्रतिपादयति यत् अविद्याया अनुभवः जीवस्यैव, न तु शुद्धब्रह्मणः ।

अत्र एकः प्रश्नः उदेति । यदि जीवः अविद्याजन्यः, अविद्या च जीवाश्रया, तर्हि अन्योन्याश्रयदोषः स्यात् । जीवस्य सिद्ध्यर्थम् अविद्या अपेक्ष्यते, अविद्यायाः सिद्ध्यर्थं जीवः अपेक्ष्यते । अस्य समाधानार्थं भामतीकारः अनादित्वसिद्धान्तं स्वीकरोति । जीवाविद्ययोः सम्बन्धः अनादिः । बीजाङ्कुरन्यायेन उभयोरपि प्रवाहः अनादित्वेन

[1] आवरणविक्षेपशक्तिद्वयरूपा माया जगत्प्रपञ्चस्य कारणत्वेन विवृता । सदानन्दयोगीन्द्रः, वेदान्तसारः, मायाविवेकः ।

[2] "अहं ब्रह्मास्मि", "तत्त्वमसि" इत्यादिमहावाक्यजन्यज्ञानात् अविद्यानिवृत्तिः भवति । बृहदारण्यकोपनिषद्, १.४.१० ; छान्दोग्योपनिषद्, ६.८.७ ।

[3] "अहं कर्ता", "अहं भोक्ता" इत्याद्यध्यासः अविद्याजन्यः इति शाङ्करवेदान्तस्य मूलाभिप्रायः । शङ्करभगवत्पादः, ब्रह्मसूत्रभाष्यम्, अध्यासभाष्यम् ।

कल्प्यते । अतः अन्योन्याश्रयदोषः न भवति ।

भामतीप्रस्थाने अविद्याया विषयः ब्रह्म एव इति स्वीक्रियते । विषयः नाम यत् वस्तु अविद्यया आव्रियते । ब्रह्मणः वास्तविकस्वरूपं अविद्यया तिरोहितं भवति । जीवः स्वात्मानं ब्रह्मरूपेण न जानाति । तस्मात् ब्रह्म अविद्याया विषयः, जीवस्तु आश्रयः इति भेदः स्पष्टतया प्रतिपाद्यते ।

"अयं सिद्धान्तः विवरणप्रस्थानात् भिन्नः । विवरणमतानुसारं ब्रह्म एव अविद्यायाः आश्रयः । किन्तु भामतीकारः तदसङ्गतं मन्यते । यदि ब्रह्म अविद्याश्रयः स्यात्, तर्हि ब्रह्मणः शुद्धता बाध्येत । नित्यप्रकाशस्वरूपे ब्रह्मणि अज्ञानस्य स्थितिः तर्कतः न सम्भवति । अतः जीवाश्रयवादः अधिकयुक्तियुक्तः इति भामतीकारस्य अभिप्रायः"[1] ।

भामतीकारस्य एषः अभिप्रायः केवलं दार्शनिकवितण्डा नास्ति, किन्तु मोक्षशास्त्रस्य आधारः । जीव एव बद्धः, जीव एव साधकः, जीव एव ज्ञानप्राप्त्या मुक्तो भवति । यदि अविद्या जीवाश्रया न स्यात्, तर्हि मोक्षव्यवहारोऽपि असम्भवः स्यात् । अतः जीवाश्रयवादः अद्वैतव्यवहारस्य सुदृढं तात्त्विकाधिष्ठानं निर्माति ।

अविद्यायाः आश्रयविषये भामतीकारस्य मतं परवर्तिभिः अनेकैः वेदान्तिभिः चर्चितम् । अमलानन्दस्य "कल्पतरु", अप्पय्यदीक्षितस्य "परिमलम्" इत्यादिषु ग्रन्थेषु अस्य पक्षस्य विस्तृतं विवेचनं दृश्यते । एतेन ज्ञायते यत् भामतीप्रस्थानस्य अविद्यावादः अद्वैतवेदान्तपरम्परायाम् अत्यन्तप्रभावशाली आसीत् ।

एवं भामतीप्रस्थाने अविद्यायाः आश्रयविचारः अद्वैतवेदान्तस्य सूक्ष्मदार्शनिकपरम्परां प्रकाशयति । जीवब्रह्मसम्बन्धस्य, संसारस्य, मोक्षस्य च यथार्थविवेचनाय अयं सिद्धान्तः अत्यन्तोपयोगी इति निष्कर्षः ।

## भामतीप्रस्थाने अविद्यानिवृत्तेः स्वरूपम्

अद्वैतवेदान्ते अविद्याया विचारः यथा महत्त्वपूर्णः, तथैव तन्निवृत्तिविचारोऽपि अत्यावश्यकः । यतः अविद्यैव संसारबन्धस्य मूलकारणम्, अतः तस्याः नाश एव मोक्षः इति अद्वैतसिद्धान्तः । भामतीकारः वाचस्पतिमिश्रः अविद्यानिवृत्तेः स्वरूपं गम्भीरतया विवेचयति । तस्य मते अविद्यायाः नाशः केवलं ब्रह्मज्ञानजन्यः, न तु कर्मणा, उपासनया वा ।

अविद्या अनादिरपि ज्ञाननिवर्त्या इति अद्वैतवेदान्तस्य प्रसिद्धः सिद्धान्तः । यथा सहस्रवर्षस्थितोऽपि अन्धकारः दीपप्रकाशेन क्षणेन निवर्तते, तथैव अनादिरप्यविद्या आत्मज्ञानोत्पत्त्या विनश्यति । भामतीकारः अस्य दृष्टान्तस्य साहाय्येन ज्ञानस्य प्राधान्यं प्रतिपादयति ।

कर्मणां सीमितफलत्वं भामतीप्रस्थाने स्पष्टतया प्रतिपादितम् । यज्ञदानतपःप्रभृतयः कर्मविशेषाः चित्तशुद्धिं जनयन्ति, किन्तु अविद्यायाः मूलनाशं कर्तुं न समर्थाः । कर्म सदैव कर्तृत्वभोक्तृत्वादिव्यवहाराश्रितं भवति । अविद्या तु तेषामेव व्यवहाराणां मूलकारणम् । अतः कारणनिवृत्तिः केवलं ज्ञानादेव सम्भवति ।

भामतीकारस्य मते" श्रवणमनननिदिध्यासनानि ब्रह्मज्ञानस्य प्रमुखसाधनानि"[2] । उपनिषद्वाक्येषु निहितं ब्रह्मतत्त्वं प्रथमं गुरुमुखेन श्रोतव्यम् । तदनन्तरं युक्तिभिः संशयानां निरासः करणीयः । अन्ते निरन्तरचिन्तनेन आत्मैक्यनिष्ठा दृढीभवति । एष एव ज्ञानमार्गः अविद्यानाशस्य साधनं भवति ।

---

[1] विवरणप्रस्थानानुसारं ब्रह्म एव अविद्याया आश्रयः इति मतं प्रतिपादितम्, किन्तु भामतीप्रस्थाने तदसङ्गतमिति निराकृतम् ।
— प्रकाशात्मयतिः, पञ्चपादिकाविवरणम्, अविद्याप्रकरणम् ।

[2] श्रवणमनननिदिध्यासनजन्यं ब्रह्मज्ञानमेव अविद्यानाशकं मोक्षसाधनं च इति अद्वैतवेदान्तस्य निष्कर्षः ।
— धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा ।


ISSN : 2249-538X

अविद्यानिवृत्तेः स्वरूपविषये भामतीकारः "बाधरूपनाश" सिद्धान्तं स्वीकरोति । यदा आत्मा ब्रह्मरूपेण ज्ञायते, तदा पूर्वसंसारदृष्टिः मिथ्यात्वेन बाध्यते । यथा रज्जौ सर्पभ्रमः प्रकाशे सत्ये निवर्तते, तथैव ब्रह्मज्ञानसमये जगत्सत्यत्वबुद्धिः विनश्यति । संसारः व्यवहारदृष्ट्या दृश्यते, किन्तु पारमार्थिकतः मिथ्यैव ।

अत्र ज्ञातव्यं यत् अविद्यानिवृत्तिः न कस्यचित् नवीनवस्तुनः प्राप्तिः । आत्मा नित्यसिद्धः, नित्यशुद्धः, नित्यमुक्तश्च । अविद्यया केवलं तस्य स्वरूपस्य आवरणं भवति । ज्ञानं तु तदावरणनिवर्तकम् । अतः मोक्षः नाम न किञ्चिदुत्पाद्यं वस्तु, किन्तु स्वस्वरूपावस्थानमेव ।

भामतीप्रस्थाने जीवन्मुक्तिसिद्धान्तोऽपि सूक्ष्मतया स्वीकृतः । ज्ञानोत्पत्त्यनन्तरम् अविद्याया मूलनाशः भवति, तथापि प्रारब्धकर्मवशात् देहव्यवहारः किञ्चित्कालं तिष्ठति । ज्ञानी लोकव्यवहारे प्रवृत्तोऽपि अन्तः आत्मैक्यनिष्ठया स्थितः भवति । स सुखदुःखयोः अतीतः, कर्तृत्वभोक्तृत्वाभिमानरहितश्च भवति ।

अविद्यानाशे सति जीवब्रह्मभेदबुद्धेः पूर्णनिवृत्तिः जायते । "अहं ब्रह्मास्मि", "तत्त्वमसि", "अयमात्मा ब्रह्म" इत्यादिमहावाक्यजन्यज्ञानं जीवस्य वास्तवविकस्वरूपं प्रकाशयति । तदा न कश्चिद्भेदः, न संसारभयम्, न दुःखानुभवः । एषा एव अद्वैतदृष्ट्या मोक्षावस्था ।

भामतीकारः विशेषतया प्रतिपादयति यत् ज्ञानमेव मोक्षस्य साक्षात्साधनम् । कर्म ज्ञानस्य साहायकत्वेन उपकरोति, किन्तु स्वतन्त्रतया मोक्षहेतुर्न भवति । अयं सिद्धान्तः शाङ्करवेदान्तस्य मूलाधाररूपेण समग्रे भामतीप्रस्थाने प्रतिध्वनति ।

एवं भामतीप्रस्थाने अविद्यानिवृत्तिविचारः केवलम् आध्यात्मिकप्रक्रिया नास्ति, अपि तु मानवीयदुःखनिवृत्तेः परमोपायः इति प्रतिपादितम् । ज्ञानप्रधानः अयं मार्गः अद्वैतवेदान्तस्य दार्शनिकगौरवं, मोक्षशास्त्रस्य च परमं तात्पर्यं प्रकाशयति ।

## भामतीप्रस्थानस्य अन्यैः अद्वैतप्रस्थानैः सह तुलना

अद्वैतवेदान्तपरम्परायां शङ्करभगवत्पादानां भाष्याणि मूलाधाररूपेण स्वीकृतानि । परन्तु परवर्तिभिः आचार्यैः तेषां भाष्याणां विविधप्रकारेण व्याख्यानं कृतम् । तेषु भामतीप्रस्थानं, विवरणप्रस्थानं च विशेषतया प्रसिद्धे । अविद्याविषये, जीवब्रह्मसम्बन्धे, ज्ञानोत्पत्तौ च एतयोः प्रस्थानयोः मध्ये सूक्ष्मो मतभेदः दृश्यते । अयं भेदः अद्वैतवेदान्तस्य गाम्भीर्यं दार्शनिकविस्तारं च प्रकाशयति ।

भामतीप्रस्थानस्य प्रवर्तकः वाचस्पतिमिश्रः, विवरणप्रस्थानस्य प्रवर्तकः प्रकाशात्मयतिः इति प्रसिद्धम् । वाचस्पतिमिश्रः शाङ्करभाष्यस्य "भामती" नाम्नी टीकायां स्वतन्त्रदृष्ट्या अनेकविषयान् विवेचयति । विवरणप्रस्थानं तु पद्मपादाचार्यस्य "पञ्चपादिका" तथा प्रकाशात्मयतेः "विवरणम्" इत्येतयोः आधारे विकसितम् ।

अविद्यायाः आश्रयविषये एतयोः प्रमुखो मतभेदः दृश्यते । भामतीकारस्य मते जीवः अविद्याया आश्रयः । जीवस्य संसारानुभवः प्रत्यक्षतया दृश्यते, अतः अविद्या जीवाश्रया इति युक्तम् । किन्तु विवरणप्रस्थानानुसारं ब्रह्म एव अविद्यायाः आश्रयः । तेषां मते सर्वस्य अधिष्ठानं ब्रह्म, अतः अविद्या अपि तस्मिन्नेव कल्पनीया ।

भामतीकारः विवरणमतस्य खण्डनं करोति । यदि ब्रह्म अविद्याश्रयः स्यात्, तर्हि शुद्धज्ञानस्वरूपस्य ब्रह्मणः अज्ञानसम्बन्धः कथं सम्भवेत्? ब्रह्म नित्यप्रकाशस्वरूपम् । प्रकाशस्वरूपे अन्धकारस्य आश्रयत्वकल्पना विरोधिनी इति तस्य तर्कः । अतः जीवाश्रयवादः अधिकसङ्गत इति भामतीकारः मन्यते ।

ज्ञानोत्पत्तिविषये अपि उभयोरन्तरं दृश्यते । भामतीप्रस्थानं मनोवृत्तिजन्यज्ञानं विशेषतया स्वीकुरुते । अन्तःकरणवृत्तिः ब्रह्माकारं प्राप्य अविद्यां नाशयति इति तस्य सिद्धान्तः । विवरणमतं तु चैतन्यस्य

स्वतःप्रकाशत्वम् अधिकं प्रतिपादयति । एते भेदाः अद्वैतपरम्परायां सूक्ष्मदार्शनिकविकासस्य द्योतकाः सन्ति ।

अविद्याया स्वरूपविषये उभयोरपि सामान्यतया अनिर्वचनीय-सिद्धान्तः स्वीकृतः । तथापि भामतीकारः अविद्यायाः भावरूपत्वं अधिकदृढतया प्रतिपादयति । संसारस्य अनुभवरूपसत्तां दृष्ट्वा सा केवलमभावरूपा न भवितुमर्हति इति तस्य अभिप्रायः ।

विवरणप्रस्थानमपि अद्वैतवेदान्ते महत्त्वपूर्णं स्थानं वहति । विशेषतः मधुसूदनसरस्वती, ब्रह्मानन्दसरस्वती-प्रभृतयः अनेके आचार्याः विवरणपरम्पराम् अनुसृतवन्तः । अतः अद्वैतवेदान्तः केवलम् एकरूपसिद्धान्तसमूहः न, अपि तु बहुविधदार्शनिक विचारपरम्पराणां समुच्चयः इति ज्ञायते"[१] ।

वाचस्पतिमिश्रः केवलं भाष्यव्याख्याता नासीत्, किन्तु महान् तर्कशास्त्रविदपि आसीत् । तेन न्यायदर्शनस्य तर्कपद्धतिः अद्वैतविचारे कुशलतया उपयोजिता । अतः भामतीग्रन्थः दार्शनिकगाम्भीर्येण समृद्धः इति विद्वद्भिः प्रशंस्यते ।

एवं भामतीप्रस्थानस्य अन्यप्रस्थानैः सह तुलना अद्वैतवेदान्तस्य आन्तरिकवैचारिकवैविध्यं वर्धयति । मतभेदेष्वपि सर्वेषां तात्पर्यं ब्रह्मैक्यसिद्धौ, अविद्यानिवृत्तौ, मोक्षप्राप्तौ च एकमेव अस्ति । अतः एते प्रस्थानभेदाः विरोधरूपाः न, अपि तु अद्वैतवेदान्तस्य दार्शनिकसमृद्धेः प्रमाणरूपाः इति मन्तव्यम् ।

## उपसंहारः

अद्वैतवेदान्तस्य समग्रदर्शने "अविद्या" इति तत्त्वं केन्द्रीयस्थानं वहति । जीवस्य संसारबन्धः, कर्तृत्वभोक्तृत्वाभि-मानः, जगतः सत्यत्वबुद्धिः च सर्वमपि अविद्यायाः परिणामरूपमेव इति अद्वैतवेदान्तिनः प्रतिपादयन्ति । अस्य अविद्यातत्त्वस्य सूक्ष्मतमं विश्लेषणं वाचस्पतिमिश्रविरचिते "भामती" ग्रन्थे दृश्यते । प्रस्तुते शोधप्रबन्धे भामती-प्रस्थाने निरूपितस्य अविद्यास्वरूपस्य तात्त्विकपरिशीलनं विस्तरेण कृतम् ।

भामतीकारः अविद्यां केवलं ज्ञानाभावरूपेण न स्वीकरोति, अपि तु भावरूपाम्,अनिर्वचनीयां च मन्यते । संसारस्य अनुभवरूपसत्ता, जीवस्य बन्धदशा, आत्मानात्मविवेकाभावः च तस्याः प्रभावरूपेण निरूपिताः । यदि अविद्या केवलमभावरूपा, तर्हि जगदनुभवस्य उपपत्तिः न सम्भवेत् इति तेन युक्तिपूर्वकं प्रतिपादितम् ।

अविद्याया आश्रयविषये भामतीकारस्य जीवाश्रयवादः अद्वैतपरम्परायां विशेषमहत्त्वं प्राप्नोति । संसारदुः-खस्य अनुभवकर्ता जीवः एव, अतः अविद्याया आश्रयत्वमपि तस्मिन्नेव युक्तम् इति तस्य सिद्धान्तः । ब्रह्मणः नित्यशुद्धज्ञानस्वरूपत्वात् तत्र अविद्यायाः आश्रयत्वं न सम्भवति । एषः पक्षः विवरणप्रस्थानात् भिन्नः सन् अद्वै-तविचारस्य सूक्ष्मतां प्रकाशयति ।

आधुनिकपरिप्रेक्ष्येऽपि अविद्याविचारस्य विशेषप्रासङ्गिकता दृश्यते । मानवः अद्य बहिर्मुखजीवनव्यस्ततया स्वस्वरूपं विस्मृतवान् अस्ति। आत्मविस्मरणमेव दुःखस्य मूलम् इति वेदान्तदृष्ट्या स्वीक्रियते। अतः आत्मज्ञानप्रधानः भामतीप्रस्थानस्य अविद्यावादः आधुनिकमानवस्य आध्यात्मिकजीवने मार्गदर्शकरूपेण भवितुमर्हति ।

एवं भामतीप्रस्थाने प्रतिपादितम् अविद्यातत्त्वम् अद्वैतवेदान्तस्य हृदयस्थं दार्शनिकचिन्तनम्। तस्य सम्यगध्ययनं विना अद्वैतवेदान्तस्य गूढार्थः पूर्णतया न अवगन्तुं शक्यते । अतः भामतीप्रस्थानस्य अविद्याविचारः न केवलं शास्त्रीयदृष्ट्या, अपि तु आध्यात्मिकजीवनदृष्ट्यापि परमोपयोगी इति निष्कर्षः ।

[१]अमलानन्दस्य "कल्पतरु", अप्पय्यदीक्षितस्य "परिमल" इत्यादयः ग्रन्थाः भामतीपरम्परायाः प्रभावं विस्तारयन्ति ।
— अमलानन्दः, कल्पतरुः ; अप्पय्यदीक्षितः, परिमलः ।

 ISSN : 2249-538X

**परामृष्टाः ग्रन्थाः**


१. शाङ्करभगवत्पादः — ब्रह्मसूत्रभाष्यम्

२. वाचस्पतिमिश्रः — भामती

३. अमलानन्दः — कल्पतरुः

४. अप्पय्यदीक्षितः — परिमलः

५. धर्मराजाध्वरीन्द्रः — वेदान्तपरिभाषा

६. सदानन्दयोगीन्द्रः — वेदान्तसारः

७. मधुसूदनसरस्वती — अद्वैतसिद्धिः

८. सुरेश्वराचार्यः — नैष्कर्म्यसिद्धिः

९. उपनिषदः (ईश, केन, माण्डूक्य, तैत्तिरीय, छान्दोग्य)

१०. गीता शाङ्करभाष्यसमेता

# विवेकमार्तण्डग्रन्थानुसारेण सृष्टिविमर्शः

श्री सुशान्त - हालदारः*
शोधच्छात्रः, अद्वैत-वेदान्त :,
राष्ट्रीयसंस्कृतविद्यापीठम्,
तिरुपतिः

*लेखसारः – पुण्यपापात्मककर्मबन्धमयी सृष्टिः भवति, संहारोऽपि तन्मय एव भवति।[१] यथा-* ***स एवमालोच्य तपस्तप्त्वा प्राणिकर्मादिनिमित्तानुरूपमिदं सर्वं जगद्देशतः कालतो नाम्ना रूपेण च यथानुभवं सर्वैः प्राणिभिः सर्वावस्थैरनुभूयमानमसृजत सृष्टवान्।***[२] ***"स यथाकर्मा यथाश्रुतं भवति"***[३]***, "वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति"***[४]***, "कर्मणां परिणामेन देहयोगः पुनः पुनः"***[५]***, "कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये"***[६]***, "येन योनिं यथा कर्म गुणसंयोगतः पुनः"***[७]*, वेदपुराणेतिहासस्मृतिभाष्यग्रन्थादपि ज्ञातुं शक्यते यत् कर्मबन्धमयी सृष्टिः भवति इति। तस्मात् ज्ञातुं शक्यते यत् आत्मनः भिन्नः संसारः इति, तस्मात् तस्य अनित्यता। तदर्थं शोधलेखोऽयं प्रस्तूयते।*

***कूटशब्दाः*** *– सृष्टिः, ब्रह्म, आत्मा, विवर्तः, परिणामः, अविद्या।*

## उपक्रमः

वेदान्तशास्त्रस्य मुख्यलक्ष्यं ब्रह्मज्ञानप्राप्तिः, **"ब्रह्मविद् आप्नोति परम्"**[८] इति वाक्येन ज्ञायते। किन्तु ब्रह्म किम्? तस्य स्वरूपं कथं ज्ञायते? इत्यस्य निरूपणार्थं सृष्टिवाक्यानि उपनिषत्सु उपन्यस्तानि। **"सत्यं ज्ञानमनन्तं ब्रह्म"**[९] इति ब्रह्मणः स्वरूपलक्षणं उक्तम्। अत्र **"अनन्तम्"** इति पदस्य यथार्थबोधार्थं सृष्टिविवरणम् आवश्यकं भवति। यतः अनन्तत्वं त्रिविधं- देशतः, कालतः, वस्तुतश्च। एतत् स्पष्टयितुं दृष्टान्तरूपेण आकाशस्य उदाहरणं दत्तम्। आकाशः देशतः अनन्तः, किन्तु सः कार्यत्वात् कालतः वस्तुतश्च अनन्तः न भवति। ब्रह्म तु न कार्यम्, किन्तु सर्वकार्यकारणम्। अतः तस्य न केवलं देशतः, अपि तु कालतः अपि अनन्तत्वं सिद्ध्यति। पुनः, वस्तुतः अपि अनन्तत्वं तस्मात्, यतः ब्रह्मणः भिन्नं किञ्चिद् वस्तु नास्ति- सर्वं तस्मात् एव उत्पन्नम्। यदि किञ्चित् ब्रह्मणः भिन्नं स्यात्, तर्हि तदेव तस्य अन्तः स्यात्। किन्तु यतः सर्वं ब्रह्मणः कार्यम्, तथा च कार्यं कारणात् पृथक् नास्ति (मृत्तिकादृष्टान्तवत्)[१०], अतः ब्रह्म अनन्तम्। अतः सृष्टिवाक्यानां प्रयोजनं न केवलं जगत् उत्पत्तिवर्णनम्, अपि तु ब्रह्मणः अनन्तत्वस्य सिद्ध्यर्थम्। एतेन ब्रह्मणः सत्यत्वं, सर्वकारणत्वं, सर्वव्यापकत्वं च प्रतिपाद्यते। तस्मात् सृष्टिवाक्यं वेदान्ते ब्रह्मस्वरूपनिर्धारणार्थम् अत्यावश्यकं भवति।

---

***सम्पर्कसूत्रम्** - 8479008690, Email- susantahalder92@gmail.com

[१]कर्मबन्धमयी सृष्टिः संहारश्चैव तन्मयः। वि. मा. ५/६

[२]तैत्तिरीयोपनिषत् शाङ्करभाष्यम् २/६

[३]बृहदारण्यक उपनिषद् 4.4.5

[४]ब्रह्मसूत्रम्

[५]विष्णुपुराणम् 1.2.6

[६]श्रीमद्भागवतम् ३/३१/१

[७]श्रीमद्भागवतम् ३/३१/४४

[८]तै.उ. २/१/१

[९]तै.उ. २/१/१

[१०]वाचरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। छा. उ. ६/१/४

## सृष्ट्युत्पत्तिनिरूपणम्-

तत्र सृष्ट्यारम्भकाले परमात्मा सृज्यमाणप्रपञ्चवैचित्र्यहेतुप्राणिकर्म कर्मसहकृतः अपरिमितचिच्छक्तिविशिष्टमाया-सहितः, नामरूपात्मकं समस्तं प्रपञ्चमादौ बुद्धावाकलय्येदमेवं करिष्यामि, इदमेवं करिष्यामि, इत्यादिसङ्कल्पम् अकरोत्। **"तदैक्षत बहुस्यां प्रजायेय"**[१], **"सोऽकामयत बहुस्यां प्रजायेय"**[२] इति। **"तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निरग्नेरापः, अद्भ्यः पृथिवी"**[३] इत्यादिश्रुत्यनन्तरम् आदौ आकाशस्य सृष्टिः श्रूयते। तस्मादाकाशादीनि भूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि जायन्ते। तत्र आकाशस्य गुणः शब्दः। शब्दस्पर्शौ वायोः। तेजसस्तु शब्दस्पर्शरूपाणि। अपां तु शब्दस्पर्शरूपरसाः। शब्दस्पर्शरूपरसगन्धाः पृथिव्याः भवन्ति।

## विवेकमार्ताण्डग्रन्थे सृष्टितत्त्वनिरूपणम्

ग्रन्थे आदौ पञ्चमहाभूतानां सृष्टिक्रमस्य आदितत्त्वं निरूपितम्। सर्वेषां भूतानां मूलकारणरूपेण आकाशः प्रथमतया स्वीकृतः। आकाशस्य विशेषता निश्चलता अचलत्वं, निरवयवत्वं च। अस्य तत्त्वस्य प्रधानो गुणः "शब्दः" इति निर्दिष्टः, यतः शब्दस्य आश्रयः आकाशमेव भवति। अन्येषां भूतानां गुणाः स्वोत्तरतत्त्वैः सह संबध्यन्ते, किन्तु शब्दः केवलं आकाशगुणः। अयं श्लोकः सूचयति यत् जगतः सर्वव्यवहारः ध्वन्याधारितः अस्ति, तथा च सृष्टेः प्रारम्भः सूक्ष्मतमेन तत्त्वेन आकाशेन सम्भवति। उच्यते-

**सर्वेषामादिराकाशं निश्चलं शब्दलक्षणम्।**[४] इति॥

सृष्टिलययोः मूलम् आकाशः इति प्रतिपादितम्। सर्वं जगत् आकाशात् उत्पद्यते, अन्ते तत्रैव लीयते। अतः साधकः आकाशं आश्रयेत् नाम तस्य ध्यानं कुर्यात्।[५] तत्त्वध्यानस्य फलमपि निरूपितं, यथा- आकाशतत्त्वं सर्वत्र व्याप्यरूपेण तिष्ठति- बहिः (बाह्यजगति) तथा अन्तः (हृदयाकाशे) अपि। तत् शुद्धं, निरालम्बं, निरामयं (दोषरहितं) च अस्ति। साधकः यदि मनसा तादृशं व्योम निरन्तरं भावयति, तर्हि सः देहाभिमानं त्यक्त्वा सूक्ष्मतत्त्वे स्थितिं प्राप्नोति। जन्ममरणरूपः संसारबन्धः अज्ञानजन्यः; आकाशध्यानेन तस्य निवृत्तिः भवति। अयं श्लोकः अद्वैतं प्रेरयति, यत्र साधकः स्वात्मानं सर्वव्यापकब्रह्मरूपेण अनुभवति।[६]

तदनु आकाशाद् वायोः उत्पत्तिः प्रतिपाद्यते। वायुः गतिशीलतायाः प्रतीकः अस्ति, अतः "चञ्चलः" इति विशेषणेन तस्य स्वभावः निरूपितः। वायोः मुख्यगुणः "स्पर्शः" इति, यः आकाशस्य शब्दगुणेन सह संयुक्तः भवति। अनेन ज्ञायते यत् कार्ये कारणगुणानामपि अनुवृत्तिः भवति। वायुः जीवनस्य आधारभूतः प्राणस्वरूपश्च। सः सूक्ष्मरूपेण सर्वत्र व्याप्यतया स्थितः। यथोच्यते-

**जायते वायुराकाशाच्चञ्चलस्पर्शलक्षणः॥**[७] इति॥

---

[१]छा.उ. २-३

[२]तै.उ.१-२-६

[३]तै.उ. २/१/१

[४]वि.मा. ५/७

[५]आकाशात् सर्वमुत्पन्नं जगदेतच्चराचरम्।
लीयते पुनराकाशे तस्मादाकाशमाश्रयेत्॥ वि.मा. ५/१७

[६]बहिरन्तःस्थितं शुद्धं निरालम्वं निरामयम्।
भावयन्मनसा व्योम मुच्यते जन्मबन्धनात्॥ वि.मा. ५/१८

[७]वि.मा. ५/७

वायुध्यानात् व्यापकत्वं साधकः प्राप्नोति । अत्र वायुतत्त्वस्य ध्यानफलम् वर्णितम् । वायुः "जगतः प्राणः"- सर्वजीवनस्य आधारभूतः प्राणशक्तिरूपः अस्ति । सः सर्वं धारयति, सर्वत्र सञ्चरति, चैतन्यस्य वाहकः च । "परमानन्दसंस्पर्शकारणम्" इत्यनेन वायोः स्पर्शेन जीवनानुभवः, आनन्दः च सम्भवति । साधकः यदि हृदये वायुतत्त्वं भावयति, तर्हि सः स्वात्मानं सर्वगतप्राणरूपेण अनुभवति । सः आकाशवद् निर्बन्धः, स्वच्छन्दगामी च भवति ।[1]

इदानीम् आकाशवायुभ्यां तेजसः उत्पत्तिः भवति । तेजः प्रकाशरूपं तत्त्वं, यत् दृश्यजगतः कारणम् । तस्य विशेषगुणः रूपम् । यदा आकाशस्य वायोः अनन्तरं प्रकाशस्वरूपं तेजः प्रकटते । यथोच्यते-

**नभस्समीरणाभ्यां स्यात् तत् तेजो रूपलक्षणम् ।**[2] इति ॥

तेजोध्यानात् तेजस्वी भवति साधकः । अग्नितत्त्वस्य ध्यानफलं भवति- अनेकसूर्यसमप्रभं, अत्यन्ततेजस्वि अग्निरूपं चिन्तनीयम् । एतत् तेजः त्रिभुवनं प्रकाशयति । अग्नितत्त्वस्य साक्षात्कारात् भौतिकाग्निः तं न बाधते, अपि तु सः स्वयं तेजोमयः भवति । आत्मबलवृद्धिं, तेजस्वित्वं, निर्भयतां च ददाति ।[3]

इदानीं त्रितत्त्वसम्बन्धेन जलस्य उत्पत्तिः भवति । अस्य प्रमुखः गुणः रसः । यथोच्यते-

**एवमादित्रयादापः सम्भूता रसलक्षणाः ॥**[4] इति ॥

जलतत्त्वस्य ध्यानफलं भवति तस्य साधकस्य वारिभयं न भवति । यदि हृदये एतादृशं अमृतमयं जलतत्त्वं भावयति, तर्हि तस्य जलसम्बन्धीनि भयानि निवर्तन्ते ।[5]

नभोवाताग्निवारिभ्यः पृथिव्याः उत्पत्तिः भवति । पृथ्वी स्थूलतमं तत्त्वं, तस्य गुणः गन्धः । गन्धग्रहणं केवलं स्थूलद्रव्येषु सम्भवति, अतः पृथ्वी सर्वाधिकगुणसम्पन्ना । सा विश्वम्भरा नाम सर्वभूतानां धारयित्री । अस्यां सर्वे प्राणिनः जीवनं यापयन्ति । यथोच्यते-

**नभोवाताग्निवारिभ्यो मेदिनी गन्धलक्षणा । आधारः सर्वभूतानां प्राप्ता विश्वम्भरा ततः ॥**[6] इति ॥

अत्र पृथिवीतत्त्वस्य ध्यानफलमपि निरूपितम् । पृथिवी स्थैर्यस्य, गुरुत्वस्य, आधारत्वस्य च प्रतीकभूता अस्ति । साधकः यदि हृदये स्थिरां, विशालां, धैर्यपूर्णां पृथिवीं भावयति, तर्हि तस्य चित्तम् अचलम्, धैर्ययुक्तं च भवति । भौतिकजीवनसम्बन्धीनि भयानि नश्यन्ति ।[7]

पञ्चतत्त्वानां गुणानां क्रमवृद्धिः निरूपिता । प्रत्येकं तत्त्वं स्वकीयगुणेन सह पूर्वतत्त्वगुणान् अपि धारयति । आकाशे केवलं शब्दः, वायौ शब्दस्पर्शौ, तेजसि शब्दस्पर्शरूपाणि, जले चतुर्गुणाः, पृथिव्यां पञ्चगुणाः सब्दस्पर्शरूपरसगन्धाः । अयं क्रमः कारणकार्यभावस्य उदाहरणम् । सूक्ष्मात् स्थूलतां प्रति गच्छता जगता

[1]परमानन्दसंस्पर्शकारणं विश्वधारणम् ।
भावयन् जगतः प्राणं वायुवत् खेचरो भवेत् ॥ वि.मा. ५/१९

[2]वि.मा. ५/८

[3]अनलार्कशताकारं प्रज्वलद् भुवनत्रयम् ।
धारयन् हृदये तेजो वह्निना न स दह्यते ॥ वि.मा. ५/२०

[4]वि.मा. ५/८

[5]पीयूषाकुलकल्लोलमालाप्लावितभूतलम् ।
हृदये भावयेत् तावत् तस्य वारिभयं कुतः ॥ वि.मा. ५/२१

[6]वि.मा. ५/९

[7]अभूतलभराक्रान्तभूतलं भूतसङ्कुलम् ।
हृदये भावयेन्नित्यं तस्य नो पार्थिवं भयम् ॥ वि.मा. ५/२२

 ISSN : 2249-538X

गुणसमृद्धिः अपि वर्धते । एषा व्यवस्था सांख्यदर्शने अपि प्रसिद्धा । अनेन ज्ञायते यत् प्रत्येकं तत्त्वं अन्येषां तत्त्वानां समन्वयेन कार्यं करोति । यथोच्यते-

**पञ्चानामपि तत्त्वानामेकैकश्च निजो गुणः ।**
**अत्रैकद्वित्रिचत्वारो दृश्यन्ते योनिजा गुणाः ॥**
**मरुतो योनिराकाशं वह्नेरेतद् द्वयं भवेत् ।**
**एतत्त्रयमपां प्रोक्तं क्षितेरेतच्चतुष्टयम् ॥**
**एवमेकगुणं व्योम द्विगुणो वायुरुच्यते ।**
**तथैव त्रिगुणं तेजो भवन्त्यापश्चतुर्गुणाः ॥**
**शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ।**
**एतत्पञ्चगुणा पृथ्वी ब्रह्मणाधिष्ठिता पुरा ॥**[1] इति ॥

## पञ्चीकरणम्-

स्थूलभूतानि तु पञ्चीकृतानि । 'पञ्चीकरणम्' इति शब्दः पञ्चशब्दात् अभूततद्भावे **'च्वि'** प्रत्यये तथा **'कृ'** धातोः 'ल्युट्' प्रत्यययुक्ते सति निष्पन्नः भवति । अर्थात् यत् तु पञ्च नास्ति तस्मै पञ्च इति समुहरूपप्रदानस्य नाम 'पञ्चीकरणम्' अस्ति । पञ्चभूतेषु पञ्चभूतानां मेलनं पञ्चीकरणम् इत्युच्यते । वस्तुतः पञ्चीकरणस्य अर्थः भवति आकाशादिपञ्चसूक्ष्मभूतानां प्रत्येकं समानतया भागद्वयं कृत्वा तेषां दशधा विभाजनम्, पुनः तस्मिन् दशभागे प्रथमस्य पञ्चभागस्य प्रत्येकं चतुर्धा विभज्य, पुनः तस्मिन् चतुर्षु भागेषु एकमेकं भागं स्वस्य भागार्धं परित्यज्य अन्येषां चतुर्णां भागानाम् अपरि अर्धभागे मेलनस्य नाम एव पञ्चीकरणम् । अर्थात् प्रत्येकस्मिन् भूते अन्येषां चतुर्णां भूतानां मिश्रणं नाम भवति पञ्चीकरणम् । पञ्चीकरणप्रक्रियाविषये विद्यारण्यस्वामिविरचितपञ्चदशीग्रन्थे -

**द्विधा विधाय चैकेकं चतुर्धा प्रथमं पुनः ।**
**स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते** ॥ इति ॥

अस्याभिप्रायः भवति यत् प्रत्येकं भूतं भागद्वये विभज्य प्रथमभागद्वयं चतुर्षु भागेषु विभज्य अपरेऽस्मिन् चतुर्णां भूतानां द्वितीयभागे संयोगे कृते सति एतानि आकाशादिमहाभूतानि पञ्चात्मकानि भवन्ति । एतदेव पञ्चीकरणं भवति अर्थात् पञ्चीकृताकाशे आकाशस्य एकार्धभागः वायोः एकाष्टमांशभागः, अग्नेः एकाष्टमांशभागः, जलस्य एकाष्टमांशभागः, पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते । पञ्चीकृतवायौ वायोः एकार्धभागः, आकाशस्य एकाष्टमांशभागः अग्नेः एकाष्टमांशभागः जलस्य एकाष्टमांशभागः पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते । पञ्चीकृत अग्नौ अग्नेः एकार्धभागः, आकाशस्य एकाष्टमांशभागः, वायोः एकाष्टमांशभागः, जलस्य एकाष्टमांशभागः, पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते । पुनः पञ्चीकृतजले जलस्य एकार्धभागः, आकाशस्य एकाष्टमांशभागः, वायोः एकाष्टमांशभागः, अग्नेः एकाष्टमांशभागः, पृथिव्याः एकाष्टमांशभागश्च विद्यन्ते । पञ्चकृतपृथिव्यां पृथिव्याः एकार्धभागः, आकाशस्य एकाष्टमांशभागः, वायोः एकाष्टमांशभागः, अग्नेः एकाष्टमांशभागः, जलस्य एकाष्टमांशभागश्च विद्यन्ते । पञ्चीकरणप्रक्रिया तथा सृष्टिप्रक्रिया स्पष्टीक्रियते -

- **आकाशः**- १/२ आकाशः+ १/८ तेजः+ १/८ वायुः+ १/८ जलम् + १/८ पृथिवी- शब्दः

[1] वि.मा. ५/१०-१३

- **वायुः**- १/२ वायुः + १/८ तेजः+ १/८ आकाश+१/८ जलम्+ १/८ पृथिवी - शब्दस्पर्शौ
- **तेजः**- १/२ तेजः + १/८ आकाशः+ १/८ वायुः+ १/८ जलम्+ १/८ पृथिवी- शब्दस्पर्शरूपाणि
- **जलम्**- १/२ जलम् + १/८ तेजः+ १/८ वायुः+ १/८ आकाशः+ १/८ पृथिवी- शब्दस्पर्शरूपरसाः
- **पृथिवी**- १/२ पृथिवी+ १/८ तेजः+ १/८ वायुः+ १/८ जलम् + १/८ पृथिवी- शब्दस्पर्शरूपरसगन्धाः

पञ्चीकरणप्रक्रियायां प्रत्येकं सूक्ष्मभूतानाम् एकम् एव रूपं भवति। वस्तुतः एतत्प्रक्रियानुसारं आकाशः न केवलम् आकाशः अपि तु तत्र अर्धभाग आकाशस्य तथा अन्येषां चतुर्णां भूतानाम् एकाष्टमांशभागसंयोगेन स्थूलः आकाशः जायते। अनेन प्रकारेण अन्येषां चतुर्णां भूतानामुत्पत्तिः भवति इति पञ्चीकरणप्रक्रियया ज्ञायते। अस्याः पञ्चीकरणप्रक्रियायाः अयमपि एकः परिणामो भवति यत् पूर्वभूतस्य गुणः उत्तरेषु भूतेषु समागच्छति। परन्तु यस्मिन् भूते यस्य अंशस्य अधिकं वा प्राधान्यं भवति तस्याधारेण तस्येव नामकरणं दीयते।

जगतः उत्पत्तौ प्रलये च एका सुव्यवस्था परिदृश्यते अत्र। प्रलयः सृष्टेः विपरीतक्रिया वर्तते इति अत्र प्रतिपाद्यते। जगत् मायायाः उत्पद्यते मायया विलीयते। माया ईश्वरस्य शक्तिः विद्यते। अतः वक्तुं शक्यते यत् जगत् ईश्वरात् उत्पद्यते ईश्वरे एव लीयते। तथा च विवेकमार्ताण्डे-

**पृथ्वी शीर्णा जले मग्ना जलं ग्रस्तं महाग्निना।**
**वायुना शमितं तेजो व्योम्नि वातो लयं ययौ॥**
**आकाशात् सर्वमुत्पन्नं जगदेतच्चराचरम्।**
**लीयते पुनराकाशे तस्मादाकाशमाश्रयेत्॥**[1] इति॥

ईश्वरः जगतः कर्ता धर्ता संहर्ता च भवति। ईश्वरः आकाशं वायुम् अग्निं जलं पृथ्वीं च क्रमशः निरमात्। आकाशः एकः जडः पदार्थः वर्तते। आकाशः अनित्यः अस्ति, आकाशस्योत्पत्तिमत्त्वात्। आकाशात् वायुरुत्पन्नः, वायोः अग्निः बभूव, अग्नेः जलं बभूव, जलात् पृथ्वी सञ्जाता। सूक्ष्ममहाभूतानामुत्पत्तिः जाता। तथैव पृथिवी जले लीयते, जलम् अग्नौ, अग्निः वायौ, वायुः आकाशे। एषः क्रमः सृष्टेः प्रतिलोमगमनम्। अन्ततः सर्वं सूक्ष्मतमे आकाशे विलीयते।

उपनिषत्सु पञ्चतन्मात्राणाम् उल्लेखः वर्तते। सृष्टेः क्रमः इत्थं विविच्यते अव्याकृतनामरूपयोः अधिष्ठात्री या माया, तस्याः मायातः शब्दतन्मात्रं जायते। शब्दतन्मात्रम् आकाशस्य सूक्ष्मतत्त्वं वर्तते। अस्मिन् केवलं शब्दगुणो भवति। अस्मात् सूक्ष्मवायुः स्पर्शतन्मात्रं जायते। अस्मात् सूक्ष्माग्निः रूपतन्मात्रमभिजायते। तस्मात् सूक्ष्मजलं नाम रसतन्मात्रं सञ्जातम्। ततः सूक्ष्मा पृथ्वी नाम गन्धतन्मात्रं सञ्जायते। आकाशस्य गुणः शब्दः एवः। वायोः द्वौ गुणौ शब्दः स्पर्शश्च वर्तेते। अग्नौ शब्दस्पर्शरूपगुणाः सन्ति। जले शब्दस्पर्शरूपरसाः चत्वारो गुणाः सन्ति। पृथिव्यां शब्दस्पर्शरूपरसगन्ध इति पञ्चगुणाः सन्ति। महाभूतस्य उत्पत्तिः एषां सूक्ष्मभूतानां पञ्चीकरणप्रक्रियया भवति। प्रत्येकं सूक्ष्मभूतं भागद्वये विभक्तं भवति। प्रत्येकार्धभागोऽपि चतुर्षु भागेषु विभक्तः भवति। एकस्य सूक्ष्मभूतं भागद्वये विभक्तं भवति। एकस्य सूक्ष्मभूतस्य अंशिभागः अवशिष्टसूक्ष्मभूतस्य प्रत्येकम् अष्टमांशेन संयुक्तं सत् महाभूतम् उत्पद्यते।

[1] वि.मा. ५/१६,१७

 ISSN : 2249-538X

अत्र पञ्चभूतेषु देवतानां अधिष्ठानमपि वर्णितम् । पृथिव्यां ब्रह्मा सृष्टिकर्ता, जले विष्णुः पालनकर्ता, अग्नौ रुद्रः संहारकर्ता, वायौ ईश्वरः नियन्ता, आकाशे सदाशिवः परतत्त्वस्वरूपः ।[1]

## उपसहारः-

व्यवहारभूमावविद्यादशायां सृष्टिरिति स्वीक्रियतेऽस्माभिः । सा च सृष्टिः सकलजीवीयकर्मानुसारेण जीवभोगार्थमिति स्थितैव वर्तते । किन्तु तत्त्वबोधनाय सृष्टिवर्णनं परतत्त्वबोधप्रकरणे सर्वत्रोपनिषदि मुमुक्षोः तत्त्वबोधोपायो भवतीति वयं जानीमः, न तत्र परमतात्पर्यं विद्यते, सृष्टिज्ञानस्य स्वतन्त्रस्य कस्मिन्नपि पुरुषार्थेऽनुपयोगात् । तस्य पुरुषार्थोपयोगितया श्रुतिषु कुत्राप्यविहितत्वात् । तत्र परमतात्पर्याभावादेव सृष्टिः श्रुतिषु क्वचित् क्रमेण, क्वचित् व्युत्क्रमेण, क्वचिदक्रमेण युगपदपि वर्णिता अस्ति । श्रुतिक्रमेण सर्वत्र क्रमनिर्णयेऽपि सृष्टिज्ञानस्य नान्यत्फलमस्ति । अतः स्वतन्त्रमोक्षफलवद्ब्रह्मज्ञानाङ्गतया सृष्टिज्ञानमुपयोगि भवेदिति तत्फलेनैव फलवत् परम्परया विद्यते । अथवा निष्फलमेव स्वार्थे वर्तते इति स्वीकुर्मः । सृष्टेः परमार्थदशायां मिथ्यात्वोक्त्या निराकरणात् मिथ्यासृष्टेः पुरुषार्थो न सुवचः इति । सृष्टिश्च वेदान्ते ब्रह्मणः स्वरूपेणाप्रच्युतस्यैव सतो विचित्रपरिणामः विद्यते । स चायथार्थ इति सूत्रभाष्ये वर्णितम् । अयमेव पञ्चदशीभामत्यादिटीकासु विवर्त इति नाम्ना व्यवहृतः । दृष्टिसमसमया सृष्टिः भवति, दृष्टिरेव सृष्टिरिति सिद्धान्तलेशसंग्रहे दर्शिता या सा द्विविधाऽपि नाङ्गीक्रियतेऽस्माभिः, भाष्ये कुत्राप्यनुक्तेः, सृष्टिदृष्टिरित्येवैका व्यवहारभूमौ यथायथं स्वीकृता सूत्रे भगवत्पादभाष्ये च । यथानुभवमापामरसाधारणी सृष्टदृष्टिरेव बहुसम्मता अबाधिता, यावद्विद्योदयं न भवति, दृष्टिसृष्ट्यङ्गीकारः परं परमहंसानां जीवन्मुक्तानां कदाचित् सम्भवति । बद्धानां तु नोचितः, अन्यथा यावन्मोक्षं लिङ्गशरीरस्वीकृतिसूत्रं **'तदापीतेः संसारव्यपदेशात्'** इतीदं बाधितमेव स्यात् । तस्मादस्ति आवश्यकता सृष्टिविमर्शस्य ।

## परामृष्टाः ग्रन्थाः


१. विवेकमार्ताण्डः

२. विष्णुपुराणम्

३. पञ्चदशी

४. ब्रह्मसूत्रशाङ्करभाष्यम्

५. तैत्तिरीयोपनिषत्

६. बृहदारण्यकोपनिषत्

७. छान्दोग्योपनिषत्


[1] क्षितौ ब्रह्मा जले विष्णुस्तथा रुद्रो हुताशने ।
ईश्वरः पवने देवो व्योम्नि देवः सदाशिवः ॥ वि.मा. ५/१४

# अद्वैतवेदान्ते साक्षिस्वरूपस्य विवेचनम्

डा. राजेशः प्रामाणिकः
सहायकाचार्यः,
कर्णाटक-आयुर्वेद-महाविद्यालयः ,
मङ्गलूरु,

***लेखसारः*** – *अद्वैतवेदान्तस्य विविधसम्प्रदायेषु साक्षिस्वरूपस्य विस्तृतव्याख्यानात्प्राक् 'साक्षी' इति शब्दस्य मूलोत्पत्तेः विभिन्नभारतीयदर्शनेषु च साक्षितत्त्वस्य सामान्यचर्चा अत्यन्तमपेक्षिता वर्तते। व्युत्पत्तिदृष्ट्या साक्षिन्निति शब्दः संज्ञावाचकः शब्दोऽस्ति, यस्य निष्पत्त्यर्थं पाणिनेः महत्त्वपूर्णं सूत्रम् अस्ति 'साक्षाद् द्रष्टरि संज्ञायाम्[१] ।' अस्मिन् सूत्रे साक्षादिति शब्देन 'इनि[२] ' प्रत्यययोगात्साक्षीति शब्दस्य निष्पत्तिर्भवति । साक्षात् अर्थात् यः अपरोक्षतया द्रष्टा स एव साक्षी इति कथ्यते । एवं प्रत्यक्षदर्शिनः पुरुषस्य संज्ञैव साक्षीति भवति । साक्षिणः लक्षणं तावत्- 'अकर्तृत्वे सति द्रष्टृत्वं हि साक्षित्वम्' ।[३]*

*सामान्यतया लोके दृश्यते यत् यदा द्वयोः व्यक्त्योः मध्ये कस्यचित्प्रकारस्य विवादः भवति तदा तस्य विवादस्य साक्षी सः तृतीयः पुरुषः भवति यः तस्य विवादस्य द्रष्टा ज्ञाता स्वयञ्च उदासीनः भवति। केवलम् उदासीनतैव साक्षिणः लक्षणं भवितुं नार्हति यतः विवादकाले तस्य समीपे वृक्षाः लतादयः गृहादीनि च उदासीनभावेन एव स्थितानि भवन्ति। तर्हि तेष्वपि साक्षित्वस्य प्रयोगः कर्तव्यः स्यात्। तथैव यदि केवलं 'द्रष्टृत्वम्' एव लक्षणत्वेन स्वीक्रियते तर्ह्यपि न तत् सम्यक् भवति। यतः तदा विवादकारिणोरपि द्रष्टृत्वात् कारणात्साक्षिण्यन्तर्भावः स्यात्। किन्तु तावपि साक्षिणौ वक्तुं न शक्येते। अतः 'यः बोद्धा सन्नपि उदासीनः तिष्ठति' इति लक्षणमेव यथार्थम् ।*

*धर्मशास्त्रे स्वीकृतं यन्न्यायालये यः पुरुषः वादिप्रतिवादिनोर्विषये प्रत्यक्षज्ञानं प्रददाति स एव साक्षी भवति । एवं प्रत्यक्षदर्शी साक्षीति कथ्यते। यदि वयं प्राचीनभारतीयन्यायव्यवस्थां प्रत्यवधानं दद्मस्तर्हि तत्र साक्षिणः भूमिका अत्यन्तं महत्त्वपूर्णा आसीत् । यतः साक्षी एव न्यायनिर्णयस्य आधारः मेरुदण्डश्च आसीत् । धर्मशास्त्रेषु मनुस्मृतिः सर्वापेक्षया प्राचीना यत्र साक्षिणः संज्ञा प्रदत्ता अस्ति-*

*समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति । तत्र सत्यं ब्रुवन साक्षी धर्मार्थाभ्यां न हीयते ॥*
*साक्षी दृष्टश्रुतादन्यद् विब्रुनार्थसंसदि । अवाङ नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ॥*
*यत्रानिबद्धोपीक्षेत श्रुणुयाद् वापि किञ्चन । पृष्टस्तत्रापि तद् ब्रूयाद् यथादृष्टं यथाश्रुतम् ॥*
*एकोऽलुब्धश्च साक्षी स्माद् बह्व्यः शुच्योऽपि न स्त्रियः । स्त्रीबुद्धेरस्थिरत्वात् दोषैश्चान्येपि ये वृताः ॥*
*सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ।[४]*

***कूटशब्दाः*** – *साक्षी, ब्रह्मसाक्षी, आत्मसाक्षी, ज्ञानसाक्षी, तत्त्वसाक्षी, ईश्वरसाक्षी, जीवसाक्षी, आत्मेश्वरजीवसाक्षिणां पारस्परिकसम्बन्धः ।*

---

***सम्पर्कसूत्रम्** - 8101005500, Email- pramanikr071@gmail.com

[१]पा० सू० 5/2/91
[२]महाभाष्यम्, खलादिभ्य इनिः - 1474
[३]अद्वैतदीपिका, पृ० 295
[४]मनुस्मृतिः, 8/74-79

**प्रधानशब्दसमूहः-**

**साक्षिविषयिणी धारणा-**

साक्षितत्त्वस्य धारणा न केवलं शाङ्कराद्वैतवेदान्ते अपि तु अन्येष्वपि भारतीयदर्शनेषु यथा सांख्ये, योगे, विशिष्टाद्वैतवेदान्ते, द्वैताद्वैतवेदान्ते, उपनिषत्सु च प्राप्यते। साक्षिणः सामान्यधारणा सांख्ययोगदर्शने तत्त्वमीमांसात्मकज्ञानप्रक्रियायाः स्रोतत्वेन स्वीकृता। सांख्यदर्शने त्रिगुणविपर्यासमाधारीकृत्य साक्षित्वं प्रतिष्ठाप्यते। तत्रोक्तम् 'तस्माच्च विपर्यासात् सिद्धं साक्षीत्वमस्य पुरुषस्य कैवल्यं माध्यस्थ्यं द्रष्टत्वमकर्तृभावश्च।'[१]

सङ्घातरूपेभ्यः त्रिगुणेभ्यः विपरीतरूपेण निर्गुणत्वात्पुरुषस्य साक्षित्वं कैवल्यम् उदासीनता द्रष्टृत्वम् अकर्तृत्वं च सिद्ध्यति। प्रकृतेः प्रवृत्तिः निवृत्तिश्च उभे अपि पुरुषाधीने स्तः। अतः पुरुषः एतयोः अवस्थयोः साक्षी भवति। स एव साक्षी यः प्रदर्शितं विषयं केवलं प्रत्यक्षीकरोति। सांख्यदर्शने साक्षिणः स्वरूपम् अद्वैतवेदान्तस्य साक्षिवदेव सर्वानुभवानां प्रकाशकरूपेण निरपेक्षद्रष्टृरूपेण च परिगण्यते।

योगसूत्रभाष्ये च मूलतः साक्षीति शब्दस्य प्रत्यक्षचर्चा नास्ति किन्तु तत्र पुरुषः बुद्धेः प्रतिसंवेदीति कथितः। एषः प्रतिसंवेदः अथवा विषयाकारवृत्तेः पुरुषे प्रतिबिम्बनमेव वृत्तिसारूप्यं वा साक्षित्वं वा कथयितुं शक्यते। अत्र विज्ञानभिक्षुः साक्षीति शब्दं प्रयुज्योक्तवान् 'यद्यपि विषयाकारतैव विषयग्रहणं चिन्तस्थले दृष्टम्, पुरुषस्तु कुटस्थो न विषयाकारतां भजते। अतएव कथं पुरुषश्चित्ववृत्तिसाक्षी स्यात् कथं वा अतिविशिष्टः पौरुषेयो बोध इत्यादि शङ्का जागर्ति तथा संवेदिन्या बुद्धेः प्रतिसंवेदी तत्समानाकारः पुरुष इति चित्ते, स्वयमाकाराभावेपि प्रतिबिम्बवशात् वृत्याकारापत्या वृत्तिबोध इति पुरुशो बुद्धेः प्रतिसंवेदी कथ्यते।[२]'यद्दर्शनं पुरुषं चैतन्यस्य गुणरूपेण स्वीकुरुते तन्मते आत्मनः साक्षित्वं शाश्वतम्। विशिष्टाद्वैतवेदान्ते मतमिदं स्वीकृतम्। उद्भटवैष्णववेदान्ती यामुनाचार्यः अहमिति रूपेण साक्षिणः स्वरूपं निरूप्योक्तवान् 'अहं जानामीति ज्ञातृतया सिध्यतः प्रत्यगात्मनो व्यतिरेकेण साक्षिणो नाम प्रकाशमात्रस्यात्मनोनुपलब्धेः। देहेन्द्रियप्राणविज्ञानेभ्यो ज्ञानाश्रयतया विविच्यमाने प्रतीपमन्वतीव निर्भासतानोऽहंभाव एव हि प्रत्यक्त्वं नाम। साक्षित्वमपि तस्य साक्षाज्ज्ञातृत्वम्, न ह्यजानतमसाक्षीत्यपदिश्यते।[३]' द्वैताद्वैतवेदान्तस्य प्रतिपादकः मध्वाचार्यः। अस्मिन् दर्शने प्रमातारं स्वरूपतः साक्षिणं स्वीकृत्य प्रत्यक्षप्रमाणस्य व्यवस्था कृता अस्ति 'प्रत्यक्षं सप्तविधं साक्षी इन्द्रियभेदेन।[४]' मध्वाचार्यस्य मते साक्षिणः षण्णामिन्द्रियाणां भेदेन प्रत्यक्षं सप्तविधं भवति साक्षिप्रत्यक्षं चाक्षुषं श्रावणं स्पर्शनं रसनं घ्राणजं मानसं च प्रत्यक्षम्। अत्र साक्षी सप्तममिन्द्रियम्। अतः साक्षिणः पृथक्प्रमाणत्वादिन्द्रियस्य द्वैविध्यं प्रतिष्ठाप्यते। प्रमातुः स्वरूपमेव साक्षीन्द्रियम्। तस्मात्पृथक् षडिन्द्रियाणि च। स्वरूपेन्द्रियमेव ज्ञानरूपसाक्षी। साक्षिविषये जयतीर्थस्य मतम् 'स्वरूपेन्द्रियः साक्षीत्युच्यते। तस्य विषया आत्मस्वरूपवद् धर्मज्ञानसुखादयो भावरूपविद्या मनस्तपश्च काले। व्याकृताकाशश्चेव्याद्या। स च स्वरूपज्ञानादिकं व्यनक्ति'।[५]

उपनिषत्सु साक्षिपदं मूलतः यौगिकपदरूपेण एव प्रयुक्तम्। मधुसूदनसरस्वती स्वकीयसिद्धान्तबिन्दौ उपनिषदां केषाञ्चिदुद्धरणानां विषये साक्षिपदस्य निर्देशं स्वीकृतवान्। किन्तु तेषु उद्धरणेषु कस्मिन्नपि स्थले प्रत्यक्षतया साक्षीति शब्दः प्रयुक्तो नास्ति। अतः एतानि प्रमाणानि ब्रह्मणोऽपि विषये प्रयुज्येरन्। उपनिषत्सु

[१]सांख्यकारिका-9

[२]योगवार्तिकम् 1/7

[३]सिद्धत्रयम्, पृ०- 34

[४]जयतीर्थः, द० प्र० 1

[५]जयतीर्थः, द० प्र० भा०, पृ० 124

अन्यान्यपि कतिपयानि पदानि सन्ति येषामर्थः स्पष्टतया साक्षीति धारणायाः निर्देशं करोति। यथा प्रज्ञा[१] द्रष्टा वा विज्ञाता[२] अन्तर्यामी[३] ईश्वरः[४] आत्मज्योतिः[५] स्वयंज्योतिश्च[६]।

साक्षिणः स्वरूपविषये सर्वप्रथमं श्वेताश्वरोपनिषदि श्वेताश्वरभाष्ये च वर्णनं प्राप्यते। तत्र उक्तं यत्समस्तप्राणिषु गूढरूपेण स्थितः एकः सर्वसामान्यः अद्वितीयस्वरूपः स्वयंप्रकाशमयः सर्वव्यापी सर्वेषां जीवानामन्तरात्मा सर्वकर्मणामधिष्ठाता नियन्ता च यः कस्यचित्कार्यस्य सम्पादनकाले तस्मिन् अलिप्तः सन्नपि पृथग्भूतः तस्य द्रष्टृरूपेण तिष्ठति स एव साक्षी-

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च ॥[७]

बृहदारण्यकोपनिषदः मूलसारः अस्ति 'यदेव साक्षात् अपरोक्षात् ब्रह्म'[८] अर्थात् यत्साक्षादपरोक्षं सर्वान्तरं ब्रह्म स एव आत्मा। इदमेव साक्षितत्त्वस्य महत्त्वपूर्णं सूत्रम्। ब्रह्म समग्रजगति व्याप्तं निस्तत्त्वमिति कथ्यते। सर्वेषां प्राणिनामात्मैव ब्रह्म इति प्रतिपादितम्। अतः साक्षी एव ब्रह्म ब्रह्मैव च साक्षी। देहेन्द्रियमनोबुद्धिवेदनादिभ्यः अतीतः या सत्ता सा एव साक्षी। किन्तु देहेन्द्रियादिषु य आत्मा प्रतीयते तस्मात्पृथक् कश्चन साक्षी नास्ति। प्रमाता प्रतिशरीरं भिन्नो भिन्नः। अतः सः देहवदनात्मा। किन्तु साक्षी सर्वत्र एकः अभिन्नश्च। अतः स एव वास्तविकः आत्मा।

## शाङ्करवेदान्ते साक्षी-

अद्वैतवेदान्ते आत्मनः एकत्वनिर्विशेषत्वज्ञानस्वरूपत्वप्रतिपादनेन सह साक्षित्वमपि प्रतिपाद्यते। साक्षिचैतन्यं स्वयमेव आत्मा। आचार्यः शङ्करः तमेव ब्रह्मपदेन अभिहितवान्। अस्य कारणं तावदद्वैतवेदान्ते समस्तवेदान्तवाक्यानां नित्यशुद्धबुद्धमुक्तनिर्गुणनिर्विशेषाखण्डेत्यादीनां समन्वयः ब्रह्मणि एव स्थाप्यते। साक्षी इति पदेन जीवस्य अन्तर्यामी यदधिष्ठानस्वरूपं तत्त्वं तदुच्यते यन्न केवलं जीवसत्ताधारभूतमपि तु यस्य प्रकाशकारणेन जीवस्य समस्ताः क्रियाः व्यवहाराश्च सम्पद्यन्ते। जीवस्य अधिष्ठानभूततत्त्वं सन्नपि साक्षी जीवात्स्वातन्त्र्येण स्थितः। जीवः कर्ता भोक्ता प्रमाता च। किन्तु साक्षी न कर्ता न च भोक्ता न तु प्रमाता। सः केवलं शुद्धद्रष्टा। सः चैतन्यस्वरूपः असङ्गः निष्क्रियः निर्गुणश्च। अतः शङ्कराचार्यः उक्तवान्-

राजवत्साक्षीमात्रत्वात्सन्निध्याद्भ्रमको यथा।
भ्रामयञ्जगदात्माहं निष्क्रियोऽकारकोऽद्वयम् ॥[९]

साक्षी जीवस्य विपरीतरूपेण जगति स्थित्वापि समस्तजागतिकप्रपञ्चेभ्यः पूर्णतया असङ्गः तिष्ठति। सः प्रतिक्षणं जीवेन सह एव स्थित्वा एतज्जगज्जगतः समस्तक्रियाकलापान् जीवस्य सर्वाणि कर्माणि च निरन्तरं प्रत्यक्षीकरोति। अयं साक्षी जीवात्पृथक् नास्ति अपि तु स एव जीवस्य प्रत्यग्भूतः अन्तरात्मा। तस्यैव

[१] मा० का० 1/3/5
[२] ब्र० सू० शा० भा० 1/4/7 एवं 3/4/2
[३] ब्र० सू० शा० भा० 3/7/1
[४] ब्र० सू० शा० भा० 3/7/23
[५] ब्र० सू० शा० भा० 4/3/6
[६] ब्र० सू० शा० भा० 4/3/9
[७] श्वे० उप० 6/11
[८] वृहदारण्यकोपनिषद् 3/4/1
[९] उपदेशसाहस्री, 1/17/80

 ISSN : 2249-538X

प्रकाशेन जीवस्य समस्ताः क्रियाः व्यवहाराश्च प्रवर्तन्ते । स एव प्रमातृप्रमेयप्रमाणानां त्रयाणामपि प्रकाशकः । अद्वैतवेदान्तदृष्ट्या साक्षिणः विना प्रमाणानां कापि व्यवस्था न सम्भवति न च कश्चित्प्रमेयः सम्भाव्यते ।

शङ्कराचार्यः शारीरकभाष्यस्य सूचनायां प्रत्यगात्मानमन्तःकरणस्य समस्तवृत्तीनां साक्षिरूपेण सर्वसाक्षि-रूपेण चाङ्गीकृतवान् । अस्य तात्पर्यं गोविन्दानन्दः स्वस्य रत्नप्रभाग्रन्थे एवं व्याख्यातवान् यत् यस्य प्रत्यक्त्त्वम् अद्यापि सम्यक्तया न अनुभूतम्, स एव आत्मा साक्षी इति । आचार्यः गौडपादः स्वस्य माण्डूक्यकारिकायां प्रत्य-क्षतया साक्षिशब्दं न प्रयुक्तवान् किन्तु तस्य कारिकायाः मूलभावः अयं यत् 'यः सर्वदा सर्वं जानाति, स एव ईश्वरः साक्षी'[1] ।

शङ्कराचार्यः तैत्तिरीयोपनिषद्भाष्ये उक्तवान्-

यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरिततत्सत्यम् ।
यद्रूपेण निश्चितं यत्तद्रूपं व्यभिचरदनृतमित्युच्यते अतो विकारोऽनृतम् ।
अतः सत्यं ब्रह्मेति ब्रह्म विकारान्निवर्तयति ॥[2]

यथा वन्ध्यापुत्रः कदापि न ज्ञायते । प्रकाशार्थं सत्ता अवश्यमपेक्षिता । अतः साक्षिणः सत्ता अवश्यमस्ति । स च साक्षी स्वयमेव स्वप्रकाशमानः । पारमार्थिकदृष्ट्या तत्त्वमेकमद्वितीयम् । यत् सजातीयविजातीयस्वगतभे-दत्रयान्मुक्तम् । तत्सत्यं चैतन्यमानन्दस्वरूपं निष्क्रियमसङ्गं च स्वमहिम्नि एव स्वयम्प्रतिष्ठितम् । साक्षी तस्यैव परमतत्त्वस्य एकं रूपम् । सः चैतन्यस्वरूपः ज्ञानस्वरूपः ज्योतिस्वरूपश्च । एतदेव रूपं साक्षीति कथ्यते ।[3]

रज्जुसर्पदृष्टान्ते यथा साक्षी भ्रमवशात्सर्पमपि पश्यति रज्जुमपि पश्यति, तथैव स उभावपि प्रत्यक्षीकरोति । स तयोः पार्थक्यं न निर्धारयति । किन्तु प्रमातुः विषये स्थितिर्भिन्ना । प्रमातुः विशेषविचारक्षमदृष्टिः भवति । प्रमाता रज्जुसर्पयोः मध्ये भेदमवगच्छति किन्तु साक्षिणः कार्यं केवलं साक्ष्यवलोकनमेव । सत्यं वा मिथ्या वा भवतु तस्य कार्यं केवलं प्रत्यक्षीकरणम् । अज्ञानस्य अज्ञानजातसमस्तवस्तूनां च सामान्यग्राहकः साक्षी । सः केवलं चैतन्यस्वरूपः स्वप्रकाशमानश्च । अज्ञानादीनां ग्रहणार्थं तस्य अन्यस्य कस्यापि उपायस्य साधनस्य वा आवश्यकता न भवति । अयं साक्षी स्वग्राह्यप्रमात्र्यादिभ्यश्च भिन्नः । प्रमातुः अहम्भावः विभिन्नासु वृत्तिषु व्याप्तः भवति । चैतन्यस्य नानाविधाः वृत्तयः सन्ति । एतासां भिन्नभिन्नवृत्तीनां ज्ञानं प्रमातैव प्राप्नोति । बुद्धेः वृत्तयः सर्वदा परिवर्तन्ते । वृत्तिपरिवर्तनेन सह प्रमातुः स्वरूपमपि परिवर्तते । किन्तु साक्षी एतेभ्यः सर्वेभ्यः भिन्नः । साक्षी अस्य प्रमातुरपि ज्ञाता ।

## शाङ्करोत्तरं साक्षितत्त्वम् -

शाङ्करोत्तरे अद्वैतवेदान्ते साक्षिणः स्वरूपविषये विस्तृतचर्चा भामतीविवरणप्रस्थानयोः आचार्यैः कृता । सुरेश्वराचार्यः स्वकीयबृहदारण्यकभाष्यवार्तिके विभिन्नप्रसङ्गेषु साक्षिणः स्वरूपं व्याख्यातवान् । तस्य मते साक्षी सर्वान्तर्यामी । सः स्वयम् अदृष्टः सन्नपि सर्वेषां द्रष्टा अश्रुतः सन्नपि सर्वस्य श्रोता । यद्यपि साक्षी स्वयम् अमतः तथापि स एव सर्वेषां मन्ता । सः घटवज्ज्ञेयवस्तु नास्ति तथापि स एव सर्वेषां ज्ञाता । तेनोक्तम्- 'एष ते आत्मा सर्वान्तरः, सर्वान्तर्यामी अमृतो अदृष्टो दृष्टा, अश्रुत श्रोता, अमतो मता, अविज्ञातो-विज्ञाता,

[1] माण्डुक्यकारिका- 2/12
[2] तैत्तिरीयोपनिषद्, शाङ्करभाष्यम्, पृ० 103-4
[3] सत्वपूर्वमिदं कार्यं तमोऽन्तस्थ घटादिवत ।तस्याभिव्यक्तिधर्मत्वादन्यथा स्यान्नृश्रृंगवत् ॥ वृहदारण्यकोपनिषद् 1/2/74

न्यान्यो अतोऽस्ति दृष्टा, श्रोता, मन्ता, विज्ञाता ।[१]’ वार्तिककारस्य अस्य भावनायाः संक्षिप्तरूपं सर्वज्ञात्ममुनिना स्वस्य संक्षेपशारीरके प्रकाशितम्। तेन उक्तं यत् ‘कूटस्थः, अद्वितीयः दृश्यात् भिन्नः अविकारी च परम्पुरुषः (साक्षी) इन्द्रियादिकारणव्यतिरेकेण एव एतत् समग्रं प्रपञ्चमयं जगत्साक्षिरूपेण प्रत्यक्षीकरोति ।[२]’ विद्यारण्यः स्वयं स्वीकृतवान् यत् ‘सर्ववस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एव’ ।[३] एवं ब्रह्मानन्दसरस्वती प्रोवाच ‘कूटे कपटे साक्षित्वे यः तिष्ठति सः कूटस्थः’ ।[४]

## ब्रह्म साक्षी च-

बृहदारण्यकोपनिषदि उल्लिखितं साक्षी ब्रह्मस्वरूप एव-

साक्षिणो ब्रह्मरूपत्वं ब्रह्ममैवेत्यभिधीयते ।
संसर्गशंकानुत्यर्थमेवकारः प्रयुज्यते ॥
संयोगः समवायो वा नैव ब्रह्मात्मनोरिह ।
अखण्डैकरसत्वं तु भवतीति विक्षितम् ॥[५]

अयमेव भावः ‘साक्षी ब्रह्मैव’ इत्यादिपदैः निर्दिष्टः । अत्र साक्षिब्रह्मणोः पदयोः समानाधिकरणेन साक्षिणः द्वितीयत्वं ब्रह्मणः परोक्षत्वं च निरस्तम्। वास्तविकं तात्पर्यम् एतत् यत् साक्षी एव ब्रह्म, ब्रह्मव्यतिरिक्तं किमपि नास्ति। अस्य बोधस्य प्रतिष्ठापनार्थमेव श्रुतौ ‘साक्षी ब्रह्म’ इति समानाधिकरणं प्रयुक्तम्। अत्र शङ्का भवितुमर्हति यत् यथा ‘कृष्णः सर्पः’ इति सामानाधिकरणवाक्ये कृष्णसर्पयोः सम्बन्धः बोध्यते तथैव ‘साक्षी ब्रह्म’ इति वचनेन साक्षिब्रह्मणोः भिन्नता सम्बन्धो वा बोध्येत। तेन अखण्डब्रह्मसत्ता न सिद्ध्येत्। अस्याः शङ्कायाः निरसनार्थं वेदान्तिनः ‘एव’ इति पदस्य प्रयोगं कुर्वन्ति। अर्थात् ‘साक्षी एव ब्रह्म, ब्रह्म एव च साक्षी’इत्येव अत्र अखण्डोऽर्थः अभिप्रेतः। अतः साक्षी ब्रह्मस्वरूपः। तस्मात् पृथक् किमपि नास्ति-

विद्वदृष्ट्या स एवाऽऽत्मा जरामरणवर्जितः ।
आनन्दो भयहीनश्च ब्रह्मैवाऽतो न चेतरः ॥[६]

विद्यारण्यः साक्षिणः स्वयम्प्रकाशत्वं प्रतिष्ठाप्य अनन्तरं साक्षिणमेव ब्रह्म इति निश्चितवान्। श्रुतौ ब्रह्मणः यानि ‘सत्यं ज्ञानमनन्तम्[७]’ इति लक्षणानि वर्णितानि तानि सर्वाणि लक्षणानि साक्षिण्यपि विद्यन्ते। अतः स्वयम्प्रकाशः साक्षी एव ब्रह्म इति स्वीकर्तव्यम्। सः बाधरहितः अर्थात् यः कस्यापि प्रकारस्य ज्ञानव्यवधानेन निराकर्तुं न शक्यः। साक्षिणः ब्रह्मस्वरूपत्वं स्पष्टयन् सर्वज्ञात्ममुनिः उक्तवान्-

निजमायया परिगत पुरुषः परतन्त्रया तु बिजया प्रभया ।
परिकल्पितं सकलमाकलयन् स हि साक्षितामुपगतो भवति ॥[८]

[१]वृहदारण्यकोपनिषद् भाष्यम्, वार्त्तिकम्, पृ- 221
[२]संक्षेपशारीरकम्- 2/29
[३]विवरण-प्रमेय-संग्रहः (विजयानगरम् संस्करणम् ) पृ० 17
[४]न्यायरत्नावली, पृ. 144
[५]वृहदारण्यकोपनिषद्- 4/4/219,पृ.- 220
[६]वृहदारण्यकोपनिषद्, 4/5/489
[७]तै० उ०, 2/2/1
[८]संक्षेपशारीरकम्, 2/30

 ISSN : 2249-538X

## आत्मेश्वरजीवसाक्षिणां सम्बन्धः -

अद्वैतवेदान्तानुसारम् आत्मेश्वरजीवसाक्षिणः मूलतः एकस्य एव विशुद्धचैतन्यस्य विभिन्नप्रकाशमात्रम्। पारमार्थिकदृष्ट्या केवलं ब्रह्म अथवा आत्मैव सत्यः किन्तु व्यवहारिकस्तरे उपाधिभेदात् तदेव एकं तत्त्वमीश्वररूपेण जीवरूपेण साक्षिरूपेण च प्रतिभासते। आदिशङ्कराचार्यमते ब्रह्म निरुपाधिकं निर्विशेषं स्वयम्प्रकाशं नित्यं च। तस्मिन् कश्चन भेदो नास्ति। किन्तु जगतः व्याख्यानार्थं तदेव ब्रह्म विभिन्नोपाधीनामाश्रयेण विभिन्नरूपेण स्वीकृतम्। कदाचित् ईश्वररूपेण, कदाचित् जीवरूपेण पुनः कदाचित् साक्षिरूपेण च।

यदा तदेव चैतन्यम् अन्तःकरणेन मनसा बुद्ध्या अहङ्कारेण च सह तादात्म्यं स्थापयति तदा तज्जीवः इति कथ्यते। जीवः तदा स्वात्मानं देहमनसोः अभिन्नं मन्यते फलतः सः सुखदुःखयोः पापपुण्ययोः जन्ममृत्योः बन्धनस्य च अनुभवं प्राप्नोति। अद्वैतवेदान्तानुसारं जीव एव कर्ता भोक्ता च। अज्ञानवशात् सः सत्यमिथ्यात्वयोर्मध्ये भेदं कर्तुं न शक्नोति। जगदेव च परं सत्यं मन्यते। जीवस्य तिस्रः अवस्थाः स्वीकृताः। जाग्रत्स्वप्नसुषुप्तयः। एतासु अवस्थासु क्रमशः सः विश्वः तैजसः प्राज्ञः च इति कथ्यते।

श्रीमद्विद्यारण्यस्वामी ब्रह्मजीवेश्वरसाक्षिणां सम्बन्धं बोधयितुं महाकाशघटाकाशयोः उदाहरणं प्रयुक्तवान्। यथा एक एव आकाशः विभिन्नोपाधिभेदात् घटाकाशः जलाकाशः इत्यादिनामभिः अभिधीयते तथैव एकमेव विशुद्धचैतन्यं विभिन्नोपाधिभेदात् ब्रह्मरूपेण ईश्वररूपेण जीवरूपेण साक्षिरूपेण च प्रतिभासते। तन्मते अपरिच्छिन्नचैतन्यमेव ब्रह्म। मायायां प्रतिबिम्बितं चैतन्यम् ईश्वरः। अन्तःकरणे प्रतिबिम्बितं चैतन्यं जीवः। देहमनसोरधिष्ठानभूतं कूटस्थचैतन्यमेव साक्षी।

## साक्षिणः ज्ञानमीमांसात्मकः आधारः-

साक्षी स्वयम्प्रकाशः स्वमहिम्नि प्रतिष्ठितश्च। तस्यैव प्रकाशेन स्वप्नजाग्रत्सुषुप्तयः इत्येतासां तिसृणामपि अवस्थाः प्रमाणीकृताः भवन्ति। अपि च सुखदुःखादीनां समस्तानामनुभवानां ज्ञानमपि तेनैव स्वयम्प्रकाशेन साक्षिणा सम्भवति। अधुना प्रश्नः उदेति यदि साक्षी स्वयम्प्रकाशः ज्ञाता तर्हि सः कुतो न ज्ञायते? अथवा अन्तर्यामी साक्षी कुतो नोपलभ्यते? बृहदारण्यकोपनिषदि अस्य उत्तरं दत्तं यत् -

भूम्यादिदेवताः कस्मान्न स्वान्तर्यामिणं विदुः।
अदृष्टयेऽश्रुत इत्याह कारणं तदवेदने॥
मागोचरातिवर्तित्वाद् मातृमानादिसाक्षिणः।
द्रष्टुरन्यस्य चाऽभावान्न तं पश्यन्ति देवताः॥[1]

अदृष्टो दृष्टाऽश्रुत'[2] इत्यादिश्रुतिरपि साक्षिणः विषयरूपतां निराकरोति। प्रमातृप्रमाणयोर्द्रष्टा सन्नपि साक्षी स्वयं ज्ञानविषयतायाः मुक्तः। अतः सः दृश्यो न भवति। श्रीमद्विद्यारण्यकारः उक्तवान्-

संसारासक्तचित्तः संश्चिदाभासः कदाचन।
स्वय प्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययम्॥
न भाति नास्ति कूटस्थ इति वक्ति प्रसङ्गतः।

[1] वृहदारण्यकोपनिषद्, 3/24, 26
[2] वृहदारण्यकोपनिषद्, 3/24, 26

कर्ता भोक्ताऽहमस्मीति विक्षेपं प्रतिपद्यते ॥[१]

शब्दप्रमाणेन साक्षिणः साक्षात्कारः कर्तुं शक्यते । किन्तु साक्षिसाक्षात्कारे केवलं शब्दज्ञानम् एव पर्याप्तं न भवति । तेन सह विवेकोपासने अपेक्षेते । यथा पञ्चदशीग्रन्थे उक्तम्-

ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितम् ।
मनहावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः ॥[२]

यद्यपि वेदान्ते तत्त्वमसीत्यादिमहावाक्यैः ब्रह्मप्रत्यगात्मरूपेण अर्थात्साक्षिरूपेण उपदिष्टम्, तथापि एतत् साक्षिरूपं तत्त्वं तत्त्वमिति पदार्थयोः विवेकं विना पुरुषस्य कृते दुरवगाह्यम् । अतः केवलया विचाररहितया शाब्दिकवाक्यबुद्ध्या साक्षिणः अपरोक्षज्ञानं न भवति । साक्षी देहेन्द्रियमनोबुद्धिभ्यः पूर्णतया भिन्नः । सः कृशतादिभ्यः शरीरधर्मेभ्यः अन्धत्वादिभ्यः इन्द्रियधर्मेभ्यः सङ्कल्पादिभ्यः मनोधर्मेभ्यः शमदमादिभ्यः बुद्धिधर्मेभ्यश्च परः । अविवेकिनः विषये अध्यासवशात् एते धर्माः साक्षिणि आरोपिताः इव प्रतिभासन्ते किन्तु विवेकिनः विषये सम्यग्विचारेण एतेभ्यः सर्वेभ्यः धर्मेभ्यः शून्यस्य विशुद्धसाक्षिणः ज्ञानं प्रतिष्ठाप्यते ।[३] यद्यपि साक्षिसाक्षात्कारार्थं विविधोपायाः निर्दिष्टाः तथापि श्रुतौ उक्तं यत् अयं साक्षिस्वरूपः अन्तर्यामी न कस्यचित् पुरुषस्य दृष्टेः विषयः अपि तु स्वयमेव द्रष्टा । न हि सः कस्यचित् श्रवणेन्द्रियस्य विषयः, अपि तु स्वयमेव श्रोता । सः कस्यचित् मनसः विषयो न अपि तु स्वयमेव मन्ता । सः कस्यचित् निश्चयबुद्धेः विषयो न, अपि तु स्वयमेव निर्णायकः । एतस्मादन्तर्यामिणः व्यतिरिक्तः अन्यः कश्चन द्रष्टा श्रोता मन्ता विज्ञाता वा नास्ति ।[४] न तु साक्षी प्रमाणस्य विषयः । स्वयम्प्रकाशमानत्वात् तस्य सत्ताविषये कापि शङ्का न भवति । तथापि अज्ञानावरणकारणात् सः नोपलभ्यते । केषाञ्चित् चिन्तकानां मते तस्य ज्ञानार्थं योगस्य आवश्यकता भवति । समस्तचित्तवृत्तीनां निरोधात् परम् 'अहम् असङ्गः द्रष्टा' इति अनुभूतिः जायते । अस्य ज्ञानस्य प्राप्त्यर्थं पुनः पुनः मननस्य चिन्तनस्य च आवश्यकता अपि स्वीकृता ।

**उपसंहारः –**

वैदिकऋषयः बुद्धिमतीत्य अन्तःस्थितां परमसत्तामनुभूतवन्त 'एकं सत् विप्रा बहुधा वदन्ति[५]' इति अपरोक्षानुभूत्याः माध्यमेन च एकत्वे नानात्वस्य प्रतिभासं ब्रह्मात्मेश्वरजीवसाक्षिरूपेण व्याख्यातवन्तः । प्रस्तुते शोधपत्रे साक्षिणः तत्त्वमीमांसात्मकज्ञानमीमांसात्मकविश्लेषणे विविधप्रश्नानां यथा विशुद्धचैतन्यस्य विभिन्नरूपत्वेन आत्मनः ईश्वरस्य जीवस्य च अवधारणाविषये ज्ञानज्ञातृज्ञेयवैचित्र्यजनितसमस्यायाः समाधानार्थं प्रयासः कृतः । चर्चाविषयस्य गाम्भीर्यस्य अनुकूलतया शाङ्करपूर्वाद्वैतचिन्तनधारादारभ्य शङ्करस्य शाङ्करोत्तराणां च विभिन्नप्रस्थानपर्यन्तम् ऐतिहासिकविश्लेषणात्मकपद्धत्या परमसतः स्वरूपं ज्ञातुः ज्ञानप्रकाशे साक्षिणः अपरिहार्यतां च सूक्ष्मतया स्पष्टयितुं प्रयत्नः कृतः ।

अतः उपर्युक्तविवेचनस्य आधारेण प्रतीयते यत् ब्रह्म साक्षी च नैते द्वे पृथक् सत्ते अपि तु एकमेव अभिन्नं तत्त्वम् । तथापि दार्शनिकदृष्ट्या उभयोः प्रत्यक्षतया ऐक्यप्रतिपादनं सर्वथा न युक्तम् । पुनः पूर्णभिन्नत्वप्रतिपादनमपि सम्यक् न अपि तु उभयोः मध्ये सूक्ष्मभेदः विद्यते । यद्यपि उभावपि निर्गुणौ निराकारौ

[१] पञ्चदशी, तृप्तिदीपोनाम् – सप्तमः परिच्छेदः - 29-30
[२] पञ्चदशी- 9/20
[३] वृहदारण्यकोनिषद्- 3/5/89
[४] वृहदारण्यकोनिषद्- 3/7/23
[५] ऋग्वेदः - 1/164/46


ISSN : 2249-538X

स्वयम्प्रकाशौ अविकारिणौ तटस्थौ च तथापि स्पष्टं यद्ब्रह्म एकं निरपेक्षं परमतत्त्वं यत् एकमेव पारमार्थिकसत्यं यदतिरिक्तस्य कस्यापि प्रपञ्चस्य कल्पनापि न सम्भवति । ब्रह्मणः सत्ता स्वतःसिद्धा । तस्य कृते अन्यस्य कस्यापि आवश्यकता नास्ति । पक्षान्तरे साक्षिणः कृते 'साक्षीतरसत्तायाः अस्तित्वम् अपरिहार्यं यतः तया विना साक्षिणः कापि सार्थकता न भवति । साक्षिणः सत्ता दृश्यनिर्भरिता । दृश्याभावे द्रष्टृद्रष्टव्ययोः उभयोरपि धारणे निरर्थके भवतः । किन्तु ब्रह्म न द्रष्टा । यतः ब्रह्मव्यतिरिक्तं किमपि दृश्यं नास्ति । ब्रह्मणः बहिः यत्किञ्चिद्दृश्यरूपेण प्रतीयते तत् अविद्याकृतम् । ब्रह्म च विशुद्धज्ञानस्वरूपम् । अतः तत्र साक्षिणः धारणा आरोपयितुं न शक्यते । साक्षिणः धारणा अविद्यां विना न सम्भवति । यतः अविद्यया एव ज्ञातृज्ञेययोः भेदः प्रतीयते । ज्ञेयाभावे च साक्षिणः काप्यर्थवत्ता न भवति । अतः स्पष्टं भवति यत्साक्षिणः कृते दृश्यं साक्षीतरसत्ता च अपरिहार्ये स्तः किन्तु ब्रह्मणः कृते तयोः आवश्यकता नास्ति । यतः ब्रह्मव्यतिरिक्तं किमपि नास्ति । न दृश्यं न द्रष्टा न वा काचिदन्या सत्ता ।

अतः स्पष्टं यत्ब्रह्मणः साक्षिणश्च मध्ये एका सूक्ष्मा निश्चिता सीमारेखा निर्धारयितुं शक्यते । अयं भेदः केवलं व्यवहारिकस्तरे एव सत्यत्वेन स्वीकृतः, यतः साक्षी एव तस्मिन् स्तरे ज्ञातृरूपेण द्रष्टृरूपेण च कार्यं करोति । दृश्यव्यवहारश्च केवलं तस्मिन् स्तरे एव सम्भवति । पारमार्थिकस्तरे ज्ञातृज्ञेयभेदः पूर्णतया विलीयते । तत्र एकस्य ब्रह्मणः अतिरिक्तं किमपि नावतिष्ठते । साक्षी अपि न । अतः वक्तुं शक्यते यद् यं व्यवहारिकपारमार्थिकभेदः अविद्याकृतः । अविद्यानिवृत्तौ सति व्यवहारपरमार्थयोः अयं भेदोऽपि लुप्यते । तदा साक्षिणः ब्रह्मणि लयो भवति । एकमेव परमतत्त्वं ब्रह्म अवशिष्यते । अतः व्यवहारदृष्ट्या सूक्ष्मभेदः सन्नपि पारमार्थिकदृष्ट्या ब्रह्मसाक्षिणोः मध्ये पूर्णाभेद एव प्रतिष्ठाप्यते ।

अन्ततो गत्वा वक्तुं शक्यते यत् अस्मिन् परिवर्तनशीले वैज्ञानिकयुगे भौतिकवादिनि परिवेशे अद्वैतवेदान्त-दर्शनं नूतनां दिशं प्रददाति । पूर्वं दार्शनिकचिन्तकानां चर्चा मुख्यतया ब्रह्मजीवमायाजगतां तात्त्विकविश्लेषणपर्य-न्तमेव सीमिता आसीत् । किन्तु साक्षिचैतन्यस्य धारणया अद्वैतवेदान्तः पारमार्थिकभौतिकयोः उभयोः स्तरयोः जगतः गूढरहस्यं सुस्पष्टतया उद्घाटयति । साक्षिचैतन्यं तत् शाश्वतं तत्त्वं यस्याभावे समग्रं विश्वम् अन्धकारस्य भीषणतायां निमग्नं स्यात् । सर्वत्र तमसः प्राधान्यं च प्रतिष्ठाप्येत । एतदेव साक्षितत्त्वं समग्रं विश्वं स्वस्य ज्ञानम-यज्योतिषा दीप्यमानं करोति ।

## परामृष्टाः ग्रन्थाः


१. ऋग्वेद-संहिता, Edited by Max Müller, चौखम्बा संस्कृत-ग्रन्थमाला, वाराणसी, 1996 ।

२. गौडपादः, गौडपादकारिका, माण्डुक्योपनिषद् शाङ्करभाष्यः, गीताप्रेसः, गोरखपुरम् ।

३. गौतमः, चमनलालः, पञ्चदशी, विद्यारण्यमुनिविरचितः, संस्कृत-संस्थान-ख्वाजा-कुतुबः, वेदनगरम्, बरेली, 1981 ।

४. जिज्ञासुः, ब्रह्मदत्तः, अष्टाध्यायी (पाणिनिसूत्र), रामलालः कपूरः ट्रस्टः, अमृतसरः, 1955 ।

५. पाणिनीसूत्रम् अष्टाध्यायी, रामलालः कपूरः ट्रस्टः, अमृतसरः, 1955 ।

६. त्रिपाठी, रमाकान्तः, सांख्यकारिका, ईश्वरकृष्णविरचिता, तत्त्वप्रभाख्या-व्याख्या-युक्तिदीपिकासहितम्, वाराणसी ।

7. सरस्वती, दयानन्दः, ब्रह्मसूत्रम् शाङ्करभाष्यम्, सत्यानन्दीदीपिका सहितम्, गोविन्दमठः, वाराणसी, संवत् 2040 ।

8. पतञ्जलिः, व्याकरण-महाभाष्यम्, प्रथम-संस्करणम्, सम्पादकः चारुदेवः शास्त्री, श्री मोतीलालः बनारसीदासः, दिल्ली, संवत् 2025।
9. मनुस्मृतिः. अनुवादकः पण्डितः गिरिजाप्रसादः द्विवेदी, मुन्सीनवकिशोरः, 1917।
10. माण्डुक्योपनिषद् (शाङ्करभाष्यम्), गीताप्रेसः, गोरखपुरम्।
11. बृहदारण्यकोपनिषद् (शाङ्करभाष्यम्), गीताप्रेसः, गोरखपुरम्।
12. सदानन्दयतिः, अद्वैत-ब्रह्म-सिद्धिः, एशियाटिकः सोसाइटी ऑफः बंगालः, कलकत्ता, 1890.
13. सरस्वती, दयानन्दः, ब्रह्मसूत्रशाङ्करभाष्यम्, वाराणसी।
13. संक्षेपशारीरकः, सर्वज्ञात्ममुनिः, चौखम्बा संस्कृतं सीरीजम्, वाराणसी।
13. शर्मा, उर्मिला, अद्वैतवेदान्ते तत्त्वज्ञानञ्च, छन्दस्वती प्रतिष्ठानम्,वाराणसी, 1978।
13. शर्मा, राममूर्तिः, वेदान्तसारः, नेशनलः पब्लिशिङ्गः हाउसः, नई दिल्ली, 1978।
13. विज्ञानश्रीविक्षु, महामहोपाध्यायः, योगवार्तिकम्, मेडिकलहालयन्त्रालयः, 1884।
13. मुसलगाँवकरः, गजाननशास्त्री, उपदेशसाहस्री (श्रीशङ्करभगवत्पादाचार्यविरचिता), महेश अनुसन्धान-संस्थानम्, विक्रम-संवत् 2045।
13. शुक्लः, सूर्यनारायणः, संक्षेपशारीरकम् (श्रीमत्सर्वज्ञमुनिविरचितम्), आलिबुक्स, 1936।
13. त्रिपाठीः, राधाबल्लभः, परोहा, केदारप्रसादश्च, सिद्धित्रयम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, 2012।
13. सिद्धान्तबिन्दुः (मधुसूदनसरस्वत्या विरचितेन न्यायरत्नावलीटीकासहितेन), जायकृष्णदासहरिदासगुप्तः, चौखम्बा संस्कृतसीरिजं विद्याविलासप्रेसम्, वाराणसी, 1928।


 ISSN : 2249-538X

# भक्तौ ध्वनेरन्तर्भावविवेचनम्

डा. कोम्पेल्लि विनयकुमारः
सहायकाचार्यः,के.सं.वि.
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः – पूर्वपक्षः - (भाक्तवादिनां मतम्)*** *साहित्यशास्त्रे आनन्दवर्धनात् पूर्वं स्थिताः केचन आचार्याः मुकुलभट्टादयः मन्यन्ते यत्* ***'काव्यस्य आत्मा ध्वनिः'*** *इति नूतनसिद्धान्तस्य स्वीकरणं व्यर्थम् इति । यतः ध्वनिवादिभिः यः* ***'व्यङ्ग्यार्थः'*** *उच्यते, सः सर्वोऽपि* ***'भक्तिः' (गुणवृत्तिः/लक्षणा)*** *इत्यत्रैव अन्तर्गतो भवति इति । अतः लक्षणया एव ध्वनेः सिद्धत्वात् ध्वनेः स्वतन्त्रम् अस्तित्वं नास्ति इति अन्तर्भाववादः ।* ***आनन्दवर्धनस्य सिद्धान्तः (खण्डनप्रक्रिया)***

*आचार्यः आनन्दवर्धनः ध्वन्यालोकस्य प्रथमे उद्योते १.१४ कारिकातः १.१८ कारिकापर्यन्तम्*[१]

*अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया ॥*

*उक्त्यन्तरेणाशक्यं यच्चारुत्वं प्रकाशयन् । शब्दो व्यञ्जकतां बिभ्रद्ध्वन्युक्तेर्विषयीभवेत् ॥*

*रूढा ये विषयोऽन्यत्र शब्दाः स्वविषयादपि । लावाण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥*

*वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता । व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम् ॥ इति ॥*[२] *अतिशयतर्केण भाक्तवादस्य खण्डनं कृत्वा प्रतिपादयति यत्* ***भक्तौ (लक्षणायाम्) ध्वनेः अन्तर्भावः कदापि न सम्भवति,*** *यतो हि अनयोः द्वयोः स्वरूपं सर्वथा भिन्नं वर्तते इति ।*

- ***रूपभेदः*** *- ध्वनिः लक्षणा इत्यनयोः रूपं भिन्नं वर्तते । लक्षणा मुख्यार्थबाधे सति जायते, परन्तु ध्वनिः (व्यञ्जना) मुख्यार्थबाधं विना अपि (यथा - विवक्षितान्यपरवाच्यध्वनौ) सहृदयानन्दं जनयति ।*

- ***अतिव्याप्ति-अव्याप्तिदोषौ*** *- यदि ध्वनिः लक्षणा इति मन्यते, तर्हि लक्षणे अतिव्याप्ति-अव्याप्तिदोषौ आगच्छतः ।*

***अतिव्याप्तिः*** *- यत्र केवलं रूढिमूला लक्षणा भवति (यथा - लावण्य-कुशलादिशब्देषु), तत्र लक्षणा अस्ति, किन्तु कोऽपि चमत्कारी व्यङ्ग्यार्थः (ध्वनिः) नास्ति ।* ***अव्याप्तिः*** *- यत्र उत्तमकाव्ये ध्वनिः सर्वमान्यो भवति (यथा - वस्तु-अलङ्कार-रस-ध्वनिषु), तत्र मुख्यार्थबाधस्य अभावात् लक्षणायाः गन्धोऽपि न भवति ।* ***फलप्रतीतौ लक्षणायाः असमर्थता*** *- प्रयोजनवत्यां लक्षणायां (यथा - गङ्गायां घोषः) तटार्थबोधनात् परं यस्य फलस्य (पावनत्व-शीतलत्वादिप्रयोजनस्य) प्रतीतिः भवति, तस्य फलस्य बोधः लक्षणया न सम्भवति । यतः फलप्रतीतौ मुख्यार्थबाधः न भवति । अतः तत्र* ***व्यञ्जना (ध्वनिः)*** *एव शरणम् ।* ***परतन्त्रता / स्वतन्त्रता*** *- गुणवृत्तिः (लक्षणा) सर्वदा* ***'वाचकत्वाश्रयेणैव'*** *अभिधाशक्तिं मुख्यार्थबाधं च आश्रित्य तिष्ठति । अतः सा लक्षणा* ***अभिधापुच्छभूता*** *परतन्त्रा च । परन्तु ध्वनिः सर्वथा* ***'व्यञ्जकत्वैकमूलः'*** *स्वतन्त्रः व्यापारः अस्ति ।अतः आनन्दवर्धनमतानुसारं सिद्धं भवति यत् लक्षणा केवलं शब्दस्य एका गौणी वृत्तिः अस्ति, परन्तु ध्वनिस्तु काव्यस्य सर्वोत्कृष्टः आत्मा इति । अतः भक्तौ ध्वनिः नान्तर्भवति इति सिद्धान्तः ।*

***सम्पर्कसूत्रम्*** - 9482608866, Email- vinayakumar@sanskrit.ac.in

[१]भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः ।

[२]ध्व.लो.प्र.उ.का.सं.14-18

***कूटशब्दाः – उपक्रमः, भक्तिशब्दस्य अर्थः, भक्तिध्वन्योः अनैक्यम् असाम्यं च, उपचारस्वरूपम्, भक्तौ ध्वनेरन्तर्भावे अतिव्याप्तिदोषः, भक्तौ ध्वनेरन्तर्भावे अव्याप्तिदोषः, रूढिलक्षणायाम् अव्याप्तिदोषः, शब्दो नैव स्खलद्गतिः, वाचकत्वाश्रयेण गुणवृत्तिः, व्यञ्जकत्वाश्रयेण ध्वनिः, उपसंहारः***

**उपक्रमः** - ध्वनिविरोधिषु एकः वर्गः अस्ति लक्षणावादीति नाम्ना प्रसिद्धः । अयं वर्गः ध्वनितत्त्वं मन्यमानोऽपि तस्य स्वतन्त्रसत्तां न स्वीकरोति । अयं ध्वनिः गुणवृत्तिलक्षणया एव गतार्थो भवतीति अस्य लक्षणावादिवर्गस्य मतम् । अस्य मतस्य सङ्केतम् आनन्दवर्धनाचार्यः ध्वन्यालोकस्य प्रथमश्लोके **'भाक्तमाहुस्तमन्ये'**[१] इत्यनेन चकार । कारिकागतेन **'अन्ये'** इति पदेन अभिधावृत्तिमातृकाकारः मुकुलभट्टः भट्टोद्भटादयश्च अस्मिन् वर्गे समायान्ति ।

**भक्तिशब्दस्य अर्थः -**

भक्तिः नाम लक्षणा[२]। अस्याः गुणवृत्तिरित्यपि नाम । भक्तेः आगतः भाक्तः लाक्षणिकः इत्यर्थः । यः अभिधाशक्त्या बोध्यते, किन्तु वाक्यार्थे मुख्यार्थस्य अन्वयो न सम्भवति, तदा तेन सम्बद्धः अपरः अर्थः यया शक्त्या बोध्यते, सा शक्तिः लक्षणा, तया विशिष्टः शब्दः लाक्षणिकः, तेन लाक्षणिकशब्देन प्रतिपादितः अर्थश्च लक्ष्यार्थः, स एव गौणः भाक्तश्च इति कथ्यते ।

अतः अत्र प्रसङ्गे ध्वनिविरोधिनः लक्षणावादिनः भक्तिध्वन्योः सादृश्यमेव परिकल्प्य गौणीरूपलक्षणाभेदे एव ध्वनिम् अन्तर्भावयितुं प्रयासरताः सन्ति । अतः सादृश्यसम्बन्धेन अर्थान्तरस्य बोधिका वृत्तिः गौणी इति कथ्यते । गौणी एव भक्तिः इत्यपरपर्याया । अतः भाक्तपक्षावलम्बिनाम् अभिप्रायः अस्ति यत् गुणवृत्त्या एव व्यङ्ग्यस्य बोधो भवति, व्यञ्जनया न इति ।

**भक्तिध्वन्योः अनैक्यम् असाम्यं च -**

आनन्दवर्धनाचार्यः अस्मिन् प्रसङ्गे स्पष्टतया व्याचख्यौ यत् - केनापि उपायेन भक्तिध्वन्योः (लक्षणाव्यञ्जनयोः) ऐक्यं भवितुं नार्हति इति । लक्षणाप्रसङ्गे कथितं यत् –

**अभिधेयेन सामीप्यात् सारूप्यात्समवायतः । वैपरीत्यात् क्रियायोगात् लक्षणा पञ्चधा मता**[३] ॥ इति ॥

अनया कारिकया वाच्यार्थलक्ष्यार्थयोः पञ्चप्रकाराः सम्बन्धाः निर्धारिताः सन्ति, किन्तु भक्तिध्वन्योः कुत्रापि साम्यं न भवतीति अत्र प्रतिपाद्यविषयः ।

अपि च आनन्दवर्धनाचार्यः सर्वप्रथमं स्वरूपमेवम् उपस्थापयति यत् –

"**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः**"[४] इति ।

रूपभेदात् अयं ध्वनिः भक्त्या सह एकत्वं न प्राप्नोति इति । अर्थात् ध्वनिः स्वरूपभेदानुरोधेनापि भक्तिनामकेन लक्षणाभेदेन साम्यं नैव प्राप्नोति इति आनन्दवर्धनाचार्यस्य प्रतिज्ञा । अपि च आनन्दवर्धनाचार्यः उपचारस्वरूमपि कथयामास यत् "**उपचारस्तु भक्तिः**"[५] इति । विश्वनाथाचार्योऽपि लक्षणायाः प्रसङ्गे उपचारशब्दं विवृतवान् यथा –

---

[१]काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥ [1] ध्व. लो. का. सं. 1

[२]लोचनव्याख्याने भाक्तशब्दं विवृण्वता आचार्याभिनवगुप्तपादेन प्रत्यपादि यत् - "**भज्यते सेव्यते पदार्थेन प्रसिद्धतया उत्प्रेक्ष्यते इति भक्तिः, धर्मः अभिधेयेन** सामीप्यादिः । तत आगतो भाक्तः लाक्षणिकोऽर्थः" इति ।

[३]अ.पु. – अध्यायः -345

[४]ध्व. लो. – प्र.उ.-14 का.

[५]ध्व. लो. – प्र.उ.-14 कारिकायाः व्याख्यानम्


ISSN : 2249-538X

**"उपचारो नाम अत्यन्तं विशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना अत्यन्तभेदप्रतीतिस्थगनमात्रम्"**[1] इति। दीधितिटीकाकारोऽपि इत्थमेव स्वीकरोति, यथा – **"उपचारः शक्यतावच्छेदकप्रकारकः आरोपः, लक्षणा गुणवृत्तिः"** इति।

एवम् उपचारो नाम गुणवृत्तिः लक्षणामात्रम्, न तस्मादधिकमिति। ध्वनिस्तु लक्षणाविरहितस्थलेऽपि तिष्ठति। यत्र सम्भवन्नपि व्यङ्ग्यार्थः तत्प्रयोजनस्य चारुत्वविशेषस्य अभावात् असत्कल्प इव भवति। निष्कर्षतः उपचारः (लक्षणा) केवलम् अतिशयितो व्यवहारः, ध्वनिस्तु प्रयोजनात्मकव्यापारः।

सादृश्यसम्बन्धेन केवलम् असङ्केतिते अर्थे भक्तिप्रयोगः क्रियते। किन्तु ध्वनिस्तु महान्तं विषयम् अवलम्बते। ध्वनेः स्वरूपं प्रदर्शयति आनन्दवर्धनाचार्यः यथा –

**"अयमुक्तप्रकारो ध्वनिर्भक्त्या नैकत्वं बिभर्ति, भिन्नरूपत्वात्। वाच्यवाचकव्यतिरिक्तस्य अर्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः"**[2] इति।

अपि च विवक्षितान्यपरवाच्यध्वनौ भक्तिरेव (लक्षणा) नास्ति, किन्तु ध्वनिः (व्यङ्ग्यार्थः) तत्रापि तिष्ठति। अतः स्वरूपभेदात् भक्तिध्वन्योः कदापि सामानाधिकरण्यं न भवति।

एवं भक्तिः (गौणीलक्षणा) केवलं सादृश्यबलेन असङ्केतिते अर्थे, तदर्थं बोधयितुं प्रवृत्ता भवति। एतदर्थम् लक्षणायाः अभिधया सह कश्चन सम्बन्धोऽपि भवति। किन्तु यत्र ध्वनिस्तिष्ठति, तत्र इयं स्थितिः नास्ति। अयं ध्वनिः वाच्यवाचकाभ्यां सर्वथा भिन्नो भवति। अविवक्षितवाच्यध्वनिस्थले सत्यपि लक्षणा ध्वनितः पृथक्स्वरूपैव भवति। विवक्षितान्यपरवाच्यध्वनिस्थले लक्षणायाः दर्शनमेव न भवति।

**भक्तौ ध्वनेरन्तर्भावे अतिव्याप्तिदोषः –**

**"भक्तिरेव ध्वनेः लक्षणम्"** इति लक्षणे कृते सति अतिव्याप्त्यव्याप्तिदोषौ समापततः। यतः ध्वनेः स्थलात् भिन्नेऽपि स्थले भक्तेः उपस्थितिः भवति। ध्वनिविरहिते श्लोके (काव्ये) अपि भक्तिलक्षणस्य सङ्घटनात् अतिव्याप्तिदोषः ध्वनिलक्षणे आयाति। कथनमिदं प्रमाणयितुम् उदाह्रियते यथा –

**परिम्लानं पीनस्तनजघनसङ्गादुभयतः**
**तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**
**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः**
**कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्**[3] ॥ इति ॥

अयं श्लोकः लक्षणायुक्तः, किन्तु अस्मिन् कश्चित् ध्वनिर्नास्ति। अतः लक्षणैव ध्वनिरिति कृते ध्वनिलक्षणे अतिव्याप्तिदोषः समापतति। यथा - अत्र श्लोके **"कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्"** इत्यत्र बिसिनीपत्रशयनं तल्पं स्फुटवचनं कदापि न वदति, तर्हि अत्र कथं वदतीति मुख्यार्थबाधे सति, अभिधेयस्य क्रियायोगात् रूढिमाश्रित्य स्फुटीकरोति इति लक्ष्यार्थो निष्पद्यते। अत्र नास्ति किञ्चित् प्रयोजनम् इत्यतः रूढिमूला इयं लक्षणा। अतः यत्र रूढिमूला लक्षणा भवति, तत्र ध्वनिरेव न भवति। अनेन स्पष्टं सिद्ध्यति यत् यत्र लक्षणा, न तत्र ध्वनिरिति। अतः अलक्ष्ये लक्षणासङ्घटनात् अतिव्याप्तिः।

**भक्तौ ध्वनेरन्तर्भावे अव्याप्तिदोषः**

किञ्च भक्तिरेव ध्वनेर्लक्षणम् इति लक्षणे स्थिरीकृतेऽपि विवक्षितान्यपरवाच्यनामके ध्वनिभेदे भक्तेः अभावात्

[1] सा.द. – द्वि.प.
[2] ध्व. लो. – प्र.उ.-14 कारिकायाः वृत्तिः
[3] र.ना– 2 अ, 11 श्लो.

अव्याप्तिनामकदोषो भवति। अनेन प्रकारेण यत्र यत्र भक्तिः, तत्र तत्र ध्वनिः इति व्याप्तिः नास्ति। पुनः अत्र प्रसङ्गात् पृथक् पृथक् प्रयोजनवतीरूढिनामकयोः लक्षणाभेदयोः ध्वनिलक्षणस्य अङ्गीकारे अव्याप्तिदोषः आयाति इति विचारः प्रस्तूयते।

लक्षणायाः भेदद्वयं वर्तते। प्रयोजनवती लक्षणा, रूढिमूला लक्षणा इति। अत्र उभयोः भेदकतत्त्वं व्यङ्ग्यार्थे एव तिष्ठति। प्रयोजनमूललक्षणायां व्यङ्ग्यार्थः तिष्ठति, रूढिमूललक्षणायां व्यङ्ग्यार्थो न भवति। प्रयोजनवतीलक्षणायां प्रयोजनम् (व्यङ्ग्यार्थः) एव लक्षणोत्पत्तेः कारणं भवति। यदि प्रयोजनं न स्यात्, तदा लक्षणैव न भवति। यथा मम्मटाचार्येणं कथितम् –

**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते। फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया**[१]॥ इति॥

अतः प्रयोजनवतीलक्षणा ध्वनिकाव्यस्य पर्यायभूतं लक्षणं स्वीक्रियेत, तदा पुनः अव्याप्तिनामकदोषेण सहितं स्यात्। यतो हि प्रयोजनवतीलक्षणायाः भिन्नेऽपि स्थले ध्वनिकाव्यस्य उपस्थितिः (सद्भावः) भवति। तेन सम्पूर्णं ध्वनिक्षेत्रं प्रयोजनवतीलक्षणया अभिव्याप्तं न भवति। अविवक्षितवाच्यध्वनौ एव प्रयोजनवती लक्षणा तिष्ठति, तदतिरिक्ते विवक्षितान्यपरवाच्यध्वनौ अस्याः लक्षणायाः अभावात् ( तत्र अव्याप्तेः) तस्य अव्याप्तिनामकदोषस्य उपस्थितिः भवत्येव।

**रूढिलक्षणायाम् अव्याप्तिदोषः -**

व्यङ्ग्यसहिता लक्षणा प्रयोजनवती, व्यङ्ग्यरहिता रूढिमूला इति कथ्यते। रूढिमूललक्षणायाः हेतुः परम्परागता प्रसिद्धिरेव। तत्र तथाविधेप्रयोगे किञ्चिदपि प्रयोजनं न भवति। यथा -'**कर्मणि कुशलः**', '**कलिङ्गः साहसिकः**' इत्यादीनि। अत्र व्यङ्ग्यार्थः लेशोऽपि न तिष्ठति। अस्यां दशायां यदि कथ्येत यत् रूढिमूललक्षणा व्यङ्ग्यार्थप्राणभूतस्य ध्वनिकाव्यस्य लक्षणं भवेत्, तदा महत् अनुचितं स्यात्। यतो हि व्यङ्ग्यार्थहीनत्वात् रूढिमूललक्षणा ईषदंशेनापि ध्वनिकाव्यस्य समानरूपतां न लभते। अतः ऐकान्तिकभिन्नत्वात् ( पूर्णतः भिन्नतया ) रूढिमूललक्षणा ध्वनिकाव्यस्य लक्षणतया स्वीकर्तुं नैव शक्यते। तथाकृते अव्याप्तिनामकः दोषस्तु दूरे तिष्ठतु, ततोऽपि बृहत्तरः असम्भवनामको दोषोऽपि समापतति। लक्ष्यलक्षणयोः ईषदंशेनापि साधर्म्याभावात् अयं दोषः समापतति। यदि गोः लक्षणावसरे लक्षणं क्रियेत "**पुच्छविषाणहीनः पशुविशेषः गौः**" इति, तदा अयमेव असम्भवरूपो लक्षणदोषो भवति। तथैव अत्रापि ध्वनेः लक्षणावसरे "**रूढिमूललक्षणावान् ध्वनिः**" इति लक्षणे कृते भवति।

आनन्दवर्धनाचार्यः एतद्विषये स्वकीयं मतम् उपस्थापयामास यथा –

**रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि। लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः**[२]॥ **इति**॥

तत्र लावण्याद्याः इत्यनेन लावण्य-सब्रह्मचारि-सोदरप्रभृतयः[३] शब्दाः दीधितिटीकाकारेण गृहीताः सन्ति। तथैव लोमानुलोमशब्दा अपि भवितुम् अर्हन्ति। एते शब्दाः स्वकीयान् व्युत्पत्तिजन्यान् अर्थान् परित्यज्य, अन्यत्र प्रसिद्धिं गते द्युतिविशेषादिरूपे बोधविषया भवन्ति। एषु अर्थेषु एते शब्दाः रूढाः सन्ति। अतः प्रयोजनाभावात्

[१]का.प्र.– 2 उ, 14 का.

[२]ध्व. लो. – 1 उ, 16 का.

[३]

| शब्दः | मूल-व्युत्पत्तिः | लौकिकः/साहित्यिकः रूढ्यर्थः |
|---|---|---|
| लावण्यम् | लवणस्य भावः | अवयवातिरिक्तं अलौकिकं सौन्दर्यम् |
| सब्रह्मचारि | समानवेदपठनकर्ता छात्रः | समकक्षः / सदृशः पदार्थः |
| सोदरः | एकोदरजन्यः | सर्वथा अभिन्नः (यथा - ब्रह्मानन्दसहोदरः) |


ISSN : 2249-538X

ते शब्दाः ध्वनेः आश्रया न भवन्ति ।

रूढिमूललक्षणा कदा भवति ? इति प्रश्ने कृते सति, उत्तरमेवं भण्यते यत् - परम्परागतप्रसिद्धः शब्दः स्वकीयं प्रधानमर्थं परित्यज्य, लोकप्रसिद्धिगतम् एव अर्थं स्वीकरोति इति । यथा –

**लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन् स्मेरेऽधुना तव मुखे तरलायताक्षि ! ।**
**क्षोभं यदेति न मनागपि तेन मन्ये, सुव्यक्तमेव जलराशिरयं पयोधिः**[१] ॥ इति ॥

अत्र लावण्यशब्दः अनुपमसौन्दर्ये वाच्यार्थ इव प्रसिद्धः । लवणभावरूपम् अर्थं विस्मरन् इव प्रतीयते । अतोऽत्र रूढिमूललक्षणा । एवम् अनेन प्रकारेणापि सिद्ध्यति यत् रूढिमूललक्षणापि ध्वनेः लक्षणं भवितुं नार्हति । कृते च लक्षणे लक्षणदोषः समापतति इति । एवं भक्तिध्वन्योः स्वरूपभेदात् कदापि एकत्वं न भवति । उच्यते यत् –**"भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः"** इति ।

**शब्दो नैव स्खलद्गतिः**

लक्षणावादिनाम् अभिप्रायोऽस्ति यत् - येन लक्षणाव्यापारेण **'गङ्गातटे घोषः'** इति लक्ष्यार्थः बोध्यते, तेनैव लक्षणाव्यापारेण घोषगतः शीतत्वपावनत्वातिशयः बुद्धो भवेदिति । तस्य शीतत्वपावनत्वातिशयस्य आधिक्यबोधनाय पुनरेकस्य व्यञ्जनानामकशब्दव्यापारस्य आवश्यकता नास्ति । यतः व्यञ्जनानामचतुर्थव्यापारस्य स्वीकरणम् अगौरवास्पदमिति विरोधिनां लक्षणावादिनां तर्कः । अस्य उत्तरम् आनन्दवर्धनाचार्यः प्रददाति यथा –

**मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम् । यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः**[२] ॥ इति ॥

यदि शब्दः स्खलद्गतिः स्यात्, तदा पूर्वपक्षिणां विचारः स्वीकारयोग्यो भवेत्, किन्तु तथा न भवति । अतः अयं व्यञ्जनाव्यापारः लक्षणलक्षणायाः विषयो नास्ति ।

एवम् आनन्दवर्धनाचार्यः स्वरूपभेदात्, विषयभेदाच्च लक्षणायां ध्वनिः गतार्थो न भवति इति निरूप्य[३], सम्प्रति आश्रयभेदादपि भक्तिध्वन्योः सामानाधिकरण्यं न भवति इति प्रतिपादयति ।

**वाचकत्वाश्रयेण गुणवृत्तिः**

आश्रयभेदाच्च लक्षणा ध्वनेः पृथक्त्वं भजते । अतः लक्षणायाः ध्वनेश्च आश्रयः (आधारः) समानो न भवति । तस्मात् उभयोः भक्तिध्वन्योः सामानाधिकरण्यं न सम्भवति । तत्र भक्तेः स्थितिः एवमुच्यते आनन्दवर्धनाचार्येण - **"वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता"**[४] इति ।

अर्थात् 'गुणवृत्तिः' (लक्षणाशक्तिः) सर्वदा 'वाचकत्वस्य' (अर्थात् अभिधाशक्तेः मुख्यार्थस्य च) आश्रयेण एव तिष्ठति । वाचकत्वं विना लक्षणायाः स्वतन्त्रम् अस्तित्वं किमपि नास्ति इति ।

कुमारिलभट्टेन मम्मटाचार्येण च प्रोक्तम् यत् –

**अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता**[५] ॥ इति ॥

अर्थात् मुख्यार्थ-लक्ष्यार्थयोः मध्ये 'सादृश्यं' (समानता) न भवति, अपि तु अव्यभिचारी लौकिकः सम्बन्धः भवति । यथा - **'गङ्गायां घोषः'** इत्यत्र गङ्गाशब्दस्य वाच्यार्थः 'जलप्रवाहः' । जलप्रवाहे ग्रामो न सम्भवति इति

[१]ध्व. लो. – 1 उ, 16 कारिकायाः वृत्तिभागे
[२]ध्व. लो. – 1 उ, 17 का.
[३]"भक्क्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः" ।
[४]ध्व. लो.– 1 उ, 18 का.
[५]त.वा. – 1 अ, 4 पा, 23 सूत्रम्
का.प्र. – 2 उ.

मुख्यार्थबाधे सति, जलप्रवाहेण सह '**सामीप्य**'सम्बन्धकारणात् 'तटः' इति लाक्षणिकः अर्थः गृह्यते । अयं प्रवाह-तटयोः सम्बन्ध एव '**अविनाभूतप्रतीतिः**' इति ।

लोचनटीकाकारः श्रीमदभिनवगुप्तः लक्षणाम् अभिधायाः पुच्छभूतां मन्यमानो लिखति यथा - "**यतः अभिधापुच्छभूता एव लक्षणा इति हेतोः वाचकत्वम् (अभिधाव्यापारम्) आश्रिता, तद्बाधनेन एव तस्याः उज्जीवनात्, मुख्यार्थबाधं विना लक्षणायाः प्रवृत्त्यनुपपत्तेः**"[1] इति ।

दीधितिटीकाकारोऽपि व्याख्याति यथा – "**गुणवृत्तिर्लक्षणा, वाचकत्वाश्रयेणैव व्यवस्थिता, अभिधापुच्छभूतत्वात् तामेव अवलम्ब्य उदिता भवति**" इति ।

**व्यञ्जकत्वाश्रयेण ध्वनिः**

ध्वनितत्त्वस्य आश्रयः अभिधाव्यापारो न, अपि तु व्यञ्जनाव्यापार एव । तदेव आनन्दवर्धनाचार्यः उल्लिखति यत् – "**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्**"[2] इति । अर्थात् ध्वनेः (व्यङ्ग्यार्थस्य) वास्तविकं स्वरूपं तु सर्वथा व्यञ्जकत्वाश्रितं भवति, अतः तस्य बोधः अथवा लक्षणं कदापि लक्षणा (गुणवृत्ति)माध्यमेन कर्तुं न शक्यते । यतः लक्षणा परतन्त्रा, व्यञ्जना च सर्वथा स्वतन्त्रा वर्तते ।

**उपसंहारः**

लक्षणायाः आश्रयः अभिधाव्यापारः, ध्वनितत्त्वस्य चाश्रयः व्यञ्जनाव्यापारः । अतः आश्रयस्य भिन्नत्वात् भक्तिध्वन्योः सामानाधिकरण्यं कथमपि सम्भवं नास्ति । तेन च उभयोः भिन्नाश्रयत्वात् पर्यायत्वमपि दुर्लभमेव । अतः निष्कर्षो भवति यत् भक्तिध्वन्योः भिन्नरूपत्वात्, भिन्नव्यापारत्वात्, भिन्नाश्रयत्वाच्च भक्तेः ध्वनिलक्षणं कदापि नैव भविष्यति । अतः काव्यात्मभूतं काव्यचमत्कारप्राणं ध्वनिं लक्षणायाम् अन्तर्भावयितुं प्रयत्नं कृतवतां ध्वनिविरोधचेतसां लक्षणावादिनां प्रयासः शशविषाण इव असम्भवः एव स्थास्यति इति सारः । "**तस्मादन्यो ध्वनिरन्या च गुणवृत्तिः**" इति ।

## परामृष्टाः ग्रन्थाः


१. आनन्दवर्धनाचार्यस्य ध्वन्यालोकः
२. अभिनवगुप्तस्य लोचनव्याख्यानम्
३. विश्वनाथाचार्यस्य साहित्यदर्पणः
४. मम्मटाचार्यस्य काव्यप्रकाशः
५. व्यासमहर्षेः अग्निपुराणम्
६. कुमारिलभट्टस्य तन्त्रवार्तिकम्
७. हर्षवर्धनस्य रत्नावली
८. भल्लटशतकम्


[1] ध्व. लो. – प्र.उ.-18 कारिकायाः अभिनवगुप्तस्य लोचनव्याख्यानम्
[2] ध्व. लो. – 1 उ, 18 का.


ISSN : 2249-538X

# आधुनिकसन्दर्भे नरेन्द्रारोहणमहाकाव्यस्य समाजानुगुणविचारः

आचार्यः धर्मानन्दराउतः
साहित्यविभागः,
ला.शा.रा.वि.,
नई दिल्ली

श्री सौम्यरंजन बडपण्डा*
शोधच्छात्रः, साहित्यविभागः,
ला.शा.रा.वि.,
नई दिल्ली

***लेखसारः*** *– आधुनिकपरिप्रेक्ष्ये नरेन्द्रारोहणमहाकाव्यं केवलं काव्यरचनारूपेण न, अपि तु भारतीयज्ञानपरम्परायाः जीवनमूल्यानां सशक्तप्रतिपादकरूपेण विशिष्टं वर्तते । अस्मिन् महाकाव्ये समाजस्य परिवर्तनशीलस्वरूपम्, नैतिकमूल्यानां पुनःस्थापनस्य आवश्यकता, तथा वैश्विकदृष्ट्या मानवकल्याणस्य आदर्शश्चात्यन्तं प्रभावोत्पादकतया निरूपिताः सन्ति । प्रस्तुते लेखे अस्य महाकाव्यस्य आधुनिकसामाजिकसन्दर्भेषु प्रासङ्गिकता, उपयोगिता, तथा समाजानुगुणविचारधारायाः विशदपरिशीलनं कृतमस्ति ।*

*अद्यतनसमाजे यत्र नैतिकमूल्यानां क्षयः, व्यक्तिवादस्य वृद्धिः, तथा सांस्कृतिकापचयश्च दृश्यते, तत्र नरेन्द्रारोहणमहाकाव्यं भारतीयसंस्कृतेः मूलतत्त्वानि, धर्मः, कर्तव्यनिष्ठा, लोकसंग्रहः, तथा वसुधैव कुटुम्बकम्-इत्यादीनि मूल्यानि पुनर्जीवयति । अस्य काव्यस्य नायकः केवलं राजनैतिकनेता न, अपि तु लोकनायकत्वस्य आदर्शरूपेण प्रतिष्ठितः, यः समाजस्य समग्रविकासं, नैतिकशुद्धिं, तथा आध्यात्मिकप्रगतिं च प्रोत्साहयति ।*

*अस्मिन् महाकाव्ये वर्णिताः- सुशासनम्, राष्ट्रनिर्माणम्, सामाजिकसमरसतां, नारीशक्तिसम्माननम्, पर्यावरणसंरक्षणम्-इत्यादयः आधुनिकसमाजस्य प्रमुखविषयाः सन्ति । काव्यकारेण एतेषां विषयाणां प्रस्तुतिर्न केवलं सैद्धान्तिकरूपेण, अपितु व्यावहारिकदृष्ट्या कृता, यत् पाठकानां कृते प्रेरणास्रोतः भवति । विशेषतः लोककल्याणप्रधानराजनीतिः, पारदर्शिता तथा उत्तरदायित्वबोध इत्यादीनि तत्त्वानि अस्य काव्यस्य मूलरूपेण परिगणितानि सन्ति ।*

***कूटशब्दाः*** *– नरेन्द्रारोहणमहाकाव्यम्, समाजानुगुणविचारः, राष्ट्रचेतना, नैतिकता, सुशासनम्, भारतीयज्ञानपरम्परा, आध्यात्मिकता, वसुधैवकुटुम्बकम्, युवशक्तिः, सामाजिकसमरसता, पर्यावरणसंरक्षणम्, लोककल्याणम् ।*

## प्रस्तावना

भारतीयसाहित्यपरम्परा सदा समाजस्य दर्पणरूपेण प्रतिष्ठिता अस्ति। यथा रामायणं महाभारतञ्च केवलं आख्यानग्रन्थौ न, अपितु जीवनमार्गप्रदर्शकौ स्तः । तथैव नरेन्द्रारोहणमहाकाव्यमपि आधुनिकभारतीयपरिप्रेक्ष्ये रचितं काव्यम्, यत् न केवलं एकस्य व्यक्तित्वस्य उत्थानगाथां वर्णयति, अपि तु समग्रसमाजस्य विकासमार्गं निरूपयति परिष्करोति च । भारतस्य प्रधानमन्त्रिनरेन्द्रमोदीमहोदयस्य जीवनचरितमादाय विरचितमिदं तावत् प्रथमं महाकाव्यमिति कथयितुं शक्यते । अचार्येण सोमनाथदाशेन इदं काव्यं रचितम् । महाकाव्यस्य द्वादशप्रक्रमेषु भारतमातुर्जयगानं, गुजरातवैभवम्, नरेन्द्रस्य बाल्यजीवनं शिक्षा च, बाल्ये नरेन्द्रस्य दुस्साध्यकार्यम्, राष्ट्रियस्वयंसेवकसङ्घे नरेन्द्रस्य बाल्यकालः, नरेन्द्रस्य बाल्योद्वाहः, नरेन्द्रस्य गृहत्यागो भारतभ्रमणं च , राजनैतिकजागरणम्, गोधरारेलकाण्डं राजनीतिकारोहणं च, पदाप्तिराजनीतिर्गणतन्त्रसृतिश्च, विकासप्रशासनम्, प्रधानमन्त्रिसृतिः, पुलवामानरसंहारः, प्रधानमन्त्रिविकासयोजना, कृषकान्दोलनम्, नृपकीर्त्तिभूषणम् इत्यादयः विषयाः च क्रमशः ललितवैदर्भीशैल्या ग्रथिताः काव्यकारेण ।

---

*सम्पर्कसूत्रम् - 7978449783, Email- somyaranjanbarpanda26@gmail.com

अधुना समाजः विविधाभिः समस्याभिः पीडितः अस्ति । तासु नैतिकपतनम्, सांस्कृतिकविच्छेदः, आर्थिकविषमता, पर्यावरणसंकटम्, वैश्विकसंघर्षश्च मुखयाः सन्ति । तत्समाधानाय साहित्यं महत्त्वपूर्णं साधनं भवति । अस्मिन् सन्दर्भे नरेन्द्रारोहणमहाकाव्यमत्यन्तं प्रासङ्गिकमस्ति । आधुनिकवैश्विकपरिस्थितौ, यत्र राष्ट्राणां मध्ये स्पर्धा, संघर्षः, तथा असमानता दृश्यते, तत्र अस्य महाकाव्यस्य 'वैश्विकभ्रातृत्वम्' इति सन्देशः अत्यन्तं महत्त्वपूर्णः अस्ति । "वसुधैव कुटुम्बकम्" इति भारतीयदृष्टिकोणः अस्मिन् काव्ये सशक्ततया प्रतिपादितः, यः विश्वशान्तेः, तथा मानवमूल्यसंरक्षणस्य मार्गं दर्शयति । एवं च नरेन्द्रारोहणमहाकाव्यमाधुनिकसमाजस्यावश्यकतानुसारमेकं प्रेरणादायकं काव्यं वर्तते । न केवलं साहित्यिकदृष्ट्या इदं महत्त्वपूर्णमपि तु सामाजिक-नैतिक-आध्यात्मिकक्षेत्रेष्वपि दिशानिर्देशं करोति । अस्य अध्ययनं समाजस्य उन्नयनाय, मार्गदर्शनाय, तथा भारतीयज्ञानपरम्परायाः पुनरुत्थानाय अत्यन्तम् उपयोगि वर्तते ।

## नरेन्द्रारोहणमहाकाव्ये समाजानुगुणविचारः

नरेन्द्रारोहणमहाकाव्यमाधुनिकभारतीयसाहित्ये एकं महत्वपूर्णं काव्यमस्ति, यत्र समाजस्यावश्यकतानुसारं विचारधारा सुस्पष्टतया प्रतिपादिता दृश्यते । "समाजानुगुणविचारः" इति तात्पर्यं तादृशः चिन्तनप्रवाहः यस्य मूलं समाजस्य हितसाधने, उन्नतौ, तथा समन्वये च निहितमस्ति । अस्मिन् महाकाव्ये आधुनिकसमाजे स्थितायाः समस्यायाः विविधपक्षान् समुत्थाप्य तेषां समाधानदिशा चिन्तनं प्रवर्तते ।

अस्मिन् काव्ये राष्ट्रचेतनाया आग्रहः दृश्यते। आधुनिकसमाजे यदा व्यक्तिवादः प्रबलः जातः, तदा राष्ट्रहितस्य उपेक्षा क्रियते । किन्तु नरेन्द्रारोहणमहाकाव्ये नायकः राष्ट्रसेवां परमं कर्तव्यं मन्यते । एषा भावना समाजस्य एकतां सुदृढयति तथा नागरिकाणां कर्तव्यबोधं सूचयति । नैतिकमूल्यानां प्रतिपादनमस्य काव्यस्य प्रमुखोंऽशोऽस्ति । आधुनिकयुगे भ्रष्टाचारः, असत्यं, स्वार्थपरता च सर्वत्र दृश्यते । काव्ये सत्यनिष्ठा, अनुशासनम्, परिश्रमः, तथा कर्तव्यपरायणता - इत्यादीनां महत्त्वं विशेषतया प्रतिपादितम् । अतः काव्येषु वर्णिता एवंभूताः पदार्थाः समाजस्य रक्षणाय समृद्धये चापेक्षिताः भवन्ति। सुशासनस्य आदर्शः अपि अस्मिन् महाकाव्ये वर्णितोऽस्ति । काव्यस्य नायकः प्रधानमन्त्रिनरेन्द्रमोदीमहोदयः जनसेवायां तत्परः, पारदर्शी, उत्तरदायी च अस्ति । आधुनिकराजनीतौ यत्र जनविश्वासः न्यूनः भवति, तत्र एतादृशस्यादर्शसमाजस्य कृते प्रेरणास्रोतः इति कथयितुं प्रभवामः ।

चतुर्थत आध्यात्मिकता तथा सांस्कृतिकचेतना अपि समाजानुगुणविचारस्य महत्त्वपूर्णः भागोऽस्ति । काव्ये योगस्य, ध्यानस्य, भारतीयसंस्कृतेश्च महत्त्वं प्रतिपादितमस्ति । यत् मानवस्य आन्तरिकशान्तिं तथा नैतिकस्थैर्यं वर्धयति ।

वैश्विकभ्रातृत्वस्य भावना अपि अस्मिन् काव्ये दृश्यते। "वसुधैव कुटुम्बकम्" इति सिद्धान्तः सम्पूर्णमानवजातिमेकत्वेन पश्यति। आधुनिकविश्वे संघर्षाणां निवारणाय एषा भावना अत्यन्तं उपयोगिनी अस्ति । युवशक्तेः प्रेरणा अपि अस्य काव्यस्य एकः महत्त्वपूर्णः अंशः अस्ति । युवानः राष्ट्रस्य निर्मातारः सन्ति, अतः काव्ये तेषां कृते आत्मविश्वासः, परिश्रमः, तथा स्वावलम्बनस्य सन्देशः दत्तोऽस्ति ।

अन्ते, नरेन्द्रारोहणमहाकाव्यं समाजस्य समस्यासु समाधानदृष्टिमपि प्रदर्शयति। शिक्षायाः प्रसारः, नैतिकशिक्षा, तथोत्तरदायित्वमित्यादयः उपायाः सूचिताः सन्ति ।


ISSN : 2249-538X

## राष्ट्रचेतना

अस्मिन् महाकाव्ये राष्ट्रचेतनायाः वर्णनं कविना प्रथमप्रक्रमे क्रियते यथा-

**"यस्मिन् देशे शिशूनां मनुकृतविधिना धर्मशास्त्रानुरूपं**
**संस्कारो वेदमन्त्रैः प्रचलति जननीगर्भतः पञ्चतान्तम् ।**
**आबाल्यादाश्रमाणां परिमितिनियमो निश्चितः कालदृष्ट्या**
**सोऽयं नित्यं पवित्रो जगति विजयते भारतीयार्यदेशः ॥"**[1]

अर्थात्, यस्मिन् भारतीयार्यदेशे शिशूनां संस्काराः मनुना निर्दिष्टविधिना धर्मशास्त्रानुसारं वेदमन्त्रैः सह जननीगर्भात् आरभ्य जीवनस्यान्तिमपर्यन्तं विधिवत् निबन्धनं कृतं, तथा च आबाल्यात् विवर्णिताः तथा च आश्रमाणां (ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यास) मर्यादा कालानुसारं निश्चिताः सन्ति, तदेव भारतवर्षं नित्यं पवित्रं सत् जगति विजयतेतराम् ।

**"गोसेवां गेहशुद्धिं सुहृदतिथिनतिं देवभक्तिञ्च कृत्वा**
**सान्ध्यं दीपं प्रकाश्य प्रतिदिनमचला स्नानशुद्धा महीला ।**
**गार्हस्थ्ये गार्हपत्ये बहुकृतिविभवैर्गौरवाढ्या गुणाढ्या**
**मर्यादादिव्यमूर्तिर्भवति कुलवधूर्भारते नो विदेशे ॥"**[2]

अर्थात् भारते या कुलवधूः नित्यं गोसेवां करोति, गृहस्य शुद्धिं विधत्ते, सुहृदाम् अतिथीनां च सत्कारपूर्वकं नमस्कारं करोति, देवानां प्रति भक्तिं वहति, सायंकाले सान्ध्यदीपं प्रज्वालयति, प्रतिदिनं स्नानादिना शुद्धा भवति, सा गार्हस्थ्यजीवने गार्हपत्यधर्मं बहुविधानि सत्कर्माणि च आचरन्ती, गुणैः, विभवैः, गौरवेण च युक्ता, मर्यादायाः दिव्यस्वरूपा इव विभाति । एतादृशी कुलवधू भारते दृश्यते, न तु विदेशेषु इत्यस्माकं भारतदेशस्य वैशिष्ट्यम् ।

**यथा-**

**"वेदानां वाटिकायां विकसति नितरां ज्ञानविज्ञानपुष्पं**
**गङ्गा पौराणिकीह प्रवहति तरसा सारमादाय देशे ।**
**तत्त्वं चाध्यात्मिकं तद्वितरति विपुलं दर्शनं जीवनानां**
**तस्यालम्बेन विश्वं प्रभवति तरितुं दुःखसिन्धुं सहर्षम् ॥"**[3]

अर्थात्, भारतदेशे वेदरूपेण या ज्ञानपरम्परा अस्ति, सा एका सुशोभना वाटिका सदृशी विराजते । तस्यां वाटिकायां ज्ञानस्य विज्ञानस्य च पुष्पाणि अतीव सुन्दररूपेण निरन्तरं विकसितानि सन्ति, यैः मानवजीवनं सुगन्धितं समृद्धं च भवति । एतेषां पुष्पाणां माध्यमेन केवलं आध्यात्मिकं ज्ञानं न, अपि तु लौकिकविज्ञानमपि सम्यग् प्रसारितं भवति । अत्रैव पौराणिकी गङ्गा इव ज्ञानधारा प्रवहति, यस्मिन् देशे सर्वत्र शीघ्रतया सञ्चरन्ती तत्त्वसारं स्वीकृत्य जनानां जीवनं पावयति, उन्नतिं च ददाति । एषा गङ्गा न केवलं बाह्यशुद्धिं करोति, किन्तु अन्तःकरणस्य अपि शुद्धिं साधयति, येन मनुष्याः धर्ममार्गे प्रवर्तन्ते । अस्यां भूमौ आध्यात्मिकं तत्त्वमप्यत्यन्तं विपुलरूपेण विकसितमस्ति, यत् दर्शनशास्त्रमाध्यमेन जीवनस्य रहस्यानि उद्घाटयति । एते दर्शनप्रणाल्यः वेदान्तः- सांख्यं- योगः- न्याय - इत्यादयः-मानवजीवनस्य उद्देश्यं, कर्तव्यं, तथा मोक्षमार्गं च स्पष्टयन्ति । एवं

[1]नरेन्द्रारोहणम्- प्रथमप्रक्रमः(सर्गः)-श्लोकः -१/२२
[2]नरेन्द्रारोहणम्- प्रथमप्रक्रमः(सर्गः)-श्लोकः -१/२४
[3]नरेन्द्रारोहणम्- प्रथमप्रक्रमः(सर्गः)-श्लोकः -१/२९

एतेषां वेदानां, पुराणानां, दर्शनानां च आलम्बनं कृत्वा इदं विश्वं दुःखरूपसागरं सहजतया, आनन्देन च, तर्तुं समर्थः भवति । अन्यथा दुःखसागरः दुरतिक्रमः स्यात्, किन्तु भारतीयज्ञानपरम्परायाः आश्रयणेन सः सुगमः, सुखकरः च भवति ।

## नैतिकमूल्यानि

अस्मिन् महाकाव्ये नैतिकमूल्यानां वर्णनं कविना एतावत् क्रियते यथा-

### सत्यनिष्ठा

**''स्वाधीनताया नवरश्मिभासा, प्रकाशमाने नवभारतेऽस्मिन् ।**
**सामाजिकानां गणतन्त्रगन्ध-माघ्राय मोदी क्षितिमाजगाम ॥**[१]
**वनस्पतीनां परिपेषणेन, तैलोत्सनिष्पादनदक्षजातौ ।**
**घांची' 'ति नाम्ना प्रथितेऽन्यपश्चा-द्वर्गे जनानां दलितेषु गण्ये ॥''**[२]

अर्थात् यदा अस्मिन् नवभारते स्वाधीनतायाः नूतनकिरणप्रभया सम्पूर्णदेशः प्रकाशितः आसीत्, तदा सामाजिकजीवनस्य गणतन्त्ररूपस्य सौरभं अनुभवन् अर्थात् लोकतन्त्रस्य मूल्यैः प्रेरितः सन् मोदीनामकः व्यक्तिविशेषोऽस्यां भारतभूमावतीर्णोऽभवत् ।

श्रीनरेंद्रमोदीमहोदयः तादृशे जातौ उत्पन्नः, या वनस्पतीनां बीजानां परिपेषणेन तैलनिर्माणकर्मणि निपुणा आसीत्, सा "घांची" इति नाम्ना प्रसिद्धा आसीत् । सा जातिः समाजस्य अन्यपश्चाद्वर्गेषु तथा दलितवर्गेषु अपि परिगण्यते ।

### नरेन्द्रस्य विद्यालयजीवनम्

**''गात्रस्य बुद्धेर्मनसेन्द्रियाणां, चरित्रशुद्ध्या नवनीतनीतेः ।**
**आजीविकायाश्च विकासमूलो, विद्यालयो ज्ञानविनोदकेन्द्रम् ॥''**[३]

अर्थात् विद्यालयः सः स्थानविशेषोऽस्ति, यः शरीरस्य, बुद्धेः, मनसः, इन्द्रियाणां च सम्यक् विकासं साधयति । सः चरित्रस्य शुद्ध्या, नवनीतवत् शुद्धया नीत्या उत्तमाचारयुक्तेन व्यवहारेण युक्तं शिक्षणं प्रददाति । तथा च सः विद्यालयः आजीविकायाः जीवनोपार्जनस्य विकासस्य च मूलकारणं भवति । अतः विद्यालयः केवलं ज्ञानप्रदः न अपि तु ज्ञानाभ्युदयस्याध्ययनस्यानन्दस्य च केन्द्ररूपेण प्रतिष्ठितोऽस्ति ।

### नरेन्द्रस्य गृहत्यागो भारतभ्रमणञ्च

श्रीनरेन्द्रमोदीमहोदयः स्वस्य जीवने बहुत्यागं कृतवान्, यथा-

**''किशोरमोदी जननीविनिर्मितं, सुमिष्ट 'कंसार' रसालपिष्टकम् ।**
**ललाटपट्टे विधिचन्दनाऽङ्कितो, ययौ गृहीत्वा नवभारतायनम् ॥''**[४]

[१]नरेन्द्रारोहणम्- तृतीयप्रक्रमः(सर्गः)-श्लोकः -३/२
[२]नरेन्द्रारोहणम्- तृतीयप्रक्रमः(सर्गः)-श्लोकः -३/३
[३]नरेन्द्रारोहणम्- तृतीयप्रक्रमः(सर्गः)-श्लोकः -३/२२
[४]नरेन्द्रारोहणम्- चतुर्थप्रक्रमः(सर्गः)-श्लोकः -४/१


ISSN : 2249-538X

अर्थात् यदा नरेन्द्रः किशोरावस्थायामासीत्, तदा सः स्वजनन्या निर्मितं सुमिष्टं "कंसार" नामकं रसयुक्तं पिष्टकमादाय, मातृस्नेहस्य पोषणेन संवर्धितोऽभवत्। तस्य ललाटपट्टे विधिवत् चन्दनस्य शुभचिह्नमारोपितमासीत्, यत् तस्य संस्कारसम्पन्नतां, धार्मिकभावनां, तथा शुभप्रयोजनस्य सूचकं बभूव। एवं सः किशोरमोदी स्वजीवने नूतनमार्गस्यारम्भं कर्तुं, "नवभारतायनम्" इति लक्ष्यं मनसि निधाय, गृहम् त्यक्त्वा अग्रे प्रस्थितः। अयं "नवभारतायनम्" इत्यस्य अभिप्रायः केवलं भौतिकयात्रा न, अपि तु राष्ट्रसेवायाः, आत्मविकासस्य, तथा समाजकल्याणस्य दिशि एकः महान् संकल्पः आसीत्।

अतोऽयं श्लोकः सूचयति यत्-बाल्ये एव मातृसंस्कारैः पोषितः, धार्मिकसंस्कारयुक्तः, दृढसंकल्पवान् च नरेन्द्रः स्वजीवनस्य लक्ष्यं राष्ट्रनिर्माणं कृत्वा तस्य पूर्तये अग्रे गतवान्। एषा कथा यूनां कृते प्रेरणास्रोतः भवति या कथा संस्कारं, मातृस्नेहं, तथा जीवनस्योच्चलक्ष्यं सफलतां च सुनिश्चिन्वन्ति।

**"सुखाप्तिकामे किमपीह चेतना-महानभोमण्डललुप्तकङ्कटे।**
**गृहात्प्रयाणावसरे तदाऽभज-न्निशीथिनीनिश्चललक्ष्यनिष्कुटे॥"**[1]

अर्थात् - यदा नरेन्द्रमोदी महोदयः गृहात् प्रस्थानं करोति, तदा तस्य चेतना केवलं स्वसुखप्राप्त्यर्थं न प्रवृत्ता, अपि तु किमप्युच्चतरं लक्ष्यं प्रति उन्मुखी भवति। तस्य मनः साधारणजीवनस्य सीमाभ्यः उत्क्रम्य विशालस्य आकाशमण्डलस्य इव अनन्ते क्षेत्रे विचरन् एकस्य स्वस्थसमाजस्य गठनाय दृढसंकल्पोऽभवत्।

तस्य प्रस्थानक्षणे सः निशीथिन्याः निःशब्दे, निश्चले च वातावरणे, दृढलक्ष्ययुक्ते एकान्तप्रदेशे स्थित्वा स्वजीवनस्य महान् उद्देश्यं चिन्तयामास। तस्य अन्तःकरणमचललक्ष्ये स्थितं, चलनरहितं, दृढसंकल्पपूर्णं च अभवत्। महापुरुषाणां जीवनस्य निर्णायकक्षणेषु तेषां चेतना सामान्यसुखलाभात् परं गत्वा उच्चतरलक्ष्येषु केन्द्रिता भवति। एकान्ते, शान्ते च वातावरणे दृढसंकल्पः उदेति, यः तस्य जीवनयात्रायाः प्रारम्भः।

## सुशासनं तथा जनकल्याणपरककार्याणि-

**"मुख्यमन्त्रिपदमाप्य गुर्जरे, लोकसेवनमना नवां नवाम्।**
**योजनां विरचयन्स साधको, लोकनायकगणे दृढोऽभवत्॥"**[2]

अर्थात् यदा नरेन्द्रमोदीमहोदयः गुर्जरप्रदेशे मुख्यमन्त्रिपदं प्राप्तवान्, तदा सः लोकसेवायां नितराम् अनुरक्तचित्तः सन् नित्यं नूतन-नूतनाः योजनाः अकरोत्। सः एतादृशः साधकः कर्तव्यपरायणः, प्रयत्नशीलो भूत्वा जनहितकार्येषु निरतोऽभवत्। एवं सः स्वकर्मणा, जनसेवया, तथा नूतनयोजनानां सफलप्रवर्तनद्वारा लोकनायकानां समूहे दृढस्थानं प्राप्तवान् प्रसिद्धिं च प्राप्नोत्। यथा काव्यस्याष्टमप्रक्रमे -

**"धर्मनीतिमतनोज्जने जने, शिक्षया कृषिसृतौ दिनं दिनम्।**
**वारिसेचनभृता वनैर्धनै-स्सस्यसुन्दरमभूत्तदङ्गणम्॥"**[3]

अर्थात् यदा जनसमूहेषु धर्मः, नीतिश्च क्रमशः प्रसारितौ अभवताम्, तदा जनाः शिक्षया संस्कारिताः सन्तः उत्तममार्गे प्रवर्तितुम् आरब्धवन्तः। प्रतिदिनं शिक्षायाः प्रसारेण लोकानां बौद्धिकः नैतिकश्च विकासः अभवत् येन समाजे शिष्टाचारः, कर्तव्यपरायणता, तथा सदाचारः दृढीकृतः।

[1] नरेन्द्रारोहणम्- चतुर्थप्रक्रमः(सर्गः)-श्लोकः -४/२
[2] नरेन्द्रारोहणम्- अष्टमप्रक्रमः(सर्गः)-श्लोकः -८/१
[3] नरेन्द्रारोहणम्- अष्टमप्रक्रमः(सर्गः)-श्लोकः -८/३

तथैव कृषिक्षेत्रे अपि विशेषविकासः जातः। "कृषिसृतौ" इति पदेन कृषिव्यवस्थायाः प्रवाहः, उन्नतिः, तथा सस्योत्पादनवृद्धिः बोध्यते। जलसिञ्चनव्यवस्थायाः समुचितविस्तारेण भूमेः उर्वरता वर्धिता। नदीनां, नगराणामन्येषां जलस्रोतसां च सदुपयोगेन कृषकाः लाभान्विता आसन्।

वृक्षारोपणेन तथा आर्थिकसाहाय्येन अपि प्रदेशस्य समग्रविकासः अभवत्। वृक्षसमृद्धिः पर्यावरणस्य संरक्षणं कृत्वा जीवनं सुखकरं अकरोत्, तथा आर्थिकविकासेन कृषकाणां जीवनस्तरः उन्नतः अभवत्। एवं सर्वेषामेतेषां प्रयासानां फलरूपेण तस्य प्रदेशस्य सर्वाणि क्षेत्राणि सस्यैः सुन्दरम्, समृद्धम्, हरित् च अभवन्। अन्नसमृद्धिः, कृषिविकासः, तथा सामाजिकनैतिकप्रगतिः -एते सर्वे सम्भूय एकमादर्शसमाजं निर्मितवन्तः इति अत्र प्रतिपाद्यते।

## भारतीयसंस्कृतिः एवं वैदिकशिक्षायाः प्रचारप्रसारः

### डिजिटल-भारतम्

**"अङ्कीयभारतमिति प्रथितप्रणाल्या, न्याये च शिक्षणविधौ तनुसुस्थतायाम्।**
**साक्षात्सुकर्मसचिवैर्जनताऽभिमर्शे, सम्पर्कसूत्ररचनामकरोन्नरेन्द्रः॥"**[1]

अर्थात्, श्रीनरेन्द्रमोदीमहोदयः "अङ्कीयभारतम्" (डिजिटल-भारतम्) इति नाम्ना प्रसिद्धया नूतनप्रणाल्या राष्ट्रस्य विकासं सम्यक् आरब्धवान्। अस्याः प्रणाल्याः माध्यमेन न्यायव्यवस्थायां तथा शिक्षणविधौ अपि सुसंगठितता, सुदृढता, तथा सुलभता स्थापिताऽभवत्, येन तन्त्रं अधिकं सुव्यवस्थितं कार्यक्षमं च जातम्। तथैव "तनुसुस्थतायाम्" इति पदेन स्वास्थ्यव्यवस्थायाः अपि सुदृढीकरणं सूचितम्—अर्थात् जनानां शारीरिककल्याणाय विविधाः योजनाः प्रवर्तिताः। अस्यां समग्रव्यवस्थायां नरेन्द्रमोदीमहोदयः साक्षात् कर्तव्यपरायणैः अधिकृतैः सह मिलित्वा जनतायाः मतं, आवश्यकताः, समस्याश्च सम्यक् अवगत्य तैः सह प्रत्यक्षसंवादं कृत्वा, "सम्पर्कसूत्राणि" स्थापितवान्। अर्थात्, सः जनैः सह निकटसम्बन्धं स्थापयित्वा, तेषां समस्याः ज्ञात्वा तासां समाधानाय योजनाः निर्मितवान् एवं नरेन्द्रमोदीमहोदयस्य नेतृत्वे डिजिटलप्रणाल्याः, सुशासनस्य, जनसम्पर्कस्य च समन्वयेन राष्ट्रविकासस्यैकं नवीनमादर्शरूपं स्थापितमित्यत्र प्रतिपाद्यते।

### स्वच्छभारताभियानम् -

**"स्वच्छभारताभियानयोजनाश्रितं, जाह्नवीहिमालयोपशोभमानम्।**
**वातवारिवासभूमिशुद्धतायुतं, मोदिचिन्तनेन राष्ट्रभूषणं कृतम्॥"**[2]

नरेन्द्रमोदीमहोदयस्य चिन्तनप्रभावेण "स्वच्छभारताभियानम्" नाम्नी योजना आरब्धा, या सम्पूर्णभारतभूमेः शोभां वर्धयितुं प्रवर्तिता। एषा योजना जाह्नवी तथा हिमालयेन उपशोभमाना अस्य देशस्य प्राकृतिकवैभवं रक्षितुं संवर्धयितुं च सहायिकाऽभूत्।

एतदभियानमाध्यमेन वातावरणस्य, वारिणः, तथा वासभूमेः शुद्धता सुनिश्चितीक्रियते स्म। जनाः स्वपरिसरस्य स्वच्छतां प्रति जागरूकाः अभवन्, येन ग्रामेषु, नगरेषु च शौचालयनिर्माणं, अवकरनिष्कासनव्यवस्था, स्वच्छपर्यावरणस्य च विस्तारोऽभवत्।

[1]नरेन्द्रारोहणम्- दशमप्रक्रमः(सर्गः)-श्लोकः -१०/१२
[2]नरेन्द्रारोहणम्- दशमप्रक्रमः(सर्गः)-श्लोकः -१०/२४


ISSN : 2249-538X

एवं नरेन्द्रस्य दूरदर्शिन्या चिन्तया एषा योजना राष्ट्रस्य भूषणरूपेण परिणता-अर्थात् भारतम् अधिकं स्वच्छं, सुन्दरं, स्वास्थ्यकरं च सञ्जातम् ।

## अयोध्याश्रीराममन्दिरस्थापना -

**"अयोध्याया रामालयरचनकार्याय बहुशो, जना : प्राणांस्त्यक्त्वा समधिगतकीर्त्या जनमखे ।**
**पुराऽपश्यन् स्वप्नं यमिह भुवि धर्मस्य रचने, प्रपूर्णं तत्कृत्वा जयति खलु मोदी जनपति : ॥"[1]**

अर्थात् श्रीरामस्य मन्दिरनिर्माणकार्याय अतीतकालात् आरभ्य बहवः जनाः महान्तं संघर्षं कृतवन्तः । केचन तत्र प्राणानपि त्यक्तवन्तः येन ते सम्यक् कीर्तिम् अलभन्त । तेषां जनानां मनसि एषः एकः महान् संकल्पः, स्वप्नरूपेण च आसीत् यत् अस्मिन् भूमण्डले धर्मस्य पुनः प्रतिष्ठा भवेत्, श्रीरामस्य मन्दिरं च निर्मीयेत । पूर्वकाले एषः संकल्पः केवलं स्वप्नरूपेण एव आसीत्, किन्तु कालान्तरे स एव स्वप्नः साकाररूपं प्राप्तः । यदा एतत् कार्यं सम्पूर्णतां गतं, तदा जना अत्यन्तं हृष्टा अभवन् । एवं सति यस्य नेतृत्वे एषा धर्मकार्यसिद्धिः अभवत्, सः जनप्रियः यशस्वीप्रधानमंत्रीनरेन्द्रमोदीमहोदयः "जनपति :" इव जनानां प्रियनेता लोकनायकरूपेण जयति अर्थात् तस्य यशः सर्वत्र प्रसृतम् ।

## मन्दिरपुनारचना

**"काशी-महाकाल-महेशवासान्नवान्विधातुं रमणीयरूपै :।**
**भक्त्यमृताप्लावकमोदिवर्यस्सङ्कल्पचित्तेन चकार कार्यम् ॥"[2]**

यशस्वी प्रधानमंत्रीनरेन्द्रमोदीमहोदयः भक्तिभावपरिपूर्णमनसा काश्याः, उज्जयिन्याः, तथा महेशस्य अन्येषां पवित्रधाम्नां नूतनं, सुन्दरं, रमणीयं च रूपं विधातुं तेषां विकासाय च संकल्पं कृतवान् । तस्य संकल्पः केवलं भौतिकनिर्माणपर्यन्तः न आसीत्, अपि तु भक्त्यमृतस्य प्लावनं कर्तुम् अभवत् । सः तीर्थस्थानानां सौन्दर्यवर्धनं, व्यवस्थां कारयितुं, तथा श्रद्धालूनां सौविध्यं च कर्तुं मनसि दृढनिश्चयं कृत्वा तत्सर्वं कार्यं सम्पादितवान् । एवं भक्तिसम्पन्नचित्तेन, दृढसंकल्पेन च सः पवित्रतीर्थक्षेत्राणां पुनरुत्थानं कृत्वा तानि अधिकानि रमणीयानि सुशोभनानि कृतवान् ।

## गङ्गासंस्कार :- नमामि गङ्गे !

**"वाराणसी क्षेत्रपवित्रसूत्रा गङ्गा विहङ्गाकुलमानचित्रा ।**
**तरङ्गमालाप्लवरङ्गशाला पुनाति पुण्यै : परिपाति पापात् ॥"[3]**

अर्थात् वाराणसी क्षेत्रं परमपवित्रं स्थलमस्ति, यत्र गङ्गा नदी इव एकं पवित्रसूत्रं प्रवहति । सा गङ्गाविहङ्गैः आकुला, रमणीयदृश्ययुक्ता, मनोहररूपेण शोभमाना चास्ति, या अस्य क्षेत्रस्य सौन्दर्यं बहुगुणं वर्धयति । तस्याः गङ्गायाः तरङ्गमालाः इव एकां रमणीयां रङ्गशालां निर्मान्ति, यत्र जलतरङ्गाणां चलचञ्चलं मनोहरं दृश्यं जनयति । एषा गङ्गा स्वस्याः पुण्यप्रभावेण जनान् पवित्रीकरोति, तेषां पापान्यपि निवारयति । अतः वाराणसी क्षेत्रं गङ्गायाः पवित्रप्रवाहेण, तस्याः सौन्दर्येण, तथा धार्मिकमहत्त्वेन अत्यन्तं पावनं, पुण्यप्रदं, मोक्षदायकं चास्ति ।

[1] नरेन्द्रारोहणम्- दशमप्रक्रमः(सर्गः)-श्लोकः -१०/३९
[2] नरेन्द्रारोहणम्- दशमप्रक्रमः(सर्गः)-श्लोकः -१०/७२
[3] नरेन्द्रारोहणम्- दशमप्रक्रमः(सर्गः)-श्लोकः -१०/७३

## निष्कर्षः

समग्रतया अवलोक्यते चेत् नरेन्द्रारोहणमहाकाव्यं केवलं काव्यरचनारूपेण न, अपि तु आधुनिकभारतीयसमाजस्य दर्पणस्वरूपेण, मार्गदर्शकरूपेण च प्रतिष्ठितमस्ति । अस्मिन् महाकाव्ये कविना यथार्थदृष्ट्या समाजस्य विविधपक्षाः- (नैतिकः, सामाजिकः, सांस्कृतिकः, राजनैतिकः, आध्यात्मिकश्च) सम्यक् परिशीलिताः सन्ति । "समाजानुगुणविचारः" इति अस्य मूलभावना, यया समाजस्य आवश्यकतानुसारं तस्य उन्नतये मार्गः प्रदर्शितः । अस्य काव्यस्य विशिष्टता अत्र दृश्यते यत् अत्र राष्ट्रचेतना, नैतिकमूल्यानि, सुशासनम्, लोककल्याणपरकदृष्टिः, पर्यावरणसंरक्षणम्, नारीसशक्तीकरणम्, वैश्विकभ्रातृत्वम् इत्यादयः तत्त्वाविशेषाः एकस्मिन् सूत्रे समन्विताः सन्ति । विशेषतः, "वसुधैव कुटुम्बकम्" इति भारतीयदृष्टिकोणस्य प्रतिपादनम् अस्य काव्यस्य वैश्विकमहत्त्वं वर्धयति, यत् अद्यतनसंघर्षपूर्णे विश्वे शान्तिना, सह अस्तित्वस्य च सन्देशं ददाति ।

एतत् महाकाव्यं केवलमैतिहासिक-जीवनचरितपरकं न, अपि तु आदर्शजीवनदर्शनस्य प्रतिपादकमस्ति । अत्र नायकस्य जीवनयात्रा बाल्यकालात् आरभ्य प्रधानमन्त्रिपदपर्यन्तमेकप्रेरणादायकादर्शचरित्ररूपेण चित्रिता अस्ति, या युवसमाजं कर्तव्यपरायणतां, आत्मविश्वासं, राष्ट्रसमर्पणं च शिक्षयति ।

तथैव अस्मिन् काव्ये आधुनिकविकासस्य विविधाः आयामाः यथा-अङ्कीयभारतप्रणाली, स्वच्छताभियानम्, तीर्थक्षेत्रपुनरुत्थानम्, कृषिविकासः, शिक्षाविस्तारश्चेत्यादिसमाजस्य व्यवहारिकसमस्यानां समाधानमत्र प्रस्तुतम् । एतेषां माध्यमेन कविः दर्शयति यत् साहित्यं केवलं चिन्तनपरकं न, अपि तु क्रियात्मकपरिवर्तनस्य अपि परमं प्रधानञ्च साधनं भवितुमर्हति ।

अन्ततः इदं निष्कर्षरूपेण वक्तुं शक्यते यत्, नरेन्द्रारोहणमहाकाव्यमाधुनिकभारतीयज्ञानपरम्परायाः पुनरुत्थानस्य, नैतिकमूल्यानां पुनःस्थापनस्य, तथा समग्रसमाजविकासस्य च एकं सशक्तं साहित्यिकसाधनमस्ति । अस्य अध्ययनं न केवलं साहित्यशास्त्रीयदृष्ट्या, अपि तु सामाजिक-नैतिक-आध्यात्मिकदृष्ट्या अपि अत्यन्तं उपयोगि, प्रासंगिकं च वर्तते । अतः एतत् महाकाव्यमद्यतनयुगे मानवसमाजस्य कृते प्रेरणास्रोतः, मार्गदर्शकं, तथा जीवनमूल्यानां पुनःस्मारकमिति नास्त्यत्र कस्यापि सन्देहस्यावकाशः ।

## परामृष्टाः ग्रन्थाः

१. नरेन्द्रारोहणम्, दाश-सोमनाथः, सोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजराटः, २०२५
२. करोनादहनम्, दाश-सोमनाथः, ओडिशा-संस्कृत-अकादेमी, भूवनेश्वरः, २०२१
३. काव्येष्वलंकारसन्निवेशनविधिः, दाश-सोमनाथः, राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः,२००८
४. श्रीक्षेत्रेश्रीजगन्नाथः, दाश-सोमनाथः, धरा श्रीराधा ट्रस्ट,अमरेंद्रमहापत्र,२०१५
५. वंशीविनोदः, दाश-सोमनाथः, Sanskrit Advance Research Institute, Puri, Odisha,२०११
६. कवितामाला, दाश-सोमनाथः
७. ललितलवङ्गलता (अनूदितपुस्तकम्), दाश-सोमनाथः
८. हिमांशुश्रीः, दाश-सोमनाथः
९. Complete Sanskrit Works On Jagannath Culture (Compiled), Das-Somnath
१०. अग्निपुराणम्, आनंदाश्रममुद्रणालयः, सन् १९५७

११. अद्भुतरामायणम्, राय, रामकुमारः, प्राच्य प्रकाशनम्, वाराणसी, २०१०
१२. अध्यात्मरामायणम्, अनु. मुनिलाल, गीता-प्रेस-गोरखपुरः
१३. आनन्दरामायणम्, अनु. पाण्डेयरामतेजशास्त्री, पंडित-पुस्तकालयः, काशी सन् १९५८
१४. Narendra Modi: A Political Biography, Marino- Andy, Harper Collins Publisher Publisher India Ltd, 2014
१५. Creative Discruptor Narendra Modi, Balshankar- R, Konarak Publishers, 2019

# सट्टकरचनात्वेन राजशेखरकृतकर्पूरमञ्जर्याः समीक्षात्मकमध्ययनम्

डा. दीपङ्करमण्डलः*
सहायकाध्यापकः, संस्कृतविभागः,
चारता-रामाइ-पण्डित-महाविद्यालयः,
बाँकुडा,पश्चिमवङ्गः

***शोधसारः*** *– सुविस्तृतं संस्कृतसाहित्यम् प्रधानतया दृश्यं श्रव्यञ्चेति द्विधा विभक्तम् । दृश्यकाव्यान्तर्गतेषु उपरूपकेषु सट्टकमनवद्यम् । काव्य-नाटकादिविषये विविधाङ्गिके विविधपरिसरे पर्यालोचनं नितरां दृश्यते परन्तु सट्टकविषये न तादृशं किञ्चिदपि । सट्टकं खलु नाटिकायाः भिन्नरूपम् अथवा उपरूपकान्तर्गतेषु अभिनवकाव्यश्रेण्यामायातीति आचार्याणां विवादविषयः । अस्मिन्नवसरे तादृशं सट्टकविषयकं तथा कर्पूरमञ्जरीत्याख्ता प्राचीनसट्टकग्रन्थमाश्रित्य चर्चात्र प्रस्तूयते । किं खलु सट्टकम्, कीदृशी रचना एषेति परिशील्य सट्टकरचनायाः आदिनिदर्शनत्वेन परिगणितायां कर्पूरमञ्जर्यां किम्प्रकारेण सट्टकलक्षणसङ्गतिः भवेत् न वेति पत्रेऽस्मिन् पर्यालोचितम् ।*

***कूटशब्दाः*** *– दृश्यकाव्यम्, उपरूपकम्, नाटिका, प्राकृतम्, सट्टकम् ।*

काव्यशास्त्रकारैः काव्यलक्षणादिविषयाः विविधाः अभिमताः प्रदत्ताः । काव्यभेदविषयेऽपि मतैक्यमपेक्षितम् । यद्यपि गद्य-पद्य-नाटकादितुल्यं कवेः कर्म काव्यमिति सर्वजनसमर्थितम्, तथापि आचार्यविश्वनाथेन इन्द्रियग्राह्यत्वेन काव्यस्य भेदद्वयं दर्शितम् – **'दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधामतम्'**।[१] दर्शनयोग्यं दृश्यं तथा श्रवणयोग्यं श्रव्यमिति । अर्थात् दर्शननिमित्तं नेत्रादीन्द्रियमाध्यमेन सहृदयानां रसास्वादनं यत्र सम्पाद्यते तत् दृश्यकाव्यमिति । अभिनययोग्यं खलु एतादृशं काव्यम् । दृश्यकाव्यं रूपकमेव, यत्र रामादीनां रूपारोपः[२] भवति । रूपकमिदं दशविधम् उपरूपकं त्वष्टादशविधम् । तत्रोच्यते –

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥**
**नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् । प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥**
**संलापकं श्रीगदितं शिल्पकं च विलासिका । दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥**
**अष्टादश प्राहुरूपरूपकाणि मनीषिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ॥**[३]

एतेषु उपरूपकेषु प्रसिद्धमेकमुपरूपकं भवति सट्टकमिति । सट्टके निर्दिष्टं वैशिष्टं विद्यते येन एषा रचना अपरेभ्यः काव्येभ्यः पृथग्रूपेण स्वतन्त्रतां लभते । कर्पूरमञ्जर्यां ग्रन्थकारेण सट्टकप्रसङ्गेन ग्रन्थस्यादौ उक्तम् –

**तत् सट्टकमिति भण्यते दूरं यो नाटिकामनुसरति । किं पुनः प्रवेशकविष्कम्भकौ केवलं न दृश्यते ॥**[४]

अर्थात् सट्टकं प्रवेशक-विष्कम्भकरहितं, नाटिकातुल्यञ्च भवति । साहित्यदर्पणकारेणापि विस्तरेणोक्तं -

**सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् । न च विष्कम्भकोऽप्यत्र-प्रचुरश्चाद्भुतो रसः ॥**
**अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ॥**[५]

अत्र सट्टकविषये राजशेखर-विश्वनाथयोरभिमतं काव्यशास्त्रीयवैशिष्ट्यञ्च परिपूरकत्वेन प्रतिभाति । आचार्य-

***सम्पर्कसूत्रम्** - 9851832330 , Email- dipankar.dip11@gmail.com

[१]साहित्यदर्पणः, 6/1
[२]तद्रूपारोपात्तु रूपकम्, साहित्यदर्पणः, 6/1
[३]तत्रैव, 6/3-6
[४]कर्पूरमञ्जरी, 1/6
[५]साहित्यदर्पणः, 6/276

हेमचन्द्रेणापि तदीये काव्यानुशासने सट्टकलक्षणप्रसङ्गेनोक्तम् –

**विष्कम्भकप्रवेशकरहितो यस्त्वेकभाषया भवति । अप्राकृतसंस्कृतया सट्टको नाटिकाप्रतिमः ॥**[१]

अर्थात्, विष्कम्भक-प्रवेशकरहितं, प्राकृतरहितं संस्कृतभाषया संस्कृतरहितं सम्पूर्णं प्राकृतभाषया वा विरचितं, नाटिकातुल्यमुपरूपकं खलु सट्टकमिति। द्वादशशताब्द्याः नाट्यशास्त्रकाररामचन्द्रगुणभद्रकृते नाट्यदर्पणे अपि सट्टकलक्षणे हेमचन्द्रस्यैव प्रतिबिम्बमायाति । तेनोक्तम् –

**विष्कम्भकप्रवेशकरहितौ यस्त्वेकभाषया भवति । अप्राकृतसंस्कृतया स सट्टको नाटिका ॥**[२]

अतः उपर्युक्तानां पण्डितानां विचारमवधार्य प्रतीतं यत् सट्टकं तु न तादृशः नूतनकाव्यप्रकारः, तच्च नाटिकायाः किञ्चित् परिवर्तितरूपमेव। राजशेखर-हेमचन्द्र-विश्वनाथादिभिः कृते सट्टकलक्षणे बहुवारं नाटिकाप्रसङ्गः आगतः। ततः सट्टकविषये परिपूर्णधारणायाः कृते सर्वादौ तु नाटिकाविश्लेषणमप्यपेक्षितम्। विश्वनाथमते –

**नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका । प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥**
**स्यादन्तःपुरसम्बद्धा सङ्गीतव्यापृताथवा । नवानुरागा कन्यात्र नायिका नृपवंशजा ॥**
**सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः । देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥**
**पदे पदे मानवती तद्वशः सङ्गमो द्वयोः । वृत्तिः स्यात् कैशिकी स्वल्पविमर्षाः सन्धयः पुनः ॥**[३]

केचन पाश्चात्यपण्डिताः सट्टकं नृत्यगीतसंकुलरचनेति मन्यन्ते। स्टेन-कोनो तथा किथ-महोदयश्च उक्ताभिमतसमर्थकौ दृश्येये। कर्पूरमञ्जर्यामपि राजशेखरेण कथितम् – **'सट्टअं णच्चिदव्वं'**[४] **(सट्टकं नर्तितव्यम्)**। अतः उपर्युक्तविश्लेषणद्वारा एवं वक्तुं शक्यते –

- सट्टकं सम्पूर्णतया प्राकृतभाषायामेव सम्पाद्यते इति विश्वनाथः। परन्तु हेमचन्द्रस्तथा रामचन्द्रगुणभद्रा-नुसारं सट्टकमेकभाषायामेव लिखितं भवेत्, अर्थात् सम्पूर्णं संस्कृतभाषया प्राकृतभाषया वा। न केवलं प्राकृतेनेति।
- प्रवेशक-विष्कम्भकरहिता रचना।
- जवनिका इत्याख्या अस्याः रचनायाः अङ्कः।
- चतुरङ्कपरिमिता इयं रचना।
- शृङ्गारः प्रधानरसः, अद्भुतरसस्यापि प्राधान्यं दृश्यते। कैशिकीभारतीवृत्तिस्थितिः परिलक्ष्यते।
- स्त्रीपात्रबहुलरचना। नायिका गीतनिपुणा, नवानुरागसम्पन्ना, अन्तःपुरवासिनी च भवेत्।
- नायकः खलु धीरललितः, प्रसिद्धः राजा भवेत्। नायक-नायिकयोर्मेलनं प्रधानमहिषीद्वारा नियन्त्रितं भवेदिति।

विविधानि उल्लेखयोग्यानि सट्टकानि परिलक्षितानि। राजशेखरविरचिता 'कर्पूरमञ्जरी' एव तासु रचनासु सुप्रसिद्धा गुणिजनप्रशंसिता च। सट्टकरचनायाः पर्यायत्वेन कर्पूरमञ्जर्याः परमेव नयचन्द्रकृता 'रम्भामञ्जरी' विदिता। अनन्तरं मार्कण्डेयप्रणीता 'विलासवती', रुद्रदासकृता 'चन्द्रलेखा', विश्वेश्वरपाण्डेयविरचिता

[१] काव्यानुशासनम्, भाग-1, अध्याय-4, पृ-444
[२] नाट्यदर्पणम्, चतुर्थविवेकः,सू-55
[३] साहित्यदर्पणः, 6/269-272
[४] कर्पूरमञ्जरी, प्रथमजवनिकायाम्, नान्द्यन्ते

'शृङ्गारमञ्जरी', कविघनश्यामप्रणीता 'आनन्दसुन्दरी' च उल्लेखार्हाणि । कर्पूरमञ्जरी एतासु रचनासु उच्चकोटित्वेन परिगणिता । कर्पूरमञ्जर्याः प्रयोगपक्षः अधुना आलोच्यते ।

कर्पूरमञ्जरी चतसृभिः जवनिकाभिः विभक्ता । अस्याः नायकः राजा चन्द्रपालः नायिका च अपूर्वसुन्दरी विदर्भराजकन्या कर्पूरमञ्जरी । चन्द्रपालस्य प्रधानमहिषी विभ्रमलेखा कर्पूरमञ्जरीं भगिनीस्नेहेन अन्तःपुरे रक्षितवती । परिचारिका विचक्षणा तस्याः परिचर्यायां न्यस्ता । कर्पूरमञ्जर्याः रूपलावण्येन कातरितः राजा अचिरेण हि तस्याः प्रणयासक्तः अभवत् । विषयमिदं परिलक्ष्य विभ्रमलेखा राजान्तःपुरमध्यस्थिते कारागारे कर्पूरमञ्जरीं निक्षिप्तवती । अन्तिमे च गुरुदेव-भैरवानन्दस्य माहात्म्येन तथा चन्द्रपालस्य चक्रवर्तिपदलाभाय राज्ञ्या विभ्रमलेखायाः प्रयत्नेन तत्पत्युः विवाहः कर्पूरमञ्जर्य्या सह भवति ।

कर्पूरमञ्जरी शृङ्गारप्रधानरचना । अतः कैशिकीवृत्तिरत्र परिलक्ष्यते । हास्याद्भुतरसत्वेनात्र भारतीवृत्तिरपि दृश्यते ।

**शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः । रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ॥**[१]

राज्ञी विभ्रमलेखा, नायिका कर्पूरमञ्जरी, परिचारिका विचक्षणा तथा सारङ्गिका, कुरङ्गिका च मुख्याः सन्ति । विभ्रमलेखायाः स्त्रीरक्षादलमपि अन्तःपुरे । अतः कर्पूरमञ्जरी स्त्रीपात्रबहुला रचनेति स्पष्टम् । किञ्च प्रवेशक-विष्कम्भकौ रचनायामस्यां न वर्तेते । सट्टकं पुनः नृत्य-गीतबहुला रचनेति पण्डिताः । कर्पूरमञ्जर्याम् तादृशः नृत्य-गीतसमावेशः भूयान् परिलक्ष्यते । विशेषतया चर्चरी इत्याख्यं स्त्रीजनसम्मिलितनृत्यरूपमत्र प्रयुक्तं विस्तरेण वर्णितञ्च ।[२]

कर्पूरमञ्जर्याः भाषा विशिष्टं स्थानं लभते । कालिदासादीनां कवीनां दृश्यकाव्येषु संस्कृतभाषया सह प्राकृतभाषायाः प्रयोगोऽपि वर्तते । परन्तु कर्पूरमञ्जर्यामाद्यन्तं प्राकृतेनैव संवादः प्रवर्तते । अतः भाषागतत्वेनापि कर्पूरमञ्जरी सट्टकम् इति सिद्ध्यति ।

एवं च नायक-नायिकादिचरित्रगतत्वेन, वृत्तिसन्धिरसाद्यलंकारशास्त्रीयविषयत्वेन, संवादे प्रयुक्तभाषादृष्ट्या सम्पूर्णनाटकीयतादृष्ट्या च कर्पूरमञ्जरी सट्टकरचनेति परिगणयितुं शक्यते ।

**परामृष्टाः ग्रन्थाः -**


१) घोषः, मनमोहनः, कर्पूरमञ्जरी, कोलकाता विश्वविद्यालयः, कोलकाता, १९३९.

२) राय आचार्यः, सुचित्रा, कर्पूरमञ्जरी, सदेशः, कोलकाता, २००७, प्रथमसंस्करणम् ।

३) गोपः, युधिष्ठिरः, साहित्यदर्पणः, संस्कृत-पुस्तक-भाण्डारः, कोलकाता, १४०८ वङ्गाब्दः प्रथमसंस्करणम् ।

४) दाहालः, लोकमणिः, संस्कृतसाहित्येतिहासः, चौखाम्वा-कृष्णदास-अकादेमी, वाराणसी, २०१६, चतुर्थसंस्करणम् ।

५) शर्मा, रामानन्दः, काव्यानुशासनम्, चौखाम्वा-कृष्णदास-अकादेमी, वाराणसी, २०१८.

६) टि.सि. आप्रेति, नाट्यदर्पणम्, परिमल-पाब्लिकेशन्स्, दिल्ली, २०१८.


[१]साहित्यदर्पणम्, 6/122

[२]कर्पूरमञ्जरी,4/10-17

 ISSN : 2249-538X

# रसतत्त्वसमीक्षा

डा. रमेश चन्द्र बरमोला*
सहायकाचार्यः(सं), के.सं.वि.,
मु.स्वा., श्रृङ्गेरी

***लेखसारः*** *– काव्यशास्त्रपरम्परायां रससिद्धान्तः काव्यात्मत्वेन सर्वतन्त्रस्वतन्त्ररूपेण प्रतिष्ठितः अस्ति। रसपदार्थः महर्षिभरतमुनेः नाट्यशास्त्रे "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति सूत्रमाध्यमेन शास्त्रीयं मनोवैज्ञानिकञ्च स्वरूपं प्राप्नोत्। अस्मिन् शोधपत्रे रसशब्दस्य व्युत्पत्तिम्, अर्थविस्तारं, उपनिषत्सु तस्य दार्शनिकस्वरूपञ्च उपस्थाप्य रससूत्रस्य ऐतिहासिकक्रमेण प्रमुखाचार्याणाम् (भट्टलोल्लट-श्रीशङ्कुक-भट्टनायकानां) मतानां तार्किकसमीक्षा कृता अस्ति। श्रीमदाचार्याभिनवगुप्तपादानाम् 'अभिव्यक्तिवादस्य' सूक्ष्मं विश्लेषणं कृतमस्ति। लौकिकभावाः साधारणीकरणप्रक्रियया कथं 'वेद्यान्तरसम्पर्कशून्यां' दशाम् उत्पाद्य अलौकिकानन्दरूपेण (ब्रह्मानन्दसहोदररूपेण) परिणमन्ति, अभिनवभारत्यां प्रतिपादितानां सप्तरसविघ्नानां कथं परिहारः भवति, रसः कथं न कार्यः नापि ज्ञाप्यः, तथा च काश्मीरशैवदर्शनस्य 'भग्नावरणा चित्' इति सिद्धान्तेन सह अस्य कः अद्वैतसम्बन्धः अस्ति इति विषयस्य नूतनशोधदृष्ट्या अत्र सविस्तरं तार्किकञ्च प्रतिपादनं विहितमस्ति।*

***कूटशब्दाः*** *– रसतत्त्वम्, रससूत्रम्, रसध्वनिः, अभिव्यक्तिवादः, साधारणीकरणम्, वासना, व्यञ्जनाव्यापारः, रसविघ्नाः, भग्नावरणा चित्, अभिनवभारती, ब्रह्मानन्दसहोदरः, चित्रतुरगादिन्यायः, काश्मीरशैवदर्शनम्, प्रत्यभिज्ञा।*

**१. प्रस्तावना- रसशब्दस्य व्युत्पत्तिः पृष्ठभूमिः च** भारतीयचिन्तनपरम्परायां 'रस' इति शब्दः अतीव व्यापकः वर्तते। लौकिकव्यवहारात् आरभ्य परमतत्त्वस्य साक्षात्कारपर्यन्तम् अस्य शब्दस्य यात्रा दृश्यते। व्याकरणदृष्ट्या 'रस् आस्वादने' इति धातोः अच्-प्रत्यये सति 'रस' इति शब्दः निष्पद्यते। अस्य व्युत्पत्तिलभ्यः अर्थः भवति— "रस्यते आस्वाद्यते इति रसः[१]"। अर्थात् यस्य आस्वादः क्रियते, यस्मात् आनन्दस्य अनुभूतिः भवति, सः एव रसः। तत्रादौ आयुर्वेदे अस्य शब्दस्य प्रयोगः षड्रसानां (मधुराम्ललवणकटुतिक्तकषायाः) कृते भवति स्म, यः जिह्वाग्राह्यः भौतिकः आस्वादः आसीत्। ततः परं भौतिकपदार्थानां सारतत्त्वस्य कृते अस्य प्रयोगः आरब्धः। ऋग्वेदे सोमसम्बन्धे रसशब्दः बहुत्र प्रयुक्तः[२]। किन्तु अस्य शब्दस्य सर्वोच्चः दार्शनिकः अर्थः तैत्तिरीयोपनिषदि श्रूयते— "**रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति**[३]। अत्र 'रसः' इति साक्षात् परब्रह्मणः पर्यायः अस्ति। जीवः तं रसस्वरूपं ब्रह्माणं प्राप्य एव परमानन्दम् अनुभवति। लौकिकजगत्यपि मानवाः सुखदुःखादीन् भावान् अनुभवन्ति, किन्तु ते लौकिकभावाः स्वार्थरागद्वेषत्वात् क्लेशकराः भवन्ति। परन्तु काव्ये नाट्ये वा ते एव भावाः यदा प्रस्तूयन्ते, तदा तेषां स्वरूपं लौकिकरागद्वेषादिभ्यः मुक्तं सत् 'अलौकिकम्' आनन्दमयं च जायते। अस्याः एव लोकोत्तरायाः रसप्रक्रियायाः वैज्ञानिकं सूत्रं महर्षिणा भरतमुनिना नाट्यशास्त्रे प्रदत्तम्।

**२. भरतमुनेः रससूत्रम्** - नाट्यशास्त्रस्य षष्ठाध्याये भरतमुनिना रसनिष्पत्तेः सुप्रसिद्धं सूत्रं दत्तम्—

---

***सम्पर्कसूत्रम्** - 9449899733, Email- dr.rameshcb@gmail.com

[१]शब्दकल्पद्रुमः, भागः ४, पृ. १२७

[२]ऋग्वेदः (९.९६.५) अत्र रसरूपेण सोमस्य स्तुतिः

[३]तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, २.७.१।

"**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः**[१]।" अस्य सूत्रस्य अभिप्रायः अस्ति यत् विभावानाम्, अनुभावानां, व्यभिचारिभावानां च संयोगात् रसस्य निष्पत्तिः भवति। अत्र रससामग्री एवं वर्तते—

**२.१ विभावः** रत्यादिस्थायिभावानाम् उद्बोधकं कारणं विभावः। लोके ये पदार्थाः रत्यादीनां भावानाम् उद्बोधकाः भवन्ति, ते एव काव्ये नाट्ये वा 'विभावाः' इति कथ्यन्ते। साहित्यदर्पणे आचार्यविश्वनाथेन अस्य लक्षणमेवं कृतम्— "रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः"। अस्य विभावस्य द्वौ भेदौ स्तः—

**आलम्बनविभावः** : यम् आलम्ब्य सहृदयस्य हृदये रत्यादिस्थायिभावस्य उद्गमः भवति, सः आलम्बनविभावः उच्यते। नायक-नायिकादीनि पात्राणि आलम्बनविभावाः सन्ति। "आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात्[5]"। यथा श्रृङ्गाररसे दुष्यन्तस्य कृते शकुन्तला आलम्बनम् अस्ति।

**उद्दीपनविभावः** : आलम्बनविभावैः उद्बुद्धः स्थायिभावः यैः तत्त्वैः उद्दीप्तः (तीव्रः) भवति, ते उद्दीपनविभावाः प्रोच्यन्ते। "उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये। आलम्बनस्य चेष्टाद्या देशकालादयस्तथा॥" एते द्विधा भवन्ति— आलम्बनगत-उद्दीपनम् (नायिकायाः कटाक्षपातः, मधुरवचनानि) तथा परिवेशगत-उद्दीपनम् (देशकाल-उद्यान-चन्द्रोदयादयः)।

**२.२ अनुभावः** विभावैः स्थायिभावानाम् उद्बोधने सति, तदनन्तरं ये शारीरिकाः मानसिकश्च विकाराः उत्पद्यन्ते, ते अनुभावाः कथ्यन्ते। कारणानन्तरं यथा कार्याणि समुत्पद्यन्ते, तथैव विभावानन्तरम् अनुभावाः सञ्जायन्ते। दशरूपककारमतेन— "अनुभावो विकारस्तु भावसंसूचनात्मकः।" साहित्यदर्पणे च— "उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्। लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥" अनुभावाः द्विधा विभक्ताः सन्ति—

**कायिकानुभावाः**- नायकनायिकादिपात्रगतशरीरचेष्टारूपाः यथा कटाक्षभुजाक्षेपस्मितादयः।

**सात्त्विकानुभावाः**- मनोविकारजाताः स्वेदादयः। एते अष्टौ सन्ति— स्तम्भः, स्वेदः, रोमाञ्चः, स्वरभङ्गः, वेपथुः, वैवर्ण्यम्, अश्रुः, प्रलयः च।

**२.३ व्यभिचारिभावः (सञ्चारिभावः)** स्थायिभावम् अपेक्ष्य ये भावाः अस्थिरचित्तवृत्तयः भवन्ति किञ्च रसानुकूल-व्यवहारेण सञ्चरन्ति, ते व्यभिचारिभावाः कथ्यन्ते। भरतमुनिमतेन— "**विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः**।" यथा समुद्रे कल्लोलाः उत्पद्यन्ते, पुनः जले एव विलीनाः भवन्ति, तथैव एते सञ्चारिभावाः स्थायिभावरूपे समुद्रे उन्मग्नाः निर्मग्नाश्च भवन्ति। एतेषां त्रयाणां संयोगात् सामाजिकानां हृदये विद्यमानः रत्यादिः 'स्थायिभावः' एव रसरूपेण परिणमति।

**३. रससूत्रस्य व्याख्यानानि**- अभिनवगुप्तपादानां सिद्धान्तं प्रवेष्टुं पूर्वं तस्य पूर्वसूरीणां मतानां समीक्षा अत्यावश्यकी वर्तते।

**क. भट्टलोल्लटस्य उत्पत्तिवादः**- (मीमांसादर्शनप्रभावः) : भट्टलोल्लटः रससूत्रस्य प्रथमो व्याख्याता मन्यते। तस्य मतेन विभावादिभिः सह स्थायिभावस्य 'उत्पाद्य-उत्पादक-भावः' (विभावैः सह), 'गम्य-गमक-भावः' (अनुभावैः सह), तथा 'पोष्यपोषकभावः' (व्यभिचारिभिः सह) सम्बन्धः अस्ति[२]। सः मन्यते यत् रसः मुख्यवृत्त्या अनुकार्ये (ऐतिहासिके रामादौ) एव तिष्ठति। नटे च अनुसन्धानबलात् (आरोपात्) रसः प्रतीयते। तार्किकसमीक्षा : भट्टलोल्लटस्य मते रसः लौकिकः एव अस्ति, अतः अत्र महान् दोषः उत्पद्यते। यदि रसः रामादौ नटे वा अस्ति, तर्हि सामाजिकः (दर्शकः) कथम् आनन्दम् अनुभवति? लौकिककारणेन (विभावेन) अलौकिकरसस्य 'उत्पत्तिः'

[१]नाट्यशास्त्रम्, अध्यायः ६ (रससूत्रम्)
[२]"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः..." (काव्यप्रकाशः, चतुर्थोल्लासः, भट्टलोल्लटमतम्)।

तार्किकदृष्ट्या न सङ्गच्छते। रसः यदि उत्पद्यते, तर्हि सः कार्यरूपः स्यात्, कार्यञ्च कारणनाशेऽपि तिष्ठेत् (यथा कुलाले मृतेऽपि घटः तिष्ठति), किन्तु रसास्वादः तादृशः नास्ति, सः तु विभावादिसमकालमेव तिष्ठति।

**ख. श्रीशङ्कुकस्य अनुमितिवादः-** (न्यायदर्शनप्रभावः): श्रीशङ्कुकः 'चित्रतुरगादिन्यायेन' रसस्य प्रतीतिं मन्यते। तस्य मतेन नटः रामादीनां कृत्रिमम् अनुकरणं करोति, यत् शिक्षाभ्यासपाटवेन अत्यन्तं स्वाभाविकं भासते। दर्शकः तं कृत्रिमम् अभिनयं दृष्ट्वा 'रामोऽयम्' इति तस्मिन् नटे रत्यादेः 'अनुमानं' करोति। इयम् अनुमितिः सम्यक्-मिथ्या-संशय-सादृश्य-प्रतीतिभ्यः विलक्षणा भवति[१]। अत्र संयोगस्य अर्थः 'अनुमाप्य-अनुमापकभावः' तथा निष्पत्तेः अर्थः 'अनुमितिः' अस्ति। तार्किकसमीक्षा: अनुमानं ज्ञानात्मकं भवति, आस्वादात्मकं न। 'अयं नटः रतिमान्' इति अनुमानेन दर्शकस्य हृदये आनन्दस्य स्फुरणं न सम्भवति, यतः अनुमानं परोक्षज्ञानम् अस्ति। रसः प्रत्यक्षानुभवः अस्ति, न तु परोक्षानुमानम्। प्रत्यक्षज्ञानमेव चमत्कारं जनयितुं शक्नोति, न तु लैङ्गिकं ज्ञानम्।

**ग. भट्टनायकस्य भुक्तिवादः-** (साङ्ख्यदर्शनप्रभावः): भट्टनायकेन उत्पत्तिम् अनुमितिञ्च खण्डयित्वा रसस्य 'भोगः' (आस्वादः) स्वीकृतः। तेन साङ्ख्यदर्शनाधारेण काव्ये शब्दस्य त्रयः व्यापाराः कल्पिताः- १. अभिधा : शब्दार्थबोधकः सामान्यव्यापारः। २. भावकत्वम् : साधारणीकरण-व्यापारः। अनेन विभावादीनां वैयक्तिक-सम्बन्ध-विमुक्तिः भवति (यथा शकुन्तला दुष्यन्तपत्नी न भूत्वा केवलं 'कामिनी' रूपेण भासते)। ३. भोजकत्वम् - अस्य व्यापारस्य बलेन सामाजिकस्य हृदये रजः-तमो-गुणानां नाशः भवति, सत्त्वगुणस्य च उद्रेकः भवति। सत्त्वोद्रेकेण प्रकाशानन्दमयी संविद् एव रसस्य भोगः जायते[२]। तार्किकसमीक्षा: भट्टनायकस्य 'साधारणीकरण' सिद्धान्तः अतीव महत्त्वपूर्णः आसीत्। किन्तु भावकत्व-भोजकत्वरूपयोः नूतनव्यापारयोः कल्पना शास्त्रे 'गौरव-दोषं' जनयति। यत् कार्यं प्राचीनाभिः वृत्तिभिः (व्यञ्जनया) सम्भवति, तदर्थं व्यापारान्तरकल्पना अनुचिता इति परवर्तिभिः आचार्यैः तार्किकरीत्या खण्डितम्।

**४. रसप्रक्रियायां ध्वन्यालोकस्य भूमिका-** अभिनवगुप्तस्य अभिव्यक्तिवादं पूर्णतया अवगन्तुम् आचार्य-आनन्दवर्धनस्य '**ध्वनिसिद्धान्तस्य**' ज्ञानम् अपरिहार्यमस्ति। आनन्दवर्धनेन स्वग्रन्थे ध्वन्यालोके रसस्य साक्षात् वाच्यत्वं कठोरतया खण्डितम्। तस्य मतेन रसः कदापि अभिधावृत्त्या (साक्षात् नामग्रहणेन) न बोध्यते। यदि काव्ये 'शृङ्गारः' वा 'करुणः' इति शब्दः लिख्यते, तर्हि तत्र रसस्य प्रतीतिः न भवति (स्वशब्देनाभिधानं तु दोषः एव मन्यते)। रसः तु केवलं '**व्यञ्जनाव्यापारेण**' एव ध्वनितः भवति। ध्वन्यालोके स्पष्टमुक्तम् अस्ति—

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा। क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[३]

अतः 'रसध्वनिः' (असंलक्ष्यक्रमव्यङ्ग्यध्वनिः) एव काव्यस्य सर्वोत्कृष्टं तत्त्वमस्ति। अस्य व्यञ्जनाव्यापारस्य सुदृढभित्तौ एव अग्रे गत्वा अभिनवगुप्तस्य अभिव्यक्तिवादस्य प्रासादः निर्मितः।

**५. अभिनवगुप्तपादानाम् अभिव्यक्तिवादः-** श्रीमदाचार्याभिनवगुप्तपादाः काश्मीरशैवदर्शनस्य (प्रत्यभिज्ञा-दर्शनस्य) महान्तः दार्शनिकाः, तान्त्रिकाः, आलङ्कारिकाश्च आसन्। तैः 'अभिनवभारती' (नाट्यशास्त्रस्य टीका) तथा 'लोचनम्' (ध्वन्यालोकस्य टीका) इत्यनयोः रससूत्रस्य यत् विशदीकरणं कृतं, तत् अद्यावधि भारतीयकाव्यशास्त्रस्य सर्वोत्कृष्टं शिखरं मन्यते। तस्य मतेन रसः न 'उत्पद्यते', न 'अनुमीयते', नापि 'भुज्यते', अपि तु रसः 'अभिव्यज्यते'। अत्र 'संयोगः' इत्यस्य अर्थः 'व्यङ्ग्य-व्यञ्जक-भावः' तथा 'निष्पत्तिः' इत्यस्य अर्थः 'अभिव्यक्तिः'

[१] "सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन..." (काव्यप्रकाशः, चतुर्थोल्लासः, श्रीशङ्कुकमतम्)
[२] "सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते..." (काव्यप्रकाशः, चतुर्थोल्लासः, भट्टनायकमतम्)।
[३] ध्वन्यालोकः, प्रथमोद्योतः, कारिका ५।

(चर्वणा) अस्ति ।

**क. वासना-सिद्धान्तः**- अभिनवगुप्तस्य मतेन मनुष्यस्य अन्तःकरणे पूर्वजन्मनः इहजन्मनश्च संस्काराः 'वासना' रूपेण सुप्तावस्थायां तिष्ठन्ति । रतिहासशोकादयः स्थायिभावाः प्रत्येकं सहृदयस्य हृदये बीजरूपेण विद्यमानाः सन्ति । "वासना चेद् नास्ति तर्हि रसास्वादो न सम्भवति"[1] इति तस्य स्पष्टं मतम् । नीरसानां जनानां हृदये काव्यश्रवणेन आनन्दः न जायते, यतः तेषु सा वासना प्रबुद्धा नास्ति । यदा एते सुप्ताः भावाः काव्यनाट्यादिषु विभावादिभिः (उद्दीपकैः) आभिमुख्यं प्राप्नुवन्ति, तदा ते प्रबुद्धाः भूत्वा अभिव्यक्ताः भवन्ति । इदमेव तथ्यम् आधुनिकमनोविज्ञानस्य (Depth Psychology तथा Collective Unconscious) सिद्धान्तेन सह पूर्णतया संवदति ।

**ख. व्यञ्जनाव्यापारः साधारणीकरणञ्च** - अभिनवगुप्तेन भट्टनायकस्य 'भावकत्व' व्यापारः निराकृतः, तस्य स्थाने 'व्यञ्जना'व्यापारेणैव साधारणीकरणं साधितम् । साधारणीकरणं नाम - 'अहङ्कारस्य विगलनम्' देशकालनिबन्धानां च मुक्तिः । यदा दर्शकः नाट्ये शकुन्तलां पश्यति, तदा व्यञ्जनाव्यापारस्य महिम्ना सा केवलं 'रत्यालम्बनमात्ररूपेण' प्रतीयते । अभिनवगुप्तः वदति— "ममैवैते, शत्रोरेवैते, तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैः..."[2] अर्थात् अयं विभावः मम अस्ति, शत्रोः अस्ति, वा कस्यचित् तटस्थस्य अस्ति इति लौकिक-देशकालसम्बन्धानां तिरोधानमेव साधारणीकरणम् । अस्मिन् काले दर्शकः '**परिमितप्रमाता**' न भूत्वा '**अपरिमितप्रमाता**' भवति । तदा सः सकलसहृदयसंवादभाक् भवति ।

**ग. सप्तरसविघ्नानां परिहारः** - अभिनवभारत्याम् अभिनवगुप्तेन रसप्रतीतौ सप्त विघ्नाः वर्णिताः सन्ति । ते च— १. प्रतिपत्तियोग्यतासम्भावनाविरहः, २. स्वगतपरगतदेशकालनियमः, ३. निजसुखदुःखादिवशीभावः, ४. प्रतीत्युपायवैकल्यम्, ५. स्फुटत्वाभावः, ६. अप्रधानता, ७. संशययोगः च[3] । काव्ये नाट्ये च चतुर्विधाभिनयैः, साधारणीकरणेन, अलङ्कारगुणरीतिभिः च एतेषां सप्तानां विघ्नानां परिहारः क्रियते । विघ्नेषु अपास्तेषु सत्सु एव रसचर्वणा निर्बाधं प्रचलति ।

**घ. वेद्यान्तरसम्पर्कशून्या दशा**- रसास्वादकाले सहृदयस्य चित्ते काचन लोकोत्तरा अवस्था जायते । अभिनवगुप्तः तामित्थं वर्णयति— "तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा..."[4] । अत्र 'वेद्यान्तरसम्पर्कशून्या' अर्थात् रसास्वादकाले अन्यस्य कस्यापि बाह्यविषयस्य, चिन्तायाः वा ज्ञानं तत्र न तिष्ठति । दर्शकः स्वस्य लौकिकं दुःखं सुखं वा पूर्णतया विस्मरति । इयं दशा योगिनां समाधितुल्या अस्ति ।

**६. भग्नावरणा चित्- काश्मीरशैवदर्शनेन अद्वैतसम्बन्धः** अभिनवगुप्तस्य अभिव्यक्तिवादस्य सूक्ष्मं रहस्यं तस्य 'शैव-अद्वैतदर्शने' (प्रत्यभिज्ञादर्शने) निगूढमस्ति । यस्य परवर्तिकाले पण्डितराजजगन्नाथेन रसगङ्गाधरे 'भग्नावरणा चित्' इति नाम्ना पल्लवनं कृतम्[5] । शैवदर्शनानुसारम् आत्मा (शिवः) स्वभावतः एव प्रकाशविमर्शमयः (ज्ञानानन्दस्वरूपः) अस्ति । किन्तु अविद्यायाः (मलस्य) आवरणेन सः निजानन्दं न अनुभवति । काव्ये नाट्ये वा

[1]अभिनवभारती (नाट्यशास्त्रस्य टीका), अध्यायः ६ ।
[2]काव्यप्रकाशः, चतुर्थोल्लासः, अभिनवगुप्तपादानामभिव्यक्तिवादः ।
[3]अभिनवभारती, अध्यायः ६ (सप्तरसविघ्नानां विस्तृतविवेचनम्) ।
[4]काव्यप्रकाशः, चतुर्थोल्लासः, अभिनवगुप्तमतम् ।
[5]रसगङ्गाधरः, प्रथमाननम्, रससवरूपविवेचनम् ।


ISSN : 2249-538X

यदा साधारणीकृत-विभावादीनां चर्वणा भवति, तदा चित्तस्य उपरि स्थितम् अज्ञानस्य (लौकिकरागद्वेषादीनाम्) आवरणं भज्यते। आवरणे भग्ने सति, आत्मा स्वस्य निजम् आनन्दस्वरूपम् एव आस्वादयति। अतः रसः कुतश्चित् बाह्यस्थानात् न आगच्छति, सः तु स्वस्यैव आत्मा अस्ति, यः विभावादिभिः अभिव्यक्तः भवति।

**पानकरसन्यायः तथा रसस्य अलौकिकत्वम्-** कथं भिन्नाः विभावानुभावाव्यभिचारिणः एकम् अखण्डम् आनन्दं जनयन्ति? अत्र अभिनवगुप्तः 'पानकरसन्यायम्' उपस्थापयति[१]। यथा खण्डमरिचकर्पूरजलादीनां मिश्रणेन कश्चित् नूतनः एव 'पानकरसः' (शर्बत) उत्पद्यते, यस्मिन् मरिचादीनां पृथक् स्वादः न प्रतीयते, अपि तु एकः अखण्डः मधुरः स्वादः अनुभूयते, तथैव विभावादीनां सम्मेलनेन कश्चित् अखण्डः 'चर्वणैकप्राणः' रसः अभिव्यज्यते। अयं रसः **'ब्रह्मानन्दसहोदरः'** मन्यते। रसः प्रमाणान्तरात् सर्वथा भिन्नः अस्ति। सः तं 'लोकोत्तरस्वसंवेदनगोचरः' इति कथयति।

रसः न कार्यः, यतः विभावादिनाशे तस्य नाशः भवति (कार्यं तु कारणनाशेऽपि तिष्ठति, रसस्तु विभावादिजीवितावधिः एव)।

रसः न ज्ञाप्यः, यतः ज्ञाप्यपदार्थः पूर्वमेव सिद्धः भवति (यथा अन्धकारे दीपेन प्रतीयमानः घटः), किन्तु रसः पूर्वं सिद्धः नास्ति। अत्र "कारकज्ञापकाभ्यामन्यत् क्व दृष्टम्?" इति आक्षेपे अभिनवगुप्तः सगर्वम् उत्तरति- **"न क्वचिद्दृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न दूषणम्।"**[२]अर्थात् लौकिकप्रमाणानाम् अत्र असामर्थ्यम् एव अस्य रसतत्त्वस्य अलौकिकत्वं साधयति।

७. **निष्कर्षः** (Conclusion) निष्कर्षरूपेण वक्तुं शक्यते महर्षिणा भरतेन यत् रसबीजम् उप्तम्, आनन्दवर्धनेन यस्य ध्वनिमाध्यमेन सेकः कृतः, तस्य पूर्णः, पुष्पितः, फलितश्च कल्पवृक्षः आचार्याभिनवगुप्तस्य 'अभिव्यक्तिवादे' एव दृश्यते। अभिव्यक्तिवादः साधारणीकरणद्वारा परिमिताहङ्कारस्य बन्धनात् मुक्त्वा मानवं 'विश्वमानवस्य' स्तरे उपस्थापयति। एषैव कलायाः, साहित्यस्य, दर्शनस्य च चरमा सार्थकता। रससिद्धान्तस्य यादृशं सूक्ष्मं मनोवैज्ञानिकं दार्शनिकञ्च विश्लेषणम् अभिनवगुप्तेन कृतं, तत् सर्वथा अद्यापि अद्वितीयं, लोकोत्तरञ्च वर्तते।

## परामृष्टाः ग्रन्थाः

१. तैत्तिरीयोपनिषत्, शाङ्करभाष्यसहिता, गीताप्रेस, गोरखपुर।
२. नाट्यशास्त्रम्, महर्षिभरतमुनिप्रणीतम् (अभिनवभारती-टीकासहितम्), सम्पादकः : एम. रामकृष्ण कवि, गायकवाड़ ओरियण्टल सिरीज, बड़ोदा।
३. ध्वन्यालोकः, आचार्य-आनन्दवर्धनप्रणीतः (लोचन-टीकासहितः), चौखम्बा विद्याभवन, वाराणसी।
४. काव्यप्रकाशः, आचार्यमम्मटप्रणीतः, झलकीकर-टीकासहितः (बालबोधिनी), भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पुणे।
५. रसगङ्गाधरः, पण्डितराजजगन्नाथप्रणीतः, नागपब्लिशर्स, दिल्ली।
६. साहित्यदर्पणः, आचार्यविश्वनाथप्रणीतः, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
७. दशरूपकम्, धनञ्जयप्रणीतम्, चौखम्बा संस्कृत संस्थान, वाराणसी।
८. रससिद्धान्त, डा. नगेन्द्र, नेशनल पब्लिशिंग हाउस, दिल्ली।
९. शब्दकल्पद्रुमः, राजा राधाकान्त देव, चौखम्बा संस्कृत सिरीज आफिस, वाराणसी।

[१]"पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन्..." (काव्यप्रकाशः, चतुर्थोल्लासः)।
[२]काव्यप्रकाशः, चतुर्थोल्लासः, रसस्य अलौकिकत्वसिद्धिः।

# ग्रहस्फुटीकरणे मतभेदाः

डा. विजयानन्दः अडिगः बि*
सहायकाचार्यः , के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– अस्मिन् लेखे ग्रहस्फुटीकरणस्य स्वरूपं, प्रयोजनं तथा सूर्यसिद्धान्त–आर्यभटीय–सिद्धान्तशिरोमणिषु प्रतिपादितानां ग्रहस्फुटीकरणपद्धतीनां तुलनात्मकं विवेचनं कृतम् । ग्रहस्फुटीकरणं नाम अहर्गणेन प्राप्तानां मध्यमग्रहाणां मन्द–शीघ्रफलसंस्कारैः दृग्गणितैक्यसम्पादनम् । एतदेव जातक–यात्रा–विवाहादिषु फलनिर्णयस्य मूलाधारत्वेन स्वीकृतम् । सूर्यसिद्धान्ते रविचन्द्रयोः केवलं मन्दफलसंस्कारः, कुजादीनां तु मन्द–शीघ्रफलयोः पुनःपुनः संस्कारः प्रतिपादितः । आर्यभटीये ग्रहस्फुटीकरणक्रमे विशेषतः कुज–गुरु–शनि–बुध–शुक्राणां विषये सूर्यसिद्धान्तात् किञ्चित् वैलक्षण्यं दृश्यते, तथा तद्व्याख्यातृभिः अपि विविधाः मतभेदाः निरूपिताः । सिद्धान्तशिरोमणौ कुजशुक्रयोः विशेषप्रक्रिया, परिधिस्फुटीकरणम्, मन्द–शीघ्रसंस्कारयोः सूक्ष्मविवेचनं च प्रदर्शितम् ।*

***कूटशब्दाः*** *– ग्रहस्फुटीकरणम्, दृग्गणितैक्यम्, संस्कारः, मन्दफलम्, शीघ्रफलम्, मध्यमग्रहः, स्पष्टग्रहः ।*

ग्रहाः रव्यादयः, एषां स्फुटीकरणं नाम यथा अस्फुटाः स्फुटाः सम्पद्यन्ते तथा करणं ग्रहस्फुटीकरणमित्युच्यते । अर्थात् अहर्गणेन मध्यमग्रहानयनकर्मणा आनीतानाम् अस्पष्टानां दृग्दर्शनयोग्यतारहितानां ग्रहाणां मन्दशीघ्रफलसंस्कारेण दृग्दर्शनयोग्यत्वसम्पादरूपं कर्मैव ग्रहस्फुटीकरणमिति । उक्तं च आर्षे सूर्यसिद्धान्ते – 'तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः । प्रयान्ति तत्प्रवक्ष्यामि स्फुटीकरणमादरात्'[१] ॥ इति, अपि च सिद्धान्तशिरोमणौ - 'स्फुटक्रिया दृग्गणितैक्यकृद्या'[२] इति । स्फुटीकृतेभ्यः एव ग्रहेभ्यः होराफलमपि स्फुटमभिव्यक्तं भवतीत्याह भास्करः यथा – "यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्[३]" इति । तत्तत्काले यस्मात् सिद्धान्तात् ग्रहाः दृक्तुल्याः भवन्ति तस्मात् सिद्धान्तात् ते ग्राह्याः इति अभियुक्तानां वचनं युक्तियुक्तमेवास्ति, तथा चाह श्रीपतिः - "तत्कालप्रभवा विलग्नसहिताः कार्यास्ततश्च ग्रहाः । सिद्धान्तोक्तपरिस्फुटोपकरणैस्ते चासकृत्कर्मणा[४]", केशवदैवज्ञोऽपि यथाऽह – "खेटाः स्फुटाः यत्पक्षे हि घटन्ते[५]" । तत्र तावदस्ति एतत्स्फुटीकरणगणितविषये महान् मतभेदः मतिमतां सौरार्यादिमतानुयायिनां दैवज्ञानाम् । अतोऽत्र प्रामुख्येन सूर्यसिद्धान्ते आर्यभटीये सिद्धान्तशिरोमणौ च प्रतिपादितानि मतानि विविच्यन्ते ।

तत्रादौ सूर्यसिद्धान्तस्य मतं यथा –

सूर्यसिद्धान्तस्य द्वितीये अधिकारे "ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्राद्विशोध्य च"[६] इत्यारभ्य स्फुटीकरणप्रक्रिया आरभ्यते । एतदर्थं मध्यमग्रह-मन्दोच्च-शीघ्रोच्चानि उपकरणानि भवन्ति, एतेषां त्रयाणां ग्रहभगणाः अहर्गणः च उपकरणम् इति स्थितिः । अत्र गणिते अस्ति कश्चिद्विशेषः । यथा- मन्दफलसंस्कारः शीघ्रफलसंस्कारः चेति । रविचन्द्रयोः केवलं मन्दफलसंस्कारः, कुजादीनां ताराग्रहाणां शीघ्रफलसंस्कारः अपि

---

***सम्पर्कसूत्रम्*** - 9901731995, Email- adiga.vijaya@gmail.com

[१]सूर्यसिद्धान्तः- अधि.२, श्लो १४
[२]सिद्धान्तशिरोमणिः- अधि.२, श्लो.१
[३]सिद्धान्तशिरोमणिः- अधि.२, श्लो.१
[४]श्रीपतिपद्धतिः अ.१, श्लो २
[५]केशवीयजातकपद्धतिः- श्लो १
[६]सूर्यसिद्धान्तः- अधि.२, श्लो २९

वर्तते इति, तत्रापि शीघ्रमन्दयोः असकृत् संस्कारः इति स्थितिः ।

तत्रादौ रविचन्द्रयोः स्फुटीकरणं यथा – रविमन्दोच्चात् अहर्गणानीतं रविं विशोधयेत् । अस्य मन्दकेन्द्रम् इति संज्ञा । एतच्च केन्द्रं राशिषट्कान्न्यूनं चेत् अजादि, अन्यथा तुलादि इति संज्ञितम् । अस्य मन्दकेन्द्रस्य भुजः तस्य च ज्या साध्या, सा मन्दकेन्द्रभुजज्या भवेत् । तदनु मन्दपरिधेः स्फुटीकरणं विधेयम् । मध्यमरवेः स्पष्टरवेः च यावत् परममन्तरं तस्य ज्या मन्दान्त्यफलज्या इत्युच्यते, अस्याः परिधिरेव मन्दपरिधिरित्यर्थः । ओजपदान्ते युग्मपदान्ते च परिधिभागाः पठिताः, तदन्तराले यावन्तः परिधिभागाः ते स्फुटाः इत्यर्थः, अर्थात् तत्तत्स्थानीयपरिधिभागाः स्फुटाः इति । 'ओजयुग्मान्तरगुणा भुजज्या त्रिज्ययोद्धृता'[१] इत्याद्युक्तरीत्या मन्दकेन्द्रभुजज्याम् ओजयुग्मान्तमन्दपरिध्यन्तरेण गुणयित्वा त्रिज्यया विभज्य लब्धं परिधिफलं युग्मान्तपरिधौ संस्कृत्य प्राप्तं स्फुटमन्दपरिधिप्रमाणं 'तद्गुणे भुजकोटिज्ये भगणांशविभाजिते[२]' इत्यादिनियमेन पूर्वानीतमन्दकेन्द्रभुजज्यया गुणयित्वा षष्ट्यधिकशतत्रयेण विभजेत् । तदा मन्दकेन्द्रभुजफलज्या लभ्यते । अस्याः चापः एव रवेः मन्दफलं भवति । एतच्च मन्दफलं मध्यमरवौ संस्कार्यम् । संस्कारक्रमश्च 'अजादिकेन्द्रे सर्वेषां शैघ्र्ये मान्दे च कर्मणि । धनं ग्रहाणां लिप्तादि तुलादावृणमेव च[३] ॥' इति । मन्दकेन्द्रे अजादौ सति मध्यमग्रहे फलं योज्यम्, तुलादौ सति मध्यमग्रहात् फलं वियोज्यम् इत्यर्थः । तदा मन्दस्पष्टरविः सः एव स्पष्टरविः भवति । एवमेव चन्द्रस्य । इत्थं रविचन्द्रयोः केवलं मन्दफलाख्यः एक एव संस्कारः विहितः । 'स्फुटौ रवीन्दू मृदुनैव वेद्यौ शीघ्राख्यतुङ्गस्य तयोरभावात्[४]' इत्युक्ते रविचन्द्रयोः शीघ्रोच्चं नास्ति, मन्दोच्चमेव वर्तते इत्यतः मन्दफालसंस्कारेणैव उभौ स्फुटौ भवतः इति भास्कराचार्यस्य मतम् । गणेशदैवज्ञोऽप्याह ग्रहलाघवे यथा - 'रवीन्दू स्फुटौ संस्कृतौ स्तश्च ताभ्याम्'[५] इति ।

कुजादीनामुभयोः सत्त्वात् द्विविधं गणितकर्म उच्यते । तद्यथा – शीघ्रोच्चात् अहर्गणानीतं ग्रहं विशोध्य यत् शीघ्रकेन्द्रं लभ्यते तस्य भुजज्यां कोटिज्यां च आनीय यथापूर्वं स्फुटशीघ्रपरिधिं समासाद्य अनेन भुजकोटिज्ययोः पृथग् गुणनेन भगणांशेन भागाहारेण च शीघ्रकेन्द्रभुजफलज्यां शीघ्रकेन्द्रकोटिफलज्यां च साधयेत् । पूर्वानीतं शीघ्रकेन्द्रं यथा अजादि तुलादि चेति भिद्यते तथैव मकरादि कर्क्यादि चेत्यपि । अजादि तुलादि च केन्द्रं ग्रहफलसंस्काराय, एतच्च मकरादि कर्क्यादि च केन्द्रं कोटिफलसंस्काराय चेति विशेषः । उक्तं च 'शैघ्र्यं कोटिफलं केन्द्रे मकरादौ धनं स्मृतम् । संशोध्यं तु त्रिजीवायां कर्क्यादौ कोटिजं फलम्[६]' इति । अतः मकरादौ शीघ्रकेन्द्रे त्रिज्याकोटिफलज्ययोः योगेन, कर्क्यादौ शीघ्रकेन्द्रे त्रिज्यातः कोटिफलज्यायाः वियोगेन स्फुटकोटिज्यामानीय अस्याः भुजफलज्यायाः वर्गैक्यान्मूलेन शीघ्रकर्णम् आनयेत् । उक्तं च 'तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः[७]' इति । तदनु 'त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितम् । लब्धस्य चापं लिप्तादि फलं शैघ्र्यमिदं स्मृतम्[८]' ॥ इत्यनेन प्रकारेण शीघ्रकेन्द्रभुजफलज्यां त्रिज्यया गुणयित्वा शीघ्रकर्णेन विभजेत्, तदा स्फुटशीघ्रफलज्या लभ्यते । अस्याः चापः शीघफलमित्युच्यते ।

---

[१]सूर्यसिद्धान्तः- अधि.२, श्लो ३८
[२]सूर्यसिद्धान्तः- अधि.२, श्लो ३९
[३]सूर्यसिद्धान्तः- अधि.२, श्लो ४५
[४]सिद्धान्तशिरोमणिः- अधि.२, श्लो.३६
[५]ग्रहलाघवम् - अधि.२, श्लो.३
[६]सूर्यसिद्धान्तः - अधि.२, श्लो.४०
[७]सूर्यसिद्धान्तः - अधि.२, श्लो.४१
[८]सूर्यसिद्धान्तः - अधि.२, श्लो.४२

कुजादीनां शीघ्रफलस्य मन्दफलस्य चेत्युभयोः संस्कारः असकृत् कार्यः । उक्तं च -

मान्दं कर्मैकमर्कन्द्वोर्भौमादीनामथोच्यते ।
शैघ्र्यं मान्दं पुनर्मान्दं शैघ्र्यं चत्वार्यनुक्रमात् ॥
मध्ये शीघ्रफलस्यार्धं मान्दमर्धफलं तथा ।
मध्यग्रहे मन्दफलं सकलं शैघ्र्यमेव च ॥[१]

अर्थात् कुजादीनां शीघ्रफलसंस्कारः, मन्दफलसंस्कारः, पुनः मन्दफलसंस्कारः, पुनः शीघ्रफलसंस्कारः चेति चत्वारः संस्काराः क्रमशः भवन्ति । तत्रापि आदौ यत् शीघ्रफलं लभ्यते तस्य अर्धम् अहर्गणानीते मध्यमग्रहे संस्कार्यम् । अस्मात् शीघ्रफलार्धसंस्कृतग्रहात् मन्दफलमानीय (अर्थात् एनं शीघ्रफलार्धसंस्कृतग्रहमेव मध्यमं मत्वा स्वमन्दोच्चाद्विशोध्य रवेः यथा मन्दफलम् आनीतं तथा मन्दफलमानीय) तदर्धं शीघ्रफलार्धसंस्कृतग्रहे संस्कार्यम् । एवं द्वितीयसंस्कारान्ते शीघ्रफलार्ध-मन्दफलार्धसंस्कृतग्रहः लभ्यते । अस्मात् पुनः मन्दफलमानीय तत् सम्पूर्णं मन्दफलं मध्यमग्रहे संस्कार्यम्, अयं तृतीयसंस्कारः, तदन्ते मन्दस्पष्टग्रहो लभ्यते । पुनः मन्दस्पष्टग्रहं शीघ्रोच्चाद्विशोध्य शीघ्रकेन्द्रं संसाध्य यथापूर्वं स्फुटकोटिं शीघ्रकर्णं शीघ्रफलं चानीय तत् मन्दस्पष्टग्रहे संस्कार्यम् । तदा स्पष्टः ग्रहः भवति इति, एवं क्रमः सूर्यसिद्धान्ते प्रतिपादितः ।

अथ आर्यभटीयस्य मतं यथा - ग्रहस्फुटीकरणक्रमः कालक्रियापादे सन्निविष्टः वर्तते । तदुपकरणानि अर्थात् परिधिभागाः गीतिकापादे प्रोक्ताः[२] । तत्र मूलश्लोके कुत्रापि परिधिस्फुटीकरणक्रमः नोक्तः, तथापि प्रकाशिकाव्याख्याकारेण सूर्यदेवयज्वना रविचन्द्रौ विहाय अन्येषां परिधिस्फुटीकरणं विधेयम् इत्युक्तम्[३] । रविचन्द्रयोः तावत् सूर्यसिद्धान्तोक्तक्रमेण मन्दफलसंस्कारः एकः एव भवति । अन्येषु कुजादिषु ताराग्रहेषु कुजगुरुशनीनां बुधशुक्रयोः च स्फुटीकरणक्रमः भिन्नः वर्तते । तत्र **कुजगुरुशनीनां** यथा "मन्दोच्चाच्छीघ्रोच्चादर्धमृणधनं ग्रहेषु मन्देषु । मन्दोच्चात्स्फुटमध्याः शीघ्रोच्चाच्च स्फुटा ज्ञेयाः[४]"– आदौ मन्दफलं समानीय तदर्धं मध्यमे संस्कार्यम्, ततः शीघ्रफलं समानीय तदर्धं मन्दफलार्धसंस्कृते ग्रहे संस्कार्यम् । एवमसकृत् इति मूले । परन्तु व्याख्याने मन्दफलार्धशीघ्रफलार्धसंस्कृतग्रहाभ्यां मन्दफलम् आनीय मध्यमे, ततः शीघ्रफलम् आनीय मन्दस्पष्टे संस्कार्यमिति उल्लेखः वर्तते[५] । **बुधशुक्रयोः** तु विशेषोऽभिहितः यथा– 'शीघ्रोच्चादर्धोनं कर्तव्यमृणं धनं स्वमन्दोच्चे । स्फुटमध्यौ तु भृगुबुधौ सिद्धान्मन्दात्स्फुटौ भवतः[६]' इति । अर्थात् आदौ शीघ्रफलमानीय तस्यार्धं तत्तन्मन्दोच्चे संस्कार्यम् । तेनैव शीघ्रफलार्धेन मध्यमग्रहं संस्कृत्य तस्मात् पूर्वानीतं मन्दोच्चं शोध्यम् । तदा मन्दोच्चं संस्कृतं भवति । एवं संस्कृतं मन्दोच्चं मध्यमात् त्यक्त्वा मन्दफलमानीय संस्कृतौ बुधशुक्रौ मन्दस्पष्टौ भवतः । ततः शीघ्रफलमानीय संस्कृतौ स्फुटौ भवतः इति । आर्यभटीयस्य बहुषु व्याख्यानेषु बहवो मतभेदाः दृष्टिपथमायान्ति इत्यतः कस्य मतं ग्राह्यमित्यत्र विद्वांसः प्रमाणम् ।

अथ च सिद्धान्तशिरोमणेः मतं यथा – तत्र तावत् कुजशुक्रौ विहाय अन्येषां ग्रहाणां परिधिस्फुटीकरणं नोक्तम्[७] । शुक्रस्य मन्दपरिधिभागाः रुद्रतुल्याः ये पठिताः ते युग्मपदान्ते, ओजपदान्ते तु नव ।

[१]सूर्यसिद्धान्तः - अधि.२, श्लो.४३-४४
[२]आर्यभटीयम् २ – गीतिकापादः, श्लो.१०
[३]आर्यभटीयम् १ – कालक्रियापादः, श्लो.२२ (व्याख्या)
[४]आर्यभटीयम् १ – कालक्रियापादः, श्लो.२३
[५]आर्यभटीयम् १ – कालक्रियापादः, श्लो.२३ (व्याख्या)
[६]आर्यभटीयम् - कालक्रियापादः, श्लो.२४
[७]सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः, अधि-२, श्लो. २२-२६


ISSN : 2249-538X

अनयोरन्तरेणानुपातः यथा- यदि त्रिज्यया अंशद्वयमन्तरं तर्हि इष्टभुजज्यया किमिति? फलेन वर्जितः सः स्फुटः भवति। तथैव वसुबाणदस्रमिताः शीघ्रपरिधिभागाः ये पठिताः ते युग्मपदान्ते, ओजपदान्ते तु पञ्चाधिकाः, अवान्तरेऽनुपातेन स्फुटः परिधिः ज्ञेयः। कुजस्य तावदस्ति इतोऽपि वैशिष्ट्यम्। यथा मन्दोच्चस्य स्फुटीकरणम्, शीघ्रपरिधेः स्फुटीकरणं चेति। तद्यथा – कुजस्य प्रथमं शीघ्रकेन्द्रं कृत्वा तद् यस्मिन् पदे वर्तते इति ज्ञात्वा तस्य गतगम्ययोः अल्पस्य ज्यां त्रिभागोनैः सप्तभिरंशैः गुणयित्वा पञ्चचत्वारिंशतः भागानां ज्यया विभजेत्, समागतं फलं मन्दोच्चे संस्कार्यम्। (मकरादौ +, कर्क्यादौ - चेति) तदा मन्दोच्चं स्फुटं भवति। पुनस्तदेव फलं पठितशीघ्रपरिधौ संस्कार्यम्, तदा सः शीघ्रपरिधिः स्फुटः भवति[1] इति। तत्र स्पष्टीकरणे विशेषः यथा -

स्यात् संस्कृतो मन्दफलेन मध्यो मन्दस्फुटोऽस्माच्चलकेन्द्रपूर्वम्।
विधाय शैघ्र्येण फलेन चैवं खेटः स्फुटः स्यादसकृत्फलाभ्याम्॥
दलीकृताभ्यामसकृत्फलाभ्यां ततोऽखिलाभ्यामसकृत्कुजस्तु।
स्फुटौ रवीन्दू मृदुनैव वेद्यौ शीघ्राख्यतुङ्गस्य तयोरभावात्॥[2]

इति। अर्थात् ताराग्रहाणाम् आदौ मन्दफलमानीय तत् मध्यमग्रहे संस्कार्यम्। तदा मन्दस्फुटो भवति। तं शीघ्रोच्चाद्विशोध्य शीघ्रकेन्द्रं समानीय ततः शीघ्रफलं च गणयित्वा तेन संस्कृतः मन्दस्पष्टः स्फुटग्रहो भवति। पुनः असकृत्कर्मणा अतिस्फुटः इत्यर्थः। कुजस्य तावत् आदौ मन्दफलार्धसंस्कारः पुनः शीघ्रफलार्धसंस्कारः, पुनः मन्दफलसंस्कारः पुनः शीघ्रफलसंस्कारः चेति विशेषः।

उभयोः मन्दशीघ्रफलयोः आनयनस्य उपपत्तिः गोले एवं निरूपिता –

शीघ्रनीचोच्चवृत्तस्य मध्यस्थितिं ज्ञातुमादौ कृतं कर्म मान्दं ततः।
खेटबोधाय शैघ्र्यं मिथः संश्रिते मान्दशैघ्र्ये हि तेनासकृत्साधिते॥[3]

कुजस्य विशेषे उपलब्धिरेव वासना इति भास्कराचार्याणां मतम्[4]। मन्दकर्मणि कर्णाकरणेऽपि उपलब्धिरेव वासनेति यथा –

स्वल्पान्तरत्वान्मृदुकर्मणीह कर्णः कृतो नेति वदन्ति केचित्।
त्रिज्योद्धृतः कर्णगुणः कृतेऽपि कर्णे स्फुटः स्यात्परिधिर्यतोऽत्र॥
तेनाद्यतुल्यं फलमेति तस्मात् कर्णः कृतो नेति च केचिदूचुः।
नाशङ्कनीयं न चले किमित्थं यतो विचित्रा फलवासनात्र॥[5]

## उपसंहारः -

इत्थमत्र त्रयाणां मतानि प्रस्तुतानि। सूर्यसिद्धान्तः परमं प्रमाणं चेदपि गच्छता कालेन तत्राप्यन्तरं सञ्जातमित्यतः तद्द्वारा साधिताः ग्रहाः अधुना दृक्सिद्धाः न भवन्ति, तथापि सूर्यसिद्धान्तोक्तमेव ग्राह्यमित्याग्रहः न कर्तव्यः। कल्पादितः कल्पावसानं यावत् एकप्रकारकमेव गणितं कथञ्चिदपि भवितुं नार्हति, काले काले परिष्कारः आवश्यकः इत्यत्र "शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः। युगानां परिवर्तेन कालभेदोऽत्र केवलः॥" इति सूर्यसिद्धान्तस्य

[1]सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः, अधि-२, श्लो. २५ (वासनाभाष्यम्)
[2]सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः, अधि-२, श्लो. ३५
[3]सिद्धान्तशिरोमणिः – गोलाध्यायः, छेद्यकाधिकारः, श्लो. ३५
[4]"अत्रागम एव प्रमाणम्" सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः, अधि-२, श्लो. २५ (वासनाभाष्यम्)
[5]सिद्धान्तशिरोमणिः – गोलाध्यायः, छेद्यकाधिकारः, श्लो. ३६

वचनमेव प्रमाणम्[१]। "कालभेदात् वृत्तभेदः, वृत्तभेदात् स्थितिभेदः, ततो गतिभेदः" इति कार्तान्तिकानां समयः, एतदनुरोधेन गच्छता कालेन ग्रहपरिधौ यत् अन्तरमापतति तस्य अन्तरस्य अपाकरणाय संस्काराः यथाकालं विहिताः इत्यतः एव सत्यपि सूर्यसिद्धान्ते अन्येषां सिद्धान्तग्रन्थानां प्रणयनस्य प्रसक्तिः इति विदितमेव समेषाम्। सूर्यसिद्धान्तप्रतिपादितग्रहस्फुटीकरणसंस्कारविषयमभिलक्ष्य न केवलम् आर्यभटीये सिद्धान्तशिरोमणौ च मतभेदः दृश्यते इति मन्तव्यम्, पञ्चसिद्धान्तिका-ब्राह्मस्फुटसिद्धान्त-शिष्यधीवृद्धिद-सिद्धान्तशेखर-ग्रहलाघव-केतकीग्रहगणित-शुद्धदृग्गणितादिग्रन्थेषु अपि मतभेदः स्फुटं दृश्यते एव। यैः संस्कारैः संस्कृतः गणितागतः ग्रहः दृक्सिद्धः भवति ते संस्काराः तत्तत्काले गणितज्ञैः कृताः, सर्वेषां लक्ष्यं तावत् दृग्गणितैक्यकरणप्रतिपादनमेत्यतः कालभेदेन ते सर्वेऽपि संस्काराः ग्राह्याः इत्यलमतिविस्तरेण।

## परामृष्टाः ग्रन्थाः


१. **आर्यभटीयम्-१** – (सूर्यदेवयज्वप्रणितप्रकाशिकाव्याख्योपेतम्) – Edited by K.V.Sarma, INSA, New Delhi, 1976
२. **आर्यभटीयम्-२** – (प्रथमभास्करप्रणीतभाष्योपेतम्) – Edited by K.S.Shukla, INSA, New Delhi, 1976
३. **केशवीयजातकपद्धतिः** - Edited by Chandrama Pandey, Sanskrit Sansthan, Varanasi, 1981
४. **सिद्धान्तशिरोमणिः** - Edited by Bapudevashastri, Choukhambha Sanskrit Sansthan, Varanasi 2005
५. **सूर्यसिद्धान्तः** – (कपिलेश्वरशास्त्रिप्रणीततत्त्वामृतव्याख्योपेतः) Choukhambha Sanskrit Bhavan, Varanasi 2015
६. **श्रीपतिपद्धतिः** - Edited by V. Subrahmanya Sastri, Bangalore 1937


[१]सूर्यसिद्धान्तः, अधि.१, श्लो.९


ISSN : 2249-538X

# ज्योतिश्शास्त्रदृष्ट्या भूमेः स्वरूपादिचिन्तनम्

डा. रमानन्द भट्टः एन् *
सहायकाचार्यः (सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– अथास्मिन् लेखने ज्योतिश्शास्त्रदृष्ट्या भुवः स्वरूपादिकं प्रतिपादयितुम् ईहे । तथैव न केवलं स्वरूपादिविषयोपस्थापनं विधीयते, किं च तत्र बहूनां मतस्य विमर्शः क्रियते । तथैव भुवः स्वरूपादिकं स्पष्टं भारतीयैः ऐदम्प्राथम्येन कथितम् इत्यपि प्रपञ्चयितुं प्रयत्नः क्रियते ।*

***कूटशब्दाः*** *– भूगोलः, Aristotle, Christopher Columbus, भास्कराचार्यः, आर्यभटः*

त्रैलोक्याधारचक्रं तदुपरि कमठं तत्र चानन्तभोगी तन्मध्ये भूमिपद्माङ्कुशशिखरदलं कर्णिकाभूतमेरुम् ।
तत्रस्थं शान्तमूर्तिं मणिमयमकुटं कुण्डलोद्भासिताङ्गं लक्ष्मीनारायणाख्यं सरसिजनयनं चेतसा चिन्तयामः ॥

भारतीयखगोलशास्त्रम् अप्रतिमं विशिष्टं वैज्ञानिकं च वर्तते । प्राचीनैः आचार्यैः अल्पैरप्युपकरणैः महत्तमं साधितं वर्तते । जगदिदं सर्वत्र अज्ञानान्धकारेण व्याप्तमासीद्यदा तदैव भारते ज्ञानज्योतिः मुनिभिः प्रज्वालितम् आसीत् । विभिन्नदेशे धर्मे च ग्रहाणां कल्पना अन्यथैव आसीद् यदा तदा अत्र ग्रन्थेष्वेव ग्रहादीनां स्वरूपम् अक्षरशः सुस्पष्टं लिखितमासीत् । अतः मुनिप्रणीतान् अंशान् अवलोक्य तेषामेव अभिप्रायेण भुवः स्वरूपादिनिरूपणं परमतनिराकरणपूर्वकम् अत्र करिष्यते ।

## भूमिशब्दार्थः

अस्माकं समेषां जीवजातानाम् आवासस्थानं भूमिः । भूमिर्नाम का ? इति जिज्ञासायां "भवन्त्यस्मिन् भूतानि[१]" इति व्युत्पत्तिः कोषे दृश्यते । तस्याः बहूनि लक्षणानि आर्यैः कथितानि । तत्रैव कोषे दृश्यन्ते **"भूमेः स्थैर्यं गुरुत्वं च काठिन्यं प्रसवार्थता । गन्धो गुरुत्वं शक्तिश्च सङ्घातः स्थापना धृतिः**[२]" चेति । एतादृश्याः भूमेः स्वरूपादिचिन्ता न अद्यतनी, किन्तु बहुभ्यः वर्षेभ्यः पूर्वमेव आचार्यैः कृता ।

## भूमेः आकारः (समतलाकारखण्डनम्)

भारतीयखगोलशास्त्रे भूमेः गुणलक्षणानि बहुधा चिन्तितानि । तत्र आचार्यभास्करवचनेन भुवः आकार-स्थिति-स्वभावादीन् पश्यामः ।

## भूमेः स्वरूपम्

**भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा- वृत्तैर्वृत्तो वृतः सन् मृदनिलसलिलव्योमतेजोमयोऽयम्**[३] ।

अस्मिन् श्लोकद्वये आदौ एव भास्कराचार्यः कथयति भूमेः पिण्डः वृत्तः, शशाङ्कादिग्रहकक्षावृत्तैः वृतः सन् गगने तिष्ठति इति । अत्रैव भूः वृत्ताकारा इति स्पष्टमुक्तम् ।

तथा च श्रूयते, प्रथमतया भुवः वृत्ताकारकत्वं ग्रीक्देशस्य तत्त्वज्ञानिना अरिष्टाटल् इत्याख्येन साधितम्

---

***सम्पर्कसूत्रम्** -9686548489, Email- rnbhat1987@gmail.com, ramananda@sanskrit.ac.in

[१]वाचस्पत्ये भूमिशब्दे ।

[२]प्रथमगुरुत्वस्य पतनविरोधी गुणः इति, द्वितीयस्य च पिण्डपुष्टिः इत्यर्थः ।

[३]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – ०२ ।

इति, पुनः कोलम्बस् इत्यनेनापि सप्रमाणं प्रस्तुतीकृतम् इत्यपि उल्लेखाः दृश्यन्ते। वस्तुतः भारतीयानां भुवः आकारादिकल्पना तु पुराणेषु अन्यथा दृश्यते। तथापि अत्र वस्तुतः भारतीयखगोलशास्त्रीयं चिन्तनम् अस्माभिः द्रष्टव्यम्।

## भुवः समता निराकरणम्

**यदि समा मुकुरोदरसन्निभा भगवती धरणी तरणिः क्षितेः।**
**उपरि दूरगतोऽपि परिभ्रमन् किमु नरैरमरैरिव नेक्ष्यते ॥**

**यदि निशाजनकः कनकाचलः किमु तदन्तरगः स न दृश्यते।**
**उदगयं ननु मेरुरथांशुमान् कथमुदेति च दक्षिणभागके**[1] ॥

पुराणे भूः दर्पणोदरसन्निभा इत्युक्तम्। तत्र मध्ये मेरुरस्ति। यद्येवं तर्हि किमर्थं तदुपरि भ्रमन् रविः सततं देवैरिव नावलोक्यते ?। यदि मेरुणा अन्तर्हितो रविः तर्हि मेरुः कथं न दृश्यते ?। यदि मेरोः सकाशात् रवेरुदयः तर्हि रविः पूर्वस्याः उत्तरतः एव द्रष्टव्यः, यतः मेरुरुत्तरदिशि एव वर्तते, किमर्थं दक्षिणदिशि दृश्यते ?। अस्मात् कारणात् भूमेः समतलाकारत्वम् अङ्गीकर्तुं न शक्यते।

तर्हि किमर्थं भूमिः मुकुरोदरवत् समैव प्रतिभाति ? इत्युक्ते तत्र कारणमुक्तं भास्करेण -

**समो यतः स्यात् परिधेः शतांशः पृथ्वी च पृथ्वी नितरां तनीयान्।**
**नरश्च तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा**[2] ॥

परिधेः शतांशः समो दृश्यते सर्वत्र वृत्ते। पृथ्वी तु पृथ्वी। तत्र स्थितः नरः अत्यन्तं लघुः। अतः तस्य दृष्ट्या कृत्स्ना भूः समेव प्रतिभाति।

सूर्यसिद्धान्ते च –

**अल्पकायतया लोकाः स्वस्थानात् सर्वतोमुखम्। पश्यन्ति वृत्तामप्येनां चक्राकारां वसुन्धराम्**[3] ॥

यद्यपि भास्कराचार्यः अर्वाचीनः। किन्तु सूर्यसिद्धान्तः आर्षः ग्रन्थः। तत्रापि अत्यन्तं स्पष्टं भूमिरियं वृत्ताकारा इति शब्दशः उक्तं दृश्यते। तत्रैव किमर्थं भूः दर्पणोदरवत् दृश्यते इति सकारणं निरूप्य भूमेः समतलत्वं निराकृतं च वर्तते। सर्वत्रापि गोले परिधेः शतांशः दण्डवदेव दृश्यते। अस्मात् कारणात् भूमिरपि दर्पणोदरवत् अनुभूयते पृथुत्वात् पृथिव्याः। तत्र शाकल्यवचनमपि वर्तते "**वृत्तस्य षण्णवत्यंशः दण्डवत् परिदृश्यते**" इति। एवं बहुभिः कारणैः भूमेः समतलत्वं निराकृतं प्राचीनैः।

ग्रहणप्रकरणेऽपि भुवः गोलत्वं साधयितुं शक्यते। चन्द्रग्रहणे "भूच्छायां प्राङ्मुखः चन्द्र प्रविशति"। अतः तदा चन्द्रग्रहणम्। चन्द्रग्रहणे विधोः अर्धखण्डिततनोः विषाणयोः कुण्ठता दृश्यते[4]। किन्तु विषाणयोः दर्शनं भवति। यदि गोलाकारत्वं न भवति भुवः, तर्हि तच्छायायाः अपि गोलाकारत्वं न सम्भवति। ग्रहणे चन्द्रबिम्बे अर्धखंडिते भुवः गोलाकारत्वं प्रत्यक्षं द्रष्टुं शक्यते।

भारतीयगणितवेत्तृषु अत्यन्तं प्राचीनः आर्यभटोऽपि भूगोलः इत्येव प्रयोगं कृतवान्। गोलः नाम सर्ववर्तुलाकारकः पिण्डः इति कोषे वाचस्पत्यादौ दृश्यते। "**भूग्रहभानां गोलार्धानि स्वच्छायया विवर्णानि।**

[1]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – ११-१२।
[2]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – १३।
[3]सूर्यसिद्धान्तः १२.५४।
[4]सिद्धान्तशिरोमणिः गोलाध्याये ग्रहणवासना – ०७।


ISSN : 2249-538X

**अर्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते**[१]" इति,"**यद्वत् कदम्बपुष्पग्रन्थिः प्रचितः समन्ततः कुसुमैः । तद्वद्धि सर्वसत्त्वैः जलजैः स्थलजैश्च भूगोलः**[२]" इति च आर्यभटेन प्रयोगः कृतः । एवमेव भुवः परिधिमानकथनादपि गोलत्वं व्यज्यते इत्यपि स्पष्टम् । यद्यपि भुवः गोलत्वमङ्गीकृत्यैव परिधिमानं कथितम् । अतः तेषाम् आचार्याणां भुवः गोलत्वे संशयः नास्तीति निश्चप्रचम् ।

अत्र श्रीपतिः –

**आदर्शोदरसन्निभा भगवती विश्वम्भरा कीर्तिता कैश्चित् कैश्चन कूर्मपृष्ठसदृशी कैश्चित् सरोजाकृतिः ।**

**अस्माकं तु कदम्बपुष्पनिचयग्रन्थेः समा सम्मता सर्वत्रासुमतां चयेन निचिता तोयस्थलस्थायिनाम्**[३] ॥

सूर्यसिद्धान्तेऽपि गोलशब्दः उक्तः –

**सर्वत्रैव महीगोले स्वस्थानमुपरि स्थितम् । मन्यन्ते खे यतो गोलः तस्य क्वोर्ध्वं क्व वाप्यधः**[४] ॥

## भूमेः पुराणोक्त-आधारपरम्पराखण्डनविचारः

पुनश्च भूमेः आधारः कोऽपि नास्ति । स्वशक्त्यैव वियति नियतं तिष्ठति इत्यपि स्पष्टीकृतम् । तत्रापि युक्तिरस्ति, तद्यथा –

**मूर्तो धर्ता चेद्धरित्र्याः ततोऽन्यस्तस्याप्यन्योऽस्यैवमत्रानवस्था ।**
**अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये किं नो भूमेः साष्टमूर्तेश्च मूर्तिः**[५] ॥

भूमेः मूर्तिरूपम् आधारं कल्पयामः चेत् तस्याप्याधारस्य अन्यः आधारः कल्पनीयः । एवम् आधारपरम्परायाम् अन्त्यस्य तु स्वशक्तिः कल्पनीयैव भवति । एवम् आधारपरम्परायाः कल्पनापेक्षया भूमेरेव स्वशक्त्या स्थितिः कल्प्यते चेत् अनवस्थादोषः न बाधते । अतः भूरेव स्वशक्त्या आकाशे तिष्ठतीति वाच्यम् ।

## बौद्धादिमतखण्डनम्

**भपञ्जरस्य भ्रमणावलोकात् आधारशून्या कुरिति प्रतीतिः ।**
**खस्थं न दृष्टं च गुरु क्षमातः खेऽधः प्रयातीति वदन्ति बौद्धाः ॥**

**द्वौ द्वौ रवीन्दू भगणौ च तद्वदेकान्तरौ तावुदयं व्रजेताम् ।**
**यदब्रुवन्नेवमनम्बराद्या ब्रवीम्यतस्तान् प्रति युक्तियुक्तम्**[६] ॥

**भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध मुधा कथम् । जाता यातं तु दृष्ट्वापि खे यत् क्षिप्तं गुरु क्षितिम् ॥**

**किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथाकृथाः । भार्केन्दूनां विलोक्याह्ना ध्रुवमत्स्यपरिभ्रमम्**[७] ॥

**नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे**

---

[१]आर्यभटीयम् – गोलपादः ०५ ।
[२]आर्यभटीयम् – गोलपादः ०७ ।
[३]अर्वाचीनं ज्योतिर्विज्ञानम् – अध्यायः २, पृ. सं. ४६-४७ ।
[४]सूर्यसिद्धान्तः १२.५३ ।
[५]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – ०४ ।
[६]शिरोमणिः – भुवनकोषः – ०७-०८ ।
[७]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – ०९-१० ।

**निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात्**[१] ॥

**यदि गच्छति भूरधोमुखी गगने क्षिप्तमुपैति नो महीम् । यदि चोर्ध्वमुपैति सा तदा निकटं किं न भवेत् भपञ्जरः**[२] ॥

## भूमेः विशिष्टा शक्तिः

पुनश्च भूमेः आकृष्टशक्तिः भास्कराचार्येण प्रतिपादिता ।

**आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या ।**
**आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे**[३] ॥

भूमेः आकृष्टशक्तिरिति काचित् विशिष्टा शक्तिरस्ति । तया शक्त्या भूमिः खस्थं वस्तु आकर्षति । किन्तु तद्वस्तु पततीति भाति ।

## भूमौ उदयाद्यवस्थाः

तत्रैव सूर्यसिद्धान्ते भूवृत्तपादान्तरितदेशेषु रवेः उदयाद्यवस्थां कथयन् – **"भद्राश्वोपरिगः कुर्याद् भारते तूदयं रविः । रात्र्यर्धं केतुमाले तु कुरावस्तमयं तदा"**[४] ॥ इति देशभेदेन याम् उदयादिस्थितिं कथयामास सा स्थितिः केवलं भुवः गोलाकारत्वे एव सम्भवतीति समेषां सुस्पष्टमेव ।

## भूमौ जनानां स्थितिः

भुवि जनानां स्थितिवशादपि भुवः गोलत्वं ज्ञातुं शक्यते । सूर्यसिद्धान्ते च –

**सर्वत्रैव महीगोले स्वस्थानमुपरि स्थितम् । मन्यन्ते खे यतो गोलः तस्य क्वोर्ध्वं क्व वाप्यधः**[५] ॥

सर्वेऽपि भूमिस्थाः स्वस्थानम् उपरि प्रकल्पयन्ति । अन्ये कुचतुर्थसंस्थाः तिर्यक्स्थिताः इति, कुदले स्थिताः अधश्शिरस्काः इति च मन्यन्ते । किन्तु तेऽपि वयं यथात्र स्थिताः तथैव अनाकुलाः एव तिष्ठन्ति ।

**सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः । कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव**[६] ॥

**यद्वत् कदम्बकुसुमग्रन्थिः प्रचितस्समन्ततः कुसुमैः । तद्वद्धि सर्वसत्त्वैः जलजैः स्थलजैश्च भूगोलः**[७] ॥

**भुवः चलनम्**

एवम् आर्यभटः **"प्राणेनैति कलां भूः**[८]**"** इति, **"अनुलोमगतिनौस्थः पश्यत्यचलं विलोमगं यद्वत् । अचलानि भानि तद्वत् समपश्चिगानि लङ्कायाम्**[९]**"** इति च भुवः भ्रमणमपि प्रतिपादयामास ।

अत्र लल्लः –

**यदि भ्रमति क्षमा तदा स्वकुलायं कथमाप्नुयुः खगाः । इषुतोऽभिनभः समुज्झिता निपतन्तः स्युरपाम्पतेर्दिशि** ॥

[१]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – ०२ ।
[२]शिष्यधीवृद्धिदम् – २०.३८ ।
[३]सिद्धान्तशिरोमणिः गोलाध्याये भुवनकोषः – ०५ ।
[४]सूर्यसिद्धान्तः १२.७० ।
[५]सूर्यसिद्धान्तः १२.५३ ।
[६]शिरोमणिः – गोलः – भुवनकोषः – २-३ ।
[७]आर्यभटीयम् – गोलपादः – ६, ७ ।
[८]आर्यभटीयम् – गीतिकापादः ०६ ।
[९]आर्यभटीयम् – गोलपादः ०९ ।


ISSN : 2249-538X

**पूर्वाभिमुखे भ्रमे भुवो वरुणाशाभिमुखो व्रजेद्धनः । अथ मन्दगमात्तदा भवेत् कथमेकेन दिवा परिभ्रमः[1] ॥**

एवं भारतीयानां बहूनाम् आचार्याणां ग्रन्थावलोकनेन इदं ज्ञायते यत् भुवः गोलत्वं भारतीयैः प्रथमतया प्रकटीकृतम् इति। विशिष्य सूर्यसिद्धान्ते तादृशवचनसद्भावात् आर्षग्रन्थे भूमेः गोलत्वप्रतिपादकविषयाणां दर्शनात् अरिष्टाटल् इत्यस्यापेक्षयापि भारतीयैः प्रथमतया भूमेः गोलाकारः प्रपञ्चमुखे प्रकटीकृतः इति निश्चप्रचं वक्तुं शक्यते। यद्यप्यत्र भास्करवचनं मुख्यतया प्रतिपादितं चेदपि तत्पूर्वैः आर्यभटादिभिः इमे अंशाः निरूपिताः आसन्। अतः इदं भारतीयं खगोलविज्ञानम् अत्युत्कृष्टं सर्वतोऽपि उच्चतमस्थाने वर्तते इति शम् ॥

## परामृष्टाः ग्रन्थाः

१. सिद्धान्तशिरोमणिः – वासनाभाष्यसहितः – श्रीमद्बापूदेवशास्त्रिभिः संशोधितः – चौखम्भा संस्कृत संस्थान – वाराणसी – २००५।
२. सूर्यसिद्धान्तः – श्रीतत्त्वामृतभाष्यसहितः – श्रीकपिलेश्वरशास्त्रिभिः विरचितः - चौखम्भा संस्कृत संस्थान – वाराणसी – वि. सं. २०६०।
३. सिद्धान्तशिरोमणिः – मरीचिभाष्यसमेतः – पं. श्रीमान् केदारदत्त जोषी – मोतीलाल बनारसीदास, वाराणसी – २०१०।
४. भुवनकोशतत्त्वमीमांसा – डा. अनिल कुमार पोरवाल – नाग प्रकाशन, दिल्ली – २०१८।
५. आर्यभटीयम् – डा. सत्यदेवशर्मा – चौखाम्बा सुरभारती प्रकाशन, वाराणसी – २००८।
६. The earth – J. H. Poynting – Cambridge University press, New york – 1913.
७. The shape of the earth – Patrick Lynch – Edward Arnold (Publishers LTD), London.
८. How People Discovered the Shape of the Earth – Anatoly Tomilin – Raduga Publishers – Moscow – 1984.
९. शिल्परत्नम् - के. साम्बशिवशास्त्री - अनन्तशयने राजकीयमुद्रणयन्त्रालये प्रकाशितम् – 1929.

[1] शिष्यधीवृद्धिदम् – २०.४२, ४३।

# पञ्चाङ्गस्य स्वरूपं वर्तमानकालिकविसङ्गतयः माहात्म्यञ्च

डा. ब्रजेशपाठकः*
सहायकाचार्यः (अ), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– भारतीयज्यौतिषशास्त्रे पञ्चाङ्गस्य स्थानम् अत्यन्तं महत्त्वपूर्णम् अस्ति । तिथि-वार-नक्षत्र-योग-करणाख्यानां पञ्चानाम् अङ्गानां समन्वयेन निर्मितं पञ्चाङ्गं न केवलं कालगणनायाः साधनं, अपि च शुभाशुभनिर्णयस्य, मुहूर्तनिर्धारणस्य, धार्मिकसामाजिककार्याणां च वैज्ञानिक आधार वर्तते । प्रस्तुते शोधलेखे पञ्चाङ्गस्य प्रत्यङ्गानां स्वरूपं, तेषां महत्त्वं वर्तमाने प्रचलितानां विविधपञ्चाङ्गानां मध्ये दृश्यमानानां विसङ्गतीनां च विवेचनं कृतमस्ति । एतेनाध्ययनेन स्पष्टं भवति यत् पञ्चाङ्गं भारतीयसंस्कृतेः, परम्परायाः चाभिन्नमङ्गमस्ति, यस्य वैज्ञानिकं तथा व्यावहारिकं महत्त्वमद्याप्यक्षुण्णं वर्तते ।*

***कूटशब्दाः*** *– पञ्चाङ्गम्, तिथिः, नक्षत्रम्, करणम्, योगः, मुहूर्तः, ज्यौतिषशास्त्रम्।*

पञ्चाङ्गस्य स्वरूपं वर्तमानकालिकविसङ्गतयः महात्म्यञ्च

## पञ्चाङ्गपरिचयः

पञ्चाङ्गशब्दश्रवणेन सामान्यतया जनानां मनसि व्रतपर्वादिबोधकं तिथिपत्रमुद्भासते । ज्यौतिषशास्त्राध्येतृणामपि मनसि पञ्चाङ्गशब्दश्रवणेन प्रप्रथमतया व्रतपर्वादिनिदर्शकं तिथिपत्रमेव कल्प्यते। रूढत्वेन पञ्चाङ्गशब्दः व्रतपर्वनिदर्शकं तिथिपत्रमेव बोधयति। अस्माभिरपि व्रतपर्वादिबोधकं तिथिपत्रं पञ्चाङ्गशब्देनैव व्यवह्रियते, यथा भोजराजपञ्चाङ्गम्, मार्तण्डपञ्चाङ्गम्, जगन्नाथपञ्चाङ्मित्यादयः । ज्योतिश्शास्त्रधिया शब्दार्थविचारः क्रियते चेत् पञ्च + अङ्गम् इत्यनेन पञ्चाङ्गमिति भवति। अस्य व्युत्पत्तिर्भवति पञ्चानामङ्गानां समाहारः अर्थात् तिथिवारनक्षत्रयोगकरणानां समाहृतं रूपं भवति पञ्चाङ्गमिति। व्रतपर्वादिबोधकस्य तिथिपत्रस्य कृतेपि पञ्चाङ्गशब्दस्य व्युत्पत्तिर्भवितुमर्हति । तदर्थमुच्यते -

तिथिर्वासरनक्षत्रे योगः करणमेव च । इति पञ्चाङ्गमाख्यातं व्रतपर्वनिदर्शकम् ॥[१] इति

सुस्पष्टमिदं यत्पञ्चाङ्गशब्दस्य प्रयोगः व्रतपर्वादिबोधकतिथिपत्रस्य कृतेऽपि भवति एवञ्च तिथिवारनक्षत्रयोग-करणानां कृतेऽपि भवति । शास्त्रेषु पञ्चाङ्गश्रवणस्य महाफलमुक्तमिति सर्वे जानन्त्येव । अतः मत्पाठकानां पञ्चाङ्ग-विषये ज्ञानवर्धनं भवत्विति विचिन्त्य भवतां हस्ते शोधपत्रमिदं राराज्यते । प्रथमतया मया व्रतपर्वादिबोधकतिथिप-त्रपञ्चाङ्गस्य विषये किञ्चिदुपस्थाप्यते, ततः तिथिवारनक्षत्रयोगकरणादिवाचकपञ्चाङ्गविषयेऽपि विस्तरेण लिख्यते । जानन्त्येव भवन्तः यज्ज्योतिषशास्त्रं वेदस्य नेत्रं वर्तते । उक्तञ्च सिद्धान्तशिरोमणौ -

शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।
या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधः ॥[२] इति

एतत्प्रवर्तका अष्टादशमहर्षयः, यथाह कश्यपः –

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः । कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ॥

***सम्पर्कसूत्रम्*** - 7004022856, Email- brajesh@sanskrit.ac.in

[१]भारतीय कुण्डली विज्ञान, मीठालाल हिंमतराम ओझा, पञ्चाङ्गप्रकरण श्लो.सं.1, पृ.सं.1 देवर्षि प्रकाशन, वाराणसी, 2004

[२]सिद्धान्तशिरोमणिः, श्लो. १०, पृ.सं.-१०, डॉ. मुरलीधरचतुर्वेदः, संपूर्णानंद संस्कृत विश्वविद्यालय वाराणसी

लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः । शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्त्तकाः ॥[१] इति ।

चतुर्णामपि वेदानां पृथक् पृथग् ज्योतिषशास्त्रमासीत् । तेषु सामवेदस्य ज्योतिषशास्त्रमधुना नोपलभ्यते, त्रयाणामितरेषां वेदानां ज्यौतिषशास्त्राण्यवाप्यन्ते -

(१) ऋग्वेदस्य ज्यौतिषम् - आर्चज्यौतिषम्, षट्त्रिंशत्पद्यात्मकम् ।

(२) यजुर्वेदस्य ज्यौतिषम् - याजुषज्यौतिषम्, ऊनचत्वारिंशत्पद्यात्मकम् ।

(३) अथर्ववेदस्य ज्यौतिषम् - आथर्वणज्यौतिषम्, द्विषष्ठ्युत्तरशतपद्यात्मकम् ।

एतेषां त्रयाणामपि ज्यौतिषशास्त्राणां प्रणेता लगधाचार्यः । लगधाचार्यस्य वेदाङ्गज्योतिषमिति नामधेयो ग्रन्थ उपलभ्यते । अत्र विशिष्य वैदिककर्मसम्पादनार्थं यदावश्यकं ज्योतिश्शास्त्रं तद्वर्णितं वर्तते । एवं श्रूयते यद्द्यापि बहवो मीमांसकाः, वैदिका अग्निहोत्रिणश्च वेदाङ्गज्यौतिषरीत्या निर्मितं पञ्चाङ्गमनुसरन्ति । भवन्तः जानन्त्येव यज्ज्योतिर्विद्या त्रिपथगा वर्तते । नारदसंहितायामुक्तम् –

सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् । वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम् ॥[२] इति

ज्यौतिश्शास्त्रे सिद्धान्त-संहिताहोरेति स्कन्धत्रयं वर्तते । तत्र सिद्धान्तलक्षणमुक्तं भास्कराचार्येण –

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रहसंस्थितैश्च कथनं यन्त्रादि यत्रोच्यते,
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥ [३] इति

ज्योतिश्शास्त्रस्य सिद्धान्तशाखया ग्रहगणितेन वेधेन वा अस्माभिर्ग्रहगणना क्रियते । तया ग्रहगणनया या शाखा समष्टिगतं फलादेशं करोति सा संहिता नामधेया । तथा च व्यष्टिगतं फलादेशं या करोति सा होरेति कथ्यते । इदं तु स्पष्टमेव यज्ज्यौतिषशास्त्रस्य सिद्धान्तशाखया एव पञ्चाङ्गनिर्माणं भवति । एषा शाखा गणितशाखेत्युच्यते । तत्र ग्रहगणनायामपि भेदत्रयं वर्तते, तद्वशात् गणितस्कन्धस्य सिद्धान्त-तन्त्र-करणश्चेति भेदत्रयं भवति । यत्र सृष्ट्यादितः गणना भवति स सिद्धान्त इत्युच्यते, यथा - सूर्यसिद्धान्तः, सिद्धान्तशिरोमणिः, सिद्धान्ततत्वविवेक इत्यादयः । यत्र युगादितः गणना भवति तत्तन्त्रमित्युच्यते, यथा लल्लाचार्यकृतं शिष्यधीवृद्धिदतन्त्रम् । इदं तान्त्रिकाणां तन्त्रं नास्ति अस्माकं ज्योतिष्काणां तन्त्रमस्ति । यत्र इष्टशकादितः गणना भवति तत् करणमित्युच्यते । यथा ग्रहलाघवकरणम्, केतकीग्रहगणितमित्यादयः । एवमत्रैव पञ्चाङ्गगणिते भेदत्रयं दृश्यत एव ।

## वर्तमानकालिकविसङ्गतयः

सिद्धान्त-तन्त्र-करणानीति भेदात्तु शास्त्रदृष्ट्या मया वर्णितम् । सम्प्रति प्रचलितपञ्चाङ्गानामध्ययनं कुर्मश्चेत् पञ्चाङ्गरचनायामपि बहवः पद्धतयः दरीदृश्यन्ते । धूलिपाल-अर्कसोमयाजिमहोदयेन एतेषां त्रिधा विभागः कृतः ।[४] प्रथमस्तावत् प्राचीनानि द्वितीयः नवीनानि तृतीयः मध्यमानीति । अस्माकं प्राचीनपञ्चाङ्गगणितपद्धतिमनुसृत्य रचितानि पञ्चाङ्गानि प्राचीनानीति ।

नवीनपाश्चात्त्यपद्धतिमनुसृत्य रचितानि पञ्चाङ्गानि नवीनानीति । अत्रापि एकः अन्यः भेद उदेति । विदुषां

[१]भारतीय ज्योतिष, डॉ.नेमिचन्द्र ज्योतिषाचार्य, पृ.58 भारतीय ज्ञानपीठ प्रकाशन, नई दिल्ली

[२]नारद संहिता, वसतिराम शर्मा श्लो.4, खेमराज श्रीकृष्णदास प्रकाशन संवत्, मुम्बई १९६३

[३]सिद्धान्त शिरोमणि, मुरलीधर चतुर्वेदी, मध्यमाधिकार, श्लो. ६, पृ.८., संपूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी

[४]अर्वाचीनं ज्योतिर्विज्ञानम्, धूलिपाल अर्क सोमयाजी, पृ.सं.221 वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी, 1964

मतमस्ति यत् व्रतपर्वादिषु दृक्सिद्धगणितविधिना तिथ्यादिसाधनं न करणीयमिति। तदर्थं ते बहूनि प्रामाणानि उल्लिखन्ति। तेषु अन्यतमोऽस्ति -

यन्त्रवेधादिना ज्ञातं यद्बीजं गणकैस्ततः। ग्रहणादि परीक्षेत न तिथ्यादि कदाचन ॥[१]

अतः ते स्वपञ्चाङ्गेषु प्राचीनपद्धत्या व्रतपर्वादिबोधकं तिथिसाधनं कुर्वन्ति, आधुनिकगणितागतग्रहणोदयास्तादीन् चोल्लिखन्ति। एवमुभयविधगणितेन निर्मितानि पञ्चाङ्गानि मध्यमानीति।

एतानि त्रीणि तु बहुप्रचलितानि पञ्चाङ्गानि वर्तन्ते। एतावदेव नास्ति अन्यानि बहूनि पञ्चाङ्गानि सन्ति, यथा मया वेदाङ्गज्योतिषग्रन्थाधारितपञ्चाङ्गस्य चर्चा कृता एव वर्तते। इदानीं ऋतुबद्धं पञ्चाङ्गमपि दृश्यते। Hindu Callander App[२] यद् भवतां दूरवाण्यां स्थापितमस्ति तत्रापि सेटिंग्स इति विकल्पे पश्यन्तु ऋतुबद्धपञ्चाङ्गस्य विकल्पः तत्रापि आगच्छति। पुनः वच्मि यत् पञ्चाङ्गस्य बहवः भेदाः दरीदृश्यन्ते। एषः तु गभीरः विस्तृतश्च विषयः वर्तते। एतद्विषये बहुकिमपि वक्तव्यमस्ति। भवतां जिज्ञासा भवति चेत् कदाचित् अन्यत्र विस्तरेण उपस्थाप्यते। ये एतद्विषये अधिकं ज्ञातुं इच्छन्ति ते मानकपञ्चाङ्गविमर्शः[३], शास्त्रीयपञ्चाङ्गमीमांसा[४], धर्मकृत्योपयोगितिथ्यादिविनिर्णयः[५] इत्यादिषु ग्रन्थेषु विषयममुं पठितुमर्हन्ति। दृक्पञ्चाङ्गखण्डनमिति[६] कन्नडभाषायामपि एकं महत्त्वपूर्णं पुस्तकमस्मिन् विषये रचितं वर्तते।

## पञ्चाङ्गस्य स्वरूपम्

इदानीं तिथिवारञ्च नक्षत्रं योगः करणमेव च एतानि यानि पञ्चाङ्गस्याङ्गानि वर्तन्ते तद्विषये किञ्चिदुच्यते।

**1. तिथिः -**

तत्रादौ तिथिः। तनुविस्तारे धातोः बाहुलकात् इथिन् प्रत्ययः नादिलोपे च कृते तिथिः शब्दः व्युत्पद्यते। अस्य तिथिशब्दस्य पुल्लिङ्गे स्त्रीलिङ्गे च प्रयोगः भवति। तनोति विस्तारयति चन्द्रकलामिति तिथिः एवमस्य व्युत्पत्तिः क्रियते। परिभाषया सूर्यचन्द्रयोः द्वादशान्तरेषु एका तिथिः भवति। यदा चन्द्रः सूर्यात् द्वादशांशान्तरितः भवति तदा प्रतिपत्तिथिः। चतुर्विंशे द्वितीया, षड्विंशे तृतीया एवं क्रमेण अशीत्युत्तरशते अंशे पूर्णिमा एवञ्च षष्ठ्यधिकत्रिशते अंशे अमावास्या भवति। यः ग्रहः यस्मिन् वृत्ते भ्रमति तद् तस्य ग्रहस्य विमण्डलवृत्तमित्युच्यते। यथा कुजः यस्मिन् वृत्ते भ्रमति तद् कुजविमण्डलवृत्तम्, बुधः यस्मिन् वृत्ते भ्रमति तद् बुधविमण्डलवृत्तम्। एवमेव चन्द्रः यस्मिन् विमण्डलवृत्ते भ्रमति तद् चन्द्रविमण्डलवृत्तम्। सर्वे जानन्त्येव यत् मण्डल-विमण्डलादीनां वृत्तीयस्वरूपाणां अंशात्मकं मानं 360° इति भवति। अतएव चन्द्रविमण्डलस्याऽपि अंशात्मकं मानं 360° इति अस्ति। चन्द्रः चन्द्रविमण्डलवृत्तस्य परिभ्रमणं त्रिंशति तिथिषु पूरयति। अतः 360 अंशाः यदि 30 तिथिषु विभज्यन्ते चेत् 12 अंशाः लभ्यन्ते। अतः किमर्थम् एका तिथिः द्वादशंशात्मिका भवतीति सुस्पष्टम्।

तिथीनां षोडशनामानि प्राप्यन्ते इत्यतः तिथीनां सञ्ज्ञा षोडशेत्युच्यते। एकस्मिन् मासे कृष्णपक्षे अमावास्यान्तपञ्चदशतिथयः, एवञ्च शुक्लपक्षे पूर्णिमान्तपञ्चदशतिथयः, आहत्य त्रिंशत्तिथयो भवन्ति। तिथीनां

[१] धर्मकृत्योपयोगितिथ्यादिनिर्णयः कुम्भपर्वनिर्णयश्च, श्रीकरपात्रस्वामिनः, पृ.सं.20 सन्मार्ग प्रेस, वाराणसी, 1965

[२] https://play.google.com/store/apps/details?id=com.alokmandavgane.hinducalendar

[३] https://www.scribd.com/document/448426897/म‌ानक-पञ-च‌ाङ-ग-नरि-णय-१-pdf

[४] https://archive.org/details/shaastriya-panchang-mimamsa

[५] https://archive.org/details/KumbhaTithyadiNirnaya

[६] https://archive.org/details/NxMc_drik-panchanga-khandanam-by-shambhu-gopala-\
krishna-bhat-kannada-karki-suri-ramachandra-shastri


ISSN : 2249-538X

फलज्ञानार्थमथवा कस्मिन् कार्ये कस्य तिथेः प्राधान्यमिति ज्ञानार्थं तिथिस्वामिनां ज्ञानमावश्यकं भवति। मुहूर्तचिन्तामणौ उक्तम् वर्तते -

तिथीशाः वह्निकौ गौरी गणेशोऽहिगुहो रविः। शिवो दुर्गान्तको विश्वे हरिः कामः शिवः शशी ॥[१]

अर्थात् – वह्निः (अग्निः), कः (ब्रह्मा), गौरी, गणेशः, अहिः (सर्पः), गुहः (कार्तिकेयः), रविः, शिवः, दुर्गा, अन्तकः (यमः), विश्वे (विश्वेदेवः), हरिः (विष्णुः), कामः (कामदेवः), शिवः, शशी (चन्द्रः) एते प्रतिपदारभ्य क्रमेण तिथीशाः ज्ञेयाः।

यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः।[२]

अस्माभिः नागपञ्चमीति आचर्यते खलु किमर्थं नागपञ्चमी ? पञ्चम्याः स्वामी भवति नागः। षष्ठ्याः स्वामी भवति स्कन्द इत्यतः स्कन्दषष्ठी इति आचर्यते। सप्तम्याः स्वामी भवति सूर्य अत अचलासप्तमी अथवा सूर्यसप्तमी इति आचर्यते। अष्टम्याः स्वामी भवति शिव अतः शिवाष्टमी इति आचर्यते। नवम्याः स्वामिनी भवति दुर्गा इत्यतः दुर्गानवमी इति आचर्यते। एवमेव बहूनि प्रत्यक्षाणि उदाहरणानि वयं जानिम एव। तिथीनां इतोऽपि वर्गीकरणं दृश्यते यथा नन्दा, भद्रा, जया, रिक्ता, पूर्णेति।

नन्दा च भद्रा च जया च रिक्ता पूर्णेति तिथ्योऽशुभमध्यशस्ताः।
सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमार्किगुरौ च सिद्धाः ॥[३]

अर्थात् - सिते (शुक्लपक्षे) नन्दा च भद्रा च जया च रिक्ता पूर्णा इति तिथयः क्रमेणाशुभमध्यशस्ताः ज्ञेयाः। असिते (कृष्णपक्षे) एते तिथयः क्रमेण शस्तसमाधमाः स्युः। पुनश्च सितज्ञभौमार्किगुरौ (शुक्र-बुध-कुज-शनि-गुरवासराः) क्रमेण एतेषां तिथौ सिद्धयोगाः स्युः।

नन्दादितिथिनाम् एवञ्च सिद्धयोगस्य बोधकं चक्रम्[४]

| **शुक्लपक्षः** | **नन्दा** | **भद्रा** | **जया** | **रिक्ता** | **पूर्णा** | **कृष्णपक्षः** |
|---|---|---|---|---|---|---|
| अशुभः | 1 | 2 | 3 | 4 | 5 | शुभः |
| मध्यमः | 6 | 7 | 8 | 9 | 10 | मध्यमः |
| शुभः | 11 | 12 | 13 | 14 | 15 | अशुभः |
| **वारः** | शुक्रः | बुधः | भौमः | शनिः | गुरुः | **सिद्धयोगः** |

## 2. वारः –

'वृ' इति धातौ घञ् प्रत्ययः कृते 'वारः' इति शब्दः निष्पद्यते।

उदयादुदयं भानोः भूमिसावनवासरः।[५] इति सूर्यसिद्धान्ते।

अर्थात् सूर्योदयात् अग्रिमसूर्योदयं यावत् वासरः भवति। वासरः वारश्च पर्यायवाचिनौ। अत्र अवधानं यच्छन्तु सम्पूर्णे विश्वे यथा संस्कृते रविवासरः, सोमवासरः, कुजवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः,

[१]मुहूर्तचिन्तामणि, रामयत्न अवस्थी, शुभाशुभप्रकरणम्, श्लो.3, पृ.सं.2, तेजकुमार बुक डिपो, लखनऊ, 2004
[२]मुहूर्तचिन्तामणि पीयूषधारा, केदारदत्त जोशी, शुभाशुभप्रकरणम्, श्लो.3, पृ.सं.11, मोतीलाल बनारसीदास, दिल्ली, 2002
[३]मुहूर्तचिन्तामणि, रामयत्न अवस्थी, शुभाशुभप्रकरणम्, श्लो.3, पृ.सं.4, तेजकुमार बुक डिपो, लखनऊ, 2004
[४]मुहूर्तचिन्तामणिः, डॉ.रामचन्द्रपाण्डेयः, शुभाशुभप्रकरणम्, श्लो.4, पृ.सं.4, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2011
[५]सूर्यसिद्धान्तः, डॉ.सत्येन्द्रमिश्रः, मध्यमाधिकारः श्लो.सं.36, पृ.सं.27, चौखम्भा संस्कृत भवन, वाराणसी, 2015

शनिवासरः तथैव आङ्ग्ले Sunday, Monday, Tuesday, Wednesday, Thursday, Friday Saturday इति एवमेव वारक्रमः सम्पूर्णे विश्वे चलति । एषः क्रमः कथं निर्धारितं किमर्थम् एषः एव क्रमः चलति इति विषये पाश्चात्यान् पृच्छामः चेत् Why does Monday always come after Sunday ? तदा ते उत्तरं दातुं समर्थाः न प्रभवन्ति । अत्र गाम्भीर्येण पश्यामश्चेदेतदस्माकमेव मतमस्ति । अस्माकं भारतीयाः ज्यौतिष्काः एव अस्य उत्तरं दातुं शक्नुवन्ति । कदाचित् यदि अस्माभिः दिनानां नामानि स्मृतं न स्याच्चेदपि ग्रहगणितपद्धत्या तज्ज्ञातुं शक्यते । रविवासरानन्तरं सोमवासरः एवागच्छति कुजवासरः आगन्तुमेव नार्हति । ग्रहकक्ष्याक्रमस्य साहाय्येन वारक्रमस्य ज्ञानं भवति । तत्तु भवन्तः जानन्त्येव । सूर्यः, बुधः, शुक्रः, पृथ्वी, कुजः, गुरुः, शनिः इति । इदानीं किं करणीयमिति चेत् पृथ्वीमुत्थाय सूर्यस्य स्थाने स्थापयामः । माता गच्छति चेत् शिशुरपि मातुः साकं गच्छति । अतः पृथ्वी गच्छति चेत् चन्द्रोऽपि सहैव गच्छत्येव । यतोहि चन्द्रस्य कक्ष्या तु भिन्ना नास्ति । चन्द्रः स्वकक्ष्यायां परिभ्रमन् पृथिव्याः परिक्रमणं करोति । एवञ्च पृथिव्याः साकं तस्यां कक्ष्यायां सूर्यस्य परितः भ्रमति । इदानीं चिन्तयन्तु सूर्यस्य स्थाने पृथ्वी गच्छति चेत् सूर्यः कुत्र गच्छति ? यत्र पृथ्वी आसीत् तत्रैव । इदानीं ग्रहक्रमः इत्थं जातमस्ति - पृथ्वी, चन्द्रः, बुधः, शुक्रः, सूर्यः, कुजः, गुरुः, शनिः इति । अयमेव क्रमः भूकेन्द्रितकग्रहकक्षाक्रम इत्युच्यते ।

उक्तञ्च गोलपरिभाषायां -

आवृत्तोऽयं क्रमाच्चन्द्रबुधशुक्रार्कभूभुवाम् । गोलैर्जीवार्किभानाञ्च क्रमादुर्ध्वोर्ध्वसंस्थितैः ॥[१] इति

एनं क्रममनुसृत्य उपर्युपरि क्रमानुसारं वारक्रमः आगच्छति । सर्वोपरि भवति शनिकक्ष्या ततोधः गुरुकक्ष्या, ततोधः कुजकक्ष्या, ततोधः सूर्यकक्ष्या, ततोधः शुक्रकक्ष्या, ततोधः बुधकक्ष्या, ततोधः चन्द्रकक्ष्या इति । अनेन क्रमेण चतुर्थः ग्रहः यः भवति तस्य वासरः अग्रिमे दिवसे आगच्छति । एवमेव प्रतिदिनं चतुर्णां ग्रहाणामनुवर्तनेन वारक्रमः सिध्यति । उदाहरणार्थं कल्पयामः अद्य कुजवासर अस्तीति । इदानीं श्वः कः वासर इति वयं न जानिमः । कुजवासरश्चेत् अधोधः क्रमेण चतुर्थः ग्रहः कः ? बुधः । तर्हि कुजवासरानन्तरं बुधवासरः भविष्यति । पुनः चिन्तयन्तु श्वः बुधवासरश्चेत् परश्वः कः वासरः ? बुधग्रहानन्तरम् अधोधः क्रमेण गुरुरस्ति इत्यतः परश्वः गुरुवासर इति निश्चयो भवति । पुनः रविवासरे स्थिर कर्माणि क्रियन्ते । सोमवासरे चरकर्माणि क्रियन्ते । कुजवासरे उग्रकर्माणि क्रियन्ते इति ।

## 3. नक्षत्रम् -

न क्षरति इति नक्षत्रम् । नक्षगतौ धातोः अत्रन् प्रत्यये कृते नक्षत्रमित्युत्पद्यते । 'नक्षत्रम्' इत्यस्य अर्थो भवति यन्न क्षीयते अथवा यन्नित्यं तिष्ठति इति । तारकाणि आकाशे स्थिराणि प्रतीयन्ते, न च्युतानि भवन्ति, अतः एतानि नक्षत्राणि इत्युच्यन्ते । ज्यौतिषशास्त्रे अस्माभिः विशिष्य अश्विन्यादीनां सप्तविंशतेः नक्षत्राणां ग्रहणं कृतं वर्तते । जनाः मां बहुवारं पृच्छन्ति, आकाशे तु बहूनि नक्षत्राणि दृश्यन्ते, किमर्थं ज्योतिष्कैः सप्तविंशतेः नक्षत्राणामेव ग्रहणं कृतम् ? गभीरोऽयं प्रश्नः । अस्य रहस्यं ज्ञातुम् एकः काल्पनिकः प्रयोगः करणीयः । एवं चिन्तयन्तु कूपः कृतः अस्ति इति तत्र कूपस्य अन्तः वयं सर्वे चलामः । तत्र गन्तुं सोपानम् अस्ति । सोपानमार्गेण गत्वा कूपात् अधः वयं सर्वे स्थिताः । इदानीमुपरि पश्यामश्चेत् किं दृश्यते ? आकाशः दृश्यते । तस्य आकाशस्य परिमाणं कियत् दृश्यते । तस्य कूपस्य परिधिः यावदस्ति तावदाकाशस्य परिमाणमपि दृश्यते । अहं कूपस्य

[१]गोलपरिभाषा, डॉ.मदनमोहनपाठकः, श्लो.सं.29-30, पृ.सं.10, रामचन्द्ररामानुजदासः, पुरी

अन्तः अस्मि कूपस्य परिधेः बहिष्ठात् कोऽपि माम् आह्वयति भो ! ब्रजेशः कुत्र ? कुत्र ? इति चेत् अहं तं द्रष्टुं न पारयामि । यदा सः कूपस्य परिधेः अन्तः दृष्ट्वा आह्वयति चेदेवाहं तं द्रष्टुं प्रभवामि । एवं पृथ्वी अपि महान् कूप अस्ति तस्मिन् कूपे वयं निवसामः । अत आवर्षं पृथ्वीभ्रमणं कृत्वा आकाशस्य यानि परिवर्तितानि दृश्यानि दृश्यन्ते तेषां संख्या सप्तविंशत्येवास्तीत्यतः सप्तविंशतेः नक्षत्राणामेव ग्रहणमस्माभिः क्रियते । अर्थात् पृथ्वी येन मार्गेण सूर्यं परिभ्रमति तस्मिन् मार्गे सप्तविंशत्येव नक्षत्राण्यागच्छन्ति इत्यतः अस्माभिः सप्तविंशतेः नक्षत्राणामेव ग्रहणं क्रियते । अस्माकं शास्त्रेषु तेषां सप्तविंशतेः नक्षत्राणामेव नाम अस्तीति नास्ति । यदि तथा स्यात् तर्हि अगस्त्यतारकस्य नाम न स्यात् एवमेव सप्तर्षितारकाणामपि नाम शास्त्रेषु न दृश्येत । बहूनि नक्षत्राणि शास्त्रे उक्तानि सन्ति येषां सप्तविंशतौ नक्षत्रेषु तु वर्णनं नास्ति । सूर्यसिद्धान्ते भग्रहयुत्यधिकारे बहूनां नक्षत्राणां नामानि सन्ति । शतपथब्राह्मणे बहूनां नक्षत्राणाम् उल्लेखोस्ति । ये तथा शास्त्राणामध्ययनं न कुर्वन्ति ते वृथैवाक्षिपन्ति । पुनः अत्रापि अभिजिन्नक्षत्रस्य ग्रहणे कृते अष्टाविंशतिः नक्षत्राणि भवन्ति । न सर्वदा सप्तविंशतेः नक्षत्राणामेव ग्रहणं कुत्रचित् अष्टाविंशतेः नक्षत्राणामपि ग्रहणमस्ति । अभिजिन्नक्षत्रं सर्वदा किमर्थं न गृह्यते इत्यपि आक्षेपः जनानां भवति । तदर्थमपि एकं रूपकं गृह्यते । चिन्तयन्तु द्विचक्रिकायानेन मार्गे वयं गच्छामश्चेदस्माकं दृष्टिः साक्षात् मार्गे भवति । मार्गस्य उभयतः वृक्षाणि वा पुष्पाणि वा सन्ति चेत् भवतु, वयं तान् पश्यामः परन्तु तत्र न गच्छामः स्वस्मिन् मार्गे एव चलामः । कदाचिदेवं भवति पुष्पवृक्षाणां लता मार्गमारोहति तदा तं मार्गारोहितां लतां उत्साहेन स्पृष्ट्वा अग्रे सरामः । सा लता मार्गे आरोपितं नास्ति परन्तु तस्याः लताभागः वर्धयित्वा मार्गमारोहति । अस्माकं भूः साक्षात् लम्बवत् स्थिरं नास्ति 23.5° तिरश्चीना अस्ति । यदा सा पृथ्वी उत्तराषाढानक्षत्रस्य समीपे आगच्छति तदा तस्याः तिरश्चीनत्वात् सा अभिजिन्नक्षत्रं किञ्चित् स्पृशति हस्तमेलनं करोतीति भावयन्तु । अतः कुत्रचित् अभिजिन्नक्षत्रस्यापि ग्रहणं कृतम् । क्रान्तिवृत्तस्य परिधौ नास्ति इत्यतः सर्वदा तस्य ग्रहणं नास्ति कुत्रचित्तु अस्त्येव । पुनः संहिताशास्त्रे तु सांहितिकफलकथने अन्येषां नक्षत्राणामपि ग्रहणं कृतं वर्तत एव ।

## 4. योगः -

युज् समाधौ इति धातोः घञ् प्रत्ययः कृते सति योगशब्दः निष्पद्यते । सोऽपि द्विविधः नित्यानित्यश्च । पञ्चाङ्गे परिगणितः योगः शब्दः नित्ययोगवाचकः वर्तते । नित्ययोगोऽपि द्विविधः । यदा नक्षत्राणां संख्या 27 स्वीकृत्य गणना क्रियते चेत् विष्कुम्भादयः 27 भवन्ति । यदा नक्षत्राणां संख्या 28 इति स्वीकृत्य गणना क्रियते चेत् आनन्दादयः 28 भवन्ति । योगास्तु स्वनामसदृशा एव फलदा भवन्ति ।

## 5. करणं -

तिथ्यर्धं करणमिति भवति । एकस्यां तिथौ करणद्वयमागच्छति । आहत्य तेषां करणानां संख्या 11 भवति । तत्र सप्त चरकरणानि चत्वारि स्थिरकरणानि भवन्ति । ज्यौतिषशास्त्रे शुभाशुभकार्यनिर्णये करणस्य विशिष्टं महत्त्वम् अस्ति । विवाहः, गृहप्रवेशः, यात्रारम्भः, व्रतारम्भः, यज्ञः, संस्काराः तथा अन्यानि मङ्गलकार्याणि करणं विचार्यैव क्रियन्ते । पञ्चाङ्गे यानि एकादशकरणानि सन्ति तेषु सप्त चरकरणानां नामानि इमानि सन्ति - बव, बालव, कौलव, तैतिल, गर, वणिज् तथा विष्टि इति । एकस्मिन् मासे पुनर्पुनराहत्य अष्टवारमावर्तन्ते । शकुनिः, चतुष्पात्, नागः किंस्तुघ्नश्चेति चत्वारि स्थिरकरणानि सन्ति, यानि एकस्मिन् मासे एकवारमेव निश्चितासु विशिष्टासु तिथिषु एव सम्भवन्ति । एतेषां करणानां स्वभावः तथा फलम् अपि पृथक् पृथक् भवति । उदाहरणार्थं बव-बालव-कौलवानि सामान्यतः शुभकार्येषु प्रशस्तानि मन्यन्ते, किन्तु विष्टिकरणं यत् भद्राकरणम् इत्यपि कथ्यते, तत् शुभकार्येषु

वर्जनीयम् इति ज्यौतिषाचार्याः वदन्ति ।

### पञ्चाङ्गस्य माहात्म्यम्

उक्तञ्च -

भूरिः श्रीः विभवस्तिथिः श्रवणतो, वारान् महायुर्भवेत्, नक्षत्रं कृत पापसञ्चयहरं, योगस्तु रोगापहा ।
यच्चित्तेप्सितमाशु तच्च करणात्, सम्प्राप्यते मानवैः, श्रोतव्यं बहुयज्ञपुण्यफलदं पञ्चाङ्गमेतच्छुभम् ॥[१]

प्रतिदिनं पञ्चाङ्गश्रवणस्य महत्फलं भवति। प्रतिदिनं तिथेः श्रवणं करोति चेत् भूरिः श्रीः विभवश्च प्राप्नोति। वारणां श्रवणेन दीर्घायुष्यमान् भवति। नक्षत्राणां श्रवणेन कृतपापसञ्चयस्य हरणं भवति योगश्रवणं रोगमपाकरोति। यच्चित्तेप्सितं वर्तते तत् करणस्य श्रवणात् मानवैः आशुः सम्प्राप्यते। अतः एतच्छुभकरं बहुयज्ञपुण्यफलदं पञ्चाङ्गं प्रतिदिनमवश्यमेव श्रोतव्यम्। पञ्चाङ्गस्य फलं तु कदापि असत्यं भवितुमेव नार्हति। यथा अमावास्यायामुत्पन्नः जातकः बहिर्मुखी अस्ति इति वक्तुं न शक्नोति संसारे एकोपि अमावास्यायामुत्पन्नः जातकः बहिर्मुखी भवितुमेव नार्हति। एवमेव संसारे पूर्णिमायामुत्पन्न एकोपि जातको अन्तर्मुखी भवितुमेव नार्हति। मघानक्षत्रोत्पन्नानां वार्धक्यं शीघ्रमेवागच्छत्येव अश्विनीनक्षत्रोत्पन्नानां औषधिविषये स्वत एवाभिरुचिर्भवत्येव। एवमेव सर्वेषां पञ्चाङ्गतत्वानां फलं ज्ञात्वा परीक्षणं कर्तुं शक्यते तत्तु सत्यमेव घटते।

जातके भवतु वा धर्मशास्त्रे वा प्रश्नशास्त्रे भवतु वा ताजिके वा अथवा आयुर्वेदशास्त्रे प्रप्रथमतया पञ्चाङ्गस्यैव महत्वं विद्यते। यदा कुत्रापि उत्तराणि न लभ्यन्ते तदा पञ्चाङ्गमेवास्माभ्यमुत्तरं बोधयति। जातकशास्त्रोदाहरणं यथा बृहत्पाराशरहोराशास्त्रे अष्टाशीतितमे अध्याये पराशरेणोक्तम् –

अथान्यत् सम्प्रवक्ष्यामि सुलग्ने सुग्रहेष्वपि यदन्यकारणेनापि भवेज्जन्माशुभप्रदम् ॥[२] इति

तत्र अशुभजन्मनः 18 कारणानि उल्लिखितानि सन्ति। येषां स्थित्या सत्यां राजयोगा अपि निष्फलाः भवन्ति। महापुरुषयोगा अपि निष्फलाः भवन्ति। तेषु दोषेषु पञ्चाङ्गदोषा एवाधिकास्सन्ति। एवं जातक-प्रश्न-ताजिक-धर्म-आयुर्वेदादिसर्वशास्त्रेषु पञ्चाङ्गस्याद्वितीयं माहात्म्यं प्रत्यक्षेण अनुभूयते। अतः "पञ्चाङ्गं मूलं सर्वशास्त्राणाम्" इति उक्तिः सर्वथा सार्थका, सत्या च वर्तते।

### उपसंहारः

एवं पञ्चाङ्गं तिथि-वार-नक्षत्र-योग-करणानाम् इति पञ्चानाम् अङ्गानां समन्वयेन निर्मितं भवति, यत् भारतीयज्योतिषशास्त्रस्य आधारभूतम् उपकरणम् अस्ति। नैतत् केवलं कालगणनायाः साधनम् अपि च शुभाशुभनिर्णयस्य, मुहूर्तनिर्धारणस्य च वैज्ञानिक आधारः वर्तते। विवाहादिसंस्कारेषु, यज्ञादिधार्मिककार्येषु, कृषिकार्येषु च पञ्चाङ्गस्योपयोगः प्राचीनकालादेव प्रचलितोऽस्ति।

किन्तु वर्तमानकाले भारते विविधानि पञ्चाङ्गानि प्रचलितानि सन्ति, यथा दृक्सिद्धपञ्चाङ्गम्, वाक्यपञ्चाङ्गम्, सूर्यसिद्धान्तानुसारि पञ्चाङ्गम् इत्यादीनि। एतेषु गणनापद्धतिभेदात्, अयनांशभेदात्, तथा सूर्यचन्द्रयोः स्थितिनिर्णये सूक्ष्मभेदात् च कदाचित् तिथि-नक्षत्रादीनां निर्णये विसङ्गतयोऽपि दृश्यन्ते। एकस्मिन् प्रदेशे या तिथिः निर्दिष्टा भवति, सा अन्यस्मिन् प्रदेशे भिन्ना अपि भवितुम् अर्हति, यतः विभिन्नानि पञ्चाङ्गानि

---

[१] ज्योतिषसोपानम् प्रथमसोपानम्, श्लो.सं.50, पृ.सं. गिरिशभाट्टः बी., SMSP Samsakrita, Samshodhana kendra, Udupi, 2024

[२] बृहत्पाराशरहोराशास्त्रम्, डॉ.सुरेशचन्द्र मिश्र, अ.सं.88, श्लो.सं.1, पृ.सं.884, रंजन पब्लिकेशन्स, दिल्ली


ISSN : 2249-538X

विभिन्नान्नाधारसिद्धान्तान् सूर्योदयान् चानुसरन्ति। अतः पर्वणां, व्रतानां च निर्धारणे कदाचित् मतभेदा अपि उत्पद्यन्ते।

तथापि एतासु विसंगतिष्वपि पञ्चाङ्गस्य मूलभूतं वैज्ञानिकस्वरूपं तथोपयोगिता न न्यूनीभवति। आधुनिकसाधनैः, गणकयन्त्रैश्चाद्यत्वे पञ्चाङ्गगणना अधिका शुद्धा, सुलभा च जाता अस्ति। अत आवश्यकता अस्ति यत् विद्वांसः ज्योतिषाचार्याः चैकीकृतां समर्थितां पद्धतिं स्वीकुर्युः, येन भविष्ये एतादृशाः विसङ्गतयः न्यूनाः भवेयुः। तथापि अद्यापि भारतीयसमाजे पञ्चाङ्गस्य महत्त्वम् अक्षुण्णं वर्तते, यदस्माकं पूर्वजानां सूक्ष्मनिरीक्षणशक्तेः, वैज्ञानिकदृष्टेः च परिचायकमस्ति। अतः पञ्चाङ्गज्ञानं न केवलं ज्योतिषशास्त्राध्ययनार्थम्, अपि च भारतीयसंस्कृतिपरम्परायाश्च गभीरं ज्ञानं प्राप्त्यर्थमत्यावश्यकमस्ति।

**परामृष्टाः ग्रन्थाः**


१. फलित राजेन्द्र (स्वरचित), Notion Press, Chennai, 2021
२. भारतीय कुण्डली विज्ञान, मीठालाल हिंमतराम ओझा, देवर्षि प्रकाशन, वाराणसी, 2004
३. सिद्धान्तशिरोमणिः, डॉ. मुरलीधरचतुर्वेदः, संपूर्णानंद संस्कृत विश्वविद्यालय वाराणसी
४. भारतीय ज्योतिष, डॉ.नेमिचन्द्र ज्योतिषाचार्य, भारतीय ज्ञानपीठ प्रकाशन, नई दिल्ली
५. नारद संहिता, वसतिराम शर्मा, खेमराज श्रीकृष्णदास प्रकाशन, मुम्बई १९६३
६. धर्मकृत्योपयोगितिथ्यादिनिर्णयः कुम्भपर्वनिर्णयश्च, श्रीकरपात्रस्वामिनः, सन्मार्ग प्रेस, वाराणसी, 1965
7. शास्त्रीयपञ्चाङ्गमीमांसा, प्रियव्रतशक्तिधरौ, श्रीमार्तण्डज्यौतिषकार्यालयः, पञ्जाब, संवत् 2036
8. मानक पञ्चाङ्ग विमर्श, डॉ. रामाधार शर्मा, जानकी प्रकाशन, पटना, संवत् 2076
9. दृक्पञ्चाङ्गखण्डनम् (कन्नड), गोपालकृष्णभट्टः, रामचन्द्रशास्त्री सूरी, होन्नावरा, शक संवत 1866
10. मुहूर्तचिन्तामणि पीयूषधारा, केदारदत्त जोशी, मोतीलाल बनारसीदास, दिल्ली, 2002
11. मुहूर्तचिन्तामणि, रामयत्न अवस्थी तेजकुमार बुक डिपो, लखनऊ, 2004
12. मुहूर्तचिन्तामणिः, डॉ.रामचन्द्रपाण्डेयः, शुभाशुभप्रकरणम्, चौखम्बा कृष्णदास अकादमी, वाराणसी,
13. सूर्यसिद्धान्तः, डॉ.सत्येन्द्रमिश्रः, चौखम्भा संस्कृत भवन, वाराणसी, 2015
14. गोलपरिभाषा, डॉ.मदनमोहनपाठकः, रामचन्द्ररामानुजदासः, पुरी
15. बृहत्पाराशरहोराशास्त्रम्, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स, दिल्ली
16. ज्योतिषसोपानम्, गिरिशभाट्टः बी., SMSP Samsakrita, Samshodhana kendra, Udupi, 2024
17. अर्वाचीनं ज्योतिर्विज्ञानम्, धूलिपाल अर्क सोमयाजी, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी, 1964
18. पञ्चाङ्गपरिचयः, गणेशकृष्णभट्टः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली, 2024
19. नक्षत्र माहेश्वरी, निग्रहाचार्यः, Notion Press, Chennai, 2021
20. बृहद्दैवज्ञरञ्जनम्, भाग 1 & 2, डॉ. मुरलीधर चतुर्वेदी, मोतीलाल बनारसीदास, दिल्ली, 1984
21. Panchanga Sarvaswam, Dr. Sureshchandra Mishra, Vedic Astro India, Delhi, 2024
22. दृक्तुल्यपञ्चाङ्गगणितमीमांसा, डॉ. अशोकथपलियालः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठ, नई दिल्ली, 2022

# भास्कराचार्योक्तानां यन्त्राणां विमर्शः

आचार्यः दिवाकरशर्मा
सिद्धान्तज्यौतिषशास्त्रम्,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

श्री गिरीशभट्टः बि*
शोधच्छात्रः, ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

***लेखसारः*** *– प्राचीनभारतीयैः कालज्ञानार्थं ग्रहवेधार्थञ्च भिन्नभिन्नयन्त्राणि उपयुज्यन्ते स्म । सूर्यसिद्धान्त-सिद्धान्तशिरोमणि-सिद्धान्तसम्राट्प्रभृतिषु ग्रन्थेषु तादृशयन्त्राणां चर्चा विद्यते । भास्कराचार्येण सिद्धान्तशिरोमणौ गोलाध्याये तादृशयन्त्राणां निरूपणाय 'यन्त्राध्यायः' इति पृथगध्याय एव स्थापितः । गोलयन्त्रम्, नाडीवलययन्त्रम्, यष्टियन्त्रम्, शङ्कुयन्त्रम्, घटीयन्त्रम्, चक्रयन्त्रम्, चापयन्त्रम्, तुर्ययन्त्रम्, फलकयन्त्रम्, धीयन्त्रञ्चेति दश यन्त्राणि, त्रीणि स्वयंवहयन्त्राणि च भास्कराचार्येण प्रतिपादितानि । अवनि-भ-ग्रहाणां संस्थानमानप्रतिपादनार्थं कल्पितः क्षेत्रविशेष एव गोलयन्त्रं भवति । तच्च गोलयन्त्रं खगोलवृत्तानां भगोलवृत्तानाञ्च बन्धनेन निर्मीयते । खगोलवृत्तानां भगोलवृत्तानाञ्च बन्धनद्वारा गोलयन्त्रस्य निर्माणक्रमो भास्कराचार्येण गोलबन्धाधिकारे प्रतिपादितः । यन्त्राध्याये गोलयन्त्रस्य धारणविधिना सह इतरेषां यन्त्राणां विन्यासाः धारणविधयश्च प्रतिपादिताः । एकस्मिन् चक्रे षष्टिनाडिकानाम् अङ्कनं कृत्वा तद्द्वारा कालज्ञानं नाडीवलययन्त्रेण भवति । घटीयन्त्रं तु प्राचीनकाले कालज्ञानार्थम् आभारते उपयुज्यते स्म । द्वादशाङ्गुलमितशङ्कुरेव शङ्कुयन्त्रम् । शङ्कुयन्त्रद्वारा दिग्देशकालाख्यानां त्रयाणामपि अंशानां ज्ञानं भवति । परिधौ चक्रांशैः अङ्कितं चक्रमेव चक्रयन्त्रं भवति । चक्रयन्त्रस्य अर्धमेव चापयन्त्रम् । चापयन्त्रस्य अर्धं चक्रयन्त्रस्य तुर्यभागं वा 'तुर्ययन्त्रम्' अथवा 'तुर्यगोलम्' इत्यभिधीयते । चाप-चक्र-तुर्ययन्त्रेभ्यो दिवाकाले स्थूलकालज्ञानम्, रात्रिकाले ग्रहाणां नक्षत्राणाञ्च वेधं कर्तुं वयं शक्नुमः । सूक्ष्मरूपेण कालज्ञानाय भास्कराचार्येण फलकयन्त्रमिति नूतनं यन्त्रं स्वयमेव गवेषितम् । ३४३८ मानमिता यष्टिरेव यष्टियन्त्रम्, तद्द्वारा कालज्ञानम्, पलभाज्ञानम्, सायनसूर्यस्फुटज्ञानञ्च सम्भवति । समेषां यन्त्राणां चालनार्थम् अस्माकं बुद्धिशक्तिरपेक्ष्यते इत्यतो भास्कराचार्येण बुद्धिशक्तेः कृते अपि 'धीयन्त्रम्' इति यन्त्रसञ्ज्ञा प्रदत्ता । यानि यन्त्राणि एकवारं हस्तेन चालयामश्चेत् स्वयमेव निरन्तरं चलन्ति तानि स्वयंवहयन्त्राणीत्यभिधीयन्ते । एतादृशानि त्रीणि स्वयंवहयन्त्राणि भास्कराचार्येण प्रतिपादितानि । शोधपत्रेऽस्मिन् आवाभ्यां गोलाध्याये भास्कराचार्योक्तानाम् एतेषां यन्त्रविशेषाणां विमर्शनं सङ्क्षेपतः कृतम् ।*

***कूटशब्दाः*** *– गोलयन्त्रम्, चापयन्त्रम्, फलकयन्त्रम्, धीयन्त्रम्, स्वयंवहयन्त्रम् ।*

## गोलयन्त्रम्

अवनि-भ-ग्रहाणां संस्थानमानप्रतिपादनार्थं कल्पितः क्षेत्रविशेष एव गोलयन्त्रं भवति। यथोक्तं श्रीमता भास्कराचार्येण गोलप्रशंसाध्याये –

**दृष्टान्त एवावनिभग्रहाणां संस्थानमानप्रतिपादनार्थम् । गोलः स्मृतः क्षेत्रविशेष एष प्राज्ञैरथ स्याद्गणितेन गम्यः ॥**[१] इति ।

सिद्धान्तज्यौतिषशास्त्रे अस्य गोलयन्त्रस्य महानुपयोगो दृश्यते । गोलयन्त्रस्य ज्ञानं विना सिद्धान्तज्यौतिषस्य स्पष्टं ज्ञानं न भवति । अतः सिद्धान्तज्यौतिषशास्त्रे कथितेषु यन्त्रेषु गोलयन्त्रं मूर्धन्यस्थाने विराजते ।

***सम्पर्कसूत्रम्** - 8277210178, 6361249486, Email- bhatgirish1997@gmail.com

[१] सिद्धान्तशिरोमणिः – गोलाध्यायः – गोलप्रशंसा – श्लोकः ५

गोलयन्त्रस्य निर्माणप्रक्रिया इतरेषां यन्त्राणां निर्माणप्रक्रियापेक्षया अतीव दीर्घा वर्तते इत्यतो भास्कराचार्येण गोलाध्याये यद्यपि यन्त्राध्यायसञ्ज्ञके एकस्मिन्नेव अध्याये इतरेषां समेषामपि यन्त्राणां प्रतिपादनं कृतं तथापि गोलयन्त्रस्य निर्माणक्रमनिरूपणार्थं 'गोलबन्धाधिकारः' इति पृथगधिकार एव स्थापितः ।

गोलयन्त्रस्य निर्माणार्थं सर्वादौ अभीष्टेन सारदारुणा ऋज्वीं सुवृत्तां च ध्रुवयष्टिं कृत्वा तन्मध्यभागे शिथिलाम् अपृथ्वीं पृथ्वीं च कृत्वा तां परितः दृढैः यष्टिभिः उपर्युपरिक्रमेण चन्द्र-बुध-शुक्र-रवि-कुज-गुरु-शनि-नक्षत्राणां कक्षाः बन्धनीयाः । एताः कक्षाः परितो नलिकासंस्थौ खगोलदृग्गोलकौ मिथो बन्धनीयौ । तौ खगोलदृग्गोलकौ मिथः छिन्नौ न भवेताम् । पूर्वापरवृत्तम्, याम्योत्तरवृत्तम्, कोणवृत्तद्वयम्, क्षितिजवृत्तम्, उन्मण्डलम्, दृग्वृत्तम् एतानि गोलयन्त्रस्थानि खगोलवृत्तानि भवन्ति । नाडीवृत्तम्, क्रान्तिवृत्तम्, ग्रहविमण्डलानि, अहोरात्रवृत्ताणि च भगोलवृत्तानि भवन्ति ।

खगोले ध्रुवचिह्नयोः नलिकाद्वयं बद्ध्वा तन्नलिकास्थमेव दृग्गोलं खगोलाद् बहिः बध्नीयात् । इत्थं भगोलवृत्तानां खगोलवृत्तानाञ्च मेलनेन यो गोलो निर्मितो भवति स एव दृग्गोल इत्युच्यते । एवम् इदं गोलयन्त्रं द्विगोलजातं भवति । यथोक्तं भास्कराचार्येण –

**बद्ध्वा खगोले नलिकाद्वयं च ध्रुवद्वये तन्नलिकास्थमेव ।**
**बहिः खगोलाद्विदधीत धीमान् दृग्गोलमेवं खलु वक्ष्यमाणम् ॥**
**भगोलवृत्तैः सहितः खगोलो दृग्गोलसञ्ज्ञोऽपममण्डलाद्यैः ।**
**द्विगोलजातं खलु दृश्यतेऽत्र क्षेत्रं हि दृग्गोलमतो वदन्ति ॥**[१] इति ।

इत्थं गोलबन्धाधिकारोक्तरीत्या निर्मितो गोल एव गोलयन्त्रमित्युच्यते । गोलयन्त्रद्वारा कालज्ञानं लग्नज्ञानञ्च कथं भवतीति श्रीमता भास्कराचार्येण यन्त्राध्याये,

**अपवृत्तगरविचिह्नं क्षितिजे धृत्वा कुजेन संसक्ते ।**
**नाडीवृत्ते बिन्दुं कृत्वा धृत्वाथ जलसमं क्षितिजम् ॥**
**रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विधृते ।**
**उडुगोले कुजबिन्द्वोर्मध्ये नाड्यो द्युयाताः स्युः ॥**
**अपवृत्ते कुजलग्ने लग्नं ।**[२]

इत्यनेन सपादश्लोकद्वयेन प्रतिपादितम् ।

अस्मिन् गोलयन्त्रे क्रान्तिवृत्ते सूर्योदयकाले मेषादेरारभ्य रविभुक्तराशिभागाद्यं दत्त्वा तदग्रे चिह्नमेकं कार्यम् । तदेव सूर्योदयकाले अपवृत्तगरविचिह्नं भवति । भगोलं चालयित्वा रविचिह्नं क्षितिजे धार्यम् । अर्थात् सूर्योदयकाले क्रन्तिवृत्तस्य यस्मिन् भागे रविचिह्नम् अङ्कितं तस्मिन् भागे क्षितिजवृत्तं यथा स्पृशति तथा सन्धार्यम् । क्षितिजवृत्ते तथा धृते सति क्षितिजं प्राच्यां दिशि नाडीवृत्ते यत्र संलग्नं भवति तत्र खटिकया एको बिन्दुः कार्यः । ततः क्षितिजं जलसमं यथा भवति तथा गोलयन्त्रं स्थिरं कृत्वा यथा रविचिह्नस्य छाया कुमध्ये (भूगर्भे) पतति तथा भगोलः चालनीयः । अभीष्टसमये विषुवद्वृत्ते विद्यमानस्य बिन्दोः, क्षितिजस्य च अन्तराले नाडीवृत्ते याः घटिकाः भवन्ति ताः एव उदयादीष्टघटिकाः ज्ञेयाः । अनेन प्रकारेण गोलयन्त्रद्वारा इष्टकालज्ञानं भवति । इष्टकाले क्रान्तिवृत्तस्य यो भागः पूर्वक्षितिजं स्पृशति स एव लग्नस्फुटो भवति । अतो गोलयन्त्रे भगोलस्य सञ्चालनेन

[१] सिद्धान्तशिरोमणिः – गोलाध्यायः – गोलबन्धाधिकारः – ८, ९ श्लोकौ
[२] सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकसङ्ख्या ३ तः ४१२

क्रान्तिवृत्तगरविचिह्नम् इष्टकाले यत्र वर्तते स एव तत्काले राश्यादिको लग्नस्फुटो भवति ।

## नाडीवलययन्त्रम्

चारुदारुमयम् अभीष्टप्रमाणमितं चक्रमेकं कार्यम् । तच्च चक्रं खगोलमध्यस्थायां ध्रुवयष्ट्यां पृथ्वीमध्यस्थाने प्रोतं कार्यम् । अस्य चक्रस्य नेम्यां (परिधौ) षष्टिघटिकाः व्यस्तरूपेण अङ्कनीयाः । मेषादिराशीनां स्वोदयघटिकाश्चापि व्यस्तरूपेण अङ्कनीयाः । एवं प्रकारेण नाडीवलययन्त्रं विन्यस्य अभीष्टदिवसे सूर्योदयकाले सायनरविस्फुटः तत्र चिह्नितः कार्यः । तथा तस्मिन् दिवसे सूर्योदयकाले पश्चिमदिग्गतायां यष्टिच्छायायां रविचिह्नं यथा भवेत् तथा तद्यन्त्रं स्थिरं कार्यम् । सूर्योदयादनन्तरं रविर्यथा यथा क्षितिजादुपर्युपरि याति तथा तथा छाया रविचिह्नात् अधः अधो गच्छति । अर्कचिह्नं तु सूर्योदयकालिकयष्टिच्छायास्थाने यत्र अस्माभिः स्थिरं कृतं तत्रैव भवति । अर्कचिह्नस्य, अभीष्टकालिकायाः यष्टिच्छायायाश्च मध्ये यावत्यो घटिकाः भवन्ति ताः एव उदयादितो याताः नाडिकाः ज्ञेयाः । अथवा खगोलान्तःस्थेन यष्टिप्रोतेन विनापि सरलतया एव कालज्ञानं भवति । तद्यथा – अभीष्टप्रमाणेन चक्रमेकं कृत्वा तच्चक्रम् अभीष्टप्रमाणेन कीलकेन प्रोतं कार्यम् । स च कीलको ध्रुवाभिमुखो यथा भवति तथा केनचिदाधारेण तच्चक्रं स्थिरं कार्यम् । तथा कृते सति उदयादीष्टकाले कीलच्छाया यत्र लगति तस्य चिह्नस्य, यन्त्राधश्चिह्नस्य च मध्ये याः नाड्यः भवन्ति ता एव नताः नाड्यः (नतघटिकाः) ज्ञेयाः । नतघटिकानां ज्ञानेन इष्टकालस्य ज्ञानं सरलतया एव भवति । सूर्योदयकाले सायनसूर्यस्फुट एव लग्नस्फुटो भवति । अभीष्टकाले यष्टिच्छायायां यस्य राशेर्यः क्षेत्रांशः संलग्नो भवति स एव तत्काले उदयलग्नं भवति । यथोक्तं भास्कराचार्येण –

**चाथो खगोलनलिकान्तः । भूस्थं ध्रुवयष्टिस्थं चक्रं षष्ट्या निजोदयैश्चाङ्क्यम् ॥**
**व्यस्तैर्यष्टीभायामुदयेऽर्कं न्यस्य नाडिका ज्ञेयाः । इष्टच्छायासूर्यान्तरेऽथ लग्नं प्रभायां च ॥**
**केनचिदाधारेण ध्रुवाभिमुखकीलकेऽत्र धृते । अथवा कीलच्छायातलमध्ये स्युर्नता नाड्यः ॥**[1] इति ।

## घटीयन्त्रम् (घटिकायन्त्रम्)

घटस्य अर्धरूपेण संयोजितः, ताम्रेण निर्मितः, तले पृथुच्छिद्रयुक्तश्च पात्रविशेष एव घटीयन्त्रं भवति । एतत् ताम्रपात्रं जलेन पूर्णे अन्यस्मिन् ताम्रपात्रे स्थापनीयम् । यथा यथा ताम्रपात्रस्य तलभागस्थकृष्णरन्ध्रेण ताम्रपात्रस्यान्तः जलमागच्छति तथा तथा तत् ताम्रपात्रं जले निमज्जनं प्राप्नोति । एवम् एतत् ताम्रपात्रं वर्तमानदिवसस्य सूर्योदयादारभ्य अग्रिमदिवसस्य सूर्योदयपर्यन्तं पूर्णतया कति निमज्जनानि करोतीति गणना कार्या । एकदिवसीयनिमज्जनसङ्ख्याम् इष्टकालिकनिमज्जनसङ्ख्यां चोपयुज्य त्रैराशिकेन कालो ज्ञातव्यः । यथोक्तं भास्कराचार्येण –

**घटदलरूपा घटिता घटिका ताम्री तले पृथुच्छिद्रा ।**
**द्युनिशनिमज्जनमित्या भक्तं द्युनिशं घटीमानम् ॥**[2] इति ।

## शङ्कुयन्त्रम्

समतलमस्तकपरिधियुक्तं भ्रमयन्त्रद्वारा दन्तिदन्तमुपयुज्य निर्मितं यन्त्रमेव शङ्कुयन्त्रं भवति । सिद्धान्तज्यौतिष-ग्रन्थेषु अस्य शङ्कुयन्त्रस्य मानं द्वादशाङ्गुलमितं स्वीकृतम् । एतत् शङ्कुयन्त्रमुपयुज्य वयं दिग्देशकालान् स्पष्टतया

[1]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – ५ तः ७ श्लोकाः
[2]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकः ८

 ISSN : 2249-538X

ज्ञातुं प्रभवामः । यथोक्तं भास्कराचार्येण –

**समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः शङ्कुः ।**
**तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥**[१] इति ।

## चक्र-चाप-तुर्ययन्त्राणि

दिवाकाले स्थूलेष्टकालसाधनार्थम्, रात्रिकाले ग्रहाणां नक्षत्राणाञ्च वेधार्थञ्च चक्र-चाप-तुर्ययन्त्राणि उपयुक्तानि भवन्ति । चक्रयन्त्रस्य विन्यासम्, तद्द्वारा स्थूलकालज्ञानविधिञ्च भास्कराचार्यः,

**चक्रं चक्रांशाङ्कं परिधौ श्लथशृङ्खलादिकाधारम् ।**
**धात्री त्रिभ आधारात् कल्प्या भार्धेऽत्र खार्धं च ॥**
**तन्मध्ये सूक्ष्माक्षं क्षिप्त्वार्काभिमुखनेमिकं धार्यम् ।**
**भूमेरुन्नतभागास्तत्राक्षच्छायया भुक्ताः ॥**
**तत्खार्धान्तरतश्च नताः उन्नतलवसङ्गुणीकृतं द्युदलम् ।**
**द्युदलोन्नतांशभक्तं नाड्यः स्थूलाः परैः प्रोक्ताः ॥**[२]

इत्येतैः श्लोकैः प्रतिपादयामास ।

परिधौ चक्रांशैरङ्कितं चक्रमेव चक्रयन्त्रमित्युच्यते । तच्च चक्रयन्त्रं धातुना दारुणा वा निर्मितं भवेत् । अस्य चक्रयन्त्रस्य परिधौ कश्चन आधारः स्थाप्यः । तं च आधारं यथा इतस्ततः भ्रामयितुं शक्नुमः तथा श्लथं कुर्यात् । अस्य चक्रयन्त्रस्य मध्ये सूक्ष्मः सुषिरः कार्यः । आधारात् सुषिरोपगामिनी ऊर्ध्वरेखा लम्बवत् कार्या । अस्याम् ऊर्ध्वरेखायां मत्स्यं कृत्वा तिर्यग्रेखा च कार्या । चक्रयन्त्रपरिधौ आधारात् त्रिभेऽन्तरे भूः कल्प्या । सा च भूः चक्रयन्त्रमध्यगामितिर्यग्रेखा-चक्रयन्त्रपरिध्योः सम्पातस्थाने भवति । आधारात् राशिषट्कान्तरे खमध्यं कल्प्यम् । चक्रयन्त्रमध्ये कृते सुषिरे सूक्ष्मा शलाका प्रवातव्या । सा शलाका अक्षसञ्ज्ञा भवति । एवं विन्यस्तं चक्रयन्त्रम् अर्काभिमुखनेमिकं यथा स्यात्तथा आधारे चक्रयन्त्रस्य धारणं कुर्यात् । चक्रयन्त्रे तथा धृते सति चक्रयन्त्रमध्ये विन्यस्तस्य अक्षस्य च्छाया चक्रयन्त्रपरिधौ यत्र लगति तस्य बिन्दोः, क्षितिजचिह्नस्य चान्तराले ये अंशाः भवन्ति ते एव तस्मिन् समये सूर्यस्य उन्नतांशाः । तथा चक्रयन्त्रपरिधौ छाया यत्र लगति तस्य बिन्दोः, खमध्यबिन्दोश्च मध्ये ये अंशाः भवन्ति ते एव तस्मिन् समये सूर्यस्य नतांशाः । एवम् अनेन चक्रयन्त्रेण नतांशानामुन्नतांशानाञ्च ज्ञानं सुलभतया एव भवति । किन्तु अस्य चक्रयन्त्रस्य धारणं दृङ्मण्डलवत् क्रियते । परं कालो नाडीवृत्ते गण्यते, न तु दृग्वृत्ते । अतः एवं दृङ्मण्डलाकारेण धृतेन चक्रयन्त्रेण सिद्धेभ्यो नतांशेभ्यः उन्नतांशेभ्यश्चानुपातेनानीतौ नतोन्नतकालौ स्थूलावेव भवतः, न तु सूक्ष्मौ ।

रात्रिकाले चक्रयन्त्रद्वारा ग्रहाणां नक्षत्राणां च वेधः कथं करणीयः इति भास्कराचार्येण,

**पैत्रर्क्षपुष्यान्तिमवारुणानामृक्षद्वयं नेमिगतं यथा स्यात् ।**
**दूरेऽन्तरेऽल्पेषु भखेचरौ वा तथात्र यन्त्रं सुधिया प्रधार्यम् ॥**
**नेमिस्थदृष्ट्याक्षगतं प्रपश्येत् खेटं च धिष्ण्यस्य च योगताराम् ।**
**नेम्यङ्कयोरक्षयुजोस्तु मध्ये येंऽशाः स्थिता भध्रुवकौ युतस्तैः ॥**

[१]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकः ९
[२]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – १० तः १२ श्लोकाः

**पृथक्स्थिते भेऽथ पुरःस्थिते तैर्हीनो ध्रुवः स्यात्खचरस्य भुक्तम् ।**[१]

इत्यनेन सार्धश्लोकद्वयेन प्रतिपादितम् ।

मघा-पुष्य-रेवती-शतभिषानक्षत्राणि शून्यशरनक्षत्राणि भवन्ति । एतेषु चतुर्षु शून्यशरनक्षत्रेषु द्वे नक्षत्रे चक्रयन्त्रस्य परिधिगते यथा स्यातां तथा चक्रयन्त्रस्य धारणं कृतं चेत् चक्रयन्त्रं क्रान्तिवृत्ताकारं जायते । परन्तु सर्वदा एतानि शून्यशरनक्षत्राणि दृश्यचक्रार्धे एव भवेयुरिति न नियमः । कदाचित् अदृश्यचक्रार्धेऽपि एतानि नक्षत्राणि भवितुमर्हन्ति । अतो यदि शून्यशरनक्षत्रद्वयं दृश्यचक्रार्धे न भवति तर्हि रोहिण्याद्यं यत्किमपि अल्पशरनक्षत्रं तथा तस्मात् अल्पशरनक्षत्रात् दूरे अन्तरे विद्यमानः कश्चित् ग्रहश्च चक्रयन्त्रस्य नेमिगतौ यथा भवेतां तथा चक्रयन्त्रस्य धारणं क्रियते चेत् चक्रयन्त्रं क्रान्तिमण्डलाकारं जायते । एवं क्रान्तिमण्डलाकारेण सन्धृतेन चक्रयन्त्रेण निशाकाले ग्रहाणां नक्षत्राणां च वेधः कार्यः ।

चक्रयन्त्रस्य अर्धमेव चापयन्त्रम् । चापयन्त्रस्य अर्धमेव तुरीययन्त्रम् अथवा तुर्ययन्त्रम् । यथोक्तं भास्कराचार्येण –

**दलीकृतं चक्रमुशन्ति चापं कोदण्डखण्डं खलु तुर्यगोलम् ॥**[२] इति ।

चाप-तुर्ययन्त्रयोः धारणविधिः चक्रयन्त्रवदेव भवति । चक्रयन्त्रवदेव चाप-तुर्ययन्त्राभ्यामपि स्फुटाः दृग्वृत्तीयोन्नतांशाः, तद्वशात् स्थूलकालज्ञानम्, पुनः रात्रौ ग्रहनक्षत्राणां वेधद्वारा क्रान्तिवृत्ते तेषां स्थानज्ञानञ्च संसिध्यन्ति । किन्तु चक्रयन्त्रं बृहदाकारेण वर्तते इति हेतोः एकस्मात् स्थानात् अपरं स्थानं प्रति तस्य वहनं कष्टदायकं भवति । अतः स्थानात् स्थानान्तरं प्रति वहनसौविध्यार्थं यन्त्रस्य गात्रं न्यूनीकृत्य प्राचीनभारतीयखगोलशास्त्रज्ञैः चाप-तुर्ययन्त्रयोः विन्यासः कल्पितः ।

## फलकयन्त्रम्

कालः अस्माभिः नाडीवृत्ते एव गण्यते । किन्तु चक्र-चाप-तुर्ययन्त्राणि दृङ्मण्डलाकारेण सन्धार्य कालः साध्यते । अतः चक्र-चाप-तुर्ययन्त्रेभ्यः आनीताः कालाः स्थूलाः भवन्ति । चक्र-चाप-तुर्ययन्त्राणि ध्रुवाभिमुखरूपेण धारयामश्चेदेव तानि नाडीवृत्तरूपेण धृतानि भवन्ति । किन्तु दिवाकाले सूर्यस्य तेजसः प्रभावात् ध्रुवनक्षत्रं न दृश्यते इति हेतोः वयं चक्रयन्त्रं ध्रुवाभिमुखरूपेण स्थापयितुं न शक्नुमः । अतः चक्र-तुर्य-चापयन्त्राणि दृङ्मण्डलाकारेण सन्धार्य स्थूलकालः संसाध्यते । चक्रयन्त्रद्वारा कालसाधनसन्दर्भे जायमानम् एतत् स्थौल्यं परिहर्तुं भास्कराचार्येण फलकयन्त्राख्यं विशिष्टं यन्त्रं गवेषितम् । फलकयन्त्रे दृङ्मण्डलाकारेण धारणस्य सौविध्यं वर्तते इति हेतोः फलकयन्त्रद्वारा साधितः कालः सूक्ष्मो भवति । यथोक्तं भास्कराचार्येण –

**दृङ्मण्डलेऽत्र स्फुटकाल उक्तः सुखेन नान्यैर्यदितं मयातः ।**
**सद्गोलयुक्तेर्गणितस्य सारं स्पष्टं प्रवक्ष्ये फलकाख्ययन्त्रम् ॥**[३] इति ।

अस्य फलकयन्त्रस्य विन्यासक्रमः भास्कराचार्येण,

**कर्तव्यं चतुरस्रकं सुफलकं खाङ्काङ्गुलैर्विस्तृतं**
**विस्ताराद् द्विगुणायतं सुगणकेनायाममध्ये तथा ।**
**आधारः श्लथशृङ्खलादिघटितः कार्या च रेखा तत-**

[१]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकसङ्ख्या १३ तः १४१२
[२]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकसङ्ख्या १५
[३]सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकसङ्ख्या १६


ISSN : 2249-538X

**स्त्वाधारादवलम्बसूत्रसदृशी सा लम्बरेखोच्यते ॥**
**लम्बं नवत्यङ्गुलकैर्विभज्य प्रत्यङ्गुलं तिर्यगतः प्रसार्य ।**
**सूत्राणि तत्रायतसूत्ररेखा जीवाभिधानाः सुधिया विधेयाः ॥**
**आधारतोऽधः खगुणाङ्गुलेषु ज्यालम्बयोगे सुषिरं च सूक्ष्मम् ।**
**इष्टप्रमाणा सुषिरे शलाका क्षेप्याक्षसञ्ज्ञा खलु सा प्रकल्प्या ॥**
**षष्ट्यङ्गुलव्यासमतश्च रन्ध्रात् कृत्वा सुवृत्तं परिधौ तदङ्क्यम् ।**
**षष्ट्या घटीनां भगणांशकैश्च प्रत्यंशकं चाम्बुपलैश्च दिग्भिः ॥**
**अग्रे सरन्ध्रा तनुपट्टिकैका षष्ट्यङ्गुला दीर्घतया तथाङ्क्या ।**[1]

इत्येतैः श्लोकैः प्रतिपादितः ।

आदौ धातुमयं वा श्रीपर्ण्यादिसारदारुमयं वा फलकं चतुरश्राकारेण श्लक्ष्णं समं च कर्तव्यम् । एवं निर्मितं चतुरश्रकं सुफलकमेव फलकयन्त्रं भवति । फलकाकारत्वादस्य यन्त्रस्य फलकयन्त्रमित्यन्वर्थकं नाम । अस्य फलकयन्त्रस्य विस्तारो नवत्यङ्गुलमितो भवेत् । विस्तारात् द्विगुणितम् आयतं (दैर्घ्यम् आयामं वा) भवेत् । आयाममध्यभागे सुगणकेन श्रृङ्खलादिभिर्घटितः श्लथः आधारः कार्यः । ततः आधारात् अलवम्बसूत्रसदृशी रेखा कार्या । सा रेखा एव लम्बरेखा इत्युच्यते । सा लम्बरेखा आधारः यस्मिन् आयामे वर्तते तत्र आधारस्थितस्थानात् तदितरायामं यावद्भवतीत्यभिप्रायः । तां लम्बरेखां नवतिभिरङ्गुलकैर्विभज्य विस्तारस्य एकपार्श्वादपरपार्श्वं प्रति लम्बरेखायाः प्रत्यङ्गुलं स्पृशान्त्यः इव तिर्यग्रेखाः कार्याः । एवं नवतिः तिर्यग्रेखाः भवन्ति । तासां रेखाणां तिर्यक्त्वं तु लम्बभवेभ्यो मत्स्येभ्यो जातम् । एताः नवतिः निर्यग्रेखाः ज्यारेखाः इत्युच्यन्ते । आधारादधः ३० अङ्गुलमितेऽन्तरे या ज्यारेखा भवति तस्याः, लम्बरेखायाश्च सम्पातस्थाने सूक्ष्मं सुषिरं कार्यम् । तस्मिन् सुषिरे इष्टप्रमाणा शलाका क्षेप्या । सा शलाका एव अक्षसञ्ज्ञा भवति । तस्माद्रन्ध्रात् षष्ट्यङ्गुलव्यासमानेन अर्थात् त्रिंशदङ्गुलत्रिज्यामितेन कर्कटकेन एकं सुवृत्तं कृत्वा अस्य वृत्तस्य परिधौ ६० घटिकाः, ३६० अंशाश्च अङ्क्याः । तत्र कालज्ञानसौकर्यार्थं प्रत्येकम् अंशं दशभिः पानीयपलैः अङ्कयेत् । ततः ताम्रादिधातुमयी वंशशलाकामयी वा तनुपट्टिका वृत्तकेन्दात् आधारेतरायामपर्यन्तं षष्ट्यङ्गुलदीर्घतया कार्या । अस्यां पट्टिकायामपि एकैकमङ्गुलं रेखया अङ्कितं कार्यम् । सा पट्टिका अर्धाङ्गुलविस्तृता भवति । परन्तु वृत्तमध्यस्थाने अर्थात् पट्टिकायाः आरम्भस्थाने सा पट्टिका एकाङ्गुलविस्तृता कुठाराकारा कार्या । तत्र स्थाने विस्तारस्य मध्ये छिद्रं कार्यम् । अस्याः पट्टिकायाः एकपार्श्वः लम्बरेखोपरि एव भवेत् । इत्थं विन्यस्तेन फलकयन्त्रेण चरज्यामानं यष्टिमानञ्च दत्त्वा नतोन्नतघटिकाः साधनीयाः ।

## यष्टियन्त्रम्

३४३८ मानमिता यष्टिरेव यष्टियन्त्रम् । ३४३८ मानमितायाः यष्टेर्धारणात् दिनगतकालावयवानां ज्ञानं सूक्ष्मरूपेण भवतीति हेतोर्भास्कराचार्येण ३४३८ मितायाः यष्टेः यन्त्रसञ्ज्ञा प्रदत्ता । एवं यष्टियन्त्रं नाम अन्यत्किमपि विशिष्टं यन्त्रं नास्ति, ३४३८ मानमिता यष्टिरेव यष्टियन्त्रमिति अत्र अवगन्तव्यम् । अनेन यष्टियन्त्रेण न केवलं कालज्ञानं भवति । यष्टियन्त्रस्य पलभाज्ञानम्, सायनरविस्फुटज्ञानमित्यादीनि बहूनि प्रयोजनानि भास्कराचार्येण प्रतिपादितानि । पत्त्रविस्तरभिया आवाभ्यां तान्यत्र नोल्लिख्यन्ते ।

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – १८ तः २१ १२ श्लोकाः

## धीयन्त्रम्

अस्माकं मस्तिष्के विद्यमाना बुद्धिशक्तिरेव धीयन्त्रं भवति। तेषु सर्वेष्वपि यन्त्रेषु धीयन्त्रमेव पारमार्थिकं यन्त्रं भवति। यतो हि धीयन्त्रमुपयुज्य एव इतरेषां यन्त्राणां चालनं क्रियते। यथोक्तं भास्कराचार्येण –

**धीरेकं पारमार्थिकं यन्त्रम् ॥**[1] इति।

यो गणकः स्वकीयमस्तिष्के विद्यमानया बुद्धिशक्त्या एव समेषामपि वस्तूनां दूरत्वादीनां वेधं करोति सो गणकः 'धीयन्त्रवेदी' भवति। भास्कराचार्यः,

**अथ किमु पृथुतन्त्रैर्धीमतो भूरियन्त्रैः स्वकरकलितयष्टेर्दत्तमूलाग्रदृष्टेः।**
**न तदविदितमानं वस्तु यद् दृश्यमानं दिवि भुवि च जलस्थं प्रोच्यतेऽथ स्थलस्थम् ॥**
**वंशस्य मूलं प्रविलोक्य चाग्रं तत्स्वान्तरं तस्य समुच्छ्रयं च।**
**यो वेत्ति यष्ट्यैव करस्थयासौ धीयन्त्रवेदी वद किं न वेत्ति ॥**[2]

इत्याभ्यां श्लोकाभ्यां धीयन्त्रवेदिनः प्रशंसां चकार।

## स्वयंवहयन्त्राणि

स्वयं वहतीति स्वयंवहः। यद्यन्त्रं स्वयमेव वहति (चलति) तत् स्वयंवहयन्त्रम्। स्वयंवहयन्त्राणां पुनः पुनः हस्तेन चालनस्य आवश्यकता न भवति। एकवारम् एतेषां यन्त्राणां चालनं कुर्मश्चेत् यदा वयं बलात् स्थगयामस्तावत्पर्यन्तं तानि यन्त्राणि नैरन्तर्येण चलन्त एव भवन्ति। एतादृशयन्त्राणाम् अन्तः स्थाप्यमानानां पादरसादिधातूनां घर्षणतत्त्वमेव अस्य कारणम्। भास्कराचार्येण आहत्य त्रीणि स्वयंवहयन्त्राणि कथितानि। पत्रविस्तरभिया आवाभ्याम् अत्र तेषां विवरणं न दीयते।

**निष्कर्षः**

यन्त्राणां निर्माणं सिद्धान्तज्यौतिषे प्रतिपाद्यविषयेष्वन्यतमम्। यथोक्तं भास्कराचार्येण सिद्धान्तस्कन्धस्य लक्षणनिरूपणावसरे –

**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**[3] इति।

सिद्धान्तज्यौतिषे दिग्देशकालादीनां ज्ञानाय यन्त्राणां महती आवश्यकता वर्तते। सिद्धान्तज्यौतिषे यन्त्रणि अतीव महत्त्वपूर्णानीत्यतो भास्कराचार्येण विविधानां यन्त्राणां निरूपणार्थमेव सिद्धान्तशिरोमणेः गोलाध्याये "यन्त्राध्यायः" इति कश्चन अध्यायः एव संस्थापितः। सूक्ष्मकालज्ञानाय गणकेभ्यः सौकर्यं कल्पयितुं भास्कराचार्येण स्वयमेव गवेषितं फलकयन्त्रं भारतीययन्त्रविज्ञानक्षेत्रे भास्कराचार्यस्य महत्त्वपूर्णं योगदानं भवति। अस्मिन् शोधपत्त्रे आवाभ्यां केवलं भास्कराचार्योक्तानां यन्त्राणां सामान्यपरिचय एव कृतः। भास्कराचार्योक्तयन्त्राणां विस्तृतविवरणानि ज्ञातुं सिद्धान्तशिरोमणेर्गोलाध्यायान्तर्गतौ गोलबन्धाधिकारयन्त्राध्यायाववलोकनीयौ।

---

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकः २

[2] सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – ४०, ४१ श्लोकौ

[3] सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः – मध्यमाधिकारः – कालमानाध्यायः – श्लोकः ६


ISSN : 2249-538X

**परामृष्टाः ग्रन्थाः**


१. सिद्धान्तसम्राट्; ग्रन्थकर्ता – जगन्नाथसम्राट्, प्रथमसंस्करणम्, संस्करणवर्षम् – सा.यु.१९७६, प्रकाशनसंस्था – संस्कृतपरिषद्, सागरविश्वविद्यालयः, सागरम् (मध्यप्रदेशः)

२. श्रीमद्भास्कराचार्यप्रणीतः सिद्धान्तशिरोमणिः – स्वोपज्ञवासनाभाष्यसंवलितो नृसिंहदैवज्ञकृतवार्त्तिकोपेतश्च; सम्पादकः – डॉ. मुरलीधरचतुर्वेदः; तृतीयं संस्करणम्; संस्करणवर्षम् – सा.यु. २०१०; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

३. सिद्धान्तशेखरः; ग्रन्थकर्ता – श्रीपतिः, व्याख्याकारः – सत्यदेवशर्मा, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

४. सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः – लेखकः – डॉ. प्रेमकुमारशर्मा, संस्करणम् : सा.यु.२००५, प्रकाशनसंस्था – नागप्रकाशनम्, नवदेहली

५. मन्दशीघ्रफलसाधनसमीक्षा; ग्रन्थकर्ता – विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः; प्रथमसंस्करणम् – सा.यु. २००५; प्रकाशनसंस्था – ठाकुरप्रकाशनम्

६. सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः; लेखनं सम्पादनञ्च – डॉ. सुराकान्तझा; प्रथमं संस्करणम्; संस्करणवर्षम् – सा.यु. २००९; प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी

७. सूर्यसिद्धान्तः (आर्षग्रन्थः); व्याख्याकारः – श्रीकपिलेश्वरशास्त्री; संस्करणवर्षम् – सा.यु. २०१५; प्रकाशनसंस्था – चौखम्भा संस्कृतभवनम्, वाराणसी

८. म.म.सुधाकरद्विवेदिप्रणीतया 'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः; सम्पादकः – विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी; द्वितीयं संस्करणम्; संस्करणवर्षम् – सा.यु. २०१६; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

९. भास्करीयगोलमीमांसा; प्रधानसम्पादकः – आचार्यः. वाचस्पति उपाध्यायः, लेखकः – आचार्यः. देवीप्रसादत्रिपाठी, सम्पादकः – आचार्यः. रमेशकुमारपाण्डेयः, संस्करणम् – सा.यु. २०१०, प्रकाशनसंस्था – श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

१०. उपपत्तीन्दुशेखरः; महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः – श्रीगिरिजाप्रसादद्विवेदी, संस्करणम् – सा.यु. २००८, प्रकाशनसंस्था – भारतीयबुक् कारपोरेशन् – नवदेहली

# अभिप्रेरणम् (Motivation)

आचार्यः रामचन्द्रुल बालाजी*
समन्वयकः, शिक्षाशास्त्रविद्याशाखा,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– "Efficient learning depends on effective motivation." इत्युक्तरीत्या सर्वेषां जनानां कृते तेषां लक्ष्यसम्पादनाय प्रेरणा अत्यन्तावश्यकी । प्रेरणाभावे कदाचित् सामर्थ्यमस्तिचेदपि फलप्राप्तिः नैव भवति । इयं प्रेरणा बाह्यान्तरिकभेदेन द्विविधा भवति । विशिष्य कक्ष्यासु अस्याः अनिवार्यता वर्तते । अतः अध्यापकैः छात्रेषु आत्मविश्वाससम्पादनार्थं छात्रान्तरिकशक्तेः उचितसमये सदुपयोगार्थं सद्व्यवहारसम्पदनाय च कक्षायां प्रेरणापद्धतयः अनुसर्तव्याः । तेन छात्राः स्वकीयजीवने उत्तमलक्ष्यम् अनायासेन प्राप्तुं शक्नुवन्ति । अस्मिन् प्रबन्धे किं नाम अभिप्रेरणम् ? अभिप्रेरणस्य घटकाः, विशिष्य अभिप्रेरकाणां प्रकाराः, प्रधानसिद्धान्ताश्च वर्णिताः वर्तन्ते ।*

***कूटशब्दाः*** *– प्रचोदनम्, लङ्घनम्, अभिप्रेरणम्, आवश्यकताः, आन्तरिकशक्तिः, प्रोत्साहनम्, अवकुण्ठनम्, संक्लिष्टाप्रक्रिया, शक्तिपरिवर्तनम्, सुरक्षा, अधिगमः, आत्मनिर्भरता, इत्यादयः ।*

श्रीमद्रामायणे किष्किन्धाकाण्डे सीतायाः अन्वेषणसमये समुद्रोल्लङ्घनसन्दर्भे जाम्बवान् हनूमन्तमुद्दिश्य एवं वदति -

**त्वद्वीर्यं द्रष्टुकामेयं सर्ववानरवाहिनी । उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम् ॥ (६६ स. ३६ श्लो.)**

**ततस्तुवै जाम्बवता प्रचोदितः प्रतीतवेगः पवनात्मजः कपिः । प्रहर्षयन् तां हरिवीरवाहिनीं चकाररूपं महदात्मनस्तदा ॥ (६६ स. ३८ श्लो.)**

यद्यपि हनूमान् समुद्रलङ्घने समर्थः, परन्तु यावत्जाम्बवतः प्रेरणा न भवति तावत् पर्यन्तं हनूमान् स्वशक्तिं न ज्ञातवान् । अत एव तूष्णीमेवोपविष्टः आसीत् । परन्तु जाम्बवान् हनूमतः शक्तिं सम्यक् जानाति चेदपि हनूमन्तं कार्यं कर्तुं नादिशत् । परन्तु हनूमतः शक्तिं स्मारितवान् । परिणामतः जाम्बवता वाक्येन प्रचोदितः हनूमान् कार्योन्मुखः जातः । प्रायः एतादृशी स्थितिः सर्वेषामपि जनानां बहुषु सन्दर्भेषु भवति । वयमस्माकमान्तरिकशक्तिं योग्यतां वा नैव जानीमः । अतः अस्माकम् आन्तरिकशक्तेः बहिरानयनाय एकं चोदनमावश्यकं भवत्येव । इदमेव अभिप्रेरणं (Motivation) भवति ।

अभिप्रेरणम् इत्यस्य आङ्ग्लभाषायां 'Motivation' इति समानार्थकशब्दः वर्तते । एतत् लेटिनभाषायाः 'Movere' इति शब्दात् निष्पन्नः भवति, यस्यार्थः वर्तते 'चलनम्' (Movement) । इत्थमभिप्रेरणस्य शाब्दिकार्थः वर्तते यत्- कस्यापि जीवस्य कार्यं प्रति चालनप्रक्रिया अथवा किमपि कार्यं कर्तुं प्रोत्साहनम् इति । व्यक्तेः आवश्यकताः, अभिरुचयः, सहजाताः, प्रोत्साहकानि इत्यादयः व्यक्तौ अभिप्रेरणां जनयन्ति, तेन व्यक्तिः कार्यं कर्तुं प्रवृत्ता भवति । मनोवैज्ञानिकानां मते प्रेरणा एका आन्तरिकी अदृश्यशक्तिः भवति । इयं तस्य व्यवहारदर्शनेनैव अनुमातुं शक्या ।

**अभिप्रेरणस्य परिभाषाः** (Definitions of Motivation)

**गुड् महोदयस्य मते** – "कस्यचित् कार्यस्य आरम्भस्य, प्रवर्तनस्य, नियन्त्रणस्य च प्रक्रिया एव अभिप्रेरणम् इत्युच्यते ।"

---

***सम्पर्कसूत्रम्*** - 9448618043 , Email- rbalaji@sanskrit.ac.in

(Motivation is the process of arousing, sustaining and regulating activity), Good.

**ब्लेयर इत्यादयः** – "अध्येतुः आन्तरिकशक्तीनाम् आवश्यकतानाञ्च तस्य वातावरणे विभिन्नलक्ष्येषु दिशानिर्देशनप्रक्रिया एव अभिप्रेरणम् ।"

(Motivation is a process in which the learner's internal energies of needs are directed towards various goal objects in his environment), Blair, Jones and Simpson.

**अकिन्सनमहोदयस्य मते** – "एकोऽथवा ततोऽप्यधिकप्रभावान् उत्पादयितुं कार्यकरणप्रवृत्तेः उत्पादनमेव अभिप्रेरणम् ।"

(The term motivation refers to the arousal of a tendency to act to produce one or more effects) - Atkinson.

उपर्युक्तपरिभाषाभिः ज्ञायते यत् –

1. अभिप्रेरणं लक्ष्यकेन्द्रितं (Goal cantered) भवति ।
2. अभिप्रेरणं प्राणिषु शक्तिपरिवर्तनं (Energy change) करोति ।
3. अभिप्रेरितव्यवहारे नैरन्तर्यम् (Continuity) भवति ।

अतः प्रेरणा मानवजीवने प्राधान्यं वहतीत्यत्र नास्ति संदेहः । लक्ष्यसाधनाय प्रेरणा अत्यावश्यकी । प्रेरणाभावे लक्ष्यप्रातिः न भवति । तेन अवकुण्ठनम् (Frustration) भवति । तेन मानसिकरोगाः भवन्ति ।

यः कोऽपि जनः उत्तमस्थितिं प्राप्तुमिच्छति तदर्थमावश्यकशक्तिसामर्थ्यानि प्रज्ञापाटवादीनि वर्तन्ते चेदपि प्रेरणाभावे न प्राप्तुमर्हति । प्रज्ञादिभिः साकं प्रेरणा अत्यन्तानिवार्या भवति । आधुनिकमनोवैज्ञानिकानां मते इयं प्रेरणा एका शक्तिः भवति, या यं कमपि कार्यं कर्तुं प्रेरयति । अपि च प्राणिनां सञ्चालन (Activate)- निर्देशन (Direction)- संङ्घटन (Organize)- सम्पादनमुख्यशक्तिः अभिप्रेरणा भवति । उत्तमाधिगमसम्पादनम् उत्तमप्रेरणायाः उपरि आधारितं भवति । व्यक्तेः आवश्यकताः (Needs), अभिरुचयः (Interests), मूलप्रवृत्तयः (Instincts), प्रोत्साहकाः (Incentives) प्रेरणकारकाः भवन्ति ।

अभिप्रेरणायां चत्वारः घटकाः (Components) अथवा कारकाः (Factors) अथवा स्त्रोतांसि (Sources) भवन्ति । ते च आवश्यकताः (Needs), चालकाः (Drives), प्रोत्साहः (Incentives), अभिप्रेरकाः (Motives) भवन्ति ।

तेषु प्रधानीभूतस्य अभिप्रेरकविषये कश्चन विचारः अत्र क्रियते-

**अभिप्रेरकाः (Motives)**

अभिप्रेरकाणां विषये मनोवैज्ञानिकेषु ऐकमत्यं नास्ति । केचन शारीरिक-मानसिकदशाः इति मन्यन्ते, केचन प्राणिनामावश्यकताः इति , केचन विशिष्टकार्यकरणप्रवृत्तिः इति वदन्ति । परन्तु प्रायः सर्वे मनोवैज्ञानिकाः अङ्गीकुर्वन्ति यत् अभिप्रेरकाः प्राणिनां विशिष्टव्यवहाराः अथवा क्रियां कर्तुमुत्तेजना इति । अभिप्रेरकः त्रीणि कार्याणि करोति-

1. क्रियायाः आरम्भः (Initiate)

2. क्रियायाः दिशानिर्देशनम् (Direction)
3. उद्देश्यप्राप्तिपर्यन्तं स्थिरत्वम् (Sustain)

एते प्रेरकाः बहु प्रकाराः सन्ति । मास्लो (Maslow) इत्यस्य मतानुगुणं, प्रेरकः ( Motive) जन्मजातप्रेरकः (Innate Motive), अर्जितप्रेरकः (Acquired Motive) इति द्विधा विभक्तं वर्तते । थाम्सन् (Thompson) महोदयस्य मतानुसारं प्रेरकाः प्राकृतिकाभिप्रेरकाः (Natural Motives) तथा कृत्रिमाभिप्रेरकाः (Artificial Motives) इति द्विधा स्वीकृतं वर्तते । गारेट् (Garret) महोदयस्य मतानुगुणं, अभिप्रेरकाः (Motives) जैविकाभिप्रेरकाः (Biogenic Motives), मनोवैज्ञानिकाभिप्रेरकाः (Psychogenic Motives) तथा सामाजिकाभिप्रेरकाः (Sociogenic Motives) इति त्रिधा विभक्ताः वर्तन्ते । केचन मनोवैज्ञानिकाः अभिप्रेरकान् प्राथमिकप्रेरकाः (Primary Motives) अथवा शारीरिकाभिप्रेरकाः (Physiological Motives) द्वितीयप्रेरकाः (Secondary Motives) अथवा मनोवैज्ञानिकप्रेरकाः (Psychological Motives) इति प्रकारेण वर्गीकरणं कुर्वन्ति ।

**अभिप्रेरकाणां प्रकारः (Types of Motives)**

1. जन्मजातप्रेरकः (Innate Motive)- एते प्रेरकाः जन्मतः एव व्यक्तौ दृश्यन्ते । यथा- क्षुत्पिपासादयः ।
2. अर्जितप्रेरकः (Acquired Motive)- एतान् अभिप्रेरकान् प्राणिनः स्वप्रयासेन प्राप्नुवन्ति । यथा- सामाजिकता, रुचिः, प्रतिष्ठादयः ।
3. प्राकृतिकाभिप्रेरकाः (Natural Motives)- एते अभिप्रेरकाः व्यक्तिषु स्वाभाविकरूपेण प्राप्ताः भवन्ति । यथा- क्रीडनम्, सुखप्राप्तिः इत्यादयः ।
4. कृत्रिमाभिप्रेरकाः (Artificial Motives)- एते अभिप्रेरकाः प्राणिनां क्रियायाः व्यवहारस्य वा नियंत्रणार्थं, प्रोत्साहनाय च अपेक्षितां दिशां प्रापयितुं प्राकृतिकाभिप्रेरकाणां पूरकरूपेण भवन्ति । यथा- पुरस्काराः, प्रशंसा, दण्डनम् इत्यादयः ।
5. जैविकाभिप्रेरकाः (Biogenic Motives)- एते प्राणिनां जैविकाश्यकतानां फलस्वरूपेण उत्पन्नाः भवन्ति । यथा- क्रोधः, भयं, प्रेमादायः ।
6. मनोवैज्ञानिकाभिप्रेरकाः (Psychogenic Motives)- एते मनोवैज्ञानिकावश्यकतानां फलस्वरूपेण उत्पन्नाः भवन्ति । यथा- सर्जनात्मकता, जिज्ञासा, पलायनञ्च ।
7. सामाजिकाभिप्रेरकाः (Sociogenic Motives)- एते सामाजिकविश्वासैः सम्बन्धैः, परिस्थितिभिः, आदर्शैश्च उत्पन्नाः भवन्ति । यथा- सुरक्षा, प्रतिष्ठा, संग्रहः इत्यादयः ।

**कैश्चित् मनोवैज्ञानिकैः एवं विभागः कृतः वर्तते-**

- **प्राथमिकप्रेरकाः (Primary Motives)**- एतान् दैहिकाभिप्रेरकाः इत्यपि वक्तुं शक्यते । एते प्राणिनां दैहिकावश्यकतानां सम्बद्धाः भवन्ति ।

- **द्वितीयप्रेरकाः (Secondary Motives)** एतान् मनोवैज्ञानिकाभिप्रेरकाः इत्यपि वदन्ति । एते प्राणिनां मनोवैज्ञानिकावश्यकतानां सम्बद्धाः भवन्ति ।

 ISSN : 2249-538X

**अभिप्रेरणसिद्धान्ताः** (Principles of Motivation)

अभिप्रेरणायाः सिद्धान्ताः निःसन्देहं महत्त्वपूर्णाः सन्ति। परन्तु प्रेरणा कथं साधयेत् इति कश्चन प्रश्नः वर्तते एव। प्रेरणां प्रदातुं प्रेरणायाः प्रक्रियां, गतिशीलतायाः ज्ञानम् अत्यन्तानिवार्यं भवति। अभिप्रेरणम् अधिगमे महत्त्वपूर्णस्थानं भजते। अभिप्रेरणमेका संक्लिष्टप्रक्रिया वर्तते। मानवानां विभिन्नव्यवहारस्य कारणानां च अध्ययनं कृत्वा, मनोवैज्ञानिकैः प्रेरणायाः बहवः सिद्धान्ताः प्रतिपादिताः।

एतेषु केषाञ्चन सिद्धान्तानां विवरणम् अत्र क्रियते-

**मूलप्रवृत्तेः सिद्धान्तः** (Instinct Theory of Motivation) -

प्रेरणायाः मूलप्रवृत्तिसिद्धान्तः मैकडोगल् (Mc Dougall) महोदयेन 1908 मध्ये प्रस्तावितः आसीत्। वस्तुतः विभिन्नपरिस्थितिषु मनुष्यः किमर्थं विशिष्टरूपेण प्रवर्तते इति प्रश्नस्य प्राचीनतमं विवरणम् अयं सिद्धान्तः अस्ति। यद्यपि मानवव्यवहारस्य स्पष्टीकरणाय मूलप्रेरणायाः प्रत्ययस्य प्रथमः उपयोगः विलियम् जेम्स् ( William Jams) इत्यनेन कृतं वर्तते। परन्तु मैकडोगल् (Mc Dougall) वर्यः मूलप्रवृत्तिसिद्धान्तं पूर्णसिद्धान्तरूपेण प्रस्तुतीकृतवान्। अस्य महोदयस्य मतानुसारेण मूलप्रवृत्तिः स्प्रिङ्ग्-बोर्ड्-रूपेण कार्यं करोति। तस्य मतानुसारेण सर्वे मानवव्यवहाराः मूलप्रेरणायाः साहाय्येन व्याख्यातुं शक्यन्ते। सः चतुर्दशमूलप्रवृत्तीनां सूचीमपि प्राकटयत्। प्रत्येकापि मूलप्रवृत्तिः कस्याश्चित् संवेगात्मकस्थितेः (Emotional Disposition) भावात्मकानुभवेन (Effective Experience) वा सम्बद्धा अस्ति। यथा पलायनस्य मूलप्रवृत्तिः भयस्य संवेगेन, जिज्ञासामूलप्रवृत्तिः आश्चर्यस्य संवेगेन, आहार-अन्वेषणस्य मूलप्रवृत्तिः क्षुधासंवेगेन च सह सम्बद्धा अस्ति। अनेन चतुर्दशमूलप्रवृत्तयः, तत्सम्बद्धाः संवेगाश्च पट्टिकायां प्रदर्शिताः। मैकडुगल् इत्यपि अकथयत् यत् सर्वमाचरणम् अनिवार्यतया मूलप्रवृत्यात्मकं भवति। इयं मूलप्रवृत्तिः संज्ञानं (Cognition) नाम ज्ञानं (Knowing), अनुरागः (Affection) अर्थात् अनुभूतिः (Feeling), सङ्कल्पः (Conation) अर्थात् करणं (Doing) इति पक्षत्रयानुसारिणी भवति।

उदाहरणाय- कश्चन भयानकं स्वसमीपमागच्छन्तं पशुं पश्यति तदा तस्य व्यवहारः त्रिषु सोपानेषु परिणामं प्राप्नोति। प्रथमसोपाने पशुं पश्यति। द्वितीयसोपाने भीतिं प्राप्नोति। तृतीयसोपाने ततः पलायनं करोति। एवम् मैकडुगल् महोदयः मूलप्रवृत्तिः मानवव्यवहारस्य निर्देशनं करोतीति स्पष्टीकर्तुं प्रयासमकरोत्। मूलभूतप्रेरणायाः अयं सिद्धान्तः प्रारम्भे अत्यन्तं लोकप्रियः आसीत्, परन्तु व्यवहारवादिनः मनोवैज्ञानिकाः तस्य प्रबलतया विरोधम् अकुर्वन्। समस्तमानव-व्यवहारस्य मूलप्रवृत्तिरेव कारणमिति धारणा, मूलप्रवृत्तिसङ्ख्यायां क्रमेण वृद्धिः च अस्य विमर्शस्य द्वौ मुख्यौ आधारौ स्तः। वस्तुतः, साम्प्रतिकमनोवैज्ञानिकाः स्वीकुर्वन्ति यत्- सर्वे मानव-व्यवहाराः स्वाभाविकतया सहजप्रवृत्तिद्वारा भवन्ति इति कथनं न शक्यते। मनुष्यः स्वपरिसरं प्रति प्रतिक्रियां कृत्वा ततः बहून् व्यवहारान् जानाति, अर्जयति च। अल्पवयस्काः शिशवः अपि जीवनस्य आरम्भे सहजप्रवृत्त्या शिक्ष्यन्ते। यदि मानवव्यवहारः मूलप्रवृत्तिद्वारैव भवति तर्हि सर्वे जनाः समानरूपेण प्रवर्तन्ते। अतः वक्तुं शक्यते यत् मनुष्यः मूलप्रकृत्या स्वपर्यावरणं प्रति प्रतिक्रियां च कृत्वा अनेकान् व्यवहारान् जानाति, प्राप्नोति च इति।

पुनः अभिप्रेरणसिद्धान्तेषु प्रसिद्धमानवतावादिमनोवैज्ञानिकस्य **मास्लोमहोदयस्य 'आवश्यकतासिद्धान्तः'** (Needs Theory) अतीव प्रसिद्धः वर्तते।

**मास्लोमहोदयस्य आवश्यकतासिद्धान्तः** (Needs Theory)

अब्राहम् मास्लो (Abraham Maslow) महोदयः मानवतावादस्य प्रवर्तकः वर्तते। अधिगमस्य अभिप्रेरणस्य विषये तस्य प्रतिपादनानि व्यवहारवादिभ्यः भिन्नानि वर्तन्ते। सः मानवानां व्यवहारस्य वर्णनाय

आवश्यकतानाम् अनुक्रमः इति नूतनभावनां प्रत्यपादयत्। जीवः निरन्तरं विभिन्नावश्यकतानां पूर्तये प्रयत्नं करोति। तासां सर्वासाम् आवश्यकतानां पञ्चसु सोपानेषु विभागमकरोत्। यथा-

1. शारीरिकावश्यकताः (Physiological needs)
2. भद्रतावश्यकताः (Safety needs)
3. सामाजिकावश्यकताः (Social needs)
4. आत्मगौरवावश्यकताः (Self esteem needs)
5. आत्मसाक्षात्कारः (Self actualization)

**मास्लोमहोदयस्य आवश्यकतनाम् अनुक्रमः**

एतासु आद्याश्चत्वारः निम्नस्तरीयावश्यकताः, पञ्चमे उच्चस्तरीयावश्यकताः अन्तर्भवन्ति। यथा-

1. **शारीरिकावश्यकताः** (Physiological Needs) - मानवस्य शरीरधारणपोषकाः आवश्यकताः अत्रान्तर्भवन्ति। यथा- आहारः, जलं, स्वच्छवायुः, निद्रा इत्यादीनि। उक्तञ्च "**आहारनिद्राभयमैथुनानि समानमेतत् पशुभिर्नराणाम्**" इति। यावत्पर्यन्तम् एतासां पूर्तिः न संभवति तावत्पर्यन्तं द्वितीयस्तरे आवश्यकतकानां विषये चिन्तयितुं न शक्नोति।
2. **सुरक्षावश्यकताः** (Safety Needs) - द्वितीयस्तरे व्यक्तेः शारीरिक-मनोवैज्ञानिक-सामाजिकसुरक्षासम्बद्धावश्यकताः अन्तर्भवन्ति। सामाजिकनियमानां पालनम्, शीतवातातपादिक्लेशेभ्यः रक्षणम्, उत्तमस्वास्थ्यञ्च प्राप्तुमिच्छन्ति। एतासां पूर्तेरनन्तरमेव तृतीयस्तरीयावश्यकतानां विषये चिन्तयति।
3. **सामाजिकावश्यकताः** (Social Needs) - प्रत्येकं व्यक्तिः पारिवारिकजनानां प्रीतिः, वात्सल्यम्, आदरः इत्यादीन् प्राप्तुमिच्छति। समवयस्कैः सह मैत्रीमपि वाञ्छति। प्रत्येकं व्यक्तिः समाजे सांस्कृतिकसमूहे च सदस्यः भवितुमिच्छति। इत्थं सामाजिकाङ्गीकारः व्यक्तेः समाजस्य च हिताय अत्यावश्यकः वर्तते। ततः परमेव सः चतुर्थस्तरे आवश्यकताः प्राप्तुं प्रयतते।
4. **आत्मगौरवावश्यकताः** (Self esteem) - चतुर्थस्तरे व्यक्तिः अन्यजनेभ्यः गौरवं सम्मानञ्च प्राप्तुमिच्छति। इयमिच्छैव अभिप्रेरकवत् कार्यं करोति। व्यक्तिः स्वस्य योग्यता, सामर्थ्यम् इत्यादीन् ज्ञात्वा आत्मनः विकासोपायान् चिन्तयति। तस्मिन् आत्मविश्वासः, आत्मनिर्भरता, स्वतन्त्रता इत्यादिभावनाः विकसन्ति। एतैर्गुणैः सः अन्येषां प्रशंसां सामाजिकगौरवञ्च प्राप्नोति। परिणामतः सः योग्यपौरः भूत्वा समाजकल्याणाय विविधकार्याणि करोति।
5. **आत्माभिव्यक्तेः आवश्यकताः** (Self actualization needs) - अस्मिन् पञ्चमसोपाने व्यक्तिः स्वस्य योग्यताः, सामर्थ्यानि, न्यूनताः इत्यादीन् सम्यगवबुध्य तदनुसारं वैयक्तिकविकासाय प्रयतते। योग्यपरिस्थितौ अथवा विविधसन्दर्भेषु स्वस्य सामर्थ्यानि प्रतिभाञ्च प्रदर्शयति। इत्थमस्यामवस्थायां मनुष्यः सदाचारः, सर्जनात्मकता, समस्यासमाधानमित्यादिगुणान् प्राप्नोति।

**मास्लोमहोदयस्य आवश्यकतानामनुक्रमं चित्रमाध्यमेनेत्थं प्रदर्शयितुं शक्यते-**


ISSN : 2249-538X




**मास्लोमहोदयस्य आवश्यकतानाम् अनुक्रमः**

पूर्वोक्तावश्यकतानां पूर्तये व्यक्तिः निरन्तरं प्रयतते । तत्पूर्तिसमये व्यक्तिः विभिन्नानुभवान् प्राप्नोति ये चानुभवाः तस्याः व्यवहारे अपेक्षितपरिवर्तनाय प्रोत्साहकाः, प्रेरकाः, चालकाश्च भवन्ति । इत्थम् आवश्यकतानां पूर्तिसमये नूतनविषयान् अधिगच्छति ।

प्रेरणा प्रधानतया द्विविधा भवति ।

1. आन्तरिकी प्रेरणा (Intrinsic Motivation)
2. बाह्या प्रेरणा (Extrinsic Motivation)

**आन्तरिकी प्रेरणा** (Intrinsic Motivation) – बहिस्तात् प्रेरणां विना बालकः स्वेच्छया आत्मनः आवश्यकतानां पूरणार्थं, सुखसन्तोषप्राप्त्यर्थं, स्वकीयतृप्त्यर्थं कार्ये प्रवर्तते । अत्र शिक्षकैः विभिन्नकार्यक्रमाणाम् अयोजनेन विभिन्नस्थितीनां निर्माणेन बालकेषु सकारात्मकं चिन्तनम् आनेयं भवति । एतदेव आन्तरिकं प्रेरणम्, सकारात्मकं प्रेरणम् इति नाम्ना उच्यते ।

**बाह्या प्रेरणा** (Extrinsic Motivation) – अत्र छात्रावश्यकतानाम् अभिरुचीनां सम्बन्धं विना एक कार्योन्मुखीकरणम् उद्दीपनमेव बाह्यप्रेरणा भवति । इदं कदाचित् बाह्यपरिवेशात् भवति अथवा श्रेयोभिलाषिणां चोदनेनैव भवति । एतादृशाभिप्रेरणं कक्षायाम् अध्यापकेन सम्पादनीयं भवति । यथा- स्तुतिद्वारा, अभिनन्दनद्वारा, भीतेः उत्पादनद्वारा वा लक्ष्यप्राप्त्यै चोदनं कर्तव्यं भवति ।

**कक्षायां प्रेरणा दानाय एताः प्रेरणापद्धतयः उपयुज्यन्ते-**

1. स्तुतिः निन्दा च (Praise and Blame)
2. पुरस्कारः दण्डश्च (Reward and Punishment)
3. स्पर्धा सहकारश्च (Competition and Cooperation)
4. साफल्यं वैफल्यञ्च (Success and Failure)
5. काङ्क्षा स्तरः (Level of Aspiration)

6. फलितांशज्ञानम् (Knowledge of Result)
7. तन्यतान्यूनता (Reducing Stress)
8. दृश्य-श्रव्योपकरणानि (Audio Visual Aids)
9. कक्ष्यावातावरणम् (Classroom Environment)
10. शिशुकेन्द्रितशिक्षा (Child centred Education)

अतः अध्यापकैः छात्रेषु आत्मविश्वाससम्पादनार्थं छात्रान्तरिकशक्तेः उचितसमये सदुपयोगार्थं सद्व्यवहारसम्पदनाय च कक्षायां प्रेरणापद्धतयः अनुसर्तव्याः । तेन छात्राः स्वकीयजीवने उत्तमलक्ष्यम् अनायासेन प्राप्तुं शक्नुवन्ति ।

**परामृष्टाः ग्रन्थाः**

१. शिक्षायाः मनोवैज्ञानिकाधाराः - डा. पि.बि. पद्मपत्रश्रीनिवासः
२. उच्चतर शिक्षा मनोविज्ञान – सुशील गुप्ता, अलका गुप्ता
३. शिक्षा मनोविज्ञान – पी.डी. पाठक
४. श्रीमद्रामायणम् – महर्षिः वाल्मीकिः


ISSN : 2249-538X

# श्रीशङ्कराचार्यविरचितप्रश्नोत्तरमालिका शिक्षा च

आचार्यः हरिप्रसादः के*
शिक्षाशास्त्रविद्याशाखा, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– शिक्षा मानवस्य निर्मात्री अस्ति । कथम् ? सर्वाङ्गिकविकाससम्पादनमुखेन । स एव शिक्षित इत्युच्यते यः न केवलं पाठ्यपुस्तकस्थं विषयं* ***जानाति****, अपि तु अवगतानि तत्त्वानि* ***अनुतिष्ठति****। अत एव आचार्यलक्षणम् इत्थम् उक्तम् –*

*आचिनोति च शास्त्रार्थान् आचारे स्थापयत्यपि ।*
*स्वयमाचरते यस्तु आचार्य इति कथ्यते ॥*[1] *इति ।*

*बौद्धिकविकासमात्रं शिक्षायाः लक्ष्यं नास्ति । निर्दिष्टशास्त्रस्य अध्ययनमात्रं जनं शिक्षितं न करोति । अधीतनानाशास्त्राः बहवः अशिक्षिता इव व्यहरन्तः लोके दृश्यन्ते । मानवव्यवहारे समुचितपरिवर्तनमेव शिक्षायाः लक्ष्यमिति आधुनिकाः व्यवहारवादिनः ब्रुवन्ति ।*

*अस्मन्मनीषिणः ब्रुवन्ति यत्"****साक्षरा विपरीताश्च राक्षसास्त इति स्मृताः ॥***[2] *" इति अत्र उपलक्षणम् । कस्य उपलक्षणम् ? हृदयविहीन-चारित्र्यहीनवैदुष्यस्य । अत एव भर्तृहरिर्वदति –*

***वृत्तं यत्नेन संरक्षेत् - - - - वृत्ततस्तु हतो हतः*** *॥*[3]

*इत्थं बौद्धिकविकासेन सह चारित्र्यादिविकासः शिक्षया साधनीयः इति तात्पर्यतः आयाति । तदर्थम् अस्माकं शिक्षाव्यवस्थायां तादृशाः विषयाः अपि चर्चनीयाः, चिन्तनीयाः येषाम् माध्यमेन व्यक्तित्वस्य अन्यविधविकासः जायेत । अतः तद्दिशि व्यक्तित्वविकासापेक्षितगुणानां विवेचनाय अत्र प्रश्नोत्तररत्नमालिका इति ग्रन्थः उपायुज्जि ।*

***कूटशब्दाः*** *– अधिगततत्त्वः, मानसम्, जाड्यम्, साधुजनमैत्री, शीलम्, पिशुनयुत:*

## प्रश्नोत्तररत्नमालिका

भगवत्पादाः आदिशङ्कराचार्याः नित्यानित्यवस्तुविवेकादिगुणैः ब्रह्म जिज्ञासितुम् अधिकृतानां निमित्तं प्रस्थानत्रय-भाष्यं विलिख्य पुनः तदितरान् लोकान् उद्धर्तुं स्तोत्रादिग्रन्थान् प्रणिन्युः येषां मध्ये प्रश्नोत्तररत्नमालिका अन्यतमः ग्रन्थः वर्तते । प्रश्नोत्तररत्नमालिकायाम् आचार्यशङ्करभगवत्पादाः मानवस्य पूर्णतः मानवत्वं साधयितुम् अपेक्षितानां गुणानां विचारं प्रश्नोत्तरमाध्यमेन प्रतिपादयामासुः । तदीयवचनानुगुणं दृष्टादृष्टार्थसाधनपटीयान् प्रश्नोत्तररत्नमालिकां हृदि कुर्यात् । दृष्टादृष्टार्थसाधनपटीयान् इत्युक्ते कः ? यः आत्मनः इहपरयोः श्रेयः सिसाधयिषति सः दृष्टादृष्टार्थसाधनपटीयान् ।

प्रश्नोत्तररत्नमालिका केवलं शिक्षार्थिनं न परिष्करोति, अपि तु शिक्षकमपि । बहवो हि शिक्षकाः मन्यन्ते यत् – वयं छात्रान् उपदेशेन परिवर्तयिष्यामः इति । वस्तुतः परिवर्तनीयाः सन्ति न केवलं छात्राः, अपि तु शिक्षकाः अपि ।

---

***सम्पर्कसूत्रम्** - 9481223990, Email- hariprasad@sanskrit.ac.in

[1] ब्रह्माण्डपुराणम् ३२/३२

[2] शिवपुराणम्, कैलाससंहिता, २०/३५

[3] सुभाषितम्

## प्रश्नोत्तररत्नमालिका शिक्षा च

इत्थं शिक्षकछात्रयोः उभयोरपि व्यक्तित्वं परिष्कर्तुं प्रश्नोत्तररत्नमालिका विचारणीया। अत्र आचार्याः शङ्करभगवत्पादाः आदावेव गुरोः लक्षणं प्रतिपादयमासुः। तदित्थम् अस्ति -

**को गुरुः अधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥२ ॥**

इदं पद्यं गुरोः स्वरूपं वर्णयति। गुरुः शिष्यहिताय तदीयविकासाय वा अध्याप्यग्रन्थसम्बद्धतया बहून् विषयान् जानीयात् इति विद्मः। तदर्थं आचार्यभगवत्पादाः अधिगततत्वः इति पदं प्रायुञ्जत। तावता गुरोः गुरुत्वं न सेत्स्यति इति मन्वानाम् अन्यदेकं विशेषणं न्यवेशयन् शिष्यहिताय उद्यतः सततम् इति। गुरुः शिष्यम् अध्याप्य स्वीयं कर्तव्यजातं सम्म्पन्नमिति विरन्तुम् नार्हति। सः शिष्यहिताय सततं प्रवृत्तः स्यात् इति ते ब्रुवन्ति। "आचार्यात् पादमादत्ते[1]" इति वचनानुगुणम् आचार्यः शिष्याय पादमात्रम् अनुग्रहीष्यति चेदलम् इति न मन्तव्यम्। अतः भगवत्पादाः कथयन्ति -स एव गुरुः यः बोध्यान् सर्वान् विषयान् सुष्ठु जानानः शिष्यस्य हितार्थं सततं परिश्राम्यति इति।

**कः शुचिरिह ? यस्य मानसं शुद्धम्।**

वयं लोके बहुत्र अशुचिविषये अनुभूतवन्तः स्मः। खेदस्य विषयो नाम यावन्तः अशुचिविषये प्रबलं प्रतिपादयन्ति तेषु अधिकाधिकाः स्वयमशुचयः एव। वस्त्रेण वपुषा वा अशुचयः न स्युः कदाचित्। किन्तु वाचा मनसा वा अशुचयः भवन्ति। यतो हि वाचा मनसा च शुचयः अतिविरलतया भवन्ति लोके। तत्रापि केचन वाचा कापट्येन शुचित्वं प्रदर्शयन्ति। किन्तु पुरतः शुचयः इव प्रतीयमानाः अन्तरङ्गे विपरीता भवन्ति। अत एव अत्र भगवत्पादाः प्रत्यपीपदन् यत् - कः शुचिरिह ? यस्य मानसं शुद्धम् इति। "शुचिर्वाक्कायमानसैः" कायेन वाचा मनसा च शुचिः भवेत्। मनसा शुचिः भवति चेत् अवश्यं वाचा वपुषा वस्त्रेण च शुचिः भवत्येव।

**कः पण्डितो ? विवेकी**.... ॥४ ॥।

भगवत्पादाः कथयन्ति – विवेकी एव पण्डितः इति। पण्डा अस्य अस्ति इति पण्डितः। पण्डा इत्युक्ते आत्मविषयकं ज्ञानम्। नित्यानित्ययोः सत्यानृतयोः ज्ञानाज्ञानयोः भेदज्ञानं यस्य अस्ति स एव पण्डितः। वैदुष्येन पण्डितः न भवति। वैदुष्येन विद्वान् भवति। सर्वोऽपि विद्वान् विवेकी भवति इति नास्ति। नित्यानित्ययोः भेदज्ञानं, सत्यानृतयोः वा भेदज्ञानं नाम किम् ? येन भेदज्ञानेन विवेकी इति प्रकीर्त्या पण्डितः इति व्यवह्रियते।

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः[2] इति वेदान्तडिण्डिमः। ब्रह्म तु स्यान्नाम सत्यम्। किन्तु अयं पुरतः परिदृश्यमानः सत्यत्वेन अनुभूयमानः प्रपञ्चः मिथ्या इत्युच्यते कथम् ? इति बहूनां सन्देहः। आचार्यभगवत्पादाः कथयन्ति असत्यम् इत्युक्ते सर्वथा अविद्यमानं तत्वं नास्ति। असत्यं मिथ्या इत्युच्यते। मिथ्या नाम सदसद्भिन्नं तत्त्वम् इति प्राथमिकं मिथ्यात्वलक्षणम् वर्तते। सत् इत्युक्ते त्रिकालाबाध्यं तत्त्वम्। भूतभविष्यद्वर्तमानेषु कालेषु यत् तत्त्वं स्वस्वरूपेणैव तिष्ठति तत् सत् इत्युच्यते। ब्रह्म सत्पदार्थः अस्ति। तत् ब्रह्म त्रिषु अपि कालेषु न व्यभिचरति। प्रपञ्चः सत्यत्वेन वर्तमानकाले प्रतीयते चेदपि भूतकाले सदा आसीद् इति वक्तुं न शक्यते। यतो ह अयं प्रपञ्चः सृष्टः अस्ति। सृष्टेः प्राक् अयं प्रपञ्चः अनेन रूपेण नासीत्। भविष्यत्काले अनेनैव रूपेण स्थास्यति इति निश्चयो नास्ति।यतो हि नित्यं परिवर्तनशीलोऽयं प्रपञ्चः। अपि च कदाचित् अस्य प्रपञ्चस्य प्रलयः भविष्यति। अतः अयं प्रपञ्चः सत्पदार्थो न। यत् तत्वं त्रिषु अपि कालेषु अविद्यमानं भवति तत्

[1] महाभारतम्, उद्योगपर्व

[2] ब्रह्मज्ञानावली

असत् इत्युच्यते, यथा शशविषाणम्, अथवा खपुष्पम्। किन्तु अयं प्रपञ्चः वर्तमाने सत्यत्वेन अनुभूयते। अतः खपुष्पवत् असत् अपि नास्ति ब्रह्म इव त्रिकालाबाध्यं सत् अपि नास्ति। इत्युक्ते सदसद्भिन्नम् अस्ति। लोकाः तावत् मिथ्या इत्युक्ते असत् इति मन्यन्ते। वस्तुतः मिथ्या इत्यस्य अभिप्रायः असत् इति नास्ति, प्रत्युत सदसद्भिन्नम् इत्यभिप्रायः।

इत्थं विद्यमानं सत्यानृतयोः भेदं यः जानाति सः विवेकी इत्युच्यते। तच्च भेदज्ञानं वाचा ज्ञातं चेत् विवेकः इति नोच्यते शास्त्रज्ञैः। अनुभवेन सदसद्विवेकः यो जायते स एव विवेकः इत्युच्यते। यतो हि वाक् ब्रह्मस्वरूपं ज्ञापयितुम् असमर्था अस्ति, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह[१]" इति श्रुतेः। तथापि लोके सत्यानृतयोः भेदज्ञानमिव युक्तायुक्त-उचितानुचितादिभेदज्ञानमपि विवेक इति व्यवह्रियते। अनया दृष्ट्या पण्डितः इत्युक्ते उचितानुचितादिभेदज्ञानवान् विवेकी इति मन्तव्यम्।

**को वैरी ? यस्त्वनुद्योगः** ॥९॥

अलसः सन् यः अकर्मण्यस्तिष्ठति सः समाजस्य शत्रुः भवति। यतः बाह्यः शत्रुः कस्मिन्नपि कालविशेषे एव हानिं जनयति। किन्तु अनुद्योगी नित्यम् हानिं जनयति। अतः "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः[२]" इत्युपनिषद्वाक्यवत् कार्यं कुर्वन्नेव जीवितुम् इच्छेत् मानवः। लोके अधीतविद्याः सर्वेऽपि स्वयमुद्योगिनः न भवन्ति। कश्चन उद्योगं दद्यात् चेदेव प्रवृत्तिः जायते। अत एव सर्वकारः व्यावसायिकीं शिक्षां पर्यकल्पयत् येन अध्ययनानुक्षणं लोकाः उद्योगिनः सञ्जायेरन्।

**किं जाड्यम् ? पाठतोऽप्यनभ्यासः** ॥१०॥

पठनात्परम् अभ्यासः कर्तव्यः। अधीतस्य ज्ञानस्य व्यवहारे उपयोगः इत्यपि अभ्यास इत्यस्य अभिप्रायः अस्ति। तत्र आलस्यं न स्यात्। अत एव वेदाः उपदिशन्ति – "स्वाध्यायान्मा प्रमदः[३]" इति, आचार्यभगवत्पादाः च "वेदो नित्यमधीयताम्, तदुदितं कर्म स्वनुष्ठीयताम्" इत्युपदिदिशुः। अद्यत्वे स्वाध्यायः, तदुदितकर्मानुष्ठानं वा अस्तां तावत्, नित्यकर्म सन्ध्यावन्दनमपि कष्टाय कल्पते। युवानस्तु "सन्ध्यावन्दनमाचरन्ति विबुधाः ....." इत्युक्त्वा उत्तरार्धे एव निलीनमानसाः भवन्ति। "आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः" इति सुभाषितकाराः वदन्ति।

**कोऽनर्थफलो ? मानः**,

अत्र मान इत्युक्ते दुरभिमान इत्यर्थः। अहङ्कार इत्यर्थः। दम्भदर्पादयः दुरभिमानस्य परिणामाः सन्ति। दुरभिमानः अनर्थम् दुष्परिणामं जनयति। आत्मनः विषये अयथार्थप्रत्ययः अथवा यथार्थादधिकः प्रत्ययः दुरभिमानः इत्युच्यते। दुरभिमानी स्वसामर्थ्यादधिकं मानं वाञ्छति। तदलाभे क्रुध्यति। क्रोधात् किं भवतीति भगवद्गीतायां इत्थम् उक्तम् - क्रोधाद्भवति सम्मोहः.... इति। "कामः क्रोधः लोभः च नरकस्य द्वारम् इत्युक्त्वा "तस्मादेतत्त्रयं त्यजेत्[४]" इति भगवद्गीता अस्मान् उपदिशति। अपि च

"अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।

[१]तैत्तिरीयोपनिषद् ८.४
[२]ईशावास्योपनिषद् २
[३]तैत्तिरीयोपनिषद् शिक्षावल्ली
[४]भगवद्गीता १६/२१

क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु[१] ॥ इत्येवं रूपेण गीता मानादीनां अनर्थफलहेतुत्वं विवृणोति ।

**का सुखदा ? साधुजनमैत्री ।**

का सुखदा ? इति पृच्छामः चेत् एते युवानः सर्वे लोकान्तरे निलीना भवन्ति । भगवत्पादाः कथयन्ति – साधुजनमैत्री एव सुखदा इति ।

"**सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति**[२]"

"**साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।**

**तीर्थं फलति कालेन सद्यः साधुसमागमः ॥**[३] इति सुभाषितकारैः प्रोक्तं भगवत्पादैः सुष्ठु अनूदितम् ।

**का प्रेयसी विधेया ? करुणा दीनेषु सज्जने मैत्री ॥ १६ ॥**

का प्रेयसी विधेया ? । शङ्करभगवत्पादाः ब्रुवन्ति – दीनेषु करुणा, सज्जनमैत्री च प्रेयसी विधेया । 'भगवान् अस्मभ्यं किं वा प्रयच्छति ? धनिकानां समीपे एव पुनः पुनः धनं गच्छति । वयं दरिद्राः, दरिद्रा एव वर्तामहे" इति केषाञ्चित् रोदनं लोके वयं श्रुणुमः । ते निर्धनाः दीनाः भवन्ति अथवा विपदि विद्यमानाः भवन्ति । अन्येषां साहाय्यम् अपेक्षमाणाः दीनाः भवन्ति । एतेषां दीनानां विषये सबलाः करुणां प्रदर्शयेयुः । इत्युक्ते तेषां साहाय्यं कुर्युः । तच्च साहाय्यम् इच्छा/प्रेम्णा कर्तव्यम् । एषा दीनानां साहाय्यार्थम् अपेक्षिता करुणा अस्माकं प्रेयसी इव स्यात् दत्तचित्ता ।

एवमेव सज्जने मैत्री अस्माकं प्रेयसी भवेत् इति भगवत्पादा : कथयन्ति । यतो हि सङ्गदोषः मानवान् दानवान् करोति । सज्जनमैत्री नरं नारायणं करोति । अतः सज्जनमैत्री प्रेयसी विधेया, यथा काव्यानि कान्तासंहिततया मानवेन रामादिवत्प्रवर्तितव्यमिति उपदिशन्ति तथा सज्जनसङ्गः मानवं सत्पथे नयति ।

**क्व स्थातव्यं ? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥२० ॥**

न्यायमार्गे स्थातव्यम् इति तु सर्वैरपि ज्ञायते । किन्तु दृष्टादृष्टलाभाढ्ये इति अत्र विशेषः । इहलोके वयं वनितावित्तादि दृष्टं फलं प्राप्तुं न्यायमार्गे वर्तेमहि एव । परलोके अपि अदृष्टफलं प्राप्तुं न्यायमार्गः अनुसर्तव्यः । यतो हि इहलोके परेषाम् अहितकारकं चेदपि स्वानुकूलं चेत् तन्मार्गं अनुसरामः । किन्तु अदृष्टफलप्राप्तिः तु स्वकार्यसाधनवेलायां परेषाम् अहितं यत् जातं भवति तत्फलेन सहैव भवति । अतः अस्माकं दृष्ट्या न्यायमार्गे वयं स्मः चेदपि परेषां यत्र हानिर्न भवति तादृशमार्गे स्थातव्यम् ।

अत एव भर्तृहरिः वदति "न्यय्यात् पथः प्रविचलन्ति पदं न धीराः ॥[४]" इति ।

**कोऽलङ्कारः ? शीलम्** ॥२२ ॥

शीलम् इत्युक्ते चरित्रम् । चरित्रम् एव वृत्तम् । एतच्चरित्रं मनुष्यम् अलङ्कारयुक्तं करोति । तद्विहीनः अनलङ्कृतः इव इत्येव न मन्तव्यम् । सः चरित्रहीनः अपि अस्ति । -यः चरित्रहीनः भवति सः आत्मनः दुश्चरित्रत्वं गोपयितुम् नटनं करोति । यथा नारायणीये प्रत्यपादि -

पापोऽयं कृष्णरामेत्यभिलपति निजं गूहितुं **दुश्चरित्रम्** ॥4 ॥[५]

यः चरित्रवान् भवति भवति तस्य चरित्रम् अन्येषां सर्वेषामपेक्षया अत्यन्तम्, अधिकशोभावहं भवति

[१]भगवद्गीता १६/१९,२०

[२]उत्तररामचरितम् २/१

[३]स्कन्दपुराणम् ६.१.२१.६७

[४]भर्तृहरेः नीतिशतकम्

[५]नारायणीयं दशक 92 - कर्ममिश्रभक्तिः


ISSN : 2249-538X

सुभाषितकारः इत्थं वदति -

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो, ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः। अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता, **सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्** ॥[१]

**कः पूज्यो विद्वद्भिः ? स्वभावतः सर्वदा विनीतो यः** ॥२६ ॥

अत्र शङ्कराचार्याः इत्थं नावदन् यत् विद्वान् सर्वत्र पूज्यते इति, प्रत्युत विद्वद्भिः कः पूज्यते इति । स्वभावतः यः विनीतः स एव विद्वद्भिः पूज्यते इति । किञ्च यः विनीत इव कालानुगुणम् अभिनीते/परिवर्तते सः न अभिप्रेतार्थः । बहवो हि तादृशाः एव लोके दृश्यन्ते । येषाम् स्वभाव एव विनीतत्वम् अस्ति स एव विद्वद्भिः पूज्यते इत्यर्थः ।

**कः कुलकमलदिनेशः ? सति गुणविभवेऽपि यो नम्रः ।**

कमलस्य सूर्य इव कः समग्रस्य वंशस्य प्रकाशने कारणीभूतः भवति ? बहवो हि स्वजीवने बहु किमपि साधयन्ति येन तदीयः वंशः कीर्तिमान् भवति इति वयं कदाचित् चिन्तयेम । किन्तु तथा नास्ति । गुणनिधिः चेदपि यः नम्रः विनयी भवति स एव वस्तुतः वंशस्य यशः वर्धयति । एतद्विरुद्धगुणाः भवन्ति भगवद्गीतायाम् उक्ताः "दम्भो दर्पोऽभिमानश्च...[२]" इति पद्ये । एते दम्भादयः नम्रतायाः विरुद्धगुणाः । एते आसुरीगुणाः इति गीतायाम् उक्तम् । दम्भादीनाम् आश्रयस्थानम् वैदुष्यादिकम् अस्ति । दम्भादयः दुर्गुणाः कस्मिंश्चित् जने न सन्ति इति ऊहामहे , केवलं सद्गुणाः एव सन्ति चेति । तथापि नम्रता नास्ति चेत् तदीयः वंशः न प्रकाशते । अतः सत्यपि सद्गुणविभवे य नम्रः भवति सः वंशस्य कीर्तिं वर्धयति इति शङ्करभगवत्पादाः न्यरूपयन् ।

**कं न स्पृशति विपत्तिः ? प्रवृद्धवचनानुवर्तिनं दान्तम्** ॥२८ ॥

विपत्तिं को वा इच्छति ? किन्तु बहवः वृद्धवचनं तिरस्कुर्वन्ति । वृद्धाः वस्तुतः शरीरेण दुर्बलाः स्युः नाम । किन्तु तेषाम् अनुभवाः नूनं यूनाम् अननुभविनां कार्ये जनिष्यमाणां विपत्तिं निवारयन्ति । ये अत्यन्तम् अनुभविनः ते प्रवृद्धाः । तेषां वचनम् अनुसरामः चेत् निश्चयेन विपत्तयः न स्पृशन्ति इति भगवत्पादाः कथयन्ति ।

**कस्मै स्पृहयति कमला ? त्वनलसचित्ताय नीतिवृत्ताय।** ॥२९ ॥

कमला इत्युक्ते लक्ष्मीः इत्यर्थः । सा कमिच्छति ? यः आलस्यविहीनः अस्ति, इत्युक्ते यः सक्रियः यश्च नीतिमार्गे चलति तमिच्छति इत्यर्थः । अत एव सुभाषितकारः वदति –

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥[३] इति ।

**कः परिहार्यो देशः ? पिशुनयुतो लुब्धभूपश्च** ॥ ३० ॥

परेषां क्लेशदं कुर्यान्न पैशुन्यं प्रभोः प्रियम् ।
पैशुन्येन गतौ राहोश्चन्द्रार्कौ भक्षणीयताम् ॥ ३० ॥ काव्यमालायाम् उक्तम् ।

महाभारते –

आक्रोशं परिवादं च पैशुन्यं च विवर्जयेत् ॥ इत्युक्तम् ।

अतः पैशुन्यं सर्वथा सद्गुणो न। तस्मात् कारणात् यत्र जनाः पैशुन्यं कुर्वन्ति तद्देशः त्याज्यः इति

[१]भर्तृहरेः नीतिशतकम्
[२]भगवद्गीता १६/४
[३]भर्तृहरेः नीतिशतकम्

आचार्यवचनम् अत्र प्रादर्शि ।

**को हि न वाच्यः सुधिया ? परदोषश्चानृतं तद्वत्** ॥३५ ॥

मनुष्यस्य प्रायः अयं सामान्यः गुणः यत् आत्मप्रशंशा, परदोषस्य व्यक्तीकरणं चेति । एतन्न कर्तव्यम् इति भगवत्पादाः कथयन्ति पद्येऽस्मिन् । वस्तुतः एतद्विपरीतं कर्तव्यम् । इत्युक्ते परगुणकीर्तनं कर्तव्यम् इति । किन्तु तादृशाः लोके विरलां इति सुभाषितकारो वदति –

परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विलसन्तो सन्ति सन्तः कियन्तः ॥[1] इति ।

अत एव आत्मनि दोषेषु अगणितेषु सत्स्वपि गुणान् आरोपयन्तः परेषु च दोषं पश्यन्तः जनाः लोके ये भवन्ति तेषां निन्दा क्रियते -

परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै । विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते ॥ इति ।

## उपसंहारः

इत्थं प्रश्नोत्तररत्नमालिका शिक्षाक्षेत्रे छात्रस्य शिक्षकस्य च सर्वाङ्गिकसमुन्नतये अपेक्षितान् उपदेशान् प्रयच्छन्ती छात्रशिक्षकयोः व्यक्तित्वस्य समग्रविकासस्य कारणीभूता भवतीति विवक्षामः ।

## परामृष्टाः ग्रन्थाः


१. ब्रह्मसूत्रशाङ्करभाष्यम्
२. भगवद्गीता
३. नीतिशतकम्
४. सुभाषितरत्नभाण्डागारः
५. ईशावास्योपनिषद्
६. छान्दोग्योपनिषत्


[1]भर्तृहरेः नीतिशतकम्

# कन्फ्यूशियस : शिक्षादर्शनं युगानुसारं सम्बद्धता च

डा. दयानिधि शर्मा*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– संसारस्य महापुरुषाणां जीवनं सर्वदा लोकहिताय समर्पितं वर्तते। तेषां जीवनस्य अनुभवाः दार्शनिकसिद्धान्तेषु परिवर्तिताः भवन्ति। एतस्य मुख्यं कारणमिदमस्ति यत् जीवनस्य अनुभवाः तत्त्वबोधं जनयन्ति। तत्त्वबोधस्य सूत्राणि कालान्तरे विशिष्टं दर्शनं प्रकटयन्ति। चीनराष्ट्रस्य राजनैतिकं वातावरणम् अनुभूय तत्र विद्यमानां भ्रष्टाचारस्य स्थितिं विलोक्य कन्फ्यूशियसवर्येण सर्वजनहिताय स्वस्य शिक्षादर्शनं सर्वेषां पुरतः आनीतम्। यदा संसारे कस्यापि विचारस्य प्रसङ्गे बहूनां जनानां स्वीकृतिः (Acceptance) भवति, तदा 'दर्शनस्य आरम्भः' सञ्जायते। तत् दर्शनं शनैः शनैः जनान् सन्मार्गं प्रति नेतुं प्रेरयितुं च सर्वदा उपकरोति। कन्फ्यूशियसवर्यस्य विचाराः तस्य अनन्तरं शिक्षायाः क्षेत्रे अध्येतृणां कृते, विचारकाणां कृते च महत्वपूर्णाः वर्तन्ते। कालान्तरे कश्चन 'कन्फ्यूशियसवादः' इति नाम्ना अपि तस्य शिक्षादर्शनस्य महान् प्रचारः सञ्जातः।*
***कूटशब्दाः*** *– अभ्यासः, सर्वोत्तमः, पुत्रः, नैतिकम् आचरणम्, परोपकारः, श्रवणं विस्मरणं च, दर्शनं स्मरणं च, उत्कृष्टम् अध्ययनं, सर्वाधिकं कठिनं ज्ञानम्, अनुभवस्य मार्गः, आत्मपरीक्षणं च।*

**परिचयः**

आधुनिककाले शिक्षायाः दार्शनिकेषु दार्शनिकः कन्फ्यूशियसवर्यः अन्यतमः वर्तते। एतस्य जन्म 551 ई.पू. काले सञ्जातम्। चीनराष्ट्रे जन्मस्थानं 'कु-फू' इति विद्यते। पितुः नाम 'शु लियाङ्ग हे' इति वर्तते। 'मास्टर कोङ्ग' इति नाम्ना अपि कन्फ्यूशियसवर्यः प्रसिद्धः विद्यते। अयं 'कन्फ्यूशियसवादस्य' संस्थापकः प्रतिष्ठाता वा वर्तते। बाल्यकाले एव पिता दिवङ्गतः। निर्धनताया आश्रये कष्टपूर्णं जीवनं कन्फ्यूशियसमहोदयेन यापितम् आसीत्। तस्य उपदेशानां महत्त्वपूर्णविषयाणां च कश्चन सङ्ग्रहः विद्यते 'द एनालेक्ट्स' इति। तदनुसारं बाल्यकाले निर्धनावस्थायां लघु लघु कार्याणि कृत्वा जीवनं यापितम्। 19 तमे वर्षे (आयुषः) 'किगुआन' इत्यनया सह विवाहं कृत्वा जीवनस्य कठिनपरिस्थितौ अपि अयं जनः बहु विनीतः सहनशक्तिसम्पन्नश्च आसीत्। जीवनस्य अग्रिमेषु वर्षेषु बहूनि राजनैतिकपदानि प्राप्तानि। कालान्तरे चीनराष्ट्रे 12 वर्षाणि यावत् यात्रा कृता। तदानीं स्वस्य उपदेशानां प्रयोगः तेन सम्पूर्णचीनराष्ट्रे सामाजिकं सामञ्जस्यं सौमनस्यं च स्थापयितुं विहितः। एतस्य महापुरुषस्य मृत्योः समयः 479 ई.पू. काले मतः।

**शिक्षादर्शनम्**

शिक्षादर्शनं शैक्षिकदर्शनं वा बहूनां प्रश्नानां समाधानं वक्ति। एतादृशाः प्रश्नाः दर्शनं सङ्केतयन्ति। दर्शनमेव शिक्षायाः उद्देश्यानि अपि स्पष्टयति। अधोलिखितानां प्रश्नानां समाधानं वयं दर्शनशास्त्रे पश्यामः। यथा;

i. वयं शिक्षां किमर्थं दद्मः ? (Why do we educate people ?)
ii. नैतिकं किमस्ति ? (What is moral ?)
iii. शिक्षायाः आदर्शरूपं किमस्ति ? (What is the educational ideal ?)
iv. ज्ञानं किमस्ति ? (What is knowledge ?)
v. सत्यं किमस्ति ? (What is truth ?)

***सम्पर्कसूत्रम्** - 9001473681, Email- dnsedu2015@gmail.com

vi. अस्माभिः संसारः कथं ज्ञातव्यः ? (How should we know the world ?)
vii. प्राकृतिकी वास्तविकता का ? (What is natural reality ?)
viii. अहं कः अस्मि ? (Who am I ?)
ix. शिक्षा मानवतां कथं प्रभावयति ? (How does education affect humanity ?)

विद्यालयेषु मानवीयगुणानां दृष्ट्या शिक्षा कथं कार्यं करोति ? अस्मिन् सन्दर्भे अध्यापकानां किं कर्तव्यं वर्तते ? दर्शनमेव स्पष्टयति यत् 'शिक्षायाः प्रसङ्गे कीदृशं चिन्तनम् आवश्यकम् अस्ति ? नूतनां सूचनां वयं कथं अवगच्छामः ? एतत् सर्वं दर्शनमेव वक्ति । दर्शनमेव शिक्षां दिशति । दर्शनं विना शिक्षायाः उद्देश्यानि निश्चेतुं न शक्नुमः ।

कन्फ्यूशियसवर्यः शिक्षायाः तात्पर्यं 'विलुप्तस्य हृदयस्य अन्वेषणमिति' स्वीकरोति । जनानां व्यक्तित्वे परिमार्जनं संशोधनं च परमावश्यकं विद्यते । तत् सर्वं कर्तुमेव शिक्षायाः प्रक्रिया महत्वपूर्णा विद्यते । एतस्य महापुरुषस्य जीवनं शैक्षिकसिद्धान्तानां साक्षात् उदाहरणम् आसीत् । अधुना अपि ते सिद्धान्ताः नैतिकदृष्ट्या राजनैतिकदृष्ट्या धार्मिकदृष्ट्या च उत्तमाः स्वीकारयोग्याः च वर्तन्ते । शिक्षायाः विशेषतासु अत्र उल्लेखनीयाः निम्नलिखिताः सन्ति ;

क सामाजिकं सामञ्जस्यम्
ख परम्पराणां परिपालनम्
ग मनुष्याः मूलतः सद्गुणानाम् 'आकरः' इति वर्तन्ते ।
घ सामाजिकसम्बन्धेषु कश्चन व्यवस्थितः पदानुक्रमः ।
ङ सर्वेषां हिताय यत्नशीलता ।
च दयालवः सज्जनाश्च (रेन) मनुष्याः ।
छ सज्जनानां षड्कलाः (अनुष्ठानं, सङ्गीतं, शरविद्या, रथयात्रा, सुलेखलेखनं, गणितं च)

चीनराष्ट्रस्य शिक्षायाः क्षेत्रे उपयुक्ताः कलाः, प्रामुख्येन अभ्यासयोग्याः गतिविधयः (Practice Based Activities) सन्ति इति अङ्गीकृतम् । अनेन सह 'धर्मनिरपेक्षवादः' शिक्षायाः प्रमुखं सोपानं भवेत् । धर्मनिरपेक्षवादः सर्वधर्मिणां विकासाय सदा चिन्तयति । प्रत्येकं धर्मः राष्ट्रे आदरयोग्यः वर्तते । चीनराष्ट्रस्य मन्दारिन् भाषायां अयं वादः 'रू जिया' इति नाम्ना प्रसिद्धो वर्तते ।

**अध्यापकानां छात्राणां च वर्गाः**

कन्फ्यूशियसवर्येण अध्यापकानां छात्राणां च त्रयः वर्गाः निर्धारिताः । एतेषां वर्गाणां क्रमः एवमस्ति ;

1 राज्यसेवारताः बुद्धिजीविनः ।
2 'रू' शिक्षकाः ये षड्-कलासु निपुणाः भवन्ति । एतासां कलानां शिक्षणे येषां नैपुण्यं विद्यते ।
3 कन्फ्यूशियसवर्यस्य अनुयायिनः, ये सम्यक् रीत्या ग्रन्थानाम् अध्ययनं कृतवन्तः ।

उक्ताः त्रयः प्रकाराः स्पष्टयन्ति यत् शिक्षकाः छात्राश्च विवेकपूर्वकं समाजस्य विकासाय कार्यं कुर्युः । तेषाम् उपस्थितिः सर्वदा सामाजिकसद्भावं रक्षितुम् परमावश्यकी वर्तते ।

 ISSN : 2249-538X

विविधरूपेण कन्फ्यूशियसमहोदयस्य उपदेशानां प्रचारकरणमपि तेषामेव कार्यं विद्यते। राष्ट्रे यत्र तत्र समुत्पन्नं वैमनस्यं सर्वदा दूरीकरणीयमिति परस्परं मिलित्वा कार्यसम्पादनस्य आवश्यकता वर्तते। राष्ट्रे नागरिकाः उत्तमाः व्यवहारयोग्याश्च भवेयुः, इत्यपि तेषां कृते बोधनीयम्।

**नैतिकमूल्यानि**

कन्फ्यूशियसमहोदयस्य शिक्षायां नैतिकमूल्यानि विशिष्टानि सन्ति। नैतिकमूल्यं विना सः शिक्षाम् अपूर्णां मत्वा नाङ्गीकरोति। जीवनस्य विकासाय नैतिकमूल्यानि महत्त्वपूर्णानि सन्ति। एतेषां संवर्धनं प्रत्येकं जनस्य नागरिकस्य वा जीवने अवश्यमेव स्यात्। एतानि नैतिकमूल्यानि विशिष्टक्षमताम् उत्पादयन्ति। इयं क्षमता आत्मगौरवं प्रति मनुष्यं नयति। कन्फ्यूशियसमहोदयः अधोलिखितानि मानवमूल्यानां विकासार्थम् उद्घोषं करोति;

1 रेन् (मानवता)
2 यी (समुचितं रूपम्)
3 ली (अनुष्ठानम् / शिष्टाचारः)
4 चेंद् (सत्यनिष्ठा)
5 छिन् (वैयक्तिकं कर्तव्यपरायणस्य रूपम्)
6 जियाओ (परिवारस्य / राज्यस्य आधारः)
7 झोंग योंग (सामान्यः व्यवहारः)

**आधुनिककाले सम्बद्धता**

आधुनिकयुगे यत्र अध्ययनस्य विस्तारः सञ्जातः तत्र एव छात्राणां कृते उपयुक्तं वातावरणमपि नास्ति। ज्ञानं भारः विद्यते। अनुप्रयोगाणां न्यूनता दृश्यते। कौशलानाम् अभावः दृश्यते। तन्यतायाः (stress) प्रभाववशात् छात्राः पठने अरुचिं प्रदर्शयन्ति। भविष्यं प्रति चिन्ताकुलाः ते नानारोगैः ग्रस्ताः अशान्ताश्च भवन्ति। ज्ञानस्य समुचितरीत्या उपयोगः करणीयः। कन्फ्यूशियसवर्यः वदति यत् ज्ञानं नास्ति चेत् अज्ञानतायाः स्वीकरणे का हानिः ? उत्तमः शिक्षार्थी विवेकशीलो भवति;

"The essence of knowledge is, having it, to apply it; not having it, to confess your ignorance."

पुरातनं ज्ञानं विचार्य सर्वदा नूतनं ज्ञानं प्राप्तव्यम्। अनेन अन्येषां कृते शिक्षकरूपेण पाठयितुं शक्नुमः। अस्मिन् विषये कन्फ्यूशियसवर्यः अपि एवमेव वदति;

"Acquire new knowledge whilst thinking over the old, and you may become a teacher of others."

यदा कदा अपि सुयोग्यः जनः मिलति तर्हि सः सम्माननीयः वर्तते। तादृशः जनः समाजे दृश्यते। कदाचित् एवं भवति। तदानीं सः जनः अनुकरणीयः, सः अपि उत्तमं स्थानं प्राप्नोति इति कन्फ्यूशियसवर्यः सङ्केतयति;

When you see a worthy person,
endeavor to emulate him.
When you see an unworthy person,
then examine your inner self.

प्राविधिकयुगे कृत्रिमबुद्धिमत्तायाः काले च एतादृशाः उत्तमाः विचाराः शिक्षायाः क्षेत्रे आत्मबोधं जनयन्ति । सर्वे छात्राः, शिक्षकाः प्रशासकाश्च किं करणीयं, किं न करणीयमिति आत्मबुद्ध्या विचारयन्ति । एतादृशाः महापुरुषाः शिक्षायाः क्षेत्रे सम्पूर्णं ज्ञानसमाजं प्रभावयन्ति ।

**सन्दर्भः (Reference)**


1. Andrew P. Johnson (2014) : Defining your Educational Philosophy, Theories of Learning and Human Development, www.academia.edu
2. Bertrand Russell (2022) : History of Western Philosophy, special Indian Edition, Routledge Publication. www.academia.edu
3. https://www.britannica.com/biography/Confucius dt : 26.5.2026, 17.38 pm
4. https://ancientmysteries.org/confucius/ dt : 26.5.2026, 17.41 pm
5. https://plato.stanford.edu/entries/confucius/ dt : 26.5.2026, 17.43 pm
6. https://www.worldhistory.org/Confucius/ dt : 26.5.2026, 17.45 pm
7. https://www.learnreligions.com/confucianism-the-thinking-of-confucius-117840 dt. 26.5.2026, 17.50 pm


**भाव्यध्ययनम् (Further Study)**


1. Anna Kwek (2010) : Chinese Tourists and Confucianism. www.academia.edu
2. Canglong Wang (2021) : New Confucianism : A Critical Examination. Journal of Chinese Philosophy. www.academia.edu
3. Elsten David (2021 ed.) : Dao companion to contemporary Confucian philosophy, Cham Springer. www.academia.edu
4. Eric Bronson (2021) : Confucianism : Family Harmony : chapter from Enchanted Wisdom : Enduring Ideas of World Religioner. www.academia.edu
5. Galia Patt-Shamir (2009) : Learning and women : Confucianism Revisited, Journal of Chinese Philosophy. www.academia.edu
6. Lionel Jensen (2004) : New Confucianism : Journal of Chinese Philosophy. www.academia.edu
7. Makchan, John (2003 ed.) : New Confucianism : A Critical Examination. New York, Palgrave www.academia.edu
8. Manyul Im (2012) : Goldin, Paul R., Confucianism, Dao-a Journal of Comparative Philosophy www.academia.edu
9. Mateusz Stepien (2012 ed.) : Confucianism 2.0, Is the 21st century the Age of Asia ? www.academia.edu
10. Rechard Shusterman (2009) : Pragmatist Aesthetics and Confucianism. A Journal of Aesthetic Education. www.academia.edu
11. Syaiful HALIM (2003) : Daoism and Confucianism in Indonesia. Ideology Journal of Arts and Social Science. www.academia.edu


 ISSN : 2249-538X

# इच्छा

डा. अरविन्दकुमारसोमदत्त :*
सहायकाचार्यः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– मानवजीवने इच्छायाः सर्वोपरि स्थानं वर्तते । संसारस्य समस्त-गतिविधीनां, अविष्काराणां, प्रगतेः च मूलकारणं इच्छैव अस्ति । यदा मनुष्यस्य मनसि किमपि प्राप्तुं वा कर्तुं वा तीव्र-अभिलाषा जायते, तदैव सः कर्मणि प्रवृत्तः भवति । उक्तं च वर्तते— "इच्छा सर्वस्य मूलम्" । आदिमानवात् आरभ्य आधुनिककालपर्यन्तं यावत् अपि विकासः अभवत्, सः सर्वः मानवस्य इच्छायाः एव परिणामः अस्ति ।*

***कूटशब्दाः*** *– इच्छायाः शाब्दिकव्युत्पत्तिः अर्थश्च, इच्छायाः स्वरूपं मनोविज्ञानं च, दार्शनिकदृष्ट्या इच्छायाः स्वरूपम्, उन्नतेः कारणम्: इच्छायाः सकारात्मकः पक्षः, अशान्तेः मूलम्: इच्छायाः नकारात्मकः पक्षः, इच्छा-आवश्यकतयोः भेदः, इच्छायाः प्रबन्धनं समाधानं च, इच्छायाः प्रकाराः, इच्छायाः सदुपयोगः नियन्त्रणम् च*

**Desire' इति शब्दस्य व्युत्पत्तिः** (Etymology of 'Desire')

**मूलम्** (Origin) :

आङ्ग्लभाषायाः 'Desire' इति शब्दः लैटिन-भाषायाः 'Dēsīderāre' इति पदात् निष्पन्नः। अस्य शब्दस्य मूलम् अत्यन्तं काव्यमयं नक्षत्राधारितं च वर्तते ।

**शब्द-विच्छेदः** (Breakdown) :

१. De- (अप/तः) : एषः उपसर्गः 'पृथक्त्वं' वा 'आरम्भस्थानं' सूचयति ।
२. Sidus / Sideris (नक्षत्रम्) : अस्य अर्थः 'आकाशस्थं नक्षत्रम्' अथवा 'नक्षत्रमण्डलम्' इति ।

**ऐतिहासिकी व्याख्या** (Historical Explanation) :

प्राचीनकाले रोम-नगरे (Ancient Rome) अस्य शब्दस्य प्रयोगः ज्योतिषशास्त्रे वा नौकायान-शास्त्रे अभवत् । 'De Sidere' इत्यस्य अर्थः 'नक्षत्रेभ्यः' इति ।

**तदा अस्य भावः आसीत्— "नक्षत्राणां कृते प्रतीक्षा"** ।

यदा कश्चन नाविकः स्वमार्गं प्राप्तुं अनुकूल-नक्षत्रस्य प्रतीक्षां करोति, अथवा यदा कोऽपि स्वभाग्यस्य कृते आकाशात् कस्यचित् शुभ-सङ्केतस्य प्रतीक्षां करोति, तदा सः 'Desire' (नक्षत्र-प्रतीक्षा) इति उच्यते स्म ।

**संस्कृत-दृष्ट्या तुलना** (Comparison with Sanskrit) :

यत्र आङ्ग्लशब्दे 'इच्छा' बहिः (नक्षत्रेभ्यः) आगच्छति, तत्र संस्कृते इच्छा अन्तः (मनसः) उत्पद्यते । यथा—

- इच्छा : 'इष्' धातोः (गतौ, अन्वेषणे च) । अर्थात् मनसः गतिः ।
- तृष्णा : 'तृष्' धातोः (पिपासायाम्) । अर्थात् अन्तःस्थितः दाहः ।

**भूमिका :**

*सम्पर्कसूत्रम् - 9059661960, Email- aravind69696@gmail.com

मानवजीवने इच्छायाः अथवा कामस्य महत्त्वम् अनन्यसाधारणं वर्तते । 'काम' इति शब्दः संस्कृतसाहित्ये विस्तृतार्थे प्रयुज्यते । सामान्यतः विषयेषु आसक्तिः 'कामः' इति उच्यते । अस्माकं शास्त्रेषु चतुर्विधपुरुषार्थेषु (धर्म-अर्थ-काम-मोक्ष) कामः तृतीयः पुरुषार्थः मन्यते ।

**इच्छायाः उत्पत्तिः प्रभावश्च :**

श्रीमद्भगवद्गीतायाम् उक्तं यत् विषयाणां ध्यानेन सङ्गः जायते, सङ्गात् च कामः उत्पद्यते— "ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते । सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥" (Bhagavad Gita 2.62) यदा मनुष्यस्य इच्छा पूर्णा न भवति, तदा क्रोधः उत्पद्यते । एवं कामः एव सर्वेषां पापानां मूलकारणम् अपि भवति ।

**कामः अनल इव** (Desire is like Fire) :

इच्छा कदापि शान्ता न भवति । यथा अग्नौ घृतं क्षिप्त्वा अग्निः अधिकं प्रज्वलति, तथैव उपभोगेन इच्छा वर्धते, न तु शाम्यति । मनुस्मृतौ उक्तम्— "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥" (Manu Smriti)

**इच्छायाः नियन्त्रणम् :**

यदि इच्छा धर्मविरुद्धा न स्यात्, तर्हि सा श्रेष्ठा । भगवता कृष्णेन उक्तं यत् "धर्माविरुद्धो भूतेषु कामोऽस्मि" इति । मनुष्यः यदि इच्छायाः दासः भवति, तर्हि सः दुःखं प्राप्नोति । परन्तु यः इच्छां वशीकरोति, सः एव शान्तिं लभते ।

**इच्छायाः नियन्त्रणम्** (Control of Desire)

१. **भूमिका** (Introduction) :

मानवमनः तरङ्गैः पूर्णः समुद्रः इव अस्ति, यत्र इच्छाः सततं उत्पद्यन्ते । यदि एतासां इच्छानां नियन्त्रणं न भवति, तर्हि मनुष्यः स्वमार्गात् भ्रष्टः भवति । अतः सुखशान्त्यै इच्छायाः नियन्त्रणम् अनिवार्यम् अस्ति ।

२. **नियन्त्रणस्य उपायाः** (Methods of Control) :

- **विवेकशक्तिः** (Power of Discrimination) :
  मनुष्यः बुद्ध्या विचारयेत् यत् का इच्छा अनन्ता अस्ति का च आवश्यकी । **कठोपनिषदि** उक्तं यत् धीरः पुरुषः 'प्रेयः' (Preyas - क्षणिकसुखम्) त्यक्त्वा 'श्रेयः' (Shreyas - कल्याणकारी मार्गः) चिनोति ।
- **अभ्यासः वैराग्यं च** (Practice and Detachment) :
  भगवान् कृष्णः गीतायां वदति— "**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
  **अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**" (Gita 6.35)
  निरन्तरं अभ्यासेन (Meditation) विषयाणां प्रति वैराग्येण च मनः वशीकर्तुं शक्यते ।
- **इन्द्रियसंयमः** (Sense Control) :
  इच्छाः इन्द्रियैः मनसि प्रविशन्ति । अतः इन्द्रियाणि वशे स्थापनीयानि । यथा एकः कूर्मः (Tortoise) स्वअङ्गानि सङ्कोचयति, तथैव योगी स्वइन्द्रियाणि विषयेभ्यः निवर्तयति (Gita 2.58) ।


ISSN : 2249-538X

– **१. इच्छायाः मनोविज्ञानम्** (Psychology of Desire)

संस्कृतसाहित्ये इच्छा **'बीज'** रूपेण वर्णिता अस्ति। यथा अल्पं बीजं विशालं वृक्षं जनयति, तथा एकैव लघु-इच्छा सम्पूर्णं जीवनं ग्रसितुं शक्नोति। अतः मनसः नियन्त्रणाय **'प्रतिपक्षभावनम्'** (Thinking the opposite) आवश्यकम्। यदा मनसि भोगस्य इच्छा जागर्ति, तदा तस्य दुष्परिणामानां चिन्तनं करणीयम्।

– **२. बुद्धेः भूमिका** (The Role of Intellect)

मनः चञ्चलं वर्तते, किन्तु बुद्धिः निश्चयात्मिका अस्ति। **श्रीमद्भगवद्गीतायाः** अनुसारम्:

**"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**
**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥"**

इन्द्रियेभ्यः श्रेष्ठं मनः, मनसः श्रेष्ठा बुद्धिः। अतः बुद्ध्या मनः नियन्त्रणीयम्। यदा बुद्धिः जागृता भवति, तदा इच्छाः स्वयं शिथिलाः भवन्ति।

– **३. सन्तोषस्य महत्त्वम्** (Importance of Contentment)

– इच्छानां अन्तः उपभोगेन न, अपितु **सन्तोषेण** भवति। **चाणक्यनीतिशास्त्रे** उक्तं यत्:

– "सन्तोषात् परं सुखं नास्ति" (There is no happiness greater than contentment). यथा अग्निः इन्धनेन न शाम्यति, तथा कामः उपभोगेन न शाम्यति। केवलं 'अलम्' (Enough) इति भावः एव इच्छां शमयति।

– **४. योगशास्त्रे उपायः** (Solution in Yoga Shastra)

– **पतञ्जलि-योगसूत्रे** इच्छायाः नियन्त्रणाय **'प्रत्याहारः'** वर्णितः।

– **प्रत्याहारः**: इन्द्रियाणाम् अन्तःमुखीकरणम्। यदा वयं बाह्यजगतः सकाशात् दृष्टिं हृत्वा अन्तः पश्यामः, तदा इच्छानां कोलाहलः शान्तः भवति।

– **५. निष्काम-कर्म** (Selfless Action)

– इच्छायाः पूर्णत्यागः न अपेक्षितः, अपितु **'फलस्य इच्छायाः'** त्यागः करणीयः। यदा वयं केवलं स्वार्थाय कार्यं न कुर्मः, तदा इच्छा अस्मान् बन्धने न पातयति। एषः एव **'स्थितप्रज्ञ'** भावः उच्यते।

**इच्छायाः नियन्त्रणस्य लाभाः** (Benefits of Controlling Desire)

संस्कृतसाहित्ये दर्शनशास्त्रे च इच्छायाः (कामस्य) निग्रहेण के लाभाः भवन्ति, ते अत्र विस्तरेण वर्णिताः सन्ति:

१. **परमशान्तिः** (Supreme Peace)

इच्छानां दासवत् अनुसरणेन मनः सदा उद्विग्नं भवति। यदा मनुष्यः इच्छाः नियन्त्रयति, तदा सः आन्तरिकं सुखं प्राप्नोति।

**"विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।**

**निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥" (भगवद्गीता २.७१)**

**अर्थ :** यः पुरुषः सर्वाः इच्छाः त्यक्त्वा निर्ममः निरहङ्कारः च भूत्वा विचरति, स एव शान्तिं लभते ।

२. **मानसिकशक्तिः एकाग्रता च** (Mental Strength and Focus)

इच्छाः मनः विकीर्णं (scattered) कुर्वन्ति । नियन्त्रणेन मनसः शक्तिः सञ्चिता भवति, येन कार्येषु एकाग्रता वर्धते । एकाग्रचित्तः मनुष्यः जीवने किमपि असाध्यं कार्यं साधयितुं शक्नोति ।

३. **बुद्धेः तीक्ष्णता** (Clarity of Intellect)

कामासक्तः मनुष्यः विवेकं प्राप्तुं न शक्नोति । इच्छायाः नियन्त्रणेन बुद्धिः निर्मला भवति, येन उचित-अनुचितयोः निर्णयः सुलभः भवति ।

४. **स्वातन्त्र्यम्** (True Freedom)

यः इच्छानां वशः अस्ति, सः परतः (slave) अस्ति । यः इच्छाः वशीकरोति, सः एव 'स्वराट्' अर्थात् यथार्थतः स्वतन्त्रः राजा अस्ति ।

**"आशाया ये दासास्ते दासाः सर्वलोकस्य ।**
**आशा येषां दासी तेषां दासायते लोकः ॥"**

**अर्थ :** ये आशायाः (इच्छायाः) दासाः सन्ति, ते संसारस्य दासाः । परं येषां कृते आशा एव दासी अस्ति, तेषां कृते सम्पूर्णः संसारः दासः भवति ।

**सारांशः :** इच्छायाः नियन्त्रणेन मनुष्यः **स्थितप्रज्ञः** भवति, दुःखेषु न उद्विग्नः भवति, सुखेषु च निःस्पृहः तिष्ठति । एषा एव मानवजीवनस्य श्रेष्ठा अवस्था अस्ति ।


ISSN : 2249-538X

# शिक्षायाम् अधिगमस्य मनोवैज्ञानिकसम्प्रत्ययः

डा. रामजियावन प्रजापतिः*
सहायकाचार्यः(सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, श्रृङ्गेरी

***लेखसारः*** *– अधिगमः नाम ज्ञानार्जनम् । अधिगमः एका विशिष्टा शैक्षिकप्रक्रिया भवति । शिक्षणप्रक्रियायाम् अधिगमप्राप्तिः एव शिक्षणस्य मूलकेन्द्रं भवति । यदि कस्यचित् प्रकरणस्य विषयस्य वा अधिगमः न भवति तर्हि शिक्षणं मूल्यहीनं भवति । अर्थात् अधिगमः ज्ञानार्जनस्य प्रतिफलम् इति मन्यते । अधिगमे शिक्षणेन, प्रशिक्षणेन, अनुभवेन अभ्यासेन च नूतनं ज्ञानं, कौशलं च विकसति । तथैव चिन्तनक्षमताः अपि वर्धन्ते । अर्थात् अनुभवेन, अभ्यासेन प्रशिक्षणेन च जीवव्यवहारे सापेक्षरूपेण जायमानः शाश्वतपरिणामः अधिगमः भवति । अधिगमः केवलं विद्यालयेषु पाठशालासु एव न भवति अपितु विविधकोणेभ्यः, विविधगुरुभ्यः, विविधसंदर्भेभ्यः, पुस्तकेभ्यः जनेभ्यश्च भवति । शास्त्रियसाहित्यानाम् अनुशीलनं विना अधिगमसिद्धान्तानां अभिज्ञानं न भवितुमहर्ति । अधिगमप्रक्रियायाः साफल्यतायै भारतीयमनीषिणाम् आचरणानाम् अनुसरणम् आवश्यकं भवति ।*

***कूटशब्दाः*** *– अनुभवजन्याधिगमः (Experiential Learning), संवेदी-अधिगमः (Sensory Learning), संवादात्मकाधिगमः (Interactive Learning, व्यक्तिगताधिगमः (Personalized Learning), समूहाधिगमः (Group Learning), सतताधिगमः (Life Long Learning), सङ्कल्पनात्मकाधिगमः (Conceptual Learning) अभिप्रेरणात्मकाधिगमः (Motivational Learning), सर्जनात्मकाधिगमः (Creative Learning), प्रायोजनात्मकाधिगमः (Projective Based Learning), अधिगमे अनुकरणं (Learning by Imitation & Modelling) अधिगमस्य प्रयत्नक्रियाशीलताः (Learning Through Try & Effort), संस्कृतशिक्षायां श्रद्धायाः सिद्धान्तः, अधिगमस्य अभ्यासवैराग्यसिद्धान्तः, अधिगमस्य सामाजिकसम्बन्धसिद्धान्तः (Learning through Society and Relationships) अधिगमस्य आत्मचिंतनसिद्धान्तः समग्रदृष्टेः सिद्धान्तः (Learning through Self-Reflection Gestalt Theory), अधिगमस्य स्वाध्यायसिद्धान्तः ( Self- Study), कर्तव्यपरायणतायाः सिद्धान्तः, योगसाधनेन अधिगमः (Learning by Yoga).*

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

## अधिगमस्य सम्प्रत्ययः-

अधिगमः नाम ज्ञानार्जनम् । पूर्वज्ञानेन सह नूतनज्ञानस्य सम्पादनं शिक्षणस्य मुख्योद्देश्यं भवति । शिक्षायाम् अधिगमः अत्यन्तं महत्त्वपूर्णं स्थानं भजते । शिक्षणप्रक्रियायाम् अधिगमप्राप्तिः एव शिक्षणस्य मूलकेन्द्रं भवति । यदि कस्यचित् प्रकरणस्य विषयस्य वा अधिगमः न भवति तर्हि शिक्षणं मूल्यहीनं भवति । अतः अस्मिन् क्रमे अधिगम इति पदस्य कः अर्थः भावश्च भवति इति विषये चिन्तनम् आवश्यकं भवति । अर्थात् अधिगमः ज्ञानार्जनस्य प्रतिफलम् इति मन्यते । अर्थात् सङ्क्षेपेण वक्तुं शक्नुमः यत्- अधिगमः नाम व्यवहारपरिवर्तनम् इति ।

**अधिगमस्य पाश्चात्यविदुषां परिभाषाः (Definitions of Learning by Western Educationist)-**

*सम्पर्कसूत्रम् - 8104015977,8551084832, Email - ramjiyavan@sanskrit.ac.in

**क्रो एण्ड क्रो**-"अधिगमे प्राकृतिकाभिवृत्तीनाम् अर्जनम् (Adopting Natural Aptitudes) एव अधिगमः।"

**स्किनर**-"अधिगमः व्यवहारे उत्तरोत्तरसामञ्जस्यप्रक्रिया वर्तते।"

**उपर्युक्तपरिभाषाणाम् अध्ययनेन अधिगमप्रक्रियायाः मुख्यांशाः महत्त्वपूर्णाः विद्यन्ते-**

- अधिगमः व्यवहारपरिवर्तनस्य विशिष्टा प्रक्रिया वर्तते।
- अधिगमः शिक्षणेन प्रशिक्षणेन अनुभवेन च व्यवहारे शाश्वतपरिवर्तनम् आनयति।
- अधिगमः विविधजनेभ्यः, गुरुभ्यः, विविधकोणेभ्यः विविधसंस्थाभ्यश्च भवति।
- अधिगमेन व्यवहारपरिवर्तनं भवति।
- व्यवहारपरिवर्तनं अनुभवेन भवति।
- अधिगमे स्थायीव्यवहारपरिवर्तनं भवति।
- व्यवहारपरिवर्तनम् एव अधिगमः भवति।
- अधिगमे उत्तरोत्तरसामञ्जस्यस्थापनं भवति।
- अधिगमे मूलाभिवृत्तीनाम् अर्जनं भवति।
- अधिगमे व्यवहारपरिवर्तनेन नवीनपरिस्थितिषु सामञ्जस्यं भवति।

**अधिगमस्य प्रकारः-**

- अनुभवजन्याधिगमः (Experiential Learning)- कृत्वा अधिगमः अनुभवजन्याधिगमः भवति। अथवा प्रत्यक्षवस्तूनि दृष्ट्वा अधिगमः भवति। बालकः यत् कार्यं यावत्पर्यन्तं सम्पादयति तावत्पर्यन्तम् अधिकं ज्ञानम् अर्जयति। यथा- कक्ष्यायां गत्वा शिक्षणं, छात्राध्यापकानां शिक्षणाभ्यासः, भौगोलिकस्थानस्य अध्ययनं, वैज्ञानिकसामग्रीणां प्रदर्शनं, प्रयोगशालायां गत्वा विषयाणाम् अध्ययनं वैज्ञानिकप्रयोगाश्च।
- संवेदनाधारिताधिगमः (Sensory Learning)- विविधवस्तूनि दृष्ट्वा, श्रवणेन, स्पर्शेण अनुभवेन च ज्ञानार्जनं सः इन्द्रियजन्याधिगममः इत्युच्यते।
- संवादात्मकाधिगमः (Interactive Learning)-सङ्गोष्ठी, वाक्यार्थसभायां भागग्रहणं, समूहचर्चया, प्रश्नप्रतिप्रश्नकरणं शास्त्रार्थश्च।
- वैयक्तिकाधिगमः (Personalized Learning) – प्रत्येकं छात्रस्य मानसिकक्षमताः, अधिगमे गतिः रुचयः च समानाः न भवन्ति। अतः तेषु अधिगमक्षमताम्, अभिरुचिं, गतिं वैयक्तिकक्षमतादि सम्परीक्ष्य अधिगमप्रक्रिया सम्पादनीया।
- सतताधिगमः (Life Long Learning)- अधिगमः सततं प्रचाल्यमाना शैक्षिकप्रक्रिया भवति। छात्राः ज्ञानार्जनं केवलं सुनिश्चिते काले विद्यालये एव न कुर्वन्ति। तेषाम् अधिगमक्रिया विद्यालयात् बहिः अपि सततं प्रचलति। समाजे परिवारे वा केनापि, कुत्रापि शिक्षायाः अर्जनं सातत्येन कुर्वन्त्येव। अतः अधिगमप्रक्रिया सततप्रक्रिया भवति।
- सङ्कल्पनात्मकाधिगमः (Conceptual Learning) –सर्वेषां छात्राणां शिक्षायाः विविधाः सङ्कल्पनाः भवन्ति। अतः तेषां शिक्षणसङ्कल्पना कीदृशी वर्तते इति विचिन्त्य एव तेभ्यः तादृशी शिक्षा दातव्या।


ISSN : 2249-538X

अन्यथा विभिन्नेषु विषयेषु अधिगमः न सम्भवति । यथा- विज्ञानकलासाहित्यवाणिज्याभियांत्रिकादिविषयाणाम् अधिगमसंङ्कल्पनाश्च ।

- अभिप्रेरणात्मकाधिगमः (Motivational Learning) – शिक्षा अभिप्रेरणायाः विषयः भवति । यैः छात्रैः यथा अभिप्रेरणाः लभ्यन्ते अथवा येषाम् अधिगमे अभिप्रेरणाः जायन्ते तेषां तथैव अधिगमे प्रभावपूर्णता भवति । यदि अभिप्रेरणायाः अभावः भवति तर्हि तया अधिगमः अपि प्रभावितः भवति ।
- स्मृत्याधारिताधिगमः (Memory Based Learning)- विशिष्टविषयेषु अधिगमः स्मृत्याधारितः, कण्ठस्थीकरणाधारितश्च भवति । यथा- विषयाणाम् पुनरभ्यासः, गणितविषये विविधसूत्राणां कण्ठस्थीकरणं, व्याकरणसूत्राणां कण्ठस्थीकरणं, वैदिकमंत्राणां कण्ठस्थीकरणं, श्लोकानां कण्ठस्थीकरणं, सुभाषितकण्ठस्थीकरणम् इत्यादिविषयाः केवलंस्मृत्याधारिताधिगमस्य विषयाः भवन्ति । अतः एतेषां विषयाणाम् अधिगमः स्मरणेन, कण्ठस्थीकरणेन एव भवति ।
- सर्जनात्मकाधिगमः (Creative Learning) – नवाचारयुक्तप्रायोजनाकार्याणि, कल्पनाधारितसाहित्यिकरचनाः, नूतनोपकरणनिर्माणं, प्राविधिकयन्त्राणां निर्माणादि सर्जनात्मकाधिगमः भवति ।
- प्रायोजनाधारितः प्रायोगिकाधिगमः (Projective Based Learning) - विशिष्टप्रायोजनाकार्याणां सम्पादनं, विद्यमानसमस्यानां समाधानार्थं प्रायोगिककार्येण अधिगमोपार्जनम् प्रायोजनाधारिताधिगमः भवति । प्रयोगशालायां प्रायोगिकविषयाणाम् अनुप्रयोगेण यत् ज्ञानार्जनं भवति तत् ज्ञानं प्रायोगिकाधिगमः भवति ।

## शिक्षायाम् अधिगमस्य आधारभूतसिद्धान्तः-

शिक्षायाम् अधिगमः मनोविज्ञानस्य एकः प्रमुखः विषयः वर्तते । शिक्षामनोविज्ञानम् अधिगमक्रियायाम् इदं प्रदर्शयति यत्- बालकाः उत्तमव्यवहारं कथम् आचरन्ति ?, नूतनविषयाणां ज्ञानं कथम् अर्जयन्ति ?, अनेन सह जीवने समग्रव्यक्तित्वस्य विकासः समन्वयश्च कथं भविष्यति ? इति अधिगमस्य मनोवैज्ञानिकमूलाधाराः भवन्ति । शिक्षामनोविज्ञानस्य पाश्चात्यमनोवैज्ञानिकानां मतानुसारं अधिगमस्य मुख्याधाराः अधः वर्णिताः सन्ति-

## अधिगमे व्यवहारवादः (Behaviourism)-

अस्य सिद्धान्तस्य प्रमुखाचार्याः बी.एफ.स्कीनरमहोदयाः, इवान पालव, जान वाटसनमहोदयाश्च सन्ति । अनेन इदं ज्ञायते यत्- अधिगमे परिवेशस्य प्रभावः भवति । यथा बालकस्य पारिवारिकसामाजिकशैक्षिकराजनैतिकश्च परिवेशः (Environment) भवति तथैव तस्य अधिगमक्रियाणां गतिः भवति । यदि परिवेशः अनुकूलः भवति तर्हि अधिगमस्य गतिः अपि अधिका भवति । अन्यथा अधिगमे बह्व्यः समस्याः जायन्ते । अधिगमः पुरस्कारेण, दण्डनेन (Punishment) च अधिकः प्रभावितः भवति । यदि अधिगमाय छात्रेभ्यः पुरस्कारः पुनर्बलनं वा (Reinforcement) दीयते तर्हि अधिगमस्य गतिः दिक् च धनात्मिका (Positive) भवति । अनेन सह अधिगमे विकासः अपि शीघ्रं भवति । एवमेव यदि अधिगमे छात्रेभ्यः दण्डनं (Punishment)क्रियते तर्हि अधिगमस्य गतिः दिक् च ऋणात्मिका (Negative) भवति । दण्डनेन (Punishment)अधिगमे किञ्चित् एव धनात्मकप्रभावः भवति । अन्यथा दण्डनं सदैव ऋणात्मकं प्रभावमेव (Negative Effect) जनयति ।

**इवान पी.पावलव (Ivon P. Pavlov) महोदयस्य 'अधिगमस्य शास्त्रीयानुबन्धनसिद्धान्तः' (Classical Conditioning)-** पावलवमहोदयस्य (Pavlov) शास्त्रीयानुबन्धनसिद्धान्तः' अनुबन्धितसिद्धान्तम् इति

नाम्ना ज्ञायते। अस्मिन् सिद्धान्ते अननुबन्धितोद्दीपकेन सह अननुबन्धितानुक्रिया स्वाभाविकी क्रिया भवति। परन्तु अस्मिन् सिद्धान्ते अनुबन्धितोद्दीपकेन सह अनुबन्धितानुक्रियायाः अनुबन्धनं स्थाप्यते। कालान्तरे अनुबन्धितानुक्रियाः स्वाभाविकानुक्रियायां परिवर्तनं भवति। पावलवमहोदयः शुनकस्य उपरि प्रयोगं कृत्वा अधिगमानुक्रियायाः स्वाभाविकं व्यवहारं जनयति। उदाहरणम्- एकं बुभुक्षिताय शुनकाय यदा भोजनं दीयते तदा सः लालाग्रन्थिना लालास्त्रावं करोति। अत्र भोजनम् अननुबन्धितम् उद्दीपनं (Unconditioned StimulusUS) वर्तते। अत्र लालाग्रन्थिना लालास्त्रावः अननुबन्धितानुक्रिया (Unconditional Response UR) वर्तते। यदा शुनकाय घटिका नादं कृत्वा भोजनं दीयते तदन्तरं लालाग्रन्थिना लालास्त्रावः भवति। अस्यां परिस्थितौ घटिकानादः अनुबन्धितोद्दीपकं (Conditioned Stimulus CS) भवति तेन सह भोजनम् अपि अनुबन्धितोद्दीपकं (Conditioned Stimulus CS) भवति। तथैव घटिकानादेन सह भोजनं कृत्वा लालाग्रन्थिना लालास्त्रावः अनुबन्धितानुक्रिया (Conditional Response CR) भवति। अनन्तरं घटिकानादेन सह भोजनं न दीयते। परन्तु शुनकः भोजनस्य अनुपस्थितौ अपि केवलं घटिकानादं श्रुत्वा एव लालाग्रन्थिना लालास्त्रावं करोति। अतः अस्यां परिस्थितौ शुनकस्य अनुबन्धनं घटिकानादेन सह सम्बद्धं जातम्। अतः तस्मिन् शुनके अनुबन्धितोद्दीपकेन सह अननुबन्धितानुक्रियायाः सम्बन्धः स्थापितः। एषः एव सिद्धान्तः प्राचीनानुबन्धनसिद्धान्तः इत्युच्यते।




## अधिगमस्य शास्त्रियानुबन्धनसिद्धान्तः (अनुबन्धनस्य सोपानेषु सङ्क्रियायाः सम्बन्धः)

| अनुबन्धनसोपानानि | उद्दीपकस्य प्रकृतिः | अनुक्रियायाः प्रकृतिः |
|---|---|---|
| अनुबन्धनपूर्वम् | भोजनम् (US) | लालास्त्रावः (UR) |
| | घटिकायाः ध्वनिः | आश्चर्यमपि विशिष्टानुक्रिया नास्ति |
| अनुबन्धनासमये | घटिकाध्वनिः (CS) + भोजनम् (US) | लालास्त्रावः (UR) |
| अनुबन्धनपश्चात् | घटिकायाः ध्वनिः (CS) | लालास्त्रावः (UR) |

बी.एफ. स्किनर (B.F. Skinner) महोदयस्य अधिगमस्य क्रियाप्रसूतव्यवहारस्य सिद्धान्तः नैमित्तिकव्य-वहारस्य सिद्धान्तः (Operant Conditioning) - अयं सिद्धान्तः पर्यावरणे क्रियाशीलतया सह सफलता-प्राप्तेः (Activeness & Response Result) उपरि आधारितः अस्ति। अर्थात् स्किनर महोदयः पर्यावरणे सक्रियता इति क्रियाप्रसूतः (Operant) उक्तः। अधिगमस्य दण्डपुरस्कारसिद्धान्तनाम्ना अपि ज्ञायते। अत्र इदं प्रदर्शितं यत्- यदि बालकानां कृते पुरस्कारः प्रदीयते तर्हि तेषाम् अधिगमक्षमता वर्धते। एवमेव यदि दण्डः न दीयते तर्हि अधिगमे अक्रियशीलता आगच्छति। स्किनर महोदयः अमुं प्रयोगं मूषकानाम् उपरि कृतवान्। मू-


ISSN : 2249-538X

षकानां कृते यदि भोजनं लभ्यते तर्हि ते अन्तिमे स्थाने गन्तुं सफलाः भवन्ति । परन्तु यदि मार्गे तेषां कृते किमपि भोज्यपदार्थाः न लभ्यन्ते तर्हि तेषां मार्गाणामन्वेषणे गतिः न जायते । अर्थात् छात्रेभ्यः यदि अदिगमप्रक्रियायां सफलता लभ्यते तर्हि अग्रे अधिगमाय गतिः वर्धते अन्यथा तेषाम् अधिगमे विशिष्टः विकासः न दृष्टः ।



**अधिगमस्य संज्ञानात्मकसिद्धान्तः (Cognitive Learning Theory)-**

संज्ञानात्मकाधिगमसिद्धान्तस्य प्रवर्तकः **जीन पीयाजट** (Jean Piaget), **जे. बरनर** (J. Bruner) महोदयः अस्ति । अनेन मतेन अधिगमः केवलं व्यवहारपरिवर्तनं एव न भवति, अपितु अधिगमः मानसिकप्रक्रियायाः (Cognitive Processes) परिणामः अपि भवति। अर्थात् संज्ञानात्मकसिद्धान्ते संज्ञानात्मकपक्षस्य परिणामस्वरूपेण एव छात्राणां व्यवहारपरिवर्तनं भवति । येषां छात्राणां ज्ञानात्मकक्षमता यथा भवति तथा तेषु अधिगमक्षमता अपि भवति ।

**अधिगमस्य सामाजिक-सांस्कृतिकसिद्धान्तः (Socio-Cultural Learning Theory)-**

अधिगमप्रक्रियायां सामाजिक-सांस्कृतिकसिद्धान्तस्य मुख्यप्रवर्तकः **लीव वोगात्सकी** (Lev Vygotsky) महोदयः अधिगमः सामाजिकप्रक्रिया भवति इति स्वीकृतवान् । अधिगमे भाषायाः विकासः समाजेन सह भवति । एवमेव विषयवस्तूनां ज्ञानं, सामाजिकसम्बन्धानां, व्यवहाराणाम् अधिकं ज्ञानं समाजे एव भवति । अतः शिक्षायां सामाजिकपरिवेशः अधिगमस्य प्रमुखं साधनं भवति । बालकः कस्मिन् विषये अधिगमं केवलम् आत्मना एव न करोति अपितु शिक्षकेण परिवारेण, मित्रेण, अन्येन च सहायकत्वेन अधिकम् अधिगमं करोति ।

**अभिप्रेरणात्मकाधिगमः (Motivational Learning Theory)-**

अधिगमे अस्य सिद्धान्तस्य प्रवर्तकः**अब्राहम् मैसलो** महोदयःअस्ति। अनेन इदं प्रतिपादितं यत्- अधिगमे आवश्यकतायाः (Needs) प्रभावः सर्वाधिकः भवति। यदि छात्रस्य मूलभूतावश्यकताः (Needs) पूर्णाः भवन्ति, तर्हि सः अधिगमक्रियायाम् उत्तमं प्रदर्शनं करोति । अन्यथा अधिगमे तस्य अनुक्रिया शिथिला भवति । अस्मिन् अनुक्रमे मैसलो महोदयस्य आवश्यकताप्रतिमानं द्रष्टुं शक्यते-

**अधिगमससिद्धान्तस्य आवश्यकताप्रतिमानम् (Hierarchy of Needs)-**

- शारीरिकावश्यकताः (Physiological Needs)- भोजनं, निद्रा, जलम् ।
- सुरक्षायाः आवश्यकताः (Safety Needs)- शारीरिकसुरक्षाः, सुरक्षितवातावरणम् ।
- सामाजिकावश्यकतायाः पूर्तयः (Social Needs)- मित्रता, पारिवारिकस्नेहः, सामाजिकसम्बन्धस्थापनादि ।
- आत्मसम्माननम् (Esteem Needs)- आत्मगौरवः, पुरस्कारः ।

- आत्मसिद्धः साक्षात्कारश्च (Self-Actualization)- नूतनज्ञानसम्पादनं, प्रायोगिककार्यसम्पादनम्, आत्मविकासश्च ।

## अधिगमप्रक्रियायां प्रभावकारिमनोवैज्ञानिककारकाणि ( Psychological Factors of Learning Process)-

- अधिगमे अभिप्रेरणादानम् (Motivation)
- अधिगमे पुनरभ्यासः (Practice and Repetition)
- अधिगमोपकरणानि (Teaching Tools)
- अधिगमे रुचयः आनन्दानुभवश्च (Interest and Enjoyment)
- बुद्धिः स्मरणशक्तिश्च (Intelligence and Memory)
- शारीरिकमानसिकस्वास्थ्यम् (Physical & Mental Health)
- चिन्ताः भीतयश्च (Anxiety and Fear)
- पारिवारिकवातावरणम् (Family Environment)
- सामाजिकसहयोगः (Social Co-operation)
- शिक्षणस्य विधयः (Teaching Methodology)

## भारतीयज्ञानपरम्परायाम् अधिगमस्य सिद्धान्ताः (Principals of Learning in Indian Knowledge System)-

### अधिगमस्य अनुभवसिद्धान्तः-

बालकेषु कस्यचित् विषयस्य सम्यक् अधिगमः अनुभवेन भवति । आनुभविकज्ञानं चिरस्थायी अधिगमः भवति । यथोल्लिखितमस्ति यत्-

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

### अधिगमे अनुकरणस्य सिद्धान्तः (Learning by Imitation  Modelling)-

यथा राजा तथा प्रजा इति उक्तिः सर्वैः श्रुता । यथा राज्ञः आचरणं भवति तथैव राज्ञः प्रजाः अपि आचरन्ति । यदि रामः आदर्शः राजा आसीत् तर्हि अयोध्यायाः सर्वाः प्रजाः अपि आदर्शाः आसन् । यथा-बालकः अध्यापकं दृष्ट्वा एव आचरति । यतो हि छात्रस्य कृते अध्यापकः आदर्शः भवति । तथैव रामायणे हनूमता रामस्य च लक्ष्मणस्य च पराक्रमस्य धर्मस्य च अनुकरणं कृत्वा समुद्रलङ्घनस्य महत् कार्यं कृतवान् ।

यं पालयसि धर्मं त्वं प्रीत्या च नियमेन च । स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ॥

अर्थात् राजा धर्मेण एव प्रजापालनं कुर्यात् । अत्र सामाजिकसमबन्धस्थापनस्य आदर्शः प्रदर्शितः अस्ति । रामः आदर्शपतिः सीता आदर्शपत्नी च वर्तते । अतः सीतायाः रामं प्रति समर्पणभावः कथं प्रदर्शितः इति द्रष्टव्यम्-

न पिता नात्मजो वात्मान माता न सखीजनः । इह प्रत्य च नारीणां पतिरेको गतिः सदा ॥
यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघवः । अग्रतस्ते गमिष्यामि मृद्नन्ति कुशकण्टकान् ॥

तथैव गोस्वामीतुलसीदासेन अपि रामचरितमानसे वर्णितम् अस्ति -

जिय बिनु देह नदी बिनु बारी । तैसै नाथ पुरुष बिनु नारी ॥

 ISSN : 2249-538X

नाथ सकल सुख साथ तुम्हारे । शरद बिमल बिधु बदन निहारे ॥

**अधिगमे पुण्यकर्मश्रद्धाविश्वाससिद्धान्तः-**

श्रद्धावाँन् लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

**अधिगमस्य सामाजिकसम्बन्धसिद्धान्तः** (Learning through Society and Relationships)-

बालकः समाजेन सह अधिगमं प्राप्नोति । यतो हि समाजः अपि विद्यालयस्य एकम् अङ्गं वर्तते । शैक्षिकजीवने बहवः विषयाः भवन्ति येषां सम्यक् ज्ञानं सामाजे एव भवति । अनेन सह येषां सङ्गति यथा भवति तथा तेषां व्यक्तित्वविकासः भवति । यदि संङ्गतिः उत्तमा अस्ति तर्हि शैक्षिकविकासः उत्तमः भवति । अन्यथा जीवने दुःखानां धाराः एव प्रवहन्ति । यथा शास्त्रेषु उल्लिखितमस्ति-

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते । संगात् संजायते कामः कामात्क्रोधोऽभिजायते ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः । स्मृतिभंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

**अधिगमस्य आत्मचिंतनसिद्धान्तः / समग्रदृष्टेः सिद्धान्तः**- (Learning through Self-Reflection / Gestalt Theory)-

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।

**अधिगमस्य स्वाध्यायसिद्धान्तः** ( Self- Study)-

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥
आचार्यात् पादमादत्ते, पादं शिष्यः स्वमेधया । पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥

**अधगिमे संवादस्य प्रश्नोत्तरसिद्धान्तः** (Learning through Dialogue and Enquiry)-

अधिगमे जिज्ञासा महत्त्वपूर्णं कारकं भवति। यत्र जिज्ञासा भवति तत्र प्रश्न-प्रतिप्रश्नमाध्यमेन अधिगमः उत्तमरूपेण भवति ।यथा- रामायणे हनूमतः सीतायाश्च मध्ये संवादः द्रष्टव्यः- हनूमान् सीतां प्रश्नं करोति-

का न पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि । द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दिते ॥

सीता हनुमते उत्तरं ददाति-

सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता । उवाच वाक्यं वैदेही हनूमन्तं द्रुमाश्रितम् ॥

**कर्तव्यपरायणतायाः सिद्धान्तः-**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥

**योगसाधनेन अधिगम** (Learning by Yoga) -

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जयः । सिद्ध्यसिध्योः समो भूत्वा समत्वं योग उच्यते ॥

**नैतिकतायाः सिद्धान्तः** (Moral and Duty-based Learning)-

रामलक्ष्मणभरतसत्रुघ्नानाम् सदाचरणम् । रामस्य राज्यत्यागः, भरतस्य राज्यत्यागः, लक्ष्मणस्य पत्नीं प्रति मोहरागादीनां त्यागः । यथा-

स हि राजा च वैदेहि देशस्य च कुलस्य च ॥ आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः ।

**अधिगमस्य श्रद्धाविश्वाससिद्धान्तः** (Learning through Faith) :-

अधिगमे यावत् परन्तं श्रद्धा न भवति अथवा आत्मनि विश्वासः न भवति तावत् पर्यन्तं ज्ञानं न लभ्यते । यथा- यथा चित्ते तथा वृत्ते इति उक्तिः शास्त्रेषु वर्णिता । यथा- गीतायाम् उल्लिखितमस्ति-

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

**अधिगमे अनुभवसिद्धान्तः –**

रामस्य वनवासः, हनूमतः सीतान्वेषणं, भरतस्य मातृभक्तिः इत्यादि प्रसङ्गाः प्रत्यक्षानुभवस्य महत्त्वं प्रदर्शति । प्रत्यक्षानुभवेन ज्ञानं स्थिरं भवति । यथा मधुरस्य माधुर्यता खादनेन एव अनुभूयते । प्रवचनेन कदापि न अनूभूयते । यदा छात्राः कस्मिन्श्चित् विषये आत्मना अनुभवं कृत्वा अधिगमं कुर्वन्ति तदा तेषाम् अधिगमः अधिकः दृढः भवति ।

शतक्रतुमुखैर्देवैः श्रूयते न पराजितः । महात्मा बलसम्पन्नो रावणो लोकरावणः ॥
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् । क्रियतामस्य संस्कारो ममाप्येष तथा तव ॥

**गुरूभक्त्याः अधिगमसिद्धान्तः –**

वाल्मीकिः स्वयं महर्षिणा नारदेन रामायणकथां श्रुत्वा ज्ञाने प्रवीणाः अभवन् । अत्र गुरु-शिष्यपरम्परायाः महत्त्वं स्पष्टं दृश्यते । यथा- रामचरितमानसे उक्तम्-

बंदउँ गुरु पद पदुम परागा । सुरुचि सुबास सरस अनुरागा ॥
अमिअ मूरिमय चूरन चारू , समन सकल भव रूज परिवारू ॥
गुरु बिन भव निध तरइ न कोई जो बिरंचि शंकर सम होई ॥

**धर्माधारिताधिगमसिद्धान्त-**

अत्र धर्मः निश्चिता व्यवस्था, आचारः, सिद्धान्तः नियमश्च वर्तते ।

येन धर्मो न विज्ञातो न वृत्तं न कुलं तथा । राक्षस्या नीचया बुद्ध्या येन तद् गर्हितं कृतम् ॥

 ISSN : 2249-538X

**अधिगमे समस्यासमाधानस्य सिद्धान्तः –**

रामस्य जीवनम् अनेकासु परिस्थितिषु समस्या-समाधानस्य उत्तमं उदाहरणं वर्तते। समस्यासु धैर्येण बुद्ध्या च स्थितिः कथं नियन्त्रणीया इति अत्र उपदिश्यते-

गृहात् गृहं राक्षसानामुद्यनानि च सर्वशः। वीक्षमाणोऽप्यसंत्रस्तः चचार सः॥

**अधिगमे कृतसङ्कल्पसिद्धान्तः –**

रामायणे हनुमता कृत सङ्कल्पः द्रष्टुं शक्यते-

यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः। बद्ध्वा राक्षसराजानमानयिष्यामि रावणम्॥
सर्वथा कृत कार्योऽहमेष्यामि सह सीतया। आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणम्॥

**अधिगमस्य ज्ञानयोगसेवासत्यप्रत्यक्षणसिद्धान्तः-**

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।

**आत्ममूल्याङ्कनस्य सिद्धान्तः** (Self Assessment / Reflection) –

बालकेन स्वस्य मूल्याङ्कनं आत्मना एव कर्तव्यम्। तत्र आत्मानुशीलनं कर्तव्यं यत्- अस्माकं प्रयत्नः समीचीनः अस्ति न वा इति। जनाः आत्मोद्धारं स्वयमेव कर्तुं सक्षमाः भवन्ति। आत्मना एव रिपवः जायन्ते, आत्मना एव बान्धवाः अपि जायन्ते।

उद्धरेतात्मनाऽऽत्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥

**भक्तिसमर्पणसिद्धान्तः** (Devotion & Surrender)-

बालकेन एकाग्रमनसा पूर्णतया समर्पणेन श्रद्धया च अधिगमः अधिकः सम्यक् भवितुं शक्नोति।

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

**अधिगमस्य आत्मानुशासनं संयमश्च सिद्धान्तः** (Self-Control & Discipline)-

विद्याप्राप्त्यर्थं जीवने अनुशासनम् आवश्यकं भवति। यस्मिन् जीवने अनुशासनं न भवति तस्मिन् जीवने कदापि क्रियासिद्धिः भवति। अतः सम्यक् अधिमाय व्यवहारे अनुशासनं भवेत्। अनेन अनुशासनेन इन्द्रियाणां नियंत्रणे सौलभ्यं भवति। यदि जीवनं अनुशासितं भवति तर्हि संयमशक्तयः अपि वर्धन्ते। अतः अधिगमक्रियायाः सफलतायै इंद्रियाणां संयमनं नियंत्रणं च आवश्यकं कार्यं भवति। जनानां मनसि या चंचलता भवति, सा चंचलता अनेन माध्यमेन नियंत्रिता भूत्वा जनाः उत्तमकार्येषु संङ्लग्नाः भवन्ति।उक्तं च-

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

**निष्कर्षः-**

अधिगमः नाम ज्ञानार्जनम्। अधिगमः एका विशिष्टा शैक्षिकप्रक्रिया भवति। शिक्षणप्रक्रियायाम् अधिगमप्राप्तिः एव शिक्षणस्य मूलकेन्द्रं भवति। यदि कस्यचित् प्रकरणस्य विषयस्य वा अधिगमः न भवति तर्हि शिक्षणं मूल्यहीनं भवति। अर्थात् अधिगमः ज्ञानार्जनस्य प्रतिफलम् इति मन्यते। अधिगमे शिक्षणेन, प्रशिक्षणेन,

अनुभवेन अभ्यासेन च नूतनं ज्ञानं, कौशलं च विकास्यते । तथैव चिन्तनक्षमताः अपि वर्धन्ते । अर्थात् अनुभवेन, अभ्यासेन प्रशिक्षणेन च जीवव्यवहारे सापेक्षरूपेण जायमानः शाश्वतपरिणामः अधिगमः भवति । अधिगमः केवलं विद्यालयेषु पाठशालासु एव न भवति अपितु विविधकोणेभ्यः, विविधगुरुभ्यः, विविधसंदर्भेभ्यः, पुस्तकेभ्यः जनेभ्यश्च भवति । शास्त्रियसाहित्यानाम् अनुशीलनं विना अधिगमसिद्धान्तानां अभिज्ञानं न भवितुमर्हति । अधिगमप्रक्रियायाः साफल्यतायै भारतीयमनिषिणाम् आचरणानाम् अनुशरणम् आवश्यकं भवति । यावत् पर्यन्तं वयं शास्त्रियसाहित्यानां जलनिधौ अवगाहनं न कुर्मः तावत् पर्न्यन्तं मृगतृष्णासदृशमेव ज्ञानार्जनाय इतस्ततः भ्रमणं करिष्यामः ।

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

भारतीयज्ञानपरम्परायाम् उपर्योक्ताः सर्वे सिद्धान्ताः प्रामाणिकतया उपलब्धाः सन्ति । सम्प्रति अमृतकाले देशकालपरिस्थित्यनुगुणं विशिष्टज्ञानार्जनाय भारतीयज्ञानपरम्परां प्रति प्रत्यागमनम् अनिवार्यं वर्तते । अतः आत्मज्ञानमेव अधिगमः इत्युच्यते ।

**परामृष्टाः ग्रन्थाः**


१. श्रीमद्भगवद्गीता, गीताप्रेस प्रकाशनम्, गोरखपुरम्

२. डा. रामजियावन प्रजापतिः, (2025), शिक्षायाम् अधिगमाकलनं साङ्ख्यिकी च, प्रदीप प्रकाशनम्, नालासोपारा (पूर्व), मुम्बई.

३. वाल्मीकीरामायणं, गीताप्रेसप्रकाशनम्, गोरखपुरम्

४. भवभूतिविरचितम् उत्तररामचरितम्

५. भर्तृहरिकृतं नीतिशतकम्

६. गोस्वामी तुलसीदासेन विरचितं, रामचरितमानसम्, गीताप्रेसप्रकाशनम्, गोरखपुरम्

7. आपस्तम्बधर्मसूत्रम्, गुगलमाध्यमेन अन्तरजालीयप्राप्तसूचना

8. मनुस्मृतिः

9. गुगलमाध्यमेन अन्तरजालीयप्राप्तसूचना

10. ऋग्वेदः, गीताप्रेसप्रकाशनम्, गोरखपुरम्

# अन्नं वै प्राणः

डा. जोषि सन्तोषकुमारः*
सहायकाचार्यः,
सं. अ., उस्मानियाविश्वविद्यालयः
हैदराबाद्

***लेखसारः*** *– अस्मिन् शोधपत्रे भारतीयज्ञानपरम्परायाम्* ***अन्नतत्त्वस्य*** *विस्तृतं शास्त्रीयम् अध्ययनं प्रस्तूयते । अन्नं केवलं भौतिकं द्रव्यं न, अपि तु* ***ब्रह्मस्वरूपम्, प्राणपोषकम्*** *प्रजासृष्टेः मूलकारणञ्च मन्यते । वैयाकरण-दार्शनिक-व्युत्पत्तितः आरभ्य वेदेषु, उपनिषत्सु, श्रीमद्भगवद्गीतायां, आयुर्वेदशास्त्रे, स्मृतिग्रन्थेषु च वर्णितस्य अन्नमहिम्नः, सप्तान्नानां, आहारगुणत्रयस्य, आहारनियमानां, अन्नदोषाणां च सूक्ष्मं विवेचनम् अत्र कृतमस्ति । 'यथा अन्नं तथा मनः' इति सिद्धान्तम् आधारीकृत्य शारीरिक-मानसिक-स्वास्थ्याय अन्नस्य प्रभावः, तथा च अन्नदान-अन्नयज्ञ-अन्नप्राशनादिसंस्काराणां महत्त्वम् अपि शोधपत्रेऽस्मिन् विश्लेषितम् । सर्वाणि तत्त्वानि सङ्कलय्य जडवस्तुनः अपेक्षया अन्नस्य चैतन्यपोषकत्वं प्रमाणितम् ।*

***कूटशब्दाः*** *– अन्नम्, सप्तान्नानि, आहारशुद्धिः, आयुर्वेदः, पञ्चमहायज्ञाः, अन्नदोषाः, भारतीयज्ञानपरम्परा ।*

## प्रस्तावना

अस्मिन् चराचरे जगति प्राणिनां जीवनस्य मूलाधारः अन्नम् एव अस्ति । भारतीयदर्शन- परम्परायां **अन्नं वै प्राणः** इति स्वीकृत्य अन्नं ब्रह्मरूपेण स्तूयते । पाणिनीयव्याकरणशास्त्रानुसारम् **अद् (भक्षणे)** धातोः क्त (कर्मणि) प्रत्यये कृते **अन्नम्** इति शब्दः निष्पद्यते- **अद्यते इति अन्नम्** (यत् खाद्यते तत्) ।[१] तैत्तिरीयोपनिषदि अस्य अतीव गम्भीरा तात्त्विकी व्युत्पत्तिः एवं दत्ता अस्ति- **अद्यते अत्ति च भूतानि तस्मादन्नं तदुच्यते** ।[२] अर्थात् यत् प्राणिभिः भुज्यते, यच्च स्वयं सर्वाणि भूतानि भक्षयति, तत् अन्नम् अस्ति । अयं शब्दः केवलं भौतिकभोजनस्य न अपि तु सम्पूर्णसृष्टेः भोक्तृ-भोग्य-सम्बन्धस्य द्योतकः अस्ति ।

## उद्देश्यम्

अस्य शोधपत्रस्य मुख्यम् उद्देश्यं भारतीयवाङ्मये अन्नस्य केवलं भौतिकद्रव्यरूपेण न, अपि तु **ब्रह्मस्वरूपेण** दार्शनिकं, मनोवैज्ञानिकं (यथा अन्नं तथा मनः), वैज्ञानिकं (आयुर्वेदोक्त-आहारनियमाः) च महत्त्वं सप्रमाणं निरूपणमेव भवति । वेदादारभ्य लौकिककाव्यपर्यन्तम् अन्नविमर्शस्य क्रमिकविकासं प्रदर्श्य, अन्नदान-अन्नयज्ञ-संस्कारादीनां सांस्कृतिकमूल्यानां समाजोपयोगितां स्थापयितुं, तथा च आधुनिकसमाजे वर्धमानस्य अन्नदूषणस्य, अपव्ययस्य, अशुद्धाहारस्य च निवारणाय प्राचीनाहार- शुद्धिविज्ञानस्य आधारेण शारीरिक-मानसिक-स्वास्थ्याय प्रेरणप्रदानम् एव अस्य शास्त्रीयाध्ययनस्य मुख्यम् उद्देश्यं वर्तते ।

---

***सम्पर्कसूत्रम्** - 9441054965 , Email- drjsantosh@gmail.com

[१]रदाभ्यां निष्ठातो नः पूर्वस्य च दः-अष्टाध्यायी 8-2-42

[२]अद्यते अत्ति च भूतानि तस्मादन्नं तदुच्यते- तैत्तिरीयोपनिषद् 2-2-1

## अन्नात् प्रजासृष्टिः

भारतीयज्ञानपरम्परायां **अन्नात् प्रजासृष्टिः** इति सिद्धान्तः वेदान्त-आयुर्वेदशास्त्रयोः अतीव वैज्ञानिकः समन्वयः अस्ति ; यतोहि तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां (2-1-1) **पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात् पुरुषः** इति मन्त्रेण सृष्टिक्रमः वर्णितः, तथा च तत्रैव (2-2-1) **अन्नाद्वै प्रजाः प्रजायन्ते** इति मन्त्रेण साक्षात् अन्नात् प्रजानाम् उत्पत्तेः उद्घोषः कृतः अस्ति, अस्य दार्शनिकसिद्धान्तस्य वैज्ञानिकी पुष्टिः आयुर्वेदशास्त्रे प्राप्यते, यत्र भुक्तात् अन्नात् क्रमेण रस-रक्त-मांस-मेद-अस्थि-मज्जा-शुक्रान्ताः सप्तधातवः निर्मीयन्ते, तथा च सुश्रुतसंहितायाः शारीरस्थाने [१]शुक्रशोणितजीवसंयोगे तु खलु कुक्षिगते गर्भसंज्ञा भवति इति श्लोकानुसारम् अन्नस्य एव अन्तिमसारभूतस्य शुक्रस्य शोणितस्य (आर्तवस्य) च गर्भाशये संयोजनेन नूतनप्रजायाः (गर्भस्य) उत्पत्तिः भवति, येन सिध्यति यत् मातापितरौ केवलं निमित्तमात्रं स्तः, नूतनशिशोः उत्पत्तेः साक्षात् मूलकारणं भुक्तम् अन्नम् एव अस्ति ।

## सप्तान्नानि

बृहदारण्यकोपनिषदि **सप्तान्नब्राह्मणे** [२] प्रजापतिना स्वेन तपसा मेधया च सृष्टानां सप्तान्नानां यत् दार्शनिकं विवेचनं प्राप्यते, तस्य विस्तरेण अर्थः एवम् अस्ति- **यत्सप्तान्नानि मेधया तपसाजनयत्पिता** इति मन्त्रेण आरभ्य, श्रुतिः तेषां विभाजनं करोति ; तत्र **एकमास्य साधारणम्** इति प्रथमम् अन्नं मनुष्यादीनां सर्वेषां भूतानां क्षुधानिवारणाय कल्पितं साधारणं भौतिकम् अन्नं (व्रीहियवादि) वर्तते, ततः **द्वे देवानभाजयत्** इति मन्त्रेण हुतं (अग्नौ दीयमाना आहुतिः) प्रहुतं (भूतबलिः) च इति द्वे अन्ने देवानां पोषणाय उक्ते, तदनन्तरं **पशुभ्य एकं प्रायच्छत्** इति मन्त्रेण पशूनां (तथा च शिशूनां) कृते पयः (दुग्धम्) इति अन्नं प्रदत्तं यतोहि सर्वे प्राणिनः आदौ पयः एव पिबन्ति, अन्ते च **त्रीण्यात्मनेऽकुरुत** इति श्रुत्या जीवात्मनः अभिव्यक्त्यै मनः, वाक्, प्राणः च इति त्रीणि सूक्ष्मान्नानि स्थापितानि, यैः विना अस्मिन् जगति ज्ञानस्य (मनः), शब्दस्य (वाक्), चेष्टायाः (प्राणः) च अनुभवः असम्भवः अस्ति ; अनेन सम्पूर्णं जगत् भोक्तृ-भोग्य-रूपेण (अन्नाद-अन्न-रूपेण) विभक्तम् अस्ति इति सप्रमाणं सिध्यति ।

## आहारस्य गुणत्रयम्

भारतीयदर्शने, विशेषतः श्रीमद्भगवद्गीतायाः सप्तदशाध्याये सत्त्व-रजस्-तमो-गुणानाम् आधारेण शारीरिकमानसिकप्रभावदृष्ट्या आहारस्य त्रिविधं वर्गीकरणं कृतमस्ति, यत्र गोदुग्ध-घृत-फलादिभिः युक्तः प्रथमः **सात्त्विकाहारः** आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।

रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ [३]

आयुः-बुद्धि-बल-स्वास्थ्य-सुखवर्धको रसमयः स्निग्धश्च भवति; तथा च अत्यधिक-मरिच-तीक्ष्ण-उत्तेजकपदार्थैः युक्तो द्वितीयः **राजसाहारः**

"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥[४]

कटु-आम्ल-अत्युष्ण-रूक्षस्वभावत्वात् मनसि चञ्चलतां, शरीरे च दुःखं रोगं (आमयं) च जनयति ; अन्ते च

---

[१]सुश्रुतसंहिता शरीरस्थानम् 3-3
[२]बृहदारण्यकोपनिषद् 1-5-1
[३]बृहदारण्यकोपनिषद् 1-5-1
[४]भगवद्गीता 17-9

मांस-मदिरा-पर्युषितादिभिः युक्तः तृतीयः तामसाहारः

यातयामं गतरसं पूति पर्युषितं च यत् । च्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ [१]

त्रियामपूर्वपक्वं, रसविरहितं, दुर्गन्धयुक्तम्, उच्छिष्टम्, अपवित्रं च सत् मानवे आलस्यं प्रमादं जडतां च वर्धयति, अतः आत्मोन्नतये स्वस्थजीवनाय च सर्वदा सात्त्विकाहारस्यैव सेवनं शास्त्रसम्मतमस्ति ।

## आहारसेवननियमाः

भारतीयज्ञानपरम्परायाम्, विशेषतः आयुर्वेदशास्त्रे, आहारः एव प्राणिनां प्राणाः इति मन्यते । परन्तु तत् अन्नं तदा अमृतवत् कार्यं करोति, यदा तत् शास्त्रोक्तनियमानुसारं गृह्यते । महर्षिणा चरकेन चरकसंहितायाः विमानस्थाने [२] आहारग्रहणस्य दश वैज्ञानिकाः नियमाः उपदिष्टाः सन्ति, ये **आहारविधिविधानम्** इति नाम्ना ख्याताः ।

महर्षिचरकस्य मूलसूत्रम् एवम् अस्ति—

**"तत्र खल्विमान्याहारोपयोगिकानि भवन्ति ; तद्यथा- उष्णं, स्निग्धं, मात्रावत्, जीर्णे, वीर्याविरुद्धम्, इष्टे देशे इष्टसर्वोपकरणं, नातिद्रुतं, नातिविलम्बितम्, अजल्पन् अहसन् तन्मना भुञ्जीत, आत्मानमभिसमीक्ष्य सम्यगिति ॥** [३]

**1. उष्णम् अश्नीयात् (उष्णभोजनम्)**

भोजनं सर्वदा उष्णं (सद्यः पक्वम्) कर्तव्यम् । उष्णम् अन्नं स्वादिष्टं भवति, जाठराग्निं प्रदीप्तं करोति, शीघ्रं पच्यते, तथा च शरीरे वात-कफ-दोषौ शाम्यति ।

**उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमुदर्यमुदीरयति, क्षिप्रं जरां गच्छति...**[४]

**2. स्निग्धम् अश्नीयात् (स्निग्धभोजनम्)**

आहारः स्निग्धः (घृत-तैल-आदियुक्तः) भवेत् । अतिशुष्कं भोजनं न कर्तव्यम् । स्निग्धभोजनं पचनाय सुलभं भवति, इन्द्रियाणि दृढानि करोति, बलं वर्धयति, मुखे च कान्तिं (वर्णप्रसादं) जनयति ।

**स्निग्धं हि भुज्यमानं स्वदते... शरीरमुपचिनोति, दृढीकरोतीन्द्रियाणि, बलाभिवृद्धिमुपजनयति, वर्णप्रसादं चाभिनिर्वर्तयति ।**[५]

**3. मात्रावत् अश्नीयात् (उचितमात्रायां भोजनम्)**

स्वस्य जाठराग्नेः बलम् उद्दिश्य उचितमात्रायाम् एव भोजनं कुर्यात् । मात्रापूर्वकं भुक्तम् अन्नं त्रिदोषान् (वात-पित्त-कफान्) अदूषयित्वा आयुः वर्धयति । उदरस्य भागद्वयम् अन्नेन, एकं जलेन, एकं च वायोः सञ्चारणाय रिक्तं स्थापयेत् ।[६]

**मात्रावदश्नीयात्, मात्रावद्धि भुक्तं वातपित्तकफानपीडयदायुष एव प्रमाणमनुवर्तयति...**[७]

**4. जीर्णे अश्नीयात् (जीर्णानन्तरं भोजनम्)**

पूर्वभुक्तम् अन्नं यदा पूर्णतया जीर्णं भवति, तदा एव अग्रिमं भोजनं कर्तव्यम् । अजीर्णे सति कृतं भोजनं

---

[१]भगवद्गीता 17-10
[२]चरकसंहिता विमानस्थानम् 1-24
[३]चरकसंहिता, विमानस्थानम् 1-12
[४]चरकसंहिता, विमानस्थानम् 1-13
[५]चरकसंहिता, विमानस्थानम् 1-14
[६]चरकसंहिता, विमानस्थानम् 1-15
[७]चरकसंहिता, विमानस्थानम् 1-15

पूर्वभक्तेन अन्नेन सह मिलित्वा भयंकरम् 'आमदोषं' सर्वान् रोगान् च जनयति ।

**अजीर्णे हि भुञ्जानस्याहारजातम्... सर्वान् दोषान् प्रकोपयत्याशु...**[१]

**5. वीर्याविरुद्धम् अश्नीयात् (विरुद्धाहारत्यागः)**

परस्परं विरुद्धस्वभावयुक्तं भोजनं न खादेत् (यथा- दुग्धेन सह मत्स्यः, क्षीरेण सह लवणम् वा)। वीर्याविरुद्धम् अन्नं चर्मरोगादीन् भयंकरविकारान् न जनयति ।

**अविरुद्धवीर्यमश्नन् हि विरुद्धवीर्याहारजैर्विकारैर्नोपसृज्यते**[२]

**6. इष्टे देशे इष्टसर्वोपकरणम् अश्नीयात् (अनुकूलस्थानम्)**

पवित्रे, स्वच्छे, शान्ते च स्थाने उपविश्य, स्वच्छेषु इष्टपात्रेषु भोजनं कर्तव्यम् । मलिने अशान्ते च स्थाने भोजनेन मनसः विघातः भवति, येन अन्नं सम्यक् न पच्यते ।

**इष्टे देशे... नानिष्टदेशजैर्भावैर्मनोविघातकरैर्विहन्यते ।**[३]

**7. नातिद्रुतम् अश्नीयात् (अतिशीघ्रं न खादेत्)**

अतिशीघ्रतया भोजनं न कर्तव्यम् । अतिशीघ्रं भोजनेन अन्नं सम्यक् न पच्यते, अन्ने विद्यमानाः गुणाः शरीरेण सम्यक् न गृह्यन्ते, अन्नं च उदरस्थाने दोषं जनयति ।

**अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च...**[४]

**8.. नातिविलम्बितम् अश्नीयात् (अतिमन्दं न खादेत्)**

अतिमन्दतया अपि भोजनं न कर्तव्यम् । तेन तृप्तिः न भवति, अधिकं भोजनं क्रियते, अन्नं शीतलं च भवति, येन जाठराग्निः मन्दः भवति ।

**अतिविलम्बितं हि भुञ्जानो न तृप्तिमधिगच्छति, बहु भुङ्क्ते, शीतीभवत्यन्नं...**[५]

**9. अजल्पन् अहसन् तन्मना भुञ्जीत (ध्यानपूर्वकं भोजनम्)**

भोजनसमये वार्तालापं (जल्पनं), हास्यं च न कुर्यात् । पूर्णध्यानेन तन्मना भूत्वा भोजनं कुर्यात् । अन्यमनस्कतया कृतं भोजनं शरीराय विषवत् हानिकारकं भवति ।

**जल्पतो हसतोऽन्यमनसो वा भुञ्जानस्य ते एव दोषा भवन्ति येऽतिद्रुतमश्नतः...**[६]

**10. आत्मानमभिसमीक्ष्य सम्यक् भुञ्जीत (आत्मनिरीक्षणम्)**

स्वस्य प्रकृतेः विचारं कृत्वा एव भोजनं कुर्यात्— 'इदम् अन्नं मम सात्म्यम् (हितकरम्) अस्ति, इदं च असात्म्यम् अस्ति' इति ज्ञात्वा स्वस्य कृते यत् अनुकूलं तदेव अश्नीयात् ।

**इदममेषामुपशेत इदं नोपशेते इत्येवं विदितं ह्यस्यात्मन आत्मसात्म्यं भवति ।**[७]

महर्षिणा वाग्भटेन अपि अष्टाङ्गहृदये एतेषाम् आयुर्वेदनियमानां सारः एकस्मिन् श्लोके एवम् उपदिष्टः

[१] चरकसंहिता, विमानस्थानम् 1-16
[२] चरकसंहिता, विमानस्थानम् 1-17
[३] चरकसंहिता, विमानस्थानम् 1-18
[४] चरकसंहिता, विमानस्थानम् 1-19
[५] चरकसंहिता, विमानस्थानम् 1-20
[६] चरकसंहिता, विमानस्थानम् 1-21
[७] चरकसंहिता, विमानस्थानम् 1-22


ISSN : 2249-538X

अस्ति—

काले सात्म्यं शुचि हितं स्निग्धोष्णं लघु तन्मनाः । षड्रसं मधुरप्रायं नातिद्रुतविलम्बितम् ॥ [१]

समये, अनुकूलं, पवित्रं, स्निग्धम्, उष्णं, लघु, षड्रसयुक्तं च भोजनं पूर्णमनसा, न अतिशीघ्रं न च अतिमन्दं कर्तव्यम् ।

एवम् आयुर्वेदशास्त्रे अन्नं केवलं शरीरस्य इन्धनं न मन्यते, अपि तु तत् चेतनायाः विकासस्य, स्वास्थ्यस्य च परमोपकरणम् अस्ति । धर्मशास्त्रेष्वपि आहारनियमाः 'पञ्चार्द्रो भोजनं कुर्यात्' तथा

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः । श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥ [२] इत्यादिरूपेण निर्दिष्टाः ।

## अन्नदोषाः

अन्ने विद्यमानः दोषः मुख्यतया द्विधा विभज्यते- (अ) आध्यात्मिकदोषाः, (आ) पाकदोषाः । एतैः दोषैः युक्तम् अन्नं सर्वथा त्याज्यम् अस्ति ।

**आध्यात्मिकदोषाः "आहारशुद्धौ सत्त्वशुद्धिः"** इति वेदान्तनियमानुसारम् अन्ने त्रयः दोषाः भवितुम् अर्हन्ति, ये मनसः अशुद्धिं कुर्वन्ति—

१. **जातिदोषः** (स्वभावदोषः) : अन्ने जात्या (स्वभावेन) एव विद्यमानः दोषः । (यथा- मांसं, लशुनं, पलाण्डुः वा स्वभावतः उग्राणि तामसानि च भवन्ति) ।
२. **आश्रयदोषः** (संसर्गदोषः) : केन जनेन अन्नं दत्तं, केन धनेन वा क्रीतम् ? (यथा- पापिना, क्रूरेण, भ्रष्टाचारेण उपार्जितेन धनेन वा आगतम् अन्नं दूषितं भवति) ।
३. **निमित्तदोषः** (बाह्यदोषः) : यत् अन्नं स्वभावतः शुद्धमपि बाह्यकारणैः अशुद्धं जातम् । (यथा-अन्ने केशाः, कीटाः वा पतिताः स्युः, श्वानादिभिः स्पृष्टम् उच्छिष्टं वा भवेत्): एतैः त्रिभिः दोषैः मुक्तम् अन्नमेव 'शुद्धम्' अस्ति ।

**पाकदोषाः -आयुर्वेदोक्ताः**

पाकदोषकारणात् अन्ने या विकृतिः आगच्छति, सा आयुर्वेदशास्त्रे व्याधिकारिणी मन्यते । तत्र अष्टौ दोषाः प्रमुखाः सन्ति—

१. **अश्रुतान्नम् (अपक्वम्)** : यत् अन्नं शास्त्रोक्तविधिना सम्यक् न पक्वम् । एतत् पचनाय गुरु भवति, उदररोगं जनयति च ।
२. **पैच्छिल्लान्नम् (क्लेदयुक्तम्)** : यस्मिन् अन्ने पिच्छिलत्वं आगतम् । एतत् जाठराग्निं मन्दं करोति ।
३. **अशुच्यन्नम् (अपवित्रम्)** : कृमि-केश-पाषाणादिभिः युक्तम् अन्नम्, यत् अरुचिं ग्लानिं च जनयति ।
४. **क्वथितान्नम् (विकृत-क्वथितम्)** : यस्य सम्यक् क्वथनं न जातम्, यत् वात-पित्त-कफ-दोषान् प्रकोपति ।
५. **शुष्कान्नम् (रसहीनम्)** : रसहीनम् अतिशुष्कं भोजनम्, यत् शरीरे वातदोषं जनयति धातुक्षयं च करोति ।

[१] अ हृ सूत्रस्थानम् 8-35
[२] मनुस्मृतिः 2-52

६. **दग्धान्नम् (अतिपक्कम्) :** अग्नेः अतियोगात् यत् अन्नं भस्मीभूतं दग्धं वा जातम्, तत् शरीरे धातुशोषणं करोति ।

७. **विरूपान्नम् (कठोरतण्डुलम्) :** यस्य तण्डुलाः अपक्काः कठोराः च तिष्ठन्ति, तत् अन्नं भयंकरम् आमदोषं विषूचिकां च जनयति ।

८. **अनर्तुजान्नम् (पर्युषितम्) :** ऋतोः प्रतिकूलम् अथवा कालव्यतीतेन (पर्युषितम्) पक्कम् अन्नम् । एतादृशम् अन्नं निद्रां, शीतादिरोगान् कफदोषं च वर्धयति ।[1] गीतायाम् अपि एतत् "यातयामं गतरसम्..." (17-10) इति तामसभोजनरूपेण निन्दितम् अस्ति ।

एवं रीत्या यादृशम् अन्नं मनुष्यः गृह्णाति, तादृशं तस्य शरीरं मनश्च भवति। अतः सुदृढस्वास्थ्याय, दीर्घायुषे, आध्यात्मिक-उन्नत्यै च सर्वदा आध्यात्मिकदोष-पाकदोष-रहितं शुद्धम् अन्नम् एव शास्त्रोक्तनियमानुसारं भोक्तव्यम् ।

### अन्नयज्ञः

पञ्चमहायज्ञेषु अन्नयज्ञः अन्यतमः प्रत्येकस्य गृहस्थस्य कृते शास्त्रेषु प्रतिदिनं 'पञ्चमहायज्ञाः' कर्तव्याः इति विहितम् अस्ति । एतेषु पञ्चसु यज्ञेषु द्वौ यज्ञौ साक्षात् अन्नेन (अन्नयज्ञेन) सम्बद्धौ स्तः—

नृयज्ञः (अतिथियज्ञः) : गृहे आगतस्य अतिथेः भिक्षुकस्य वा अन्नेन जलेन च सत्कारः ।

भूतयज्ञः (बलिवैश्वदेवः) : पशुपक्षिभ्यः, कीटेभ्यः, श्वानेभ्यः, गोभ्यः च स्वभोजनात् पूर्वम् अन्नस्य बलिप्रदानम् (वितरणम्) ।

श्रीमद्भगवद्गीतायामपि एवं निर्दिष्टं यत् अन्नं प्रथमं देवेभ्यः, प्राणिभ्यः च अर्पयित्वा एव भोक्तव्यम्, तदा एव तत् 'प्रसादः' भवति । यदि कश्चित् जनः केवलं स्वस्य उदरपोषणाय एव अन्नं पचति, तर्हि सः पापं खादति ।

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ [2]

तैत्तिरीयोपनिषदि भृगुवल्ल्याम् अन्नयज्ञस्य एकः उत्तमः आदर्शः वर्तते । तत्र ऋषेः उपदेशः अस्ति यत् स्वगृहे आगतं कञ्चित् अपि जनं भोजनात् कदापि न निवारयेत् । एतत् एकं महाव्रतम् अस्ति

**न कञ्चन वसतौ प्रत्याचक्षीत । तद् व्रतम् ।**

**आन्तरिकः अन्नयज्ञः (प्राणाग्निहोत्रम्)**

भारतीयपरम्परायां बाह्यदानम् इव स्वभोजनम् अपि एकः 'यज्ञः' एव मन्यते, यः 'प्राणाग्निहोत्रम्' इति कथ्यते । अस्मिन् यज्ञे-

- उदरं (आमाशयः) एव यज्ञकुण्डम् अस्ति ।
- उदरे प्रदीप्तः 'जाठराग्निः' (वैश्वानरः) एव यज्ञाग्निः अस्ति ।
- खाद्यमानम् अन्नम् एव आहुतिः अस्ति ।
- प्राण-अपान-समान-उदान-व्यानाः इति पञ्चप्राणाः देवताः सन्ति ।

---

[1] विष्णुपुराणम् 3-11

[2] भगवद्गीता 3-13


ISSN : 2249-538X

अतः एव भोजनात् पूर्वं गीतायाः अयं श्लोकः 'अन्नस्तुतिरूपेण' अस्माभिः पठ्यते, यत्र भगवान् स्वयं वदति यत् सः एव अग्निरूपेण अन्नं पचति

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥[१]

## अन्नदानं महादानम्

भारतीयवाङ्मये अन्नदानं सर्वोत्कृष्टं 'महादानं' मन्यते, यस्य महिमा वेदेभ्यः आरभ्य नीतिशास्त्रपर्यन्तं सर्वत्र सप्रमाणं गीयते; यथा ऋग्वेदस्य भिक्षुसूक्ते (10-117-6) यः एकाकी भुङ्क्ते स पापी इत्युक्तम् - **मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य । नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥** इति, तथैव तैत्तिरीयोपनिषदि (3-10-1) **बुभुक्षिताय अन्नदानं महाव्रतरूपेण संस्थाप्य "न कञ्चन वसतौ प्रत्याचक्षीत । तद् व्रतम् ।"** इत्युपदिष्टम्, अन्नदातुः साक्षात् त्रिमूर्तिस्वरूपत्वं प्राणदातृत्वं च एवं वर्णितम् **अन्नं ब्रह्मा अन्नं विष्णुः अन्नं देवो महेश्वरः । अन्नदानेन सदृशं न भूतं न भविष्यति ॥** तथा च कूर्मपुराणे **अन्नदो लभते प्राणान् इति** वर्णितम्; स्मृतिग्रन्थेषु मनुना (4-226) **श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः । श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः ॥"** इति श्रद्धया दत्तस्य अन्नस्य अक्षयपुण्यं प्रतिपादितम्, तथा चाणक्यनीत्यादिषु व्यावहारिकदृष्ट्या अस्य सर्वोपरिमहत्त्वं दर्शयन्- **नान्नोदकसमं दानं न तिथिर्द्वादशीसमा ।** इति श्लोकेन क्षुधिताय अन्नजलप्रदानमेव मनुष्यस्य परमं कर्तव्यं सर्वश्रेष्ठं दानञ्च सप्रमाणं उपस्थापितमस्ति ।

## अन्नप्राशनसंस्कारः

भारतीयसंस्कृतौ शिशोः समुचितविकासाय अन्नप्राशनसंस्कारस्य अतीव महत्त्वं वर्तते, अस्य कालः मनुस्मृत्यनुसारं **"षष्ठे मासान्नप्राशनं मासि[२] इष्टं मङ्गलमेव वा"** इति वचनात् बालकानां कृते सममासेषु (षष्ठ-अष्टम-दशमेषु) तथा बालिकानां कृते विषममासेषु (पञ्चम-सप्तम-नवमेषु) विहितः अस्ति; आयुर्वेदशास्त्रानुसारं (काश्यप-सुश्रुतसंहितादिशा) षण्मासानन्तरं शिशोः शारीरिक-मानसिक-पुष्ट्यै, पचनतन्त्रस्य दृढतायै, दन्तोद्गमाय च केवलं मातुः दुग्धं पर्याप्तं न भवति, अतः सुपाच्यान्नस्य आरम्भः अतीव वैज्ञानिकः मन्यते; अस्य संस्कारस्य मुख्यविधौ शुभमुहूर्ते मण्डपे अग्निस्थापनां देवपूजाञ्च कृत्वा गोदुग्ध-तण्डुल-घृत-मधुभिः निर्मितं 'पायसम्' (यत्र तण्डुलः शुद्धतायाः, घृतदुग्धे पुष्टेः, मधु च मधुरतायाः प्रतीकम्) पिता, माता, पितामहः वा सुवर्णस्य रौप्यस्य वा चमसेन मुद्रिकया वा शिशोः मुखे प्राशयति ।

## अन्नं न निन्द्यात्

भारतीयज्ञानपरम्परायां **अन्नं वै ब्रह्म' 'अन्नं वै प्राणः** च इति स्वीकृत्य अन्नस्य निन्दा, अपव्ययः, भौतिकं भावात्मकं वा दूषणं सर्वथा निषिद्धम् अस्ति, यस्य भयंकरं फलं शास्त्रेषु बहुधा वर्णितम्; आध्यात्मिकदृष्ट्या तैत्तिरीयोपनिषदि **अन्नं न निन्द्यात्** इति महाव्रतभङ्गेन मनुस्मृत्यनुसारं च अन्नस्य अपमानेन मनुष्यस्य तेजः, बलम्, आयुश्च नश्यति सः महापापभाग् भवति; आयुर्वेदशास्त्रानुसारं भौतिकरूपेण दूषितस्य अशुचेः वा अन्नस्य भक्षणं जाठराग्निं नाशयित्वा 'आमदोषं', विषूचिकां, 'गरविष'माध्यमेन च पाण्डु-कुष्ठरोगान् जनयति; तथा च पुराण-नीतिशास्त्र-कर्मसिद्धान्तानुसारम् अन्नस्य अपमानेन माता अन्नपूर्णा कुपिता भवति, येन गृहे दारिद्र्यं, समाजे दुर्भिक्षम्, परलोके

[१]भगवद्गीता 15-14
[२]मनुस्मृतिः 2-34

च नरकप्राप्तिः भवति; अतः सर्वैः शास्त्रैः सप्रमाणम् उपदिष्टं यत् अन्नस्य रक्षणम्, शुचिता, आदरश्च मानवानां परमं कर्तव्यम् अस्ति, यतो हि अन्नदूषणं साक्षात् प्राणानां दूषणमेव।

## अन्नमयकोशः

वेदान्तदर्शने, विशेषतः तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां [१]वर्णितपञ्चकोषेषु सर्वप्रथमो बाह्यश्च कोशः 'अन्नमयकोशः' अस्ति, यस्य साक्षात् स्वरूपं **स वा एष पुरुषोऽन्नरसमयः** इति श्रुत्या लभ्यते; अस्य स्थूलशरीररूपस्य कोशस्य अवयवाः श्रुतौ पक्षिणः रूपकेण वर्णिताः सन्ति (यथा शिरः, पक्षद्वयं, मध्यभागः, प्रतिष्ठा-पुच्छञ्च), तथा च शङ्कराचार्येणापि विवेकचूडामणौ [२] **देहोऽयमन्नभवनोऽन्नमयस्तु कोशश्चान्नेन जीवति विनश्यति तद्विहीनः** इति श्लोकेन सप्रमाणं स्पष्टीकृतं यत् त्वक्-चर्म-मांस-रुधिरादिभिः निर्मितः, अन्नेन पोषितः, अन्नाभावे च विनश्यन् अयं जडदेहो कदापि नित्यशुद्धः आत्मा भवितुं नार्हति, अतः अयं कोशः केवलं जीवात्मनः भौतिकोपाधिः (स्थूलशरीरम्) अस्ति, यस्य नश्वरतायाः जडतायाश्च बोधः आत्मज्ञानाय वेदान्तसाधनायां प्रथमं सोपानं मन्यते।

## उपसंहारः

निश्चप्रचं वक्तुं शक्यते यत् भारतीयवाङ्मये अन्नं जडवस्तु नास्ति, अपि तु तत् चैतन्यस्य पोषकं पवित्रं तत्त्वम् अस्ति। वेदादारभ्य काव्यपर्यन्तं सर्वैः ऋषिभिः, शास्त्रकारैश्च- अन्नस्य आदरः, अन्नस्य उत्पादनम्, क्षुधितेभ्यः अन्नदानम् इत्येतत् मनुष्यस्य परमं कर्तव्यम् इति महता प्रबन्धेन उपदिष्टम् अस्ति। अस्माकं विचाराः, व्यक्तित्वं, चेतना च अस्मदीयस्य आहारस्य एव सूक्ष्मं प्रतिबिम्बम् अस्ति। अतः **अन्नं न निन्द्यात्। अन्नं न परिचक्षीत। अन्नं बहु कुर्वीत।** इति उपनिषदः महाव्रतम् अस्माभिः सर्वैः जीवने अङ्गीकरणीयम्।

## परामृष्टाः ग्रन्थाः


१. अष्टाङ्गहृदयम् (सूत्रस्थानम्) चौखम्बा कृष्णदास अकादमी, वाराणसी, पं. हरिप्रसाद त्रिपाठी (सर्वाङ्गसुन्दरा-व्याख्या), 1998
२. उपनिषत् कल्पतरुः- प्रार्थनागारप्रचारसंघः, विजयवाडा, 2014
३. ऋग्वेदसंहिता, वैदिक संशोधन मण्डल, पुणे, 1933
४. चरकसंहिता – राष्ट्रियसंस्कृतसंस्थानम् – नवदेहली,2011
५. छान्दोग्योपनिषद् (शाङ्करभाष्यसहिता)मोतिलाल बनारसीदास ,1983
६. तैत्तिरीयोपनिषद् (शाङ्करभाष्यसहिता)गीताप्रेस, गोरखपुर् ,1954
७. बृहदारण्यकोपनिषद्, रामकृष्ण मठ, चेन्नई, स्वामी जगदीश्वरानन्द / स्वामी गम्भीरानन्द, 1988
८. मनुस्मृतिः- मन्वर्थमुक्तावलीसहितव्याख्यया सहितः- राकेशशास्त्री , विद्यानिधिप्रकाशन् – 2005
९. विष्णुपुराणम-आत्मप्रकाशाख्याव्याख्यया सहितम् ,धानेशचन्द्र उप्रैति,परिबल् पब्लिकेशन्स्, दिल्ली
१०. सुश्रुतसंहिता, चौखम्बा संस्कृत संस्थान, वाराणसी, आचार्य प्रियव्रत शर्मा 1980
११. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर् जयदयाल गोयन्दका (तत्त्वविवेचनी टीका), 1932


[१]तैत्तिरीयोपनिषत् (2-1-1)
[२]विवेकचूडामणिः 154


ISSN : 2249-538X

# दैवव्यापाश्रयचिकित्सादिषु श्री शङ्कराचार्यस्य सौन्दर्यलहर्यां कार्यान्वयनम्

डॉ. पाडुर ए सुब्रमण्य शास्त्रीगल :
पीएच.डी(संस्कृत), शोधार्थी,
संस्कृति विश्वविद्यालयः,
मथुरा

श्रीविद्या सुब्रमण्यन्*
शोधच्छात्रा,
संस्कृति विश्वविद्यालयः,
मथुरा

***लेखसारः*** *– अस्मिन् शोधपत्रे सौन्दर्यलहर्याः श्लोकेषु निहितं मन्त्रशास्त्रं तथा दैवव्यापाश्रयचिकित्सायाः दार्शनिक-आधारं विश्लेष्य तस्य मनोवैज्ञानिकम् एवम् आध्यात्मिकप्रभावस्य अन्वेषणं क्रियते[१] । एषा अध्ययनप्रणाली दैवव्यापाश्रयचिकित्सां केवलं धार्मिकानुष्ठानत्वेन न पश्यन् तस्य उपचारपद्धतिं मनसः, शरीरस्य च सन्तुलनसाधने एकं वैज्ञानिकं सुव्यवस्थितं च साधनं मन्यते[२] । सौन्दर्यलहर्याः विशिष्टश्लोकानां मन्त्रशक्तिः मानसिकास्थिरतां दूरीकृत्य चेतसः आरोग्यवर्धनं कर्तुं समर्था इति एतत् शोधपत्रं प्रतिपादयति[३] । आयुर्वेदस्य त्रिविध-चिकित्सापद्धत्यां सत्वापजय-युक्तिव्यपाश्रय-दैवव्यापाश्रय-चिकित्सामध्ये दैवव्यापाश्रय चिकित्सायाः अन्तर्गतं मन्त्रजपादिकं मनसः सूक्ष्मस्तरं प्रभावितं कृत्वा मानसिक-आध्यात्मिक सन्तुलनं स्थापयितुं साहाय्यकं भवति[४] । एषा प्रक्रिया विशेषतः कर्मजव्याधीनां तथा मनोवैज्ञानिक-असाम्यस्य निवारणे मन्त्रध्वनीनां द्वारा उत्पन्न-सूक्ष्मतम-स्पन्दनैः चेतनां प्रसाद्य राजस-तामस-गुणानां बाधाम् अपनीय सत्त्वगुणस्य अभिवृद्धिं करोति[५] । एतद्विधिना मानिसकस्वास्थ्यस्य सुदृढीकरणं भवित यत् प्राचीन-आयुर्वेदसंहितासु वर्णित-दैव्यापाश्रय-चिकित्सायाः दार्शनिक-आधारं दृढयिति[६] । अस्याः विशिष्टचिकित्सापद्धत्याः मन्त्रोच्चारणं, होमादयश्च उपचाराः न केवलम् आध्यात्मिकशक्तिवर्धनार्थम् अपितु मानसिकव्याधीनां समूलविनाशाय अपि प्रभावजनकाः भवन्ति[७] । आदिशङ्कराचार्यस्य कृतौ समाहितैः मन्त्रैः उत्पन्नध्वनि-तरङ्गाः स्नायुमण्डलं शान्तं कृत्वा रुग्णानां मानस- चिन्तां न्यूनीकुर्वन्ति तथा च तेषां संज्ञानात्मककार्यक्षमतायां सकारात्मकं परिवर्तनं जनयन्ति[८] । एतेषां मन्त्राणां नियमित-अभ्यासः शरीरस्य दोषसाम्यावस्थां पुनः प्राप्तुं तथा च समग्र-स्वास्थ्यस्य संवर्धने विशिष्टां भूमिकां निर्वहति[९] । अतः सौन्दर्यलहरीगतमन्त्राणां उपयोगः 'मन्त्र-मणि-औषध'समन्वितचिकित्सायाः एकं विशिष्टं रूपं प्रस्तौति यत् मनोवैज्ञानिकस्वास्थ्यं सुदृढं कुर्वन् आधिदैविकक्लेशानां शमनार्थं साहाय्यकं भवति[१०]*

*आयुर्वेदे वर्णितेषु त्रिषु मुख्यचिकित्साविधिषु अन्यतमा दैवव्यापाश्रयचिकित्सा कर्म-मनोवैज्ञानिक-सूक्ष्मकारणात् उत्पद्यमानविकारप्रबन्धनार्थम् आध्यात्मिक-संस्कारात्मक-श्रद्धाधारित-विधिषु बलं ददाति । आदिशङ्कराचार्यस्य सौन्दर्यलहरी मन्त्रशास्त्रस्य, तन्त्रस्य, भक्त्याः, ध्यानस्य, चैतन्य-प्रधानस्य चिकित्सायाः च असाधारणम् एकीकरणं प्रतिनिधीकरोति, यत् दैवव्यापाश्रय-चिकित्सायाः सिद्धान्तैः सह निकटतया सङ्गतम् अस्ति ग्रन्थे पवित्रध्वनिः, लयात्मकजपः, ध्यानदृश्यीकरणं, यन्त्रपूजनं, संस्कारपालनं, भक्तिसमर्पणं च मनसः आध्यात्मिकपरिवर्तनस्य आन्तरिकशुद्धेः च साधनरूपेण प्रयुक्तम् अस्ति मन्त्रचिकित्सा, ध्वनिचिकित्सा, ध्यानचिकित्सा, भक्ति-आधारितचिकित्सा, कर्मशुद्धिः, संस्कारात्मकाभ्यासाः इत्यादयः विविधाः आयामाः सामूहिकरूपेण शरीरं, मनः, भावान्, चेतनां च सम्बोधयन् समग्रं चिकित्सारूपरेखां प्रदर्शयन्ति । ग्रन्थे वर्णितानां पुनरावृत्तिजप-चिन्तन-अभ्यासानां भाव-नियमन-मानसिक-शान्ति-आध्यात्मिक-बलं , सत्त्वगुणवर्धनं च प्रवर्धयन्ति इति मन्यते । आधुनिकव्याख्याः मनोदैहिकप्रासंगिकता ,ध्यानसन्तुलनं, न्यूरो-मनोवैज्ञानिकस्थिरीकरणं च माध्यमेन मनोदैहिक-सान्दर्भिकताम् अपि सूचयन्ति । दार्शनिकदृष्ट्या सौन्दर्यलहरी अद्वैतवेदान्तं शाक्ताध्यात्मेन सह सामञ्जस्यं करोति,*

***सम्पर्कसूत्रम्** - 8943340423 , Email- srividyasub@gmail.com

*भक्तिं ध्यानं च उच्चचेतनायाः समग्रकल्याणस्य च परिवर्तनकारीमार्गरूपेण प्रस्तुतं करोति एवं ग्रन्थः न केवलं भक्तिकाव्यत्वेन अपितु आयुर्वेदिकदैवव्यापाश्रयचिकित्सायाः अत्यावश्यकसिद्धान्तान् समाहितः परिष्कृतः मनो-आध्यात्मिकचिकित्सातन्त्रः इति अवगन्तुं शक्यते ।*

**कूटशब्दाः** *– दैवव्यापाश्रयचिकित्सा ; सौन्दर्यलहरी ; आदिशङ्कराचार्य ; मन्त्रचिकित्सा ; ध्वनिचिकित्सा ; भक्ति-चिकित्सा ; ध्यानचिकित्सा ; यन्त्रचिकित्सा ; मनो-आध्यात्मिकचिकित्सा ; आयुर्वेदचिकित्सा ; शाक्तपरम्परा ; चेतनाचिकित्सा ; आध्यात्मिकचिकित्सा ; समग्रस्वास्थ्यम् ।*

**आमुखम्**

आयुर्वेदः तिसृः चिकित्सापद्धतीः स्वीकरोति - दैवव्यापाश्रयचिकित्सा (आध्यात्मिकचिकित्सा), युक्तिव्यापाश्रयचिकित्सा (तर्कसंगत-औषधीयचिकित्सा), सत्त्वजयाचिकित्सा (मनोवैज्ञानिकचिकित्सा) । शास्त्रीयग्रन्थेषु दैवव्यापाश्रयस्य वर्णनं भवति यत् कर्ममूलविकारानां, अदृष्टप्रभावानां, मानसिकक्लेशानां, भयस्य, शोकस्य, आध्यात्मिकासन्तुलनस्य च उद्देश्यं भवति - मन्त्र-मङ्गल-बलि-होम-नियम-व्रत-उपवास-स्वस्त्ययन-प्राणिपात-तीर्थादि-विधिभिः ।

अस्मिन् सन्दर्भे सौन्दर्यलहरी अद्वितीयं स्थानं धारयति, यत् अद्वैतदर्शनम्, श्रीविद्यातन्त्रम्, मन्त्रशास्त्रम्, भक्तिमनोविज्ञानम्, ध्यानात्मकचिकित्सा, संस्कारपूजां, चेतनापरिवर्तनं च संयोजयति । अस्य संरचना दिव्यध्वनिं, पवित्रदृश्यं, संस्कारपूजां, समर्पणं, आध्यात्मिकोन्नतिं च दर्शयति ।

**आयुर्वेदे दैवव्यापाश्रयचिकित्सायाः अवधारणा**

दैवव्यापाश्रयचिकित्सा अतीतकर्म, आध्यात्मिकासन्तुलनं, नकारात्मकप्रभावाः इत्यादिभ्यः अदृष्टकारणेभ्यः उत्पद्यमानान् रोगान् प्रति प्रयुक्तान् श्रद्धाप्रधानोपायान् निर्दिशति । चरकसंहितायाम् प्रसिद्धेन कथनद्वारा तस्य परिभाषां कुर्वन्ति -

"स्थावषधिमणिमङ्गलहोलिहोमोपहारमानाप्रायिश्चित्तोपवासस्वस्तयनप्रणिपाताब्यादिदैविश्रय"

**चरकसंहिता ११ / ५४**

एतस्याः परिभाषा मन्त्रजपः, पवित्रौषधीरत्नधारणं, शुभकर्म, बलिहोम, भक्तिः, नियमपालनं, उपवासः, प्रायश्चित्तं, प्रार्थना, तीर्थयात्रा इत्यादिभिः अभ्यासैः कृता । एतेषाम् उद्देश्यं मनःशुद्धिः, आध्यात्मिकचेतनासुदृढीकरणं च । युक्तिव्यापाश्रयस्य विपरीतं, दैवव्यापाश्रयः श्रद्धा-भक्ति-संस्काराद्यनुशासन-आध्यात्मिकस्पन्दनैः कार्यं करोति, सत्त्वगुणाभिवृद्ध्या रजस्तमोन्यूनीकरणं करोति ।

आयुर्वेदः विशेषतः तासु परिस्थितिषु एतां चिकित्साम् अनुशंसति यत्र साधारणचिकित्सा सन्तोषजनकं न भवति - कर्मजविकाराः, मानसिकविकाराः, भयं, चिन्ता, ग्रहसम्बद्धाः क्लेशाः, मनोदैहिकरोगाः, अस्पष्टकारणाः रोगाः । एषा आशां, मानसिकस्थिरतां, भावनात्मकम् आश्वासनं, आध्यात्मिकशीलतां च निर्मातुं समर्था भवति । एवं दैवव्यापाश्रयचिकित्सा प्राचीनभारतीयचिकित्सायाः समग्रदृष्टिं प्रकाशयति, यत्र चिकित्सा शरीरस्य परं मानसिक-नैतिक-कर्मात्मक-आध्यात्मिकपक्षान् अपि समावेशयति ।

**सौन्दर्यलहरी : मन्त्रचिकित्सा**

मन्त्रचिकित्सा दैवव्यापाश्रयस्य महत्त्वपूर्णः आयामः । सौन्दर्यलहर्याः श्लोकाः केवलं काव्यप्रशंसाः न, अपितु विशिष्टमन्त्रैः, यन्त्रैः, संस्कारविधिभिः सम्बद्धाः, प्रत्येकं मानवास्तित्वस्य सूक्ष्मपरिमाणं प्रभावयितुं समर्थां स्पन्दनशक्तिं धारयन्ति । पवित्राक्षराणां पुनः पाठनेन उत्पन्नानि लयात्मकस्पन्दनानि मानसिकस्थिरतां,

भावनात्मकसन्तुलनं, एकाग्रतां, आध्यात्मिकजागरूकतां च सकारात्मकरूपेण प्रभावयन्ति ।

सौन्दर्यलहरी इत्यस्य प्रारम्भिकश्लोकेन अस्य सिद्धान्तस्य सुन्दरं चित्रणं कृतम् अस्ति –

**शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।**
**अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥**

शक्तिसंयुक्तशिवस्य एव सृष्टिसामर्थ्यं दर्शयन् चेतनासक्रियीकरणस्य, सुप्तशक्तिजागरणस्य, आध्यात्मिकसशक्तिकरणस्य च प्रतीकं भवति, ध्यानलंगररूपेण कार्यं करोति ।

**ध्वनिचिकित्सा**

सौन्दर्यलहरी ध्वनिचिकित्सायाः महत्त्वपूर्णम् उदाहरणं प्रतिनिधीकरोति - छन्दोबद्धकाव्यं, लयात्मकसंरचना, बीजाक्षराणि च शरीरमनसोः सूक्ष्मस्पन्दनं जनयन्ति । ध्वनिः भारतीयपरम्परायां ब्रह्माण्डीयशक्तेः अभिव्यक्तिः गण्यते । व्यवस्थितजपः श्वसननियन्त्रणं, भ्रान्तविचारस्थिरीकरणं, भावनात्मकशान्तिं च प्रेरयति ; आयुर्वेदिकपरम्पराः एतत् भय-चिन्तान्यूनीकरणे लाभप्रदं मन्यन्ते । आधुनिकव्याख्याः एतत् परासहानुभूतितंत्रिकातन्त्रसक्रियीकरणेन, मनो-आध्यात्मिककल्याणस्य चिकित्सासाधनरूपेण सह तुलयन्ति ।

**ध्यानं चैतन्यचिकित्सा**

बहवः श्लोकाः दिव्यमातुः ध्यानदृश्यरूपेण रचिताः, चेतनाप्रधानचिकित्सायाः साधनरूपेण कार्यं कुर्वन्ति । सजीवबिम्बानां भक्तिसान्द्रतायाश्च माध्यमेन देव्याः दिव्यसौन्दर्यस्य, करुणायाः चिन्तनं लौकिकविकारात् आध्यात्मिकशान्तिं प्रति चैतन्यम् उन्नतयति । एषा प्रक्रिया सत्त्ववजयचिकित्सासिद्धान्तानां सदृशी, नकारात्मकविचारस्थाने भक्ति-आशा-शान्त्यादिसकारात्मकभावस्थापनसहायिका । ध्यानात्मकः अवशोषणः चैतन्यं दुःखात् शान्तिं प्रति, भयात् समर्पणं प्रति पुनः निर्दिशति, भावनात्मकम् आश्वासनं, आन्तरिकं बलं च प्रददाति ।

**यन्त्रं संस्कारचिकित्सा**

अनेके श्लोकाः यन्त्रचित्रणेन, संस्कारपूजनेन, होमेन, पवित्रार्पणेन च सम्बद्धाः - इमे दैवव्यापाश्रयस्य महत्त्वपूर्णाः घटकाः, यत्र चिकित्सा आध्यात्मिकसंस्कारसाधनेन सिध्यति । श्रीविद्यापरम्परायाम् अनेकश्लोकाः आध्यात्मिकशुद्ध्यर्थं, मानसिकस्थिरतार्थं च यन्त्रैः संस्कारैश्च विहिताः । यन्त्रपूजा एकाग्रतां, अनुशासनं, भक्त्यवधानं च आग्रहयति, ज्यामितीयसान्द्रता-प्रतीकात्मकसंज्ञान-ध्यानविसर्जनैः मनसः आध्यात्मिकीकरणं च करोति ।

**भक्तिः चिकित्सारूपेण**

भक्तिः अथवा दिव्यमातुः समर्पणम् केन्द्रीयचिकित्सासिद्धान्तः - भावनात्मकदुःखम् आन्तरिकबलम् आध्यात्मिकानुकूल्यं च परिणमयितुं समर्था । हृदयस्पर्शि-प्रार्थना-चिन्तनैः भक्तः दिव्यसम्बन्धस्य भावं विकसयति, यत् भावनात्मकरेचनं, आन्तरिकम् आश्वासनं, आध्यात्मिकम् आशावादं च प्रददाति, एकान्तता-निराशा-भय-चिन्ता-मानसिकभारन्यूनीकरणसहायकं भवति । दिव्यमातृप्रतीकत्वं (दयालु, रक्षात्मक, पोषक, क्षमाशील) सुरक्षा-स्वीकार-आरामभावान् उद्दीपयति, सत्त्वगुणवर्धनेन मानसिककल्याणे योगदानं ददाति ।

**कर्मणः आध्यात्मिकशुद्धिः**

दैवव्यापाश्रयचिकित्सा कर्मजविकारेषु विशेषेण प्रशस्यते, यत्र साधारणोपचारः पर्याप्तः न भवति - अतः भक्ति-मन्त्र-संस्कार-दिव्यानुग्रहैः आध्यात्मिकोपचारावश्यकता । सौन्दर्यलहरी दिव्यमातरि समर्पणं, चैतन्यशुद्धिं, लौकिकबन्धनमुक्तिं च अधिकृत्य बलं ददाति ; भक्तः देव्याः स्मरणाराधनाभ्याम् अहङ्कारं भयम् आसक्तिं च अतिक्रामति । पारम्परिकसाधकमतेन भक्तिपूजाध्यानसहितः पाठः नकारात्मककर्मप्रभावन्यूनीकरणे,

विचारशुद्धौ, सत्त्वगुणवर्धने च सहायकः ।

**मनोदैहिकप्रासंगिकता**

आधुनिकव्याख्याः सूचयन्ति यत् मन्त्र-ध्यान-भक्ति-दृश्यीकरण-संस्काराणां एकीकृतप्रयोगेन महत्त्वपूर्णा मनोदैहिकसान्दर्भिकता विद्यते । लयात्मकजपः श्वसननियन्त्रणेन, एकाग्रतावर्धनेन च मनोवैज्ञानिकम् आन्दोलनं न्यूनीकरोति ; ध्यानात्मकदृश्यीकरणं भावनात्मकम् आश्वासनं संवर्धयति ; भक्त्यभ्यासाः शान्तमानसिकावस्थां प्रोत्साहयन्ति - एतत् आधुनिकमनः सन्तोषाभ्यासैः, ध्यानाधारितचिकित्साहस्तक्षेपैश्च सदृशम् ।

**चिकित्सा-आयामसारणी**

| घटकः | उपस्थितिः | चिकित्सासङ्गतिः |
|---|---|---|
| मन्त्रः | व्यापकम् | मानसिकशुद्धिः, स्पन्दनचिकित्सा |
| ध्यानम् | केन्द्रीयम् | भावनात्मकस्थिरीकरणम् |
| भक्तिः | व्यापकम् | मनोवैज्ञानिकानुकूल्यम् |
| यन्त्रम् | पारम्परिक | एकाग्रता, संस्कारचिकित्सा |
| होमपूजा | संस्कारपरम्परा | आध्यात्मिकशुद्धिः |
| नियमः | अन्तर्निहित | व्यवहारनियमनम् |
| प्रणिपातः | देवीसमर्पणम् | अहङ्कारनिवृत्तिः, भावनिवृत्तिः |
| श्रद्धा | आधारभूतम् | श्रद्धाप्रेरितचिकित्सा |

**दार्शनिकसंश्लेषणम्**

आदिशङ्कराचार्यस्य सौन्दर्यलहरी अद्वैतवेदान्तस्य शाक्ताध्यात्मनः च विलक्षणसंश्लेषणं प्रस्तौति - अद्वैतस्य आत्मब्रह्मैक्यसिद्धान्तं स्वीकुर्वती अपि भक्तिपूजां, मन्त्रं, ध्यानं च उच्चचेतनाप्राप्त्यर्थं परिवर्तनकारिसाधनत्वेन आलिंगयति । शक्तिः सृष्टेः, चैतन्यस्य च गतिशीलं ब्रह्माण्डशक्तिरूपेण चित्रिता । दिव्यमातुः पूजया आकांक्षी अहङ्कारं भयम् आसक्तिं च अतिक्रामति - भक्तिः अद्वैतविरुद्धं न, अपितु परमचेतनासाक्षात्कारं प्रति नेत्री प्रक्रिया ।

एषा दृष्टिः आयुर्वेदस्य समग्रसिद्धान्तैः सङ्गच्छते, यत्र स्वास्थ्यं शारीरिक-मानसिक-भावनात्मक-आध्यात्मिकसौहार्दस्य सन्तुलितावस्था । परिणामतः सौन्दर्यलहरी भक्तिसाहित्यं, ध्यानशास्त्रं, तांत्रिकपुस्तिका, मनआध्यात्मिकचिकित्सातन्त्रं च युगपत् कार्यं करोति ।

**निगमनम्**

सौन्दर्यलहरी भारतीयाध्यात्मिक-आयुर्वेद-परम्परायाः अन्तः दैवव्यापाश्रय-चिकित्सायाः व्यावहारिक-कार्यन्वयनस्य उत्तम-शास्त्रीय-उदाहरणेषु अन्यतमत्वेन तिष्ठति मन्त्रजपः, पवित्रध्वनिः, ध्यानदृश्यीकरणं, भक्तिसमर्पणं, यन्त्रपूजनं, संस्कारपालनं, चैतन्यप्रधानाः अभ्यासाः च माध्यमम् अवलम्ब्य, पाठः पारम्परिकशारीरिकचिकित्साशास्त्रेभ्यः अतिक्रम्य चिकित्सायाः बहु-आयामिकां दृष्टिं प्रस्तौति अस्य मनसः आध्यात्मिकरूपरेखा न केवलं शारीरिककल्याणम् अपितु भावनात्मकस्थिरतां, मानसिकशुद्धिं, कर्मसन्तुलनं, आध्यात्मिकम् उत्थानं च सम्बोधयति ।

ग्रन्थे प्राप्ताः विविधाः चिकित्सापरिमाणाः मन्त्रचिकित्सा, ध्वनिचिकित्सा, भक्ति-आधारितचिकित्सा, ध्यानचिकित्सा,

 ISSN : 2249-538X

कर्मशुद्धिः च समग्रस्वास्थ्यस्य आयुर्वेदिकसंकल्पनाभिः सत्त्वगुणवर्धनेन च निकटतया सङ्गच्छन्ते दिव्यमातुः दयालुः रक्षात्मकः च प्रतीकवादः भक्ताय भावनात्मकं आश्वासनं, अस्तित्वार्थं, मनोवैज्ञानिकानुकूल्यं च अधिकं प्रददाति आधुनिकदृष्ट्या सौन्दर्यलहरी इत्यनेन सह सम्बद्धाः बहवः अभ्यासाः मनःसन्तोष-प्रविधिः, ध्यान-चिकित्सा, ध्वनि-आधारित-विश्रामः, आध्यात्मिक-मनोचिकित्सा च सदृशाः सन्ति ।

दार्शनिकदृष्ट्या अद्वैतवेदान्तं शाक्तभक्त्या सह सुन्दरं समाकलितं कृत्वा आध्यात्मिकसाक्षात्कारः चिकित्सा च गहनतया परस्परं सम्बद्धाः प्रक्रियाः इति दर्शयतः । अतः सौन्दर्यलहरी न केवलं भक्तिसाहित्यम् अथवा तांत्रिकशास्त्रम् अपितु आयुर्वेदस्य समग्रदृष्टिम् दैवव्यापाश्रयचिकित्सा इत्यस्य अत्यावश्यकसिद्धान्तान् च समाहितं गहनं मनसः आध्यात्मिकचिकित्सातन्त्रं गणयितुं शक्यते ।

## References


१ Epiphanies of the Divine Feminine: A Hermeneutic Inquiry into the Aesthetic Mysticism of Saundarya Lahari-Sharan Sharma-The Creative Launcher publishers.

२ Various Dimensions Of Daivavyapashraya With Its Possible Rationality - A Jignasa–Sowjany 2021. International Ayurvedic Medical Journal

३ Rediscovering Daivavyapashraya Chikitsa: Traditional Spiritual Therapies for Holistic Mental Health Care-Pareek and Ritika 2025. https://doi.org/10.37648/medinity2025.030

४ Review on Daivavyapasraya Chikitsa in Ayurveda and Contemporary Perspective– Balu Narayanan 2025. International Journal For Multidisciplinary Research

५ Mantra Incantation in Ayurveda –Agarwal 2021 and Thakur 2025 https://medicaljournals.stmjournals.in/index.php/RRJoASYN/article/view/2622

६ Daiva as Dravya: Recontextualizing Daivavyapashraya Chikitsa through the Lens of Atharvaveda and Psychodermatology–Kamakshi and Sharma 2025-AYUSHDHARA

७ A Critical Appraisal of Daivavyapashraya Chikitsa w.s.r to Mantra and Homa in Adhyatmika Vyadhis –Vaikuntam Velandikumar 2024 Deshmukh Mishra 2024. AYUSHDHARA

८ Restoring Mental Balance through Mantras as a Transcendental Communication: a Systematic Review of Insights from the Atharva Veda -International Journal For Multidisciplinary Research-2024

९ Mantra (Incantations) - Divine Remedial In Ayurveda –Deshpande 2024 Sharma & Tiwari 2025 http://www.ayurpharm.com

१० Critical Analysis of Mantra Chikitsa-Pratap 2008, Prajapati 2020 https://www.ayujournal.org

११ Daivya Vyapashraya - A Divine Therapy Of Ayurveda- Kumari & Ranjan 2023, Mukhedkar & Chavan 2022-International Ayurvedic Medical Journal

# चतुर्वेदेषु प्रतिपादितानां दार्शनिकतत्त्वानां समालोचनात्मकमनुशीलनम्

डा टुम्पा जाना
सहायकाध्यापिका
नाड़ाजोल राज कोलेज
पश्चिमबंगाल

**शोधसारः**- प्रस्तुतस्य शोधलेखस्य शीर्षकं "चतुर्वेदेषु प्रतिपादितानां दार्शनिकतत्त्वानां समालोचनात्मकमनुशीलनम्" इति अस्ति । अस्मिन् शोधलेखे चतुर्षु वेदेषु प्रतिपादितानां दार्शनिकतत्त्वानां समालोचनात्मकमनुशीलनं प्रस्तुतम् । विशेषतः जीवात्मा, ब्रह्म, जगत्, प्रकृतिः, सृष्टिः, कर्म, पुनर्जन्म तथा अध्यात्मविद्यासम्बद्धाः विषयाः विवेचिताः सन्ति । अध्ययनात् ज्ञायते यत् चतुर्वेदेषु जीवस्य नित्यत्वम्, ब्रह्मणः सर्वव्यापकत्वम्, जगतः तात्त्विकाधारत्वम्, कर्मफलस्य अनिवार्यता तथा आत्मज्ञानस्य महत्त्वं सुस्पष्टतया प्रतिपादितम् अस्ति । अतः वैदिकदर्शनस्य सम्यगवबोधनाय चतुर्वेदानामध्ययनम् अद्यापि समानरूपेण प्रासङ्गिकम् अस्ति ।

**मुख्यशब्दाः**: जीवात्मा, ब्रह्म, जगत्, अध्यात्मविद्या, चतुर्वेदाः ।

**भूमिका** - मानवसभ्यतायाः इतिहासे सत्यस्य, जीवनस्य तथा जगतः मूलतत्त्वस्य अन्वेषणं सर्वदा चिन्तनस्य केन्द्रबिन्दुः अभवत् । भारतीयमनीषायां अस्य अन्वेषणस्य प्राचीनतमं स्वरूपं वेदेषु संरक्षितम् अस्ति । वैदिकऋषयः दृश्यजगतः घटनाः केवलं बाह्यदृष्ट्या न अवलोकितवन्तः, अपि तु तासां पृष्ठभूमौ स्थितस्य शाश्वततत्त्वस्य अन्वेषणं कृतवन्तः । तेषां चिन्तने ज्ञानं, कर्म, उपासना तथा आत्मानुभूतिः परस्परविरोधिनः न, अपि तु जीवनस्य समग्रबोधाय परस्परपूरकाः मार्गाः सन्ति । अतः चतुर्वेदेषु प्रतिपादितानां दार्शनिकतत्त्वानां अध्ययनं केवलं प्राचीनभारतीयचिन्तनस्य स्वरूपं ज्ञातुं न सहायकरं भवति, अपि तु मानवजीवनस्य सार्वकालिकप्रश्नानां समाधानदृष्टिमपि प्रददाति । एतदेव अस्य विषयस्य अध्ययनस्य औचित्यं तथा प्रासङ्गिकतां प्रतिपादयति ।

**ऋग्वेद** - भारतीयवाङ्मयपरम्परायां ऋग्वेदस्य स्थानं सर्वप्रथमं तथा सर्वाधिकं गौरवपूर्णं च अस्ति । ऋग्वेदः केवलं प्राचीनतमः काव्यसंग्रहः अथवा यज्ञीयमन्त्राणां निधिः न, अपि तु मानवचिन्तनस्य आद्यः दार्शनिकसम्पदः अपि अस्ति । प्रस्तुतेषु मन्त्रेषु एषां तत्त्वानां सुविस्तृतं निरूपणं दृश्यते, यत् परवर्तिभारतीयदर्शनस्य मूलाधाररूपेण विकसितम् । जीवात्माविषये ऋग्वेदस्य दृष्टिकोणः अत्यन्तं सूक्ष्मः अस्ति । आत्मा न देहः, न इन्द्रियसमूहः, न मनः, अपि तु चेतनस्वरूपः, नित्यः, अमरः च अस्ति । "अमर्त्यो मर्त्येन सयोनिः"[१] इति मन्त्रे अमरात्मनः मर्त्यशरीरे स्थितिः प्रतिपादिता । "मर्तेष्वमृतो नि धायि"[२], "न मृत्यवेऽ- वतस्थे कदाचन"[३] इत्यादिमन्त्रेषु आत्मनः अविनाशित्वं सूचितम् । शरीरं नश्यति, किन्तु आत्मा न विनश्यति । "जीवो मृतस्य चरति स्वधाभिः"[४] इति मन्त्रे कर्मवशात् जीवस्य गमनागमने वर्णिते । "तव शरीरं पतयिष्णवर्वदन्"[५] इति मन्त्रे शरीरस्य अनित्यत्वं स्पष्टतया प्रतिपादितम् । अनेन ज्ञायते यत् ऋग्वैदिकऋषयः मानवजीवनं केवलं भौतिकसत्तारूपेण न पश्यन्ति, अपि तु तस्य अन्तःस्थिताम् अमरचेतनां प्रधानतया स्वीकुर्वन्ति ।

---

***सम्पर्कसूत्रम्** - 8101140996, Email- sanskritmoyna@gmail.com

[१]ऋग्वेद, १.१६४.३०

[२]ऋग्वेद, १०.४५.७

[३]ऋग्वेद, १०.४८.५

[४]ऋग्वेद, १.१६४.३०

[५]ऋग्वेद, ५.१६३.११

सृष्टिविषये ऋग्वेदे विशेषतः नासदीयसूक्ते (१०.१२९) गहनं चिन्तनं दृश्यते। "नासदासीन्नो सदासीत्तदानीम्"[१] इति मन्त्रे सृष्टेः पूर्वावस्थायाः वर्णनं कृतम्। न तदा सत् आसीत्, न असत्; न व्यक्तजगत्, न नामरूपव्यवहारः। "न मृत्युरासीदमृतं न तर्हि"[२] इति मन्त्रे जीवन-मरणयोः अभावः सूचितः। "तम आसीत्तमसा गूढमग्रे" (१०.१२९.३) इत्यत्र अव्यक्तावस्थायाः चित्रणं कृतम्। "कामस्तदग्रे समवर्तताधि"[३] इति मन्त्रे सृष्टेः आद्यप्रेरणाशक्तिः निर्दिष्टा। ऋषयः अत्र दार्शनिकप्रश्नान् पृच्छन्ति—सृष्टिः कथम् अभवत्? कुतः अभवत्? कः जानाति? "यो अस्याध्यक्षः परमे व्योमन्"[४] इत्यनेन परमेश्वरस्य नियामकत्वं सूचितम्। अयं सूक्तः केवलं धार्मिककथनं न, अपितु विश्वोत्पत्तेः दार्शनिकानुसन्धानम् अस्ति।

सृष्टेः क्रमिकविकासः अपि ऋग्वेदे वर्णितः। "असतः सदजायत"[५], "ब्रह्मणश्च सत्यं चाभीद्धात् तपसोऽध्यजायत"[६], "ततो रात्र्यजायत ततः समुद्रो अर्णवः" (१०.१९०.१) इत्यादिमन्त्रेषु विश्वस्य क्रमशः विकासः निरूपितः। "हिरण्यगर्भः समवर्तताग्रे" (१०.१२१.१) इति मन्त्रे हिरण्यगर्भः अथवा परमेश्वरः सृष्टेः आदिकारणरूपेण प्रतिपादितः। ऋग्वैदिकदृष्ट्या विश्वं न निरर्थकसंयोगः, अपितु सुव्यवस्थितस्य दैवीयक्रमस्य परिणामः।

अध्यात्मविद्या ऋग्वेदस्य दार्शनिकचिन्तनस्य केन्द्रबिन्दुः अस्ति। "एको देवो अमर्त्यः" (२.३.९) इति मन्त्रे परमात्मनः एकत्वं प्रतिपादितम्। "दिवस्पदं गुहा हितम्"[७] इति मन्त्रे हृदयगुहायां स्थितस्य दिव्यतत्त्वस्य वर्णनं दृश्यते। "बोधिन्मना" (२.२६.२), "मनीषामस्य पतिः" (१.११.८), "बृहज्ज्योतिः" (६.९.५) इत्यादिषु मन्त्रेषु ज्ञानस्य, अन्तर्दृष्टेः तथा आत्मप्रकाशस्य महत्त्वं प्रतिपादितम्। "य ईत्तद्विदुस्ते अमृतत्वमानशुः"[८] इति मन्त्रे आत्मविद्यायाः परमफलरूपेण अमृतत्वं निर्दिष्टम्। अनेन स्पष्टं भवति यत् ऋग्वैदिकऋषीणां मते आत्मज्ञानमेव मानवजीवनस्य सर्वोच्चलक्ष्यम्।

दार्शनिकतत्त्वेषु प्रकृत्याः अपि महत्त्वपूर्णं स्थानम् अस्ति। "अव्यक्ता स्वधया वर्तमाना"[९] इति मन्त्रे प्रकृतेः सूक्ष्मरूपं निर्दिष्टम्। "अव्यक्तं च व्यक्तं परमे व्योमन्"[१०] इति मन्त्रे व्यक्त-अव्यक्तयोः आधारभूतस्य परमतत्त्वस्य निरूपणं दृश्यते। अत्र प्रकृतिः जगतः उपादानकारणरूपेण स्वीकृता, किन्तु सा स्वतन्त्रनियन्त्री न; परमात्माधीना शक्तिरूपेण अवलोकिता। एषा धारणा परवर्तीसांख्यवेदान्तयोः चिन्तनपरम्परायाः पूर्वपीठिका इव दृश्यते।

कर्मफलसिद्धान्तः ऋग्वेदस्य नैतिकदर्शनस्य मेरुदण्डः अस्ति। "नियः संकल्पो मनसा चरामि"[११] इति मन्त्रे मानवस्य कर्मस्वातन्त्र्यं प्रतिपादितम्। मनुष्यः स्वेच्छया कर्म करोति, किन्तु तस्य फलात् न पलायितुं शक्नोति। "मा तत्कर्म वसवो यच्चयध्वे"[१२] इति मन्त्रे दुष्कर्मत्यागस्य उपदेशः प्रदत्तः। "मर्ताः सन्तो अमृतत्वमानशुः"[१३]

---

[१] ऋग्वेद, १०.१२९.१

[२] ऋग्वेद, १०.१२९.२

[३] ऋग्वेद, १०.१२९.४

[४] ऋग्वेद, १०.१२९.७

[५] ऋग्वेद, १०.७२.२

[६] ऋग्वेद, १०.१९०.१

[७] ऋग्वेद, १.१०.१

[८] ऋग्वेद, १.१६४.३९

[९] ऋग्वेद, १०.२७.१९

[१०] ऋग्वेद, १०.५.७

[११] ऋग्वेद, १.१६४.३७

[१२] ऋग्वेद, ७.५२.२

[१३] ऋग्वेद, १.११०.४

इति मन्त्रे सत्कर्मणां महान् फलप्रदत्वं सूचितम्। ऋग्वैदिकऋषयः नैतिकजीवनं, सत्याचरणं तथा कर्तव्यपालनं मानवोन्नतेः आधाररूपेण स्वीकुर्वन्ति।

पुनर्जन्मविषयकचिन्तनम् अपि ऋग्वेदे दृश्यते। "असुं स इन्द्र वः पुनः"[१], "को नो मह्या अदितये पुनर्दात्" (१०.२४.१), "पुनर्नः पृथिवी ददातु" (१०.५७.७), "स नो मह्या अदितये पुनर्दात्" (१०.२४.२) इत्यादिमन्त्रेषु पुनरागमनस्य भावना व्यक्ता। "विद्वान् जन्मोभया कवे"[२] इति मन्त्रे भूतभविष्यजन्मयोः संकेतः प्राप्तः। यद्यपि पुनर्जन्मस्य सिद्धान्तः उत्तरवर्तीभारतीयदर्शने अधिकविकसितः अभवत्, तथापि तस्य बीजारूपं ऋग्वेदे विद्यमानम् इति निःसंशयं वक्तुं शक्यते।

योगसाधनाविषये ऋग्वेदः बाह्यकर्मापेक्षया अन्तःकरणशुद्धेः महत्त्वं प्रतिपादयति। "इन्द्रो मुनीनां सखा" (८.१७.१४) इति मन्त्रे साधकस्य ईश्वरसम्बन्धः सूचितः। "उपह्वरे गिरीणां संगमे च नदीनाम्"[३] इति मन्त्रे एकान्तध्यानस्य महत्त्वं प्रतिपादितम्। "धिया विप्रो अजायत" तथा "मनो यत्र वि तद् धृषद्विचेतसः"[४] इत्यादिषु मन्त्रेषु मनोनिग्रहः, ध्यानम्, आत्मचिन्तनं च ज्ञानप्राप्तेः साधनरूपेण वर्णितम्।

लोक-परलोकविषये ऋग्वेदे मोक्षस्य आनन्दमयस्वरूपं निरूपितम्। "तत्र माममृतं कृधि" (९.११३.८), "मा वेहे पवमानामृते लोके अक्षिते" (९.११३.७), "यत्र ज्योतिरजस्रम्" (९.११३.७), "यत्र ब्रह्मस्य विष्टपम्" (९.११३.१०), "यत्रानन्दाश्च मोदाश्च" (९.११३.११) इत्यादिमन्त्रेषु शाश्वतानन्दमयस्य अमृतलोकस्य वर्णनं कृतम्। अत्र दुःखस्य अभावः, ज्ञानस्य पूर्णता, आत्मनः परमशान्तिः च प्रतिपादिता।

एवं समग्रदृष्ट्या ऋग्वेदे जीवात्मनः अमरत्वम्, परमात्मनः सार्वभौमसत्ता, सृष्टेः दार्शनिकव्याख्या, प्रकृतेः सूक्ष्मस्वरूपम्, कर्मफलस्य अनिवार्यता, पुनर्जन्मस्य सम्भावना, योगसाधनायाः आवश्यकता तथा मोक्षस्य परमपुरुषार्थत्वं सुस्पष्टतया प्रतिपादितम्। एते विचाराः परवर्तीभारतीयदर्शनस्य आधारभूततत्त्वरूपेण विकसिताः। अतः ऋग्वेदः केवलं वैदिकधर्मस्य आदिग्रन्थः न, अपितु सम्पूर्णभारतीयदार्शनिकपरम्परायाः मूलप्रेरणास्रोतः इति निःसंशयं स्वीकरणीयम्।

**यजुर्वेद** - भारतीयदर्शनस्य इतिहासे यजुर्वेदस्य विशिष्टं स्थानम् अस्ति। सामान्यतया यजुर्वेदः यज्ञकर्मप्रधानः वेदः इति प्रसिद्धः, किन्तु तस्य मन्त्रेषु निहितं दार्शनिकचिन्तनं अत्यन्तं गम्भीरं तथा व्यापकं च अस्ति। यजुर्वैदिकऋषयः केवलं कर्मकाण्डस्य विधानकर्तारः नासन्, अपितु ते जीवनस्य परमसत्यस्य अन्वेषकाः अपि आसन्। तेषां चिन्तने ईश्वरः, ब्रह्म, जीवः, प्रकृतिः तथा अध्यात्मविद्या—एते सर्वे विषयाः परस्परं सम्बद्धरूपेण प्रतिपादिताः सन्ति। यजुर्वेदस्य दार्शनिकदृष्टिः मानवजीवनस्य बाह्यव्यवहारं तथा आन्तरिकविकासं समन्वययति। यजुर्वेदे ईश्वरः सर्वव्यापकः, सर्वज्ञः तथा विश्वनियन्ता इति प्रतिपादितः। सः केवलं सृष्टेः आरम्भकर्ता न, अपितु तस्याः संरक्षणकर्त्ता तथा नियामकः अपि अस्ति। "अक्षरं ब्रह्म"[५] इत्यादिषु मन्त्रेषु ईश्वरस्य नित्यत्वं तथा अविनाशित्वं प्रतिपादितम्। "न तस्य प्रतिमा अस्ति"[६] इति मन्त्रे तस्य अद्वितीयत्वं विशेषतया निरूपितम्। यजुर्वैदिकदृष्ट्या ईश्वरः इन्द्रियगोचरः न भवति, किन्तु तस्य सत्ता सम्पूर्णविश्वे अनुभूयते। विश्वस्य नियमबद्धता, प्रकृतेः समन्वितगतिः, जीवनस्य अद्भुतव्यवस्था च तस्य अस्तित्वस्य प्रमाणरूपेण स्वीक्रियन्ते।

[१] ऋग्वेद, १०.५९.१
[२] ऋग्वेद, ३.५५.७
[३] ऋग्वेद, ८.६.२८
[४] ऋग्वेद, ८.१३.२०
[५] यजुर्वेद, १६८६
[६] यजुर्वेद, १७५१

 ISSN : 2249-538X

अत्र ईश्वरः केवलं उपास्यदेवता न, अपितु समस्तसत्तायाः मूलाधारभूतं चेतनतत्त्वम् अस्ति।

ईश्वरतत्त्वेन सह ब्रह्मतत्त्वस्य अपि गहनं विवेचनं दृश्यते। "ब्रह्म जज्ञानं प्रथमम्"[1] इत्यनेन ब्रह्मणः आदिकारणत्वं सूचितम्। ब्रह्म न किञ्चित् सीमितं पदार्थतत्त्वम्, अपितु समस्तविश्वस्य आधारभूतं सत्यं मन्यते। दृश्यजगत् परिवर्तनशीलम् अस्ति, किन्तु ब्रह्म शाश्वतं, तथा नित्यम् अस्ति। "महतो महीयान्"[2] इत्यस्य भावः ब्रह्मणः अनन्तत्वं प्रतिपादयति। यजुर्वैदिकऋषयः मन्यन्ते यत् समस्तनामरूपात्मकजगतः पृष्ठभूमौ यत् एकं नित्यं सत्यं तिष्ठति, तदेव ब्रह्म। अनेन ब्रह्मज्ञानं केवलं बौद्धिकविमर्शस्य विषयः न भवति, अपितु जीवनस्य परमलक्ष्यरूपेण प्रतिष्ठां प्राप्नोति। ब्रह्मणः साक्षात्कारः एव मानवजीवनस्य परमोद्देशः इति यजुर्वैदिकदृष्टिः।

यजुर्वेदे प्रकृतितत्त्वस्य विवेचनं विशेषरूपेण दार्शनिकं दृश्यते। सृष्टेः आद्यावस्थां चिन्तयन्तः ऋषयः प्रश्नं कुर्वन्ति—विश्वस्य आरम्भः कथम् अभवत्? "असद्वा इदमग्र आसीत्"[3] इत्यादिमन्त्रेषु अव्यक्तावस्थायाः उल्लेखः दृश्यते। "अपां गर्भः" (१९८३), "तम आसीत्"[4] इत्यादयः मन्त्राः सृष्टेः रहस्यं सांकेतिकरूपेण प्रकाशयन्ति। प्रकृतिः अत्र स्वतन्त्रसत्ता न, अपितु परमात्मनः शक्तिरूपेण अवलोक्यते। सृष्टिः न केवलं पदार्थानां यान्त्रिकसंयोगस्य परिणामः, अपि तु चेतननियमनाधीना सुव्यवस्थितप्रक्रिया इति यजुर्वैदिकमतम्। अयं विचारः आधुनिकवैज्ञानिकजिज्ञासायाः अपि समीपे स्थितः दृश्यते, यतः ऋषयः अपि जगतोत्पत्तेः मूलकारणस्य अनुसन्धानं कर्तुम् इच्छन्ति स्म। अध्यात्मविद्या यजुर्वेदस्य दार्शनिकचिन्तनस्य परिपाकरूपा अस्ति। ईश्वरस्य, ब्रह्मणः, जीवस्य तथा प्रकृतेः यथार्थज्ञानं यदा साधकस्य अन्तःकरणे जागरूकतां जनयति, तदा अध्यात्ममार्गः उद्घाटितो भवति। "अगन्म ज्योतिः" (१९९३), "आत्मानं मे" (१९९७), "उत्तमं ज्योतिः"[5], "तेनेहामृतत्वम्"[6] इत्यादिषु मन्त्रेषु आत्मसाक्षात्कारस्य दिशा प्रदर्शिता। यजुर्वैदिकऋषीणां मते मनुष्यस्य परमलक्ष्यं बाह्यभोगेषु नास्ति, किन्तु आत्मविद्यायाम् अस्ति। आत्मज्ञानं मनुष्यं स्वस्वरूपस्य बोधं ददाति, तेन सः जीवनस्य वास्तविकमर्थं ज्ञातुं शक्नोति। अध्यात्मविद्या नैतिकजीवनस्य अपि आधारः अस्ति, यतः आत्मबोधेन सह सत्यनिष्ठा, अहिंसा, दया, संयमः, श्रद्धा च स्वाभाविकरूपेण विकसिताः भवन्ति।

यजुर्वैदिकदर्शने कर्मस्य महत्त्वम् अप्रत्यक्षरूपेण सर्वत्र दृश्यते। जीवः स्वकर्मणां फलम् अवश्यमनुभवति। आत्मविकासः, नैतिकोन्नतिः, सामाजिककल्याणं च कर्मणा एव सम्भवति। यजुर्वैदिकऋषयः निष्क्रियतां न समर्थयन्ति, अपितु विवेकयुक्तकर्मणः महत्त्वं प्रतिपादयन्ति। ज्ञानं कर्मणः मार्गदर्शकं भवेत्, कर्म च ज्ञानस्य व्यावहारिकरूपम् इति तेषां चिन्तनम्। अनेन यजुर्वेदः केवलं ध्यानप्रधानं न, अपितु कर्मयोगप्रधानं दर्शनमपि प्रस्तुतयति।

समग्रतया दृष्टे यजुर्वेदस्य दार्शनिकतत्त्वानि भारतीयचिन्तनपरम्परायाः दृढमूलानि सन्ति। ईश्वरः विश्वस्य नियन्ता, ब्रह्म परमसत्यं, जीवः चेतनस्वरूपः, प्रकृतिः सृष्टेः आधारशक्तिः तथा अध्यात्मविद्या जीवनस्य परममार्गः इति तत्र प्रतिपादितम्। एतेषां तत्त्वानां समन्वयेन मानवजीवनस्य एकं समग्रं दर्शनं निर्मीयते, यत्र ज्ञानं, कर्म, श्रद्धा तथा आत्मानुभवः परस्परं पूरकत्वेन प्रतिष्ठिताः सन्ति। अतः यजुर्वेदः केवलं यज्ञकर्मणां ग्रन्थः

[1] यजुर्वेद, १८७९
[2] यजुर्वेद, १८८९
[3] यजुर्वेद, १९८४
[4] यजुर्वेद, १९८८
[5] यजुर्वेद, २०००
[6] यजुर्वेद, २००१

न, अपितु मानवजीवनस्य आध्यात्मिक, नैतिक तथा दार्शनिकविकासस्य शाश्वतमार्गदर्शकः इति निःसंशयं वक्तुं शक्यते ।

**सामवेद-** वैदिकवाङ्मये सामवेदस्य विशिष्टं स्थानम् अस्ति । यद्यपि सामवेदः सामान्यतया उपासनागान-प्रधानः वेदः इति प्रसिद्धः, तथापि तस्य अन्तर्निहितेषु मन्त्रेषु गम्भीरं दार्शनिकचिन्तनं निहितम् अस्ति । साम-वैदिकऋषयः मानवजीवनस्य परमलक्ष्यं, जीवस्य स्वरूपम्, परमात्मनः महत्त्वम्, जगतः रहस्यम्, कर्मफलस्य अनिवार्यतां तथा पुनर्जन्मस्य तत्त्वं सूक्ष्मदृष्ट्या विवेचितवन्तः ।

सामवेदे परमात्मा सर्वस्य जगतः मूलकारणम् इति प्रतिपादितम् । "लोककृज्जनिता"[१] , "विश्वकर्मा"[२], "विश्वरूपम्" (२४२५), "अस्य प्राणो जगतः"[३], "ईशानमस्य जगतः" (२४२७), "ईशानमिदं जगतः" (२४२८) इत्यादयः मन्त्राः स्पष्टतया सूचयन्ति यत् विश्वस्य उत्पत्तिः, स्थितिरेव च परमात्मनः अधीना अस्ति । स एव विश्वस्य रचयिता, पोषकः, नियन्ता च । "विश्वस्य पतिः" (२४३५), "विश्वस्य गर्भः" (२४३६), "विश्वधायाः" (२४३८) इत्यादिषु मन्त्रेषु तस्य विश्वव्यापकशक्तिः प्रतिपादिता । "यस्य छायामृतं यस्य मृत्युः"[४] इति मन्त्रे जीवनमरणयोः अपि परमात्माधीनत्वं सूचितम् । अयं भावः केवलं धार्मिकविश्वासः न, अपितु विश्वस्य एकत्वं तथा व्यवस्थां प्रतिपादयन् गम्भीरं दार्शनिकदृष्टिकोणं प्रस्तुतयति । "न त्वावानन्यो दिव्यो न पार्थिवः"[५], "मा चिदन्यद् विशंसत" (२४६५), "एको विश्वस्य भुवनस्य राजा"[६] इत्यादिमन्त्रैः परमात्मनः अद्वितीयत्वं प्रतिपाद्यते । अनेन ज्ञायते यत् सामवैदिकदर्शने परमात्मा सर्वसत्तानां परमाधारः अस्ति । जगतः स्वरूपविषये सामवेदे समन्वयात्मकदृष्टिः दृश्यते । जगत् न मिथ्या, न च स्वतन्त्रं कारणम्, अपितु परमात्मनः शक्तेः अभिव्यक्तिः इति अत्र प्रतिपाद्यते । "भुवनानि तस्थुः" (२४२९), "सत्यस्य योनिम्" (२५०१), "सत्यस्य सत्यम्" (२५०२), "सत्यं बृहत्" (२५०३), "ऋतस्य धाम" (२५०४), "ब्रह्मणः पदम्" (२५०५) इत्यादिमन्त्रेषु जगतः आध्यात्मिकाधारः प्रतिपादितः । विश्वे यः नियमः, सौन्दर्यम्, समन्वयः च दृश्यते, सः कस्यचित् अचेतनस्य परिणामः न, अपितु परमचेतनस्य योजनायाः प्रकाशः इति ऋषीणां मतम् । अनेन सामवैदिकदर्शनं भौतिकवादस्य अपेक्षया आध्यात्मिकविश्वदृष्टेः समर्थनं करोति ।

कर्मतत्त्वस्य विवेचनं सामवैदिकदर्शने अत्यन्तं प्रौढरूपेण कृतम् । "जानाति" (२४५२), "कर्मणा" (२४५३), "सुकृतम्" (२४५४), "दुष्कृतम्" (२४५५), "मनः" (२४५६), "वसानो अकल्कम्" (२४४८), "न ऋते श्रान्तस्य" (२४७४) इत्यादिमन्त्रेषु मनुष्यस्य कर्मप्रधानजीवनस्य उपदेशः दृश्यते । कर्म एव मनुष्यस्य भविष्यत् निर्माति । सत्कर्मणः फलम् उन्नतिः, दुष्कर्मणः फलम् अवनतिः इति सिद्धान्तः अत्र निहितः । सामवेदः कर्मयोगस्य, पुरुषार्थस्य तथा उत्तरदायित्वपूर्णजीवनस्य प्रेरणां ददाति । भाग्यं कर्मफलस्य परिणामः अस्ति, न तु कर्मस्य विकल्पः—इति भावना अत्र अन्तर्निहिता दृश्यते । पुनर्जन्मवादः अपि सामवेदे महत्त्वपूर्णरूपेण प्रतिपादितः । "पुनर्मनः" (२४५७), "पुनर्नः" (२४५८), "य एषो जनुषा" (२४५९), "पुनर्भवः" (२४६०), "पुनरायुः" (२४६१), "पुनर्जीवनम्" (२४६२), "पुनरागमनम्" (२४६३) इत्यादिमन्त्रेषु जीवस्य निरन्तरयात्रा वर्णिता । शरीरस्य नाशः अन्तिमसत्यं न, अपितु आत्मनः नूतनयात्रायाः आरम्भः इति वैदिकदृष्टिः । कर्मफलसिद्धान्तस्य तात्त्विकपूर्णता

[१]सामवेद, २४२२
[२]सामवेद, २४२४
[३]सामवेद, २४२६
[४]सामवेद, २४४०
[५]सामवेद, २४४९
[६]सामवेद, २४६६

 ISSN : 2249-538X

पुनर्जन्मवादेन एव सम्पद्यते। यतः कृतकर्मणां फलानि सर्वदा एकस्मिन् जन्मनि न दृश्यन्ते, अतः पुनर्जन्मस्य सिद्धान्तः नैतिकविश्वव्यवस्थायाः दार्शनिकस्पष्टीकरणं ददाति।

सामवेदस्य दार्शनिकदृष्टौ जीवः, परमात्मा, जगत्, कर्म, अध्यात्मविद्या तथा पुनर्जन्म—एते सर्वे विषयाः परस्परं सम्बद्धाः सन्ति। जीवः परमात्मनः अधीनः सन् कर्म करोति, कर्मफलानि भुङ्क्ते, पुनर्जन्मानि प्राप्नोति, अध्यात्मविद्यया आत्मस्वरूपं ज्ञात्वा परमसत्यस्य साक्षात्कारं करोति। "अक्षरे" (२४९२), "परमे व्योमन्" (२४९४), "अमृतस्य नाभिः" (२४९७), "सत्यस्य सत्यम्" (२५०२), "हृदा पश्यन्ति" (२५०८), "श्रद्धा माता" (२५१०) इत्यादयः मन्त्राः अस्य समग्रदर्शनस्य सारभूताः सन्ति। अतः सामवेदः केवलं गानप्रधानो वेदः न, अपितु भारतीयदार्शनिकपरम्परायाः एकः महत्त्वपूर्णः आधारस्तम्भः इति निःसंशयं वक्तुं शक्यते।

**अथर्ववेद** - अथर्ववेदः वैदिकवाङ्मये दार्शनिकदृष्ट्या अत्यन्तं महत्त्वपूर्णः ग्रन्थः अस्ति। अस्मिन् वेदे ईश्वरस्य, ब्रह्मणः, आत्मनः, जीवस्य, प्रकृतेः, सृष्टेः तथा विश्वस्य गूढतत्त्वानां विशदं निरूपणं दृश्यते। उपनिषदां ये प्रमुखाः सिद्धान्ताः, तेषां बीजरूपं चिन्तनम् अथर्ववेदे एव विद्यमानम्। अतः अथर्ववेदः भारतीयदर्शनपरम्परायाः आधारभूतग्रन्थत्वेन स्वीक्रियते।

अथर्ववेदे ईश्वरः अजन्मा, सर्वव्यापी, सर्वशक्तिमान्, सर्वज्ञः च इति प्रतिपादितः। "अजो अतिसर्जु ज्योतिषां ज्योतिः"[१] इति मन्त्रे ईश्वरस्य अजन्मत्वं तेजोमयस्वरूपता च निरूपिता। "अहं जजान पृथिवीमुत द्याम्"[२], "यो द्याम् पृथिवीं जनयन् देव एकः"[३] इत्यादिमन्त्रेषु तस्य जगत्कर्तृत्वं प्रतिपादितम्। "ईशानमस्य जगतः"[४] इति मन्त्रे ईश्वरस्य विश्वनियन्तृत्वं प्रकाशितम्। "विश्वकर्मा विश्वदेवो महानसि"[५] इत्यत्र सृष्टेः नियन्तृत्वेन तस्य महत्त्वं निरूपितम्। अथर्ववेदे ब्रह्म सर्वव्यापकं, अनन्तं, चेतनस्वरूपं च मन्यते। "ब्रह्म जज्ञानं प्रथमं पुरस्तात्"[६] इति मन्त्रे ब्रह्मणः आदिकारणत्वं प्रतिपादितम्। "ब्रह्म सूर्यसमं ज्योतिः"[७] इति मन्त्रे तस्य प्रकाशमयस्वरूपं वर्णितम्। "ब्रह्म वै वाचः परं व्योम"[८] इति मन्त्रो दर्शयति यत् ब्रह्म वाङ्मनसोः अपि परम् अस्ति। "ब्रह्मेदममृतं पुरस्तात्"[९] इति मन्त्रे तस्य अमृतस्वभावः प्रतिपादितः। "स्कम्भो दाधार द्यामुतेमां पृथिवीम्"[१०] इति मन्त्रे ब्रह्मणः विश्वाधारत्वं सूचितम्।

आत्मतत्त्वस्य विवेचनम् अथर्ववेदे सूक्ष्मरूपेण दृश्यते। आत्मा नित्यः, अमरः, सर्वगतः च। "अयमुतोऽस्म्युतो म आत्मा" (३४७८) इति मन्त्रे आत्मनः सर्वव्यापकत्वं प्रतिपादितम्। "तस्य मध्ये वहल्यः कोशः"[११] इति मन्त्रो हृदयगुहायां स्थितस्य आत्मनः स्वरूपं निरूपयति। "यः प्राणेन निमिषतो राजा जगतो बभूव" (३४६३) इति मन्त्रे परमात्मनः प्राणरूपेण जीवेषु स्थितत्वं प्रतिपादितम्। "यस्मिन् सर्वाणि भुवनानि विश्वा" (३६०९) इति मन्त्रे समस्तजीवानां परमात्माधीनता प्रतिपन्ना।

---

[१] अथर्ववेद, ३४५८
[२] अथर्ववेद, ३४८३
[३] अथर्ववेद, ३४३७
[४] अथर्ववेद, ३५०२
[५] अथर्ववेद, ३६३२
[६] अथर्ववेद, ३५५५
[७] अथर्ववेद, ३५६२
[८] अथर्ववेद, ३५६४
[९] अथर्ववेद, ३५६६
[१०] अथर्ववेद, ३७७६
[११] अथर्ववेद, ३५२२

अथर्ववेदे अद्वैतभावनाया अपि बीजरूपं दृश्यते। "एक एव नमस्यो विक्ष्विदः" (३५०८) इति मन्त्रे एकेश्वरवादः प्रतिपादितः। "यो देवानां नामधा एक एव"[1] इत्यत्र विविधदेवतारूपेषु एकस्यैव परमात्मनः अभिव्यक्तिः सूचिता। "न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते" (३८२८) इति मन्त्रे परमात्मनः अद्वितीयत्वं प्रतिपादितम्। "स वै अग्निः स सूर्यः स महायमः" (३८३८) इत्यत्र सर्वदेवतारूपेषु तस्यैकस्यैव ब्रह्मणः सत्ता निरूपिता।

स्कम्भब्रह्मविषये अथर्ववेदे गूढदार्शनिकचिन्तनं दृश्यते। स्कम्भः समस्तविश्वस्य आधारभूतं तत्त्वम् इति वर्णितम्। "स्कम्भे लोकाः स्कम्भे तपः" (३७७४), "स्कम्भे सर्वं प्रतिष्ठितम्" (३७७५) इत्यादिमन्त्रेषु विश्वस्य ब्रह्मणि अधिष्ठानत्वं प्रतिपादितम्। "तं संधुर्भवत्येकमेव" (३६७१) इति मन्त्रे सर्वतत्त्वानां ब्रह्मणि एकत्वभावः प्रतिपन्नः। "यस्य भूमिः प्रमान्तरिक्षमुतोदरम्" (३६९९) इति मन्त्रे विश्वस्य विराट्ब्रह्मशरीरत्वं वर्णितम्। रोहितब्रह्मविषये अथर्ववेदे सूर्यस्य ब्रह्मरूपता निरूपिता। "रोहितः कालो अभवद् रोहितोऽग्रे प्रजापतिः" (३७३२) इति मन्त्रे रोहितस्य कालस्वरूपता प्रतिपादिता। "रोहितो द्यावापृथिवी अधिश्रितः" (३७३३), "रोहितो द्यावापृथिवी जजान" (३७३५) इत्यादिषु मन्त्रेषु तस्य सृष्टिकर्तृत्वं विश्वव्यापकत्वं च वर्णितम्। "रोहितो यज्ञं व्यदधाद् विश्वकर्मणे" (३७३६) इति मन्त्रे रोहितस्य यज्ञव्यवस्थापकत्वं प्रतिपादितम्।

विराट्पुरुषविषये अथर्ववेदस्य चिन्तनं विशेषमहत्त्वपूर्णम्। "ततो ज्यायांश्च पुरुषः" (३७४३) इति मन्त्रे विराट्पुरुषस्य विश्वातिरिक्तमहत्त्वं निरूपितम्। "पादोऽस्य विश्वा भुवनानि" (३७४७) इति मन्त्रे समस्तविश्वं तस्य एकांशरूपेण वर्णितम्। "पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्" (३७४८) इति मन्त्रो भूतभविष्यद्वर्तमानात्मकविश्वस्य पुरुषे अधिष्ठानं दर्शयति। "स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्" (३७५९) इति मन्त्रे विराट्पुरुषस्य विश्वातीतस्वरूपं प्रतिपादितम्। उच्छिष्टब्रह्मविषये अथर्ववेदे विशिष्टं दर्शनं दृश्यते। "उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्" (३७६७) इति मन्त्रे समस्तविश्वस्य ब्रह्मणि स्थितत्वं प्रतिपादितम्। "उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः" (३७६८) इति मन्त्रे नामरूपलोकानां ब्रह्माधीनता निरूपिता। "उच्छिष्टे सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च" (३७७१) इत्यत्र सत्य, धर्म, तप, कर्मादीनां ब्रह्मणि प्रतिष्ठा प्रतिपादिता।

ब्रह्मौदनप्रकरणे ज्ञानस्य तपसश्च महत्त्वं निरूपितम्। "ब्रह्मौदनं पचति" (३७९९) इति मन्त्रे ज्ञानस्य साधनात्मकस्वरूपं वर्णितम्। "ब्रह्मौदनेन देवानां स्वर्गम्" (३८०१) इति मन्त्रे ज्ञानस्य मोक्षोपयोगिता प्रतिपादिता। "मुखस्य सत्यम्" (३८०२) इति मन्त्रे सत्यस्य ब्रह्मविद्यायाः आधारत्वं निरूपितम्। "यस्मिन् वेदा निहिता विश्वरूपाः"[2] इत्यत्र समस्तवेदानां ब्रह्माधीनता प्रतिपन्ना।

जीवात्मविषये अथर्ववेदस्य दृष्टिः अत्यन्तं गम्भीरा अस्ति। "अकामो धीरः अमृतः स्वयम्भूः" (३८४०) इति मन्त्रे जीवात्मनः अमरत्वं प्रतिपादितम्। "आत्मानं धीरमजरं युवानम्" ३८५८ इति मन्त्रे आत्मनः नित्ययौवनं निरूपितम्। "एको ह देवो मनसि प्रविष्टः" (३८६२) इति मन्त्रे परमात्मनः जीवचेतसि स्थितत्वं वर्णितम्। "तमेव विद्वान् न बिभेति मृत्योः" (३८६५) इति मन्त्रे आत्मज्ञानस्य मोक्षसाधनत्वं स्पष्टतया प्रतिपादितम्। प्रकृतिसृष्टिविषये अथर्ववेदे गूढतत्त्वचिन्तनं दृश्यते। "अष्टापदी बहुपदी" (३९०८) इति मन्त्रे सृष्टेः नानात्वरूपता वर्णिता। "आ यः विश्वानि भुवना ततान" (३९११) इति मन्त्रे ईश्वरस्य विश्वविस्तारशक्ति प्रतिपादिता। "एकं यदङ्गमकृणोत् सहस्रधा" (३९१४) इति मन्त्रे एकस्य तत्त्वस्य नानारूपेण अभिव्यक्तिः सूचिता। "माया ह जज्ञे मायया" (३९२७) इति मन्त्रे प्रकृतेः मायारूपता प्रतिपन्ना। "सनादेव निहिते सनाभिः" (३९२९) इति मन्त्रे सृष्टेः

[1] अथर्ववेद, ३६९०
[2] अथर्ववेद, ३८०७


ISSN : 2249-538X

सनातननियमबद्धता प्रतिपादिता ।

अध्यात्मविषयेषु अथर्ववेदे आत्मविद्यायाः महत्त्वं विशेषरूपेण प्रतिपादितम् । "असति सत्प्रतिष्ठितं सति भूतं प्रतिष्ठितम्" (३९३३) इति मन्त्रे सत्-असत्-जीव-परमात्मतत्त्वानां सम्बन्धः निरूपितः । "आ नो दृषे कवीनां मतिर्ज्योतिर्विधर्मणि" (३९३८) इति मन्त्रे आत्मज्ञानार्थं दिव्यप्रेरणायाः प्रार्थना दृश्यते । "तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः"[1] इति मन्त्रे तपसः मोक्षसाधनत्वं प्रतिपादितम् । "ज्योतिष्मतीमदितिं धारयत्क्षितिम्"[2] इति मन्त्रे ज्ञानज्योतेः विश्वधारणशक्तिः सूचिता । "न किः कर्मणा नशत्"[3] इति मन्त्रे परमात्मतत्त्वस्य केवलं ज्ञानद्वारा एव अवगमनयोग्यता प्रतिपादिता ।

**उपसंहारः** - चतुर्वेदेषु प्रतिपादितानां दार्शनिकतत्त्वानां सम्यक्परिशीलनेन एतत् स्पष्टतया ज्ञायते यत् वैदिकऋषयः केवलं धार्मिकाचारस्य प्रवर्तकाः नासन्, अपितु मानवजीवनस्य गूढतमसमस्यानां सूक्ष्मविश्लेषकाः अपि आसन् । जीवस्य नित्यत्वम्, परमात्मनः सर्वव्यापकत्वम्, प्रकृतेः जगदाधारत्वम्, कर्मफलस्य अनिवार्यता तथा मोक्षस्य परमपुरुषार्थत्वम्- एते सिद्धान्ताः चतुर्षु वेदेषु विविधरूपेण प्रतिपादिताः सन्ति । ऋग्वेदे एते विचाराः बीजरूपेण दृश्यन्ते, यजुर्वेदे तेषां नैतिक-आध्यात्मिकविस्तारः प्राप्यते, सामवेदे तेषाम् उपासनामूलकः अनुभवपक्षः प्रकाशितः, अथर्ववेदे तु तेषां व्यावहारिकजीवनसम्बद्धः प्रयोगः निरूपितः ।

अस्य अध्ययनस्य प्रमुखः निष्कर्षः अयम् यत् वैदिकदर्शनं जीवननिषेधात्मकं न, अपि तु जीवनपरिष्कारात्मकम् अस्ति । अत्र ज्ञानं कर्मणा, कर्म च आत्मबोधेन, आत्मबोधश्च लोकमङ्गलेन सह अविच्छिन्नरूपेण सम्बद्धः दृश्यते । अतः वेदेषु प्रतिपादितानि तत्त्वानि केवलं प्राचीनबौद्धिकसम्पत्तिरूपेण न अवलोकनीयानि, अपितु आधुनिकसमाजस्य नैतिकसङ्कटानां, आध्यात्मिकशून्यतायाः तथा मूल्यबोधस्य समस्यायाः समाधानदिशां प्रदर्शयन्ति । एतदेव चतुर्वेदेषु निहितस्य दार्शनिकचिन्तनस्य शाश्वतं वैशिष्ट्यम् अस्ति ।

**परामृष्टाः ग्रन्थाः**


१. दासगुप्तः, सुरेन्द्रनाथः । भारतीयदर्शनस्य इतिहासः । वाराणसी : मोतीलाल बनारसीदास, २०११ ।
२. ऋग्वेदः । सम्पा. श्रीरामशर्मा आचार्यः । बरेली : संस्कृति संस्थानम्, २००० ।
३. दयानन्दसरस्वती । अथर्ववेदभाष्यम् । अजमेर : परोपकारिणी सभा, २०१६ ।
४. सामवेदः । सम्पा. श्रीरामशर्मा आचार्यः । बरेली : संस्कृति संस्थानम्, २००० ।
५. हिरियण्णः, एम् । भारतीयदर्शनस्य रूपरेखा । दिल्ली : मोतीलाल बनारसीदास, २०१४ ।
६. अथर्ववेदः । सम्पा. श्रीरामशर्मा आचार्यः । बरेली : संस्कृति संस्थानम्, २००० ।
७. दयानन्दसरस्वती । ऋग्वेदादिभाष्यभूमिका । अजमेर : परोपकारिणी सभा, २०१४ ।
८. दयानन्दसरस्वती । ऋग्वेदभाष्यम् । अजमेर : परोपकारिणी सभा, २०१६ ।
९. यजुर्वेदः । सम्पा. श्रीरामशर्मा आचार्यः । बरेली : संस्कृति संस्थानम्, २००० ।
१०. दयानन्दसरस्वती । यजुर्वेदभाष्यम् । अजमेर : परोपकारिणी सभा, २०१६ ।
११. देव्, वी. लीटा । Vedic Gods and Some Hymns । New Delhi २००७ ।
१२. सायणाचार्यः । ऋग्वेदभाष्यम् । वाराणसी : चौखम्बा संस्कृत सीरीज् कार्यालयः, २०१० ।
१३. सायणाचार्यः । यजुर्वेदभाष्यम् । वाराणसी : चौखम्बा संस्कृत सीरीज् कार्यालयः, २०११ ।
१४. सायणाचार्यः । सामवेदभाष्यम् । वाराणसी : चौखम्बा संस्कृत सीरीज् कार्यालयः, २०११ ।
१५. सायणाचार्यः । अथर्ववेदभाष्यम् । वाराणसी : चौखम्बा संस्कृत सीरीज् कार्यालयः, २०१२ ।
१६. उपनिषद्संग्रहः । सम्पा. हरिकृष्णदास गोयन्दका । गोरखपुरम् : गीताप्रेस, २०१९ ।
१७. शङ्कराचार्यः । ईशाद्युपनिषद्भाष्यम् । वाराणसी : चौखम्बा विद्याभवनम्, २०१७ ।


[1] अथर्ववेद, ३९४९
[2] अथर्ववेद, ३९४६
[3] अथर्ववेद, ३९६१

# प्रबन्धनक्षेत्रे नेतृत्वस्वरूपविमर्शः

श्री नवीनकुमारशर्मा *
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
जयपुरपरिसर :

***लेखसारः*** *– सदा लोकहिते रतः सन् सर्वान् जनान् अग्रे नयति यो मार्गयति वा सः नेतेत्याचक्ष्यते। नयतीति नेता नी धातोः तृच्-प्रत्यये प्राप्तं रूपमिदम् अग्रे नयनत्वादिगुणान् प्रदर्शयति स एव श्रेष्ठः नेता भवति यः स्वयं अग्रे भूत्वा सनीति सधर्मं सर्वान्विषयान् सम्यक् परिशीलिते मार्गे इतरान् चानुगामिनः प्रर्वतयितुम् उद्बोधयति। इन्द्रियाणां वशे सत्येव प्राज्ञत्वं प्रतितिष्ठति।* ***"वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता"*** *इति धिया धीमति प्राज्ञे नेतृत्वगुणाः देदीप्यन्ते। एतद्गुणसम्पन्नो हि जनः श्रेष्ठनेता भवति। अतः श्रेष्ठत्वम् अनुसरणीयमेव। नेतुर्विषये गुणानामाख्यानप्रतिपादनसन्दर्भे पर्यायेण श्रीमद्भगवद्गीतायामुक्तं साक्षाद्भगवता -*

***यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥***

*श्रेष्ठपदेनेह नेतृत्वं निगूहितम्।*

***कूटशब्दाः*** *– नेतृत्वं, नीतिः, कौशलं, आत्मनियमनम्, उत्तरदायित्वम्।*

## भूमिका

आर्षज्ञानकिरणैर्नित्यं विभासयति भारतं भारतीयज्ञानपरम्परा। यया भारतीयसंस्कृतिर्नित्यपुष्टा आविश्वं राराज्यते सैषा भारतीयज्ञानसरिता सनातनन्तत्त्वेन भारतं पुष्णन्त्याधुनिकमतान्येव आर्षदिशा प्रतिपादयति। अस्याः ज्ञानगङ्गायाः मुख्यं लक्ष्यं तावत्सार्विकरूपेण तात्त्विकबौद्धिकादिभिर्धर्मैः मनुष्याणां विकासः। भारतन्तु प्राक्सृष्टेः विश्वेषां कल्याणे रतं सदैव नेतृत्वं वहद्गच्छति। तस्माद्भारतीयसंस्कृतिमनुसरन्ती भारतीया सन्ततिरपि सुतरामेव नेतृत्वपदमनुगच्छति। अतः भारतीयज्ञानपरम्परायाः विषयसन्दर्भे उत्तरदायि नेतृत्वं सुशासनकौशलं च नूनमेव आलोच्यपदमलङ्कुरुतः।

प्राचीनकालादेव नेतृत्वस्य प्राधान्यं प्रतिशास्त्रं स्वरूपान्तरेण प्रतिपादितं दृश्यते। श्रुतिस्मृतिभ्यामारभ्य काव्यशास्त्रोपन्यासपर्यन्तं विषयोऽयं बहुधा प्रतिपादितः। वेदस्तु सामूहिककल्याणाय नेतृत्वपदमुपोद्बलयति –

**"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।"**[१]

भारतभूमिं विश्वेषां गुरुरूपेण प्रतिष्ठापयन्विवेकानन्दस्वामिपादः तन्नेतृत्वं वहन् नेतुर्लक्षणं निगदति। तन्मतानुसारं नेतृत्वं केवलं तादृशं पदं नास्ति यत्र कश्चन जनः अधिकारप्राप्त्या जनसमूहे आदेशप्रदानस्य सामर्थ्यं लभते, अन्यान् पुरुषान् स्त्रीश्च स्वसेवकवत् पश्यति वा। स्वामिविवेकानन्दस्य दृष्ट्या नेतृत्वं नाम महदुत्तरदायित्वं पवित्रं कर्तव्यम्। तन्नये स एव वास्तविकः नेता यः स्वजीवनं समाजस्य मानवतायाश्च कल्याणार्थं पूर्णतया समर्पयति। तस्य चिन्तने नेतृत्वं न केवलं शासनस्य वा अधिकारस्य विषयः, अपितु आत्मनः परार्थे समर्पणस्य लोकहिताय निरन्तरप्रयत्नस्य सर्वजनसेवायाश्च दिव्यव्रतस्य मूर्तस्वरूपम्। तदेव साररूपेण लक्ष्यते

***सम्पर्कसूत्रम्** - 9887309361, Email- njoshi.csu@gmail.com

[१] ऋग्वेदः

अष्टादशपुराणानां -

**"अष्टादश पुराणानां व्यासस्य वचनद्वयम् । परोपकारः पुण्याय पापाय परपीडनम् ॥"**[१]

स्वामिपादस्तु -

"The man who has much Ojas is the leader of men. It gives a tremendous power of attraction."[२]

अतः प्रकृतेऽस्मिन् शोधपत्रे भारतीयज्ञानपरम्परायाः विधायां नेतृत्वं प्रथितयशोभिः शास्त्रैः विमश्यते ।

## तात्त्विकदृष्ट्या नेतृत्वलक्षणविचारः-

भारतीयनीतिशास्त्रपरम्परायां नेतृत्वस्य मूलं तु आत्मसंयमः सदाचारः लोकल्याणभावना च । एतद्गुणत्रयमेव वास्तविकस्वरूपस्य नेतृत्वस्य प्राणभूततत्त्वरूपेण परिगण्यते। आत्मसंयमनम् इति गुणः आदर्शनेतुः परमावश्यकधर्मत्वेन शास्त्रेषु प्रतिष्ठापितः दृश्यते । यः पुरुषः स्वमनसो वाचः इन्द्रियाणां च निग्रहे समर्थो भवति स न केवलं स्वजीवनं सम्यगनुनेतुं शक्नोति अपि तु परेषामपि यथोचितमार्गदर्शनं कर्तुमपि समर्थो भवति । उक्तं हि गीतायाम् -

**तानि सर्वाणि संयम्य युक्त आसीत मत्परः । वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥**[३]

असंयतचित्तस्य पुरुषस्य निर्णयाः प्रायेण क्षणिकावेशक्रोधमोहाहङ्कारादिदोषप्रेरिताः भवन्ति । परिणामस्वरूपेण समाजव्यवस्थायां च महानर्थः सम्पद्यते । पक्षान्तरे आत्मसंयमसमन्वितः नेता सर्वासु परिस्थितिषु धैर्यगाम्भीर्यविवेकसमन्वितया बुद्ध्या निर्णयान् करोति । सः केवलमादेशदाता न भवति अपि तु स्वाचारणेनैव लोकस्य सम्मुखे आदर्शमुत्सृजति । तस्य जीवनं सत्यनिष्ठया मर्यादापालनशीलतया कर्तव्यपरायणतया च विभूषितं भवति येन जनसमुदायः स्वयमेव तस्मात् प्रेरणामवाप्नोति । अतः आचारदर्शनात्सः आचार्यपदमप्यलङ्कुरुते । सः कदापि स्वार्थपरतां नाङ्गीकरोति किन्तु सर्वदा लोकहितमेव परमपुरुषार्थत्वेन स्वीकरोति । उदाहरणभूतास्तत्र जनकादयः आदर्शपुरुषाः लोकसङ्ग्रहपूर्वकं स्वकर्मणैव नेतृत्वं प्रदर्शयन्ति -

**कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥**

अत्र **लोकसंग्रहः** इति पदं नेतृत्वस्य मूलाधारतया प्रतिष्ठापितमिव दृश्यते। लोकसंग्रहो नाम समग्रसमाजस्य धर्मनीतिनियमसंयमादिमार्गेषु सुदृढप्रतिष्ठापनपूर्वकं सामूहिककल्याणदिशि स्थिरीकरणमिति । यः नेता स्वकीयसुखयशोलाभस्वार्थादिभ्यः पराङ्मुखीभूय समष्टेः हितमेव परमपुरुषार्थतया स्वीकरोति स एव वस्तुतः आदर्शनेतृत्वस्य अधिकारी भवति। तस्य सर्वेषु कर्मसु लोकमङ्गलभावना प्रधानतया विराजते न तु स्वार्थसाधनचिन्ता ।

**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।**[४]

अयं श्लोकः नेतृत्वस्य वास्तविकस्वरूपमपि कर्मशीलतायामेव प्रतिष्ठितमिति प्रतिपादयति । न केवलं पदं न प्रभुत्वम् न वा राजसत्ता कञ्चन पुरुषं महन्नेतारं निर्माति अपि तु तस्य कर्तव्यनिष्ठा उत्तरदायित्वबोधः कर्मपरायणता च नेतृत्वस्य वास्तविकपरिचायकत्वेन प्रकाशन्ते । जनकादयः इत्यस्य निर्देशस्य गूढार्थोऽयं यत्प्राचीनाः राजर्षयः

[१]सुभाषितम्
[२]Complete work of Swami Vivekananda
[३]गीता.२ ॥ ६१
[४]गीता.१२ ॥ १६

समाजमध्ये स्थित्वा स्वकर्तव्यपालनपरायणतया एव परमसंसिद्धिमधिगतवन्तः। अतो ज्ञायते यन्नेता सदा जागरूकः कर्मनिष्ठः लोकहिते निरतः धर्मपालनतत्परश्च भवेत्। यदि नेता स्वयमनुशासितः संयमी कर्मनिष्ठः त्यागशीलः, लोककल्याणाय समर्पितश्च भवति तर्हि तस्य प्रभावः सम्पूर्णसमाजस्य जीवनदृष्टिं परिवर्तयति। विषमपरिस्थितिषु अपि स मानसिकस्थैर्यं धैर्यं च न जहाति।

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥**[१]

यः नेता ज्ञाननीतिसंयमदूरदर्शितादिगुणसमन्वितः सन् समाजाय समुचितदिशानिर्देशनं करोति स एव वस्तुतः जनसमूहस्य पथप्रदर्शकः लोकनायकश्च कथ्यते। तादृशः पुरुषः स्वप्रज्ञया स्वनीत्या च सामूहिककल्याणस्य अभ्युदयस्य च मार्गं प्रशस्तीकुरुते। इतोऽपि निम्नोक्ताः त्रयः गुणाः अवश्यमेव भवेयुः नेतरि -

**न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्। जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥**[२]

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥**[३]

**निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥**[४]

## नेतृत्वस्य परिप्रेक्ष्ये शासनकौशलम्

**प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्। नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥**[५]

सफलताप्रतिष्ठास्थाय्यभ्युदयादयः न कदापि केवलसंयोगजनितस्य आकस्मिकसौभाग्यस्य वा क्षणिकपरिस्थितीनां परिणाममात्रं अपितु ते सर्वे विवेकसमन्वितनेतृत्वस्य सम्यग्विनिश्चितनिर्णयशक्तेश्च स्वाभाविकाः स्थायिनश्च फलविशेषा एव। यस्मिन्नेतरि परिस्थितीनां सूक्ष्ममूल्याङ्कनसामर्थ्यं नीतिसम्मतनिर्णयग्रहणकौशलं भविष्यद्भाविनां परिणामानां पूर्वानुमानक्षमत्वरूपा दूरदर्शिता च सम्यग्वर्तते तां प्रति जनसामान्यस्य विश्वासः स्वयमेव दृढतामधिगच्छति। जनाः तादृशं नेतृत्वं प्रति सहजतया आकृष्टा भवन्ति। यतः तस्य निर्णयाः समाजे स्थैर्यं सुरक्षां सामञ्जस्यं व्यापकं लोकमङ्गलं च प्रतिष्ठापयन्ति। अयञ्च विषयः किरातार्जुनीयकाव्ये दृश्यते।

**विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः। स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥**

यथा कस्मिंश्चिद्गम्भीरे दुस्तरे वा जलाशये अवतरणार्थं यदि समुचितः तीर्थमार्गः सुगमोपायश्च विनिर्मितो भवति तर्हि तस्य जलाशयस्य अवगाहनं सुकरतया सम्पन्नं भवति। तथैव जटिलाः क्लिष्टाश्च नीतिविषयाः विषमाः परिस्थितयो वा समुचितमार्गदर्शनेन विवेकपूर्णोपायैश्च सुलभतया परिचेतुं शक्यन्ते। किन्तु यः पुरुषः सम्यग्विवेकपूर्वकं कर्तव्यस्य यथार्थमार्गं निर्देष्टुं समर्थो भवति यश्च समयानुकूलं हितकरं नीतिसम्मतं च मार्गोपदेशनं करोति तादृशः प्रज्ञासम्पन्नः दूरदर्शी च मार्गदर्शकः लोके अत्यन्तदुर्लभः भवति। यश्च वस्तुतः नेता भवति लोके।

लोके अधिकारप्राप्तिः प्रभुत्वलाभो वा किञ्चित्सुलभतया सम्भवितुमर्हति किन्तु नीत्या विवेकेन दूरदर्शितया लोकहितदृष्ट्या च समन्वितान् निर्णयान् कर्तुं सर्वे समर्था न भवन्ति। यतो हि यथार्थनेतृत्वस्य सारभूतं तत्त्वं न केवलं शासनसामर्थ्यम् अपि तु धर्मनयसम्मतविवेकपूर्णनिर्णयक्षमता एव भवति। अयं श्लोकः सूक्ष्मतया एतदपि

[१] गीता.२ ॥५६

[२] गीता.३ ॥२६

[३] गीता.१६ ॥१

[४] गीता.४ ।२१

[५] अर्थशास्त्रम्


ISSN : 2249-538X

प्रतिपादयति यत् नेतृत्वस्य परमोत्कृष्टो गुणः सम्यग्मार्गदर्शनमेव । आदर्शनेता नाम सः यः विषमासु जटिलासु च परिस्थितिषु जनानां कृते समुचितां दिशं प्रदर्शयति संकटकाले मानसिकस्थैर्यं समत्वबुद्धिं च न जहाति जनसमूहस्य हितार्थं सुरक्षितं कल्याणकरं च मार्गं निर्माति । तथा स्वविवेकप्रभावेण दुष्कराः असम्भाव्याः च परिस्थितयः अपि सुगमाः साध्याश्च सम्पादयति । तेन एव समाजस्य स्थैर्यस्य शान्तेः अभ्युदयस्य च मूलं प्रतिष्ठां प्राप्नोति ।

## गुणविशेषाः

**उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ।**
**अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥**[१]

अयं श्लोकः नेतृत्वस्य अत्यन्तमहत्त्वपूर्णः गुणः "तितिक्षा" इति प्रतिपादयति। तितिक्षा नाम प्रतिकूलपरिस्थितिष्वपि धैर्यसंयमयोः अविचलितावस्था । आदर्शनेता संकटसमये विरोधपरिस्थितौ, क्लेशावस्थायां च आत्मस्थैर्यं न परित्यजति । तस्य धैर्ययुक्ता सहिष्णुता एव बहूनां शुभफलानां कारणं भवति तथा शत्रूणां प्रभावमपि शनैः क्षीणयति । यः नेता आवेशेन न चलति अपि तु धैर्यपूर्वकं स्थितिं परीक्ष्य निर्णयं करोति स एव दीर्घकालिकं लोकविश्वासं सफलतां च प्राप्नोति ।

ततश्च शासनकौशलं वितनोति -

**समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।**
**अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥**[२]

श्लोकोऽयम् आदर्शनेतुः समाजसञ्चालननीतिमत्यन्तं सूक्ष्मतया प्रकाशयति । यः नेता स्वभावतः समवृत्तिः भवति अर्थात् सर्वेषु जनसमूहेषु समदृष्टिं धारयति स एव जनविश्वासस्य पात्रं भवति। तथापि सः केवलं मृदुतायामेव न स्थित्वा समयानुकूलं कठोररूपेणाप्यात्मानं प्रकाशयति । यतः शासनव्यवस्थायां दयाशासनयोः समुचितसमन्वयः अनिवार्यः भवति । अतीव मृदुता अवमानहेतुः, अतितीक्ष्णता च जनविरोधस्य कारणं भवति । अतः युक्तियुक्तं सामञ्जस्यमेव श्रेष्ठनेतृत्वस्य लक्षणम् । यः नेता करुणायाः अनुशासनस्य च सम्यक्समन्वयं कृत्वा समाजं सञ्चालयति स एव सूर्य इव स्वतेजसा समग्रं लोकं स्वप्रभावेण अधितिष्ठति । किञ्च

**बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।**
**क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥**[३]

नेतृत्वे आत्मसंयमस्य अनिवार्यता सततमपेक्षते एव । यः नेता बलसम्पन्नोऽपि क्रोधोत्पन्नस्य तमसः अर्थात् अविवेकस्य मोहस्य च प्रभावं निरोद्धुं न शक्नोति तस्य सर्वाः शक्तयः शनैः क्षीयन्ते । यथा कृष्णपक्षे चन्द्रस्य कलाः क्रमशः विनश्यन्ति तथैव असंयतक्रोधस्य प्रभावेण नेतुः प्रभावः कीर्तिः निर्णयशक्तिः जनविश्वासश्च नश्यन्ति । नेतृत्वस्य वास्तविकं सामर्थ्यं बाहुबलान्न अपि तु मनोनिग्रहाद्विवेकयुक्तनिर्णयक्षमतायाश्च उद्भवति। यः नेता क्रोधेऽपि धैर्यं संयमं च धारयति, स एव समाजस्य स्थिरमार्गदर्शकः भवितुमर्हति । अतः आत्मसंयमः एव स्थिरस्य सफलस्य च नेतृत्वस्य मूलाधारः इति ज्ञायते । रघुवंशे अपि उच्यते -

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ॥**[४]

[१]किरातार्जुनीयम् 2.43
[२]किरातार्जुनीयम् 2.38
[३]किरातार्जुनीयम् 2.37
[४]रघुवंशम् 1.22

## निष्कर्षः

वस्तुतः कस्यापि नेतृत्वस्य सफलतायाः मूलाधारः केवलं शक्तिः, अधिकारः बाह्यप्रभावो वा न भवति अपितु तस्य पृष्ठभूमौ विद्यमानः विवेकः नीतिप्रज्ञा उत्तरदायित्वपरायणदृष्टिकोणश्च तस्मै स्थैर्यं दीर्घकालिकसफलतां च प्रददाति ।यः नेता धैर्यपूर्वकं सर्वाः परिस्थितीः परीक्षते । विविधपक्षान् गाम्भीर्येण चिन्तयति नीतिन्यायसम्मतान् निर्णयान् च करोति, स एव दीर्घकालिकां सफलतां लोकविश्वासं च प्राप्नोति ।

अयं सिद्धान्तः राजनीतौ सामाजिके प्रशासनिके आध्यात्मिके च क्षेत्रे समानरूपेण प्रवर्तते । परन्तु ये नेतारः धैर्यस्य, विवेकस्य, आत्मसंयमस्य, नीतिशास्त्रसम्मतमार्गस्य च आश्रयं स्वीकृतवन्तः ते न केवलं सफलतां प्राप्तवन्तः अपि तु समाजे सुव्यवस्थां, शान्तिं, लोककल्याणं च संस्थापितवन्तः । अत एव स्पष्टतया ज्ञायते यत् विवेकयुक्तं नेतृत्वमेव कस्यापि समाजस्य, राष्ट्रस्य, संगठनस्य वा स्थिरोन्नतेः सामूहिककल्याणस्य च मूलं भवतीति शम् ।

## परामृष्टाः ग्रन्थाः


१. श्रीमद्भगवद्गीता शाङ्करभाष्योपेता, गीता प्रेस
२. On India and Her Problems, Swami vivekananda
३. किरातार्जुनीयम्, चौखम्बा सुरभारती प्रकाशन
४. "Kautilya's Political Thought and Contemporary Governance", R. Nandagopal



ISSN : 2249-538X

# जैनदर्शने मोक्षतत्त्वविमर्शनम्

श्री शशांकशेखरपात्रः*
साहयकाचार्यः,
विद्यासागर विश्वविद्यालयः

***लेखसारः*** *– भारतीयदर्शनं द्विविधमास्तिकनास्तिकभेदेन। आस्तिकदर्शनं षट् सांख्ययोगन्यायवैशेषिकपूर्वमीमांसोत्तरमीमांसा चेति। नास्तिकदर्शनं त्रिविधं चार्वाकजैनबौद्धभेदेन। नास्तिकदर्शनेषु जैनदर्शनमन्यतमम्। जैनदर्शने तत्त्वविषये केचन मन्यन्ते तत्त्वं सप्तविधं जीवाजीवास्रवन्धसंवरनिर्जरामोक्षभेदेन। केचन मन्यन्ते तत्त्वं पञ्चविधं जीवास्तिकाय-आकाशास्तिकायधर्मास्तिकायपुद्गलास्तिकायभेदेन। भूतभविष्यद्वर्तमानकालत्रयसम्वन्धेन जीवाकाशधर्माधर्मपुद्गलानां सप्तप्रकारकं विभाजनमुच्यन्ते। केचन मन्यन्ते तत्त्वं नवविधमुच्यते जीवाजीवास्रवन्धसंवरनिर्जरामोक्षभेदेन। यद्वा भवतु जैनमते वस्तु अनन्तधर्मयुक्तं भवति। अतो वस्तुनः सर्वं ज्ञानं सर्वैः न ज्ञातम्। तत्र अधिकारिभेदेन वस्तुनः ज्ञानं जायते। अतः अधिकारिभेदेन तत्त्वानामेतादृशं विभाजनमुपदिश्यते। यस्य जीवस्य सम्यग्ज्ञानं भवति, तस्य सम्यग्ज्ञानेन मोक्षमार्गः अनायासेन ज्ञायते। परन्तु सर्वेषां जीवानां कृते सम्यग्ज्ञानं न भवति। अतः यस्य सम्यग्ज्ञानं न भवति तस्य कृते जीवाजीवयोः भेदः न भवति, तस्य कृते जीवादीनां सप्तसंख्यकानां तत्त्वानामुपदेशः क्रियते। सप्तसंख्यकानां तत्त्वानां ज्ञानेन मोक्षमार्गः ज्ञायते। यस्य सप्तसंख्यकानां पदार्थानां ज्ञानं न भवति, तस्य कृते जीवादीनां नवसंख्यकानां तत्त्वानामुपदेशः क्रियते। एतेषु मोक्षतत्त्वमन्यतमम्। अधुना* ***"जैनदर्शने मोक्षतत्त्वविमर्शनम्"*** *इति शीर्षके जैनदर्शनदिशा मोक्षतत्त्वमालोच्यते।*

***कूटशब्दाः*** *– तत्त्वम्, सम्यग्ज्ञानम्, सम्यग्दर्शनम्, सम्यक्चारित्रम्, मोक्षः।*

पदार्थस्य प्रकृतधर्मः खलु तस्य तत्त्वम्। अर्थात् यद्वस्तु यादृशं तस्य तादृशं रूपमेव तत्त्वम्। तत्त्वज्ञानस्य विषयविषयिसम्बन्धेन विषयः जैनदर्शनेषु उच्यते। जैनदर्शने तत्त्वस्य संख्याविप्रतिपत्तिः परिलक्ष्यते। तत्त्वार्थसूत्रकारमते तत्त्वं सप्तविधं जीवाजीवास्रवन्धसंवरनिर्जरामोक्षभेदेन।[1] केचन मन्यन्ते तत्त्वं पञ्चविधं जीवास्तिकाय-आकाशास्तिकायधर्मास्तिकायपुद्गलास्तिकायभेदेन। भूतभविष्यद्वर्तमानकालत्रयसम्वन्धेन जीवाकाशधर्माधर्मपुद्गलानां सप्तप्रकारकं विभाजनमुच्यते। केचन मन्यन्ते तत्त्वं नवविधमुच्यते। जीवाजीवास्रवन्धसंवरनिर्जरामोक्षभेदेन। यद्वा भवतु जैनमते वस्तु अनन्तधर्मयुक्तं भवति। अतः वस्तुनः सर्वं ज्ञानं सर्वैः न ज्ञातम्। तत्र अधिकारिभेदेन वस्तुनः ज्ञानं जायते। अतः अधिकारिभेदेन तत्त्वानामेतादृशं विभाजनमुपदिश्यते। यस्य जीवस्य सम्यग्ज्ञानं भवति, तस्य सम्यग्ज्ञानेन मोक्षमार्गः अनायासेन ज्ञायते। परन्तु सर्वेषां जीवानां कृते सम्यग्ज्ञानं न भवति। अतः यस्य सम्यग्ज्ञानं न भवति तस्य कृते जीवाजीवयोः भेदः न भवति, तस्य कृते जीवादीनां सप्तसंख्यकानां तत्त्वानामुपदेशः क्रियते। सप्तसंख्यकानां तत्त्वानां ज्ञानेन मोक्षमार्गः ज्ञायते। यस्य सप्तसंख्यकानां पदार्थानां ज्ञानं न भवति तस्य कृते जीवादीनां नवसंख्यकानां तत्त्वानां उपदेशक्रियते। जैनमते दु:खादात्यन्तिकमुक्तिलाभाय नवसंख्यकानां तत्त्वानां उपदेशः क्रियते। जीवः नवसंख्यकानां तत्त्वानां ज्ञानेन मोक्षमार्गं जानाति। नवसंख्याकेषु तत्त्वेषु मोक्षतत्त्वमन्यतमम्।

**मोक्षस्वरूपम्** जैनदर्शने नवविधतत्त्वेषु मोक्षः अन्यतमः। मोक्षशब्दार्थः बन्धनान्मुक्तिः। कर्मबन्धनक्षयेण आत्मनः शुद्धरूपं खलु मुक्तिः।[2] मिथ्यादर्शनादिकं बन्धनकारणं भवति। संसार एव बन्धः। मिथ्यादर्शनादयो

*सम्पर्कसूत्रम् - 7583954218 , Email- shasankasanskrit@mail.vidyasagar.ac.in

[1] जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम्। त. सू.1.4

[2] कृत्स्नकर्मक्षयो मोक्षः। त.सू.10.3

बन्धहेतवः । संसारबन्धनस्य कारणं मिथ्यादर्शनाविरतिप्रमादकषाययोगादिकं भवति ।[१] कर्मसंवरणेन नूतनकर्मोदयाभावेन निर्जरया पूर्वोपार्जितकर्मक्षयेण आत्यन्तिकमुक्तिः भवति ।[२] जैनदर्शने मोक्षस्य कारणं द्विविधं संबरः निर्जरा च । आस्रवस्य निरोधः खलु संवरः । आत्मनि नूतनस्य कर्मणः संयोगस्य निरोधः खलु संवरः । संवरः गुप्तिसमिति धर्मानुप्रेक्षापरीपहजयचारित्रतपसा सम्भवति ।[३] संबरेण आस्रवस्तथा नूतनकर्मोदयो न भवति । निर्जरया पूर्वकृतकर्म विनष्टं भवति । इत्थं कर्मक्षयेण मुक्तिः भवति ।[४] परन्तु जीवः यावत्पर्यन्तं बाह्यवस्तु प्रति आसक्तो भवति तावत्पर्यन्तं तस्य बन्धनान्मुक्तिः न भवति । जैनदर्शने आत्मरूपदीपकस्य निर्वाणः न मोक्षो भवति । रागद्वेषादीनां क्षयेण आत्मनः शुद्धरूपः खलु मोक्षः भवति । जैनमते मुक्तावस्थायामात्मनः ज्ञानज्योतिः प्रज्वलितं भवति । अतो जैनदर्शने मोक्षशब्दार्थः बन्धनान्मुक्तिः । आत्मा कर्मबन्धनेन बद्धो भवति, कर्मक्षयादनन्तरं परमविशुद्धो भवति ।। बन्धनक्षयेन जीवात्मा शुद्धस्वरूपं लभ्यते । जीवस्य अवस्था पञ्चधा औपशमिकक्षायिकक्षायोपशमिकौदयिकपारिणामिकभेदेन । तत्त्वार्थसूत्रकारेण उच्यते "औपशमिकक्षायिको भावो मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिको च ।।"[५]

**औपशमिकभावः** उपशमः खलु आत्मशुद्धिः । आत्मनः पूर्ववद्धकर्मणः उपशान्तावस्था अभ्युदयाभावावस्था वा खलु उपशमभावः, तस्य भावः औपशमिकभावः ।[६] यथा जले कतकद्रव्यसंमिश्रणेन जलस्य अधः पङ्कस्य स्थिरतया जलं स्वच्छं भवति तद्वत् कर्माभावेन आत्मनः स्थिरता खलु औपशमिकावस्था ।

**क्षायिकभावः** क्षयः शब्दार्थः आत्यन्तिकी निवृत्तिः । आत्मनः सम्पूर्णा कर्मक्षयावस्था खलु क्षायिकभावः । अस्यामवस्थायामात्मा शुद्धो भवति ।[७] यथा जले पङ्कस्यात्यन्ताभावेन स्वच्छता अवस्था । अर्हता कथितेन तत्त्वेन रागदोषनिवृत्त्या आत्मनः शुद्धावस्था ।

**क्षायोपशमिकभावः** आत्मनि कर्मणः अनुदयावस्था खलु औपशमिकावस्था । कर्मणः आत्यन्तिकी निवृत्तिः खलु क्षायिकावस्था । द्वयोः मिश्रभावः खलु क्षायोपशिकभावः । केषाञ्चित् कर्मणां क्षयेण केषाञ्चित् कर्मणामुपशमेन आत्मनि जायमानः भावः खलु क्षायोपशमिकभावः ।[८] यथा जले पङ्कस्य क्षीणाक्षीणवृत्त्या अर्धस्वच्छतावस्था ।

**औदयिकभावः** आत्मनिकर्मोदयेन जायमानः भावः खलु औदयिकभावः । भावोदयानेनात्मनि मालिन्यं जायते ।[९] यथा जले पङ्कस्य संयोगेन अवस्था । आत्मनि कर्मण उदयेन मोहाच्छन्नावस्था ।

**पारिणामिकभावः** द्रव्यस्य स्वाभाविकस्वरूपस्य परिणामः खलु पारिणामिकभावः । सर्वेषां कर्मणां परिणमनं खलु पारिणामिकभावः ।[१०]

एतेषां पञ्च भावानां क्षयेण आत्मनः शुद्धा स्वरूपावस्था खलु मोक्षः ।[११] जीवः कर्मक्षयेण बन्धाभावेन

---

[१] मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः । त. सू. 8.1

[२] बन्धहेत्वभावनिर्जराभ्याम् । त.सू.10.2

[३] स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः ।।त.सु.9.2

[४] मिथ्यादर्शनादीनां बन्धहेतूनां निरोधेऽभिनवकर्माभावान्निर्जराहेतुसंन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्ममोक्षणं मोक्षः । स.द.स. आर्हतदर्शनम्

[५] त.सू. 2.1

[६] अनुदयप्राप्तिरूपे कर्मणः उपशमे सति जीवस्योत्पद्यमानो भावः औपशमिकः । यथा पङ्के कलुषतां कुर्वति कतकादिद्रव्यसम्बन्धादधःपतिते जलस्य स्वच्छता । स.द.स.आर्हतदर्शनम्

[७] आर्हततत्त्वानुसन्धानवशाद् रागादिपङ्कक्षालनेन निर्मलतापादकः क्षायिको भावः । स.द.स.आर्हतदर्शनम्

[८] उभयात्मा भावो मिश्रः । स.द.स.आर्हतदर्शनम्

[९] कर्मोदये सति भवन्भाव औदयिकः । स.द.स.आर्हतदर्शनम्

[१०] कर्मोपशमाद्यनपेक्षः सहजो भावश्चेतनत्वादिः पारिणामिकः स.द.स.आर्हतदर्शनम्

[११] औपशमिकादिभव्यत्वाभावाचान्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः । त.सू.10.4

 ISSN : 2249-538X

ऊर्ध्वगामी भवति ।[१] यदा स कर्मबन्धनेन वद्धो भवति तदा स स्वाभाविको न भवति । परन्तु कर्मक्षयेण तस्य ऊर्ध्वगामित्वं भवति ।[२]

**मोक्षविभागः** मोक्षो द्विविधः भावमोक्षः द्रव्यमोक्षश्च । क्षायिकज्ञानक्षायिकदर्शनक्षायिकचारित्रैः कर्मक्षयेण जीवस्य भावमोक्षो भवति । भावमोक्षेण कर्मप्रदेशाज्जीवस्य पृथक् खलु द्रव्यमोक्षः ।

**मोक्षप्राप्त्युपायाः** जैनमते त्रिरत्नैः संसारकारणनिवृत्तिर्भवति । तदुच्यते सूत्रकारेण 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ।'[३] रत्नत्रयं खलु सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यक् चारित्रमिति । जैनकथितं तत्त्वं प्रति श्रद्धानमेव सम्यग्दर्शनम् ।[४] सम्यग्दर्शनेन सम्यग्ज्ञानं सम्यक्चारित्रञ्च जायते । त्रीण्येतानि दर्शनज्ञानचारित्राणि दण्डचक्रन्यायेन मिलितभावेन संसारकारणनिवृत्त्यां मोक्षप्राप्तौ कारणानि भवन्ति ।

**सम्यग्दर्शनम्** सम्यग्दर्शनं खलु उमास्वातिना "तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ।"[५] सूत्रे तत्त्वमिति शब्दार्थः अविपरीतार्थविषयं तत्त्वमित्युच्यते । जैनदर्शने तत्त्वार्थ इति पदस्यार्थो जीवादिवस्तुयाथात्म्यरूपो बोध्यः । जैनदर्शने तत्त्वं सप्तसंख्याकं भवति । तत् च जीवः, अजीवः, आस्रवः, बन्धः, संबरः, निर्जरा, मोक्षश्चेति । श्रद्धा इति पदस्यार्थः इच्छा, रुचिः, अभिलाष इति । सर्वदर्शनसंग्रहे माधवेनोच्यते "रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते ।"[६] जगति जीवादिवस्तुनः यथार्थज्ञानं प्रति रुचिः खलु सम्यग्दर्शनम् ।

**सम्यग्दर्शनविभागः** सम्यग्दर्शनं द्विविधं भवति । यथा निसर्गात्स्वभावाद्वा अधिगमात्परोपदेशाद्वा तदुच्यते "तन्निसर्गादधिगमाद्वा ।"[७] तदिति सर्वनामपदेन सम्यग्दर्शनं बोध्यम् । ननु रसायनस्य तत्त्वज्ञानं विना रसायनस्य श्रद्धानं न जायते इति धिया तत्त्वाधिगमाद्विना निसर्गात्सम्यग्दर्शनं कथमुत्पद्यते इत्याकाङ्क्षायामुच्यते मोहादीनां प्रतिबन्धकानां क्षयादनन्तरं बाह्योपदेशं विना निसर्गजं सम्यग्दर्शनं भवति । तदुच्यते "परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः ।"[८] अपि च परोपदेशेन जातं सम्यग्दर्शनमधिगमजं भवति । तदुच्यते "व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः ।"[९] अपि च पूज्यपादेन सरागवीतरागभेदेन सम्यग्दर्शनं द्विविधमुच्यते ।[१०] सरागसम्यग्दर्शनं खलु प्रशमादिना जन्यं सम्यग्दर्शनम् ।[११] सरागसम्यग्दर्शनमनुमानगम्यं भवति । सरागसम्यग्दर्शनस्य पञ्चसाधनानि सन्ति । तानि च प्रशमः, संवेगः, निर्वेदः, अनुकम्पा, आस्तिक्यञ्चेति ।[१२]

**सम्यग्ज्ञानम्** सम्यग्दर्शनजन्यं ज्ञानं खलु सम्यग्ज्ञानम्, मिथ्यादर्शनजन्यं ज्ञानं मिथ्याज्ञानम् । तत्त्वार्थवृत्त्यामुच्यते जीवादीनां याथात्म्यनिश्चयज्ञानमेव सम्यग्ज्ञानम् ।[१३] माधवाचार्येण सर्वदर्शनसंग्रहे आर्हतदर्शने उच्यते

'यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा । योऽवबोधस्तत्राहुः सम्यग्ज्ञानं मनीषिणः ॥'[१४]

---

[१] पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च तद्गतिः । त.सू.10.6
[२] तदनन्तरमूर्ध्वं गच्छत्या लोकान्तात् । त.सू.10.5
[३] त.सू.1.1
[४] तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् । त. सू. 1.2
[५] त.सू.1.2
[६] स.द.स.आर्हतदर्शनम्
[७] त.वा.1.3
[८] स.द.स.आर्हतदर्शनम्
[९] स.द.स.आर्हतदर्शनम्
[१०] तद्विविधं सरागवीतरागविकल्पात् । स.सि.1.2
[११] प्रशस्तरागसहितानां श्रद्धानं सरागसम्यग्दर्शनम् । जैनेन्द्रसिद्धान्तकोशः पृ.350
[१२] प्रशमसंवेगानुकम्पास्तिक्याभिव्यक्तलक्षणं प्रथमम् । स.सि.1.2
[१३] त.वृ. 1.1
[१४] स.द.स. आर्हतदर्शनम्

**सम्यग्ज्ञानविभागः** ज्ञानं द्विविधं परोक्षं प्रत्यक्षञ्चेति ।[१] मतिश्रुतज्ञाने परोक्षम् । प्रत्यक्षं त्रिविधमवधिमनःपर्यायकेवलभेदेन ।

**मतिज्ञानम्** वस्तुनः ज्ञानावरणक्षयेण इन्द्रियमनोभ्यां जन्यं ज्ञानमेव मतिज्ञानम् । तदुच्यते "इन्द्रियैर्मनसा च यथायथमर्थान् मन्यते मतिः ।"[२] मतिज्ञानं चतुर्विधम् अवग्रहैहावायधारणाभेदेन ।

**अवग्रहः** इन्द्रियेण स्वविषयस्यालोचनपूर्वकमव्यक्तावधारणमेवावग्रहः ।[३] अवग्रहेण विषयस्य सामान्यधर्मस्य ज्ञानं भवति, तज्ज्ञानं शब्देनाव्यपदेश्यं भवति । अवग्रहः द्विविधो भवति व्यञ्जनावग्रहः अर्थावग्रहश्चेति ।[४] व्यञ्जनाग्रहः खलु इन्द्रियेण सह विषयस्य संयोगादनन्तरं विषयस्य ज्ञानात्प्राग् तस्यावभासनम् ।[५] अर्थावग्रहः खलु वस्तुनः व्यक्तज्ञानम् ।[६] अर्थादवग्रहः खलु वस्तुनः नामजात्यादियुक्तं निश्चयात्मकं ज्ञानम् ।[७]

**ईहा** अवग्रहेण गृहीतस्य विषयस्य विशेषधर्मस्य ज्ञानमिच्छा खलु ईहा ।[८]

**अवायः** ईहाज्ञानेन गृहीतस्य विषयस्य निश्चयज्ञानमेवावायः ।[९] यथा किमपि शब्दं श्रुत्वा शब्दोऽयं कस्यचित्पुरुषस्य न त्वन्यस्य इत्याकारकं निश्चयज्ञानमेवावायः ।[१०]

**धारणा** अवायज्ञानस्य दृढतमावस्था खलु धारणा ।[११] सा च धारणा त्रिविधा, अविच्युतिः, स्मृतिः, वासना च भवन्ति ।[१२]

**श्रुतज्ञानम्** मतिज्ञानपूर्वकं यज्ज्ञानमुत्पद्यते तदेव श्रुतज्ञानम् ।[१३] मतिज्ञानेन पदार्थे मनसः साहाय्येन यद्विशिष्टज्ञानमुत्पद्यते तदेव श्रुतज्ञानम् ।

**अवधिज्ञानम्** अवधिज्ञानमिन्द्रियमनसोः साहाय्यं विना केवलमात्मना ज्ञानावरणक्षयोपशमे सति जायते । ज्ञानेनानेन रूपवद्द्रव्यस्य भिन्नानां पर्यायाणां ज्ञानं भवति ।[१४] अवधिज्ञानं द्विविधं भवप्रत्ययो गुणप्रत्ययश्चेति ।[१५] आयुर्नामकर्मणः फलाज्जायमानस्य जीवस्य पर्यायः खलु भवः । भवस्य निमित्तं यज्ज्ञानं तदवधिज्ञानमेव भवप्रत्ययः । जन्मनः परं यथा विहगः नभसि उड्डयति तथा जन्मनः परं सहजातभावेन जीवस्य जन्यं ज्ञानं भवप्रत्ययरूपमवधिज्ञानम् । गुणेन जन्यमवधिज्ञानमेव गुणप्रत्ययः । मनुष्याणां जन्मनः परं बुद्ध्या जन्यं ज्ञानं गुणप्रत्ययरूपमवधिज्ञानम् ।

**मनःपर्यायज्ञानम्** मनसः संयमेन ज्ञानावरणानां कर्मणां क्षये सति मनःपर्यायज्ञानं भवति । तदुच्यते

---

[१]प्रत्यक्षं परोक्षञ्च । प्र.मी.1.10 ।

[२]त.वृ.1.9

[३]तत्राव्यक्तंयथास्वंइन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः ।त. धि. भा. 1.15

[४]स द्विविधः व्यञ्जनावग्रहः, अर्थावग्रहश्चेति । जै. त.भा. पृ.6

[५]व्यञ्जनस्याऽवग्रहः । त. सू. 1.18

[६]स. सि.1.18 ।

[७]स्वरूपनामजातिक्रियागुणद्रव्यकल्पनारहितं सामान्यग्रहणमर्थावग्रहः । जै. त.भा. पृ.4

[८]विशेषाकांक्षेहा । ल. त्र. 5

[९]अवायो विनिश्चयः । ल. त्र. 5

[१०]ईहितस्य विशेषनिर्णयोऽवायः, यथा 'शब्द एवायम्' 'शाङ्ख एवायम्' इति वा । जै. त.भा. पृ.5

[११]स एव दृढतमावस्थापन्नो धारणा । प्र. न. त. लो. 2.10

[१२]सा च त्रिविधा अविच्युतिः स्मृतिः, वासना च । जै. त.भा. पृ.5

[१३]श्रुतशब्दोऽयं श्रवणमुपादाय व्युत्पादितोऽपि रूढिवशात्कस्मिंश्चिज्ज्ञानविशेषे वर्तते ...कः पुनरसौ ज्ञानविशेषः इति । अत आह श्रुतं मतिपूर्वमिति । स.सि. 1-10

[१४]अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं रूपद्रिव्यगोचरमवधिज्ञानम् । प्र. न.त.2.21 ।

[१५]द्विविधोऽवधिः । त.सू. 1.21 ।


ISSN : 2249-538X

"संयमविशुद्धिनिबन्धनाद्विशिष्टावरणविच्छेदाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानम् ।"[१]

**केवलज्ञानम्** अवधिमनःपर्यायकेवलज्ञानेषु केवलज्ञानं विशुद्धतमं भवति । मोहस्य ज्ञानावरणस्य दर्शनावरणस्य च प्रतिबन्धककर्मणः निःशेषेण क्षयादनन्तरं ज्ञानमिदमुत्पद्यते । तदुच्यते "मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ।"[२] केवलज्ञानेन सूक्ष्मान्तरितदूरस्थितानां पदार्थानां प्रत्यक्षं भवति । केवलज्ञानेन मोक्षः लभ्यते ।

**सम्यक् चारित्रम्** कर्मफलकारणाज्जीवः पुनर्जन्म लभते । कर्माणां परित्यागः खलु सम्यक् चारित्रम् । तदुक्तं

सर्वभावद्ययोगानां त्यागश्चरित्रमुच्यते । कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥[३]

सम्यक् चारित्रं पञ्चधा अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहभेदेन । अहिंसादयः पञ्चमहाव्रतं नाम्ना अभिहिताः ।

अहिंसा - मनुष्यादीनां चराणां वृक्षादीनां स्थावराणां केनापि प्रकारेण न प्राणवियोजनमहिंसाव्रतम् ।

सूनृतम् - मनोहरं हितकरं यथार्थवाक्यं खलु सूनृतम् । यद्वाक्यं मनोहरं परन्तु न हितकरं तन्न सूनृतम् ।

अस्तेयम् - दानेन प्राप्तं परेण दत्तञ्च यद्वस्तु तदस्तेयम् । अनादानमदत्तस्य न ग्रहणं खल्वस्तेयम् ।

ब्रह्मचर्यः - कायमनोवाचा विषयभोगत्यागः खलु ब्रह्मचर्यः ।

अपरिग्रहः - पृथिव्यां सर्वेषां वस्तूनां मोहत्यागः खलु अपरिग्रहः ।

अनेन व्रतपालनेन संसारकारणीभूतकर्मक्षयेण तत्त्वज्ञानी मोक्षं प्राप्नोति ।

**उपसंहारः** पुरुषार्थचतुष्टये मोक्षः परमपुरुषार्थो भवति । मोक्षस्य नामान्तरं परमपदः, निर्वाणः, सिद्धः, शिवो भवति । भारतीयदर्शने मुमुक्षुः मोक्षविषये आत्मनः सर्वेषां कर्मणां क्षयं स्वीकरोति । जैनदर्शने जीवस्य ज्ञानदर्शनचारित्रतपोभिः कर्मक्षयो भवति । कर्मक्षयादनन्तरं पूर्वकृतकर्माभावे बन्धाभावे च जीवस्य मोक्षो भवति । जीवस्य सम्यग्दर्शनेन ज्ञानेन च मिथ्यादर्शनक्षयो भवति । मिथ्यादर्शनक्षयेण ज्ञानदर्शनाभ्यां चारित्रशुद्धिर्भवति । चारित्रशुद्धेन ज्ञानावरणदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायकर्मणां क्षयो भवति । इयमवस्था जीवस्य भावमोक्षरूपा भवति । ततः केवलज्ञानेन संसारकारणनिवृत्तिरूपः द्रव्यमोक्षो भवति ।

**अन्त्यटीका**

## परामृष्टाः ग्रन्थाः

१. उमास्वातिः, तत्त्वार्थसूत्रम् : तत्त्वार्थवृत्तिसहितम्, सम्पा. ए. शान्तिराजा शास्त्री, ओरियेण्टाललाइब्रेरि, १९४४ ।

२. उमास्वातिः, तत्त्वार्थाधिगमभाष्यम्, अनु. खुवचन्द्रजी सिद्धान्तशास्त्री, रायचन्द्रजैनशास्त्रमाला, १९६२ ।

३. भट्टाकलङ्कदेवः, तत्त्वार्थवार्तिकम्, सम्पा. महेन्द्रकुमारजैनः, वाराणसी,भारतीयज्ञानपीठप्रकाशनम्, १९४४ ।

४. भास्करनन्दिः, तत्त्वार्थवृत्तिः, अनु. श्री आर्यिका, राजस्थानम्, कमलप्रिण्टर्स ।

५. माधवः, सर्वदर्शनसंग्रहः : दर्शनाङ्कुरसहितः, सम्पा. अमितभट्टाचार्यः, संस्कृतपुस्तकभाण्डारम्, २०११ ।

[१] न्या.वि.वि.2.22

[२] त.सू.10.1

[३] स.द.स.आर्हतदर्शनम्




योऽनूचानः स नो महान्।

केन्द्रीयसंस्कृतविश्वविद्यालयः

# Central Sanskrit University

Established by an Act of Parliament

Accredited with A++ grade by NAAC

Shri Bharati Teertha Center for Excellence in Shastras

Shri Rajiv Gandhi Campus, Menase, Sringeri - 577139